आतप, सं. पुं. (सं.) दिनज्योतिस् (न.), सूर्यालोकः तापनः २. उष्णता ३. ज्वरः ।

आतपत्र, सं. पुं. (सं. न.) छत्रं, आतप-घर्म,-वारणम् ।

आतपोदक, सं. पुं. (सं. न.) मरीचिका, मृग,-जलं-तृष्णा ।

आतिश, सं. स्त्री. (फ़ा.) अग्निः ।

—बाजी, सं. स्त्री. (फ़ा.) अग्निक्रीडनकानि, (न. बहु.), अग्निक्रीडा ।

आतशक, सं. पुं. (फ़ा.) उपदंशः, मेढ्ररोगभेदः ।

आतशी, वि.(फ़ा.) आग्निक, आग्नेय, २.अग्निज ३. अग्निजनकः ।

—शीशा, सं. पुं. अग्नि,-काचः-स्फटिकः ।

आतिथेय, वि. (सं.) अतिथि,-सेवक-पूजक ।

आतिथ्य, सं. पुं. (सं. न.) अतिथिसेवा २. अतिथ्यर्थवस्तु (न.) ।

आतिशय्य, सं. पुं. (सं. न.) अतिशयत्वं, आधिक्यं, बहुत्वम् ।

आतुर, वि. (सं.) आकुल, व्याकुल, व्यग्र, उद्विग्न, अधीर २. उत्सुक, उत्कण्ठित ३. दुःखित ४. रोगिन् ।

आतुरता, सं. स्त्री. (सं.) व्याकुलता, व्यग्रता २. त्वरा, संभ्रमः ।

आतुरालय, सं. पुं. (सं.) चिकित्सालयः, दे० 'अस्पताल' ।

आत्म, वि. (सं. आत्मन् >) स्व, निज, स्वीय, स्वकीय ।

—अभिमान, सं. पुं. (सं. न.) स्वप्रतिष्ठा, स्वगौरवम् ।

—अवलंबी, वि. (सं.-बिन्) आत्मविश्वासिन् , स्वाश्रित ।

—उद्धार, सं. पुं. (सं.) मुक्तिः (स्त्री.), मोक्षः ।

—उन्नति, सं. स्त्री. (सं.) आत्मकल्याणम् २. स्वाभ्युदयः ।

—घात, सं. पुं. (सं.) आत्म-स्व-निज,-हत्या-घातः-वधः, प्राण-जीवित,-त्यागः-उत्सर्गः ।

—घात करना, क्रि. सं., आत्मानं हन् (अ. प. अ.) ।

—घाती, वि. (सं.) आत्म,-घातक-घातिन्-नाशिन्-हन् ।

—ज, सं. पुं. (सं.) पुत्रः २. कामदेवः ३. रुधिरम् ।

—ज्ञान, सं. पुं. (सं. न.) ईश-जीव,-ज्ञानम् २. ब्रह्मसाक्षात्कारः ।

—त्याग, सं. पुं. (सं.) परहिताय स्वार्थत्यागः ।

—दर्शन, सं. पुं. (सं. न.) समाधिना जीवेश्वरदर्शनम् ।

—निवेदन, सं. पुं. (सं. न.) आत्मसमर्पणं, सर्वस्वार्पणम् २.स्वविषये कथनम् ३. भक्तिभेदः ।

—प्रशंसा, सं. स्त्री. (सं.) आत्मश्लाघा, स्वस्तुतिः, निजनुतिः (दोनों स्त्री.) ।

—भू, वि. (सं.) निजशरीरज २. स्वयंभू । सं. पुं., पुत्रः २. कामदेवः ३. ब्रह्मन् (पुं.) ४. विष्णुः ५. शिवः ।

—विश्वास, सं. पुं. (सं.) स्व-निज,-प्रत्ययः-विश्रम्भः ।

—विद्या, सं. स्त्री. (सं.) ब्रह्मविद्या, अध्यात्म-विद्या, आत्मज्ञानम् २. मोहनविद्या (=मेसमरिजम) ।

—हत्या, सं. स्त्री. दे. 'आत्मघात' ।

—आत्मक, वि. (सं.)-अन्वित,-रूप,-युक्त,-मय (उ. गद्यात्मक = गद्य,-रूप-मय) ।

आत्मा, सं. स्त्री. (सं. आत्मन् पुं.) जीवः,-चेतनः, जीवात्मन् २. चित्तम् ३. बुद्धिः (स्त्री.) ४. अहङ्कारः ५. मनस् (न.) ६. ब्रह्मन् (न.), परमात्मन् (पुं.) ७. देहः ८. धृतिः (स्त्री.). ९. स्वभावः, धर्मः १०. सूर्यः ११. अग्निः १२. वायुः ।

आत्मिक, वि. (सं.) अध्यात्म-(समास में) आत्म,-विषयक-सम्बधिन् २.स्वीय ३.मानसिक ।

आत्मीय, वि. (सं.) स्वीय, स्वकीय । सं. पुं., स्वजनः, बन्धुः, मित्रम् ।

आत्मीयता, सं. स्त्री. (सं.) बन्धुत्वं-सौहार्दम् ।

आत्यन्तिक, वि. (सं.) अनन्त, असीम, अत्यधिक ।

आत्रेय, वि. (सं.) अत्रिगोत्र, अत्रिसंबन्धिन् । सं. पुं. अत्रिपुत्रः ।

आत्रेयी, सं. स्त्री. (सं.) अत्रिपत्नी २. अत्रिपुत्री ३. अत्रिगोत्रजनारी ४. रजस्वला नारी ।

आथर्वण, सं. पुं. (सं.) अथर्ववेदज्ञो ब्राह्मणः, पुरोहितः २. अथर्वपुत्रः ३. अथर्ववेदे विहितं कर्मन् (न.) ।

आदत, सं. स्त्री. (अ.) शीलं स्वभावः, प्रकृतिः (स्त्री.)२.अभ्यासः, नित्यप्रवृत्तिः (स्त्री.) ।

आदम, सं. पुं. (अ.) आदिमः, प्रजापतिः (इस्लाम) २. मनुष्यः ।
आदमियत, सं. स्त्री. (अ.) मानवता, मनुष्यत्वं २. सभ्यता, शिष्टता ।
आदमी, सं. पुं. (अ.) मनुष्यः, मनुष्यजातिः (स्त्री.) २. दासः ।
—बनना, मु., सभ्यता शिक्ष् (भ्वा. आ. से.)।
फ़ी–, क्रि. वि., प्रतिमनुष्यम् , प्रतिजनम् ।
आदर, सं. पुं. (सं.) संमानः, सत्कारः, सत्क्रिया, प्रतिष्ठा, अर्हणा, अर्चा ।
—करना, क्रि. सं., आदृ-(द् + ऋ)(तु.आ. अ.), सत्कृ, पूज्-अर्च् (चु.), संमन्,संभू (प्रे.) ।
—पाना, क्रि. अ., सत्-पुरस् ,-कृ (कर्म.), आदृ-(द् + ऋ) पूज्-सेव् (कर्म.) ।
—से, क्रि. वि., सादरं, सप्रश्रयम् , आदरेण ।
आदरणीय, वि. (सं.) मान्य, माननीय, पूज्य, सत्कार्य, पूजनीय ।
आदर्श, सं. पुं. (सं.) मुकुरः, दर्पणः, आत्मदर्शः २. प्रतिरूपं, प्रतिमा, प्रतिमानम् ३. टीका, भाष्यं, व्याख्या ४. अतुल्य, अनुपम ।
आदात, सं. स्त्री. (अ० 'आदत' का बहु०) दे. 'आदत' ।
आदाता, वि. (सं.–तृ) ग्रहीतृ, ग्राहक, प्रापक ।
आदान, सं. पुं. (सं. न.) ग्रहणं, स्वीकारः, स्वीकरणम् ।
—प्रदान, सं. पुं. (सं. न.) ग्रहणवितरणं, दानादानं २. परस्परतितिक्षा, न्याय्याचरणम् ।
आदाब, सं. पुं. (फ़ा. 'अदब' का बहु०) दे. 'अदब' ।
आदि, वि. (सं.) प्रथम, अग्रिम, आदिम, आद्य । सं. पुं., उपक्रमः, आरंभः २. मूलं, उत्पत्तिहेतुः । अव्य.–प्रभृति,–आद्य (समासान्त में) ।
—कवि, सं. पुं. (सं.) वाल्मीकिः ।
—कारण, सं. पुं. (सं. न.) मूलकारणम् (प्रकृतिः ईश्वरो वा)
—से अन्त तक, क्रि. वि., आद्यन्तम् , आदितोऽन्तं यावत् ।
आदिक, अव्य. (सं. वि.)–आदि,–आद्य, –प्रभृति (सब समासान्त में) ।
आदित्य, सं. पुं. (सं.) अदितिपुत्रः २. देवः ३. सूर्यः ४. इन्द्रः ५. वामनः ६. वसुः ७. विश्वेदेवाः ८. मन्दारवृक्षः ।
—वार, सं. पुं. (सं.) रवि-भानु,-वारः-वासरः
आदिम, वि. (सं.) प्रथम, आद्य, आदि ।
—निवासी, सं. पुं., (सं.-सिन्) आदिवासिन् ।
आदिष्ट, वि. (सं.) आज्ञप्त, आज्ञापित, लब्धाज्ञ, प्राप्तादेश ।
आदी, वि. (अ.) अभ्यस्त, अभ्यासिन् ।
आदृत, वि. (सं.) सत्कृत, संमानित, पूजित ।
आदेय, वि. (सं.) ग्रहणीय, परि–प्रति, –ग्राह्य ।
आदेश, सं. पुं. (सं.) आज्ञा, निदेशः, शासनं, नियोगः, देशना २. उपदेशः ३. प्रणामः ४. ग्रहफलम् ५. वर्णस्य वर्णान्तरोत्पत्तिः (स्त्री., व्या.) ।
आदेशक, वि. (सं.) आज्ञापक, निदेशक, नियोजक, शासक ।
आदेशी, वि. (सं.–शिन्) दे० 'आदेशक' २. दैवज्ञः, ज्योतिर्विद् ।
आद्यंत, क्रि. वि. (सं. न.) दे. 'आदि से अन्त तक' ।
आद्य, वि. (सं.) प्रथम, आदिम, आदि २. अग्र्य, प्रधान ।
आद्या, सं. स्त्री. (सं.) दुर्गा २. प्रतिपदा ।
आद्योपांत, क्रि. वि., दे. 'आदि से अन्त तक' ।
आध, वि. (सं. अर्द्ध) सामि–(अव्य. उ. सामिभुक्तं) ।
—आना, सं. पुं., अर्द्धाणः ।
आधा, वि. (सं. अर्द्ध) सामि । सं. पुं., अर्द्धः, अर्द्धम् , अर्द्ध,–भागः–अंशः ।
—आना, सं. पुं., अर्द्धाणः–णकः ।
—सीसी, सं. स्त्री., अर्द्धावभेदकः, सूर्यावर्त्तः, अर्द्धशिरोवेदना ।
—तीतर आधा बटेर, मु. चित्रविचित्र असंगत ।
आधान, सं. पुं. (सं. न.) स्थापनं २. न्यसनम् ।
आधार, सं. पुं. (सं.) आश्रयः, अवलंबनम् २. आलवालम् ३. पात्रम् ४. गृह-भित्ति,-मूलं, वेश्मभूः (स्त्री.) ५. आश्रयदायकः, पालकः ।
—आधेय संबंध, सं. पुं. (सं.) आश्रयाश्रयिसंबंधः (उ. घृतपात्रयोः) ।
—होना, मु., स्तोका तृप्तिः (स्त्री.) भू ।
आधि, सं. स्त्री. (सं. पुं.) मानसी व्यथा, चिन्ता २. बन्धकः, न्यासः, निक्षेपः ।

आधिकारिक, सं. पुं. (सं. न.) मूलकथावस्तु (न.) २. कर्मचारिन्। वि., अधिकारयुक्त।

आधिक्य, सं. पुं. (सं. न.) बाहुल्यं, प्राचुर्यं, अतिशयः।

आधिदैविक, वि. (सं.) देवप्रेरित, देवताकृत (उ. अतिवृष्टिः)।

आधिपत्य, सं. पुं. (सं. न.) स्वामित्वं, प्रभुत्वं, अधिकारः, शासनम्।

आधिभौतिक, वि. (सं.) मनुष्यपश्वादिप्रेरित (उ. सर्पदंशदुःखम्)।

आधीन, वि., दे. 'अधीन'।

आधी रात, सं. स्त्री. (सं. अर्द्धरात्रः) मध्यरात्रः, निशीथः, रात्रिमध्यम्।

आधुनिक, वि. (सं.) नूतन, नवीन, अधुनातन, इदानींतन, अर्वाचीन, सांप्रतिक।

आधृत, वि. (सं.) आश्रित, अवलंबित।

आधेय, सं. पुं. (सं. न.) आधारस्थं वस्तु (न.), आश्रितः पदार्थः। वि., स्थापनीय, न्यसनीय।

आधोरण, सं. पुं. (सं.) हस्तिपकः, हास्तिकः।

आध्मान वि. (सं.) उच्छून, वातपूरित २. दृप्त, गर्वित ३. दग्ध ४. ध्वनित।

आध्यात्मिक, वि. (सं.) ब्रह्मजीवविषयक, देहचित्तजीवसंबंधिन् (उ. ज्वरमोहशोकादयः)।

आनंद, सं. पुं. (सं.) आह्लादः, मुदा, आ–प्र, –मोदः, संमदः, हर्षः, प्रमदः, शान्तिः (स्त्री.), सुखम्, प्रसन्नता। वि., आनन्दित, प्रसन्न।

—करना, क्रि. अ., नन्द् (भ्वा. प. से.), मुद् (भ्वा. प. से.)।

—देना, क्रि. स., आह्लाद्–नंद्–प्रमुद् (प्रे.)।

—बधाई, सं. स्त्री., अभिनन्दनम् २. मंगलोत्सवः।

—मंगल, सं. पुं. (सं. न.) आनन्दः, मोदः, कुशलम्।

आनन्दित, वि. (सं.) प्रमुदित, सानन्द, सुखिन्।

आन[1], सं. स्त्री. (सं. आणिः पुं., स्त्री.) सीमा, मर्यादा २. शपथः, समयः ३. विजयघोषणा ४. प्रतिज्ञा, सं–प्रति,–श्रवः।

—रखना, मु., प्रतिज्ञां पा (प्रे. पालयति)।

आन[2], सं. स्त्री. (फ़ा.) छविः (स्त्री.), सौन्दर्यम् २. अभि–, मानः ३. लज्जा, संकोच।

—बान, सं. स्त्री., वैभवं, शोभा, हावभावाः।

—बान वाला, वि., सुवसन, सुप्रभ।

आन[3], सं. स्त्री. (अ.) क्षणः, पलं, निमेषः।

—की आन में, मु., सद्यः, झटिति, आशु (सब अव्यय)।

आनक, सं. पुं. (सं.) पटहः, भेरी, मृदंगः २. स्तनयित्नुर्मेघः।

आनन, सं. पुं. (सं. न.) आस्यं, मुखं, वदनम्।

आनन–फानन, क्रि. वि. (अ.) क्षणेन, क्षणात्।

आनरेबल, वि. (अं.) मान्य।

आनरेरी, वि. (अं.) अवैतनिक, आदरवृत्ति।

—मैजिस्ट्रेट, सं. पुं. (अं.) अवैतनिको दण्डाध्यक्षः।

आना[1], सं. पुं. (सं. आणकः) रूप्यकस्य षोडशोंऽशः २. कस्यचिद् वस्तुनः षोडशो भागः।

आना[2], क्रि. अ. (सं. आगमनम्) आगम् (भ्वा. प. अ.) आया (अ. प. अ.) आव्रज् (भ्वा. प. से.) सं. पुं., आयानं, उपस्थानं, आगमनम्।

आई-गई, (बात) वि., अतीता, विस्मृता (वार्ता)।

आए दिन, क्रि. वि., अन्वहं, प्रतिदिनम्।

आ धमकना, क्रि. अ., अकस्मात् आगम।

आनाकानी, सं. स्त्री., अप-व्यप,-देशः छलेन परिहरणम् २. अनवधानम् ३. कर्णे जपनम्।

आनाकानी करना, क्रि. अ., अप-व्यप,-दिश (तु. उ. अ.), छलेन परिहृ (भ्वा. उ. अ.)।

—जाना, सं. पुं., गतागतम् २. पुनर्जन्मन् (न.)।

आनीत, वि. (सं.) आ-उपा-हृत, उपस्थापित, उपनीत।

आनुकूल्य, सं. पुं., (सं. न.) 'अनुकूलता' दे.।

आनुपूर्वी, सं. स्त्री. (सं.) अनुक्रमः, आनुपूर्व्यं, परंपरा।

आनुमानिक, वि. (सं.) अनुमान-तर्क,-सिद्ध, संभाव्य, काल्पनिक।

आनुषंगिक, वि. (सं.) प्रासंगिक, गौण।

आन्वीक्षिकी, सं. स्त्री. (सं.) तर्कविद्या, न्यायः २. आत्मविद्या।

आप, सर्व. (सं. आत्मन् >) स्वयं-स्वतः (अव्य.), २. भवत् (भवती स्त्री.)।

—बीती, सं. स्त्री. स्वानुभूत, प्रत्यक्षीकृत।

आप, सं. पुं. (सं. आपः स्त्री. बहु.) पानीयं, जलम्।

आपगा, सं- स्त्री. (सं-) नदी, तटिनी ।
आपत्काल, सं. पुं. (सं-) दुष्कालः दुस्समयः २. विपत्तिः (स्त्री.) ।
आपत्ति, सं- स्त्री. (सं-) दुःखं, क्लेशः २. विपत्तिः, विपद्, आपद् (सब स्त्री.) ३. कुसमयः ४. दोषारोपणम् ५. आक्षेपः, अपवादः ।
आपद्, सं- स्त्री. (सं-) दे. 'आपत्तिः' ।
—ग्रस्त, वि., आ-वि,-पन्न, आर्त्त, दुर्गत ।
—धर्म, सं- पुं. (सं-) विपन्नकर्तव्यं, कुसमय-धर्मः ।
आपदा, सं- स्त्री., दे. 'आपत्ति' ।
आपन्न, वि. (सं-) आपद्ग्रस्त २. प्राप्त ।
आपस, सं- पुं. (हिं. आप+से) सम्बन्धः । भ्रातृत्वं, बन्धुत्वम् ।
—का, वि., आत्मीयानां, बन्धूनाम् २. परस्परस्य, अन्योऽन्यस्य, मिथः (.अव्य.), इतरेतरस्य ।
—में, क्रि. वि., परस्परं, अन्योन्यं, मिथः ।
आपसी, वि. (हिं. आपस) पारस्परिक ।
आपा, सं- पुं. (हिं. आप) आत्मत्वं, स्वसत्ता २. गर्वः ३. चैतन्यं, चेतना ।
—धापी, सं- स्त्री., स्वार्थपरता, स्वस्वहितचिंता २. संघर्षः,अहमहमिका, अहं,-पूर्विका-प्रथमिका ।
—पंथी, वि. कुमार्गिन्, कुपथगामिन् ।
आपे में आना, मु., चैतन्यलाभः ।
आपे में न रहना, मु., क्रोधादिभिः बुद्धि-मति,-नाशः ।
आपात, सं- पुं. (सं-) पतनं, अवनतिः (स्त्री.) २. अकस्मात् उपागमः ३. आरम्भः ४. अन्तः ।
आपाततः, क्रि. वि. (सं-) अकस्मात्, सहसा, अकाण्डे २. अन्ते, अन्ततः ।
आपाती, वि. (सं.-निद्) पतन-अवतरण,-उन्मुख २. आक्रामक ३. भाविन् ।
आपाद, सं- पुं. (सं-) प्राप्तिः-अवाप्तिः (स्त्री.) २. पुरस्कारः ३. पारिश्रमिकम् । अव्य., आचरणम्, पादपर्यन्तम् ।
आपेक्षिक, वि. (सं-) सापेक्ष २. पराश्रित, परावलंबिन् ।
आप्त, वि. (सं-) अधिगत, प्राप्त, लब्ध २. कुशल, दक्ष ३. साक्षात्कृतधर्मन्, भ्रान्तिशून्य । सं. पुं., ऋषिः २. शब्दप्रमाणम् ।
—काम, वि. (सं.) पूर्णकाम, तृप्त, संतुष्ट ।
आप्ति, सं- स्त्री. (सं-) लाभः, प्राप्तिः (स्त्री.)
आप्लुत, वि. (सं-) स्नात, कृतस्नान २. सिक्त, उक्षित, आर्द्र २. सं. पुं., स्नातकः, गृहिन् ।
आफत, सं- स्त्री. (अ.) दे. 'आपत्तिः' (१-३) ।
—का परकाला, सं- पुं., लोककंटकः, कुचेष्टकः २. क्षिप्रकारिन् ।
आफिस, सं- पुं. (अं.) कार्यालयः ।
आब, सं- स्त्री. (फ़ा.) कान्तिः-द्युतिः (स्त्री.), २. उत्कर्षः ३. शोभा, श्रीः (स्त्री.) । सं- पुं., आपः (स्त्री. बहु.) जलम् ।
—कारी, सं- स्त्री. (फ़ा.) मद्यनिष्कर्षशाला, शुंडा, संधानी २. मादकद्रव्यनिरीक्षको शासन-विभागविशेषः ।
—ताब, सं- स्त्री. (फ़ा.) शोभा, विभूतिः (स्त्री.) ।
—दाना, सं- पुं., (फ़ा.) आ-उप,-जीविका २. जलान्नं, अन्नजलम् ।
—पाशी, सं- स्त्री. (फ़ा.) जलसेकः, प्लावनम् ।
—शार, सं- पुं. (फ़ा.) निर्झरः, जलप्रपातः ।
आबेहयात, सं- पुं. (फ़ा.) अमृतं, सुधा ।
आबोहवा, सं- स्त्री. (फ़ा.) जलवायु (न.) ।
आबद्ध, वि. (सं-) निगृहीत, नियंत्रित ।
आबनूस, सं- पुं. (फ़ा.) कोविदारः, युगपत्रकः ।
—का कुन्दा, मु. अतिकृष्णो मनुष्यः ।
आबाद, वि. (फ़ा.) लोकाध्युषित, जनाकीर्ण २. उर्वर, बहुशस्यद ३. संपन्न ।
आबादी, सं- स्त्री. (फ़ा.) जनाकीर्णस्थानम् २. जनसंख्या ३. शस्यदा भूमिः (स्त्री.) ।
आबाध, सं- पुं. (सं-) कष्टं, वेदना २. क्षतिः-हानिः (स्त्री.) ।
आबी, वि. (फ़ा.) जलीय, जलमय २. जल-वर्ण, ईषन्नील ।
आब्दिक, वि. (सं-) वार्षिक-सांवत्सरिक (-की स्त्री.) ।
आभरण, सं. पुं. (सं- न.) अलंकारः, मंडनं, भूषणम् २. पोषणं, संवर्द्धनम् ।
आभा, सं- स्त्री. (सं-) कान्तिः-दीप्तिः (स्त्री.) २. प्रति,-बिंब-च्छाया ।
आभाणक, सं. पुं. (सं-) लोकोक्तिः (स्त्री.) ।
आभार, सं- पुं. (सं-) उपकारः २. गार्हस्थ्य-भारः ३. भारः, भरः ।
आभारी, वि. (सं-रिन्) कृतज्ञ, कृतवेदिन् ।

आभास, सं. पुं. (सं.) प्रति,-बिंबं-च्छाया २. संकेतः ३. मिथ्याज्ञानम् ।

आभिचारिक, वि. (सं.) ऐन्द्रजालिक, मायात्मक, मायामय, मायिक ।

आभीर, सं. पुं. (सं.) गोपः ।

आभूषण, सं. पुं. (सं. न.) दे. 'आभरण' ।

आभ्यंतर, वि. (सं.) अन्तःस्थ, आन्तर, गर्भस्थ, अन्तर्गत, आभ्यन्तरिक ।

आभ्युदयिक, वि. (सं.) मांगलिक, शंकर, शुभ ।

आमंत्रण, सं. पुं. (सं. न.) आह्वानम् २. निमंत्रणम् ।

आमंत्रित, वि. (सं.) आकारित, आहूत २. निमंत्रित ।

आम[1], सं. पुं. (सं. आम्रः-म्रं) १. (वृक्ष) आम्रः, रसालः, सहकारः, कामशरः, वसन्तदूतः, कोकिलोत्सवः २. (फल) आम्रं, अम्र-रसाल-सहकार,-फलम् ।

—के आम, गुठली के दाम, मु., उभयतो लाभः ।

—खाने से काम या पेड़ गिनने से, मु., आम्रैः प्रयोजनं न तु वृक्षगणनया ।

आम[2], वि. (सं.) अपक्व, दे. 'कच्चा' ।

आम[3], सं. पुं. (सं. न.) अन्नश्लेष्मन् (पुं.) २. अजीर्णरोगभेदः ।

—अतिसार, सं. पुं. (सं.) अतिसारभेदः, संग्रहणी ।

आम[4], वि. (अ.) सामान्य, प्राकृत, अवर, २. विख्यात, प्रसिद्ध ।

—फ़हम, वि. (अ.) सुबोध, सुविज्ञेय ।

आमद, सं. स्त्री. (फ़ा.) आगमनं २. आयः ।

आमदनी, सं. स्त्री. (फ़ा.) आयः, धनागमः ।

आम (मा) नस्य, सं. पुं. (सं. न.) शोकः, खेदः २. दुःखं, वेदना ।

आमना-सामना, सं. पुं. (हिं. सामना) समागमः ।

आमने-सामने, क्रि. वि. (हिं. सामना) । परस्परस्य पुरतः, अन्योऽन्यस्य सम्मुखम् ।

आमय, सं. पुं. (सं.) रोगः, व्याधिः ।

आमयावी, वि. (सं.-विन्) रुग्ण, रोगिन् २. अजीर्ण-अपचन,-ग्रस्त ।

आमरण, क्रि. वि. (सं. न.) मृत्युं यावत्, निधनावधि, आमृत्योः ।

आमलकी, सं. स्त्री. (सं.) लघु-क्षुद्र,-आमलकः ।

आमला, सं. पुं. दे. 'आँवला' ।

आमाशय, सं. पुं. (सं.) अन्नाशयः, जठरः-रम् ।

आमिष, सं. पुं. (सं. पुं. न.) मांसं २. भोग्य-पदार्थः ३. लोभः ४. उत्कोचः ।

आमी, सं. स्त्री. (हिं.-आम) आम्रकम् ।

आमुख, सं. पुं. (सं. न.) रूपकप्रस्तावना ।

आमोद, सं. पुं. (सं.) आनन्दः, मनोविनोदः २. सुगन्धः ।

—प्रमोद, सं. पुं., आह्लादः, हर्षः २. हास्य-विनोदौ, नर्मालापः ।

आम्र, सं. पुं. (सं.) दे. 'आम' ।

आयँती-पायँती, सं. स्त्री. (अनु.+फ़ा पाय-ताना) खट्वायाः शीर्षपादभागौ ।

आय, सं. स्त्री. (सं. पुं.) धन-अर्थ,-आगमः-लाभः ।

—व्यय, सं. पुं. (सं.-व्ययौ) आगमोत्सर्गे ।

—व्ययिक, सं. पुं. (सं. न.) व्याकल्पः (=बजट) ।

आयत[1], वि. (सं.) विस्तृत, विशाल ।

आयत[2], सं. स्त्री. (अ.) इंजील-कुरान,-वाक्यम् ।

आयसु, सं. स्त्री. (सं. आदेशः) आज्ञा ।

आया[1], क्रि. अ. (हिं. आना) आगतः ।

—गया, सं. पुं., अतिथिः ।

आया[2], सं. स्त्री. (पुर्त.) धात्री, मातृका ।

आया[3], अव्य. (फ़ा.) किम्, यत् ।

आयात, सं. पुं. (सं. न.) विदेशादानयनम् २. विदेशादानीतः पण्यसमूहः ।

आयास, सं. पुं. (सं.) प्रयत्नः २. श्रमः ।

आयासक, वि. (सं.) श्रम,-जनक-उत्पादक । कष्ट-क्लेश,-प्रद ।

आयु, सं. स्त्री. (सं.-आयुस् न.) वयस् (न.), जीवितकालः, नित्यगः, विजीविनम् ।

आयुक्त, वि. (सं.) नियुक्त २. संयुक्त ।

आयुध, सं. पुं. (सं. न.) अस्त्रं, शस्त्रं, प्रहरणं, हेतिः (स्त्री.) ।

आयुधागार, सं. पुं. (सं. न.) शस्त्र-अस्त्र,-आगारं-गृहम् ।

आयुर्वेद, सं. पुं. (सं.) वैद्यकं, वैद्यशास्त्रं, चिकित्साशास्त्रम् ।

आयुष्मान्, वि. (सं.) (सं.-मत्) चीर-दीर्घ,-जीविन् । (आयुष्मती स्त्री.) ।

आयुष्य, वि. (सं.) पथ्य । सं. पुं., वयस् (न.) ।

आयोजन, सं. पुं. (सं. न.) द्रव्यासादनं, सामग्रीसंपादनम् २. नियुक्तिः (स्त्री.) ३. उद्योगः ४. सामग्री ।

आयोडीन, सं. स्त्री. (अं.) जम्बुकी, नीलीनम् ।

आरंभ, सं. पुं. (सं.) उपक्रमः, प्रारंभः, आदिः २. उत्पत्तिः (स्त्री.) ।

—करना, क्रि: स., आ-प्रा,-रभ्, प्र-उप,-क्रम् (सब भ्वा. आ. अ.) ।

आर¹, सं. पुं. (सं. न.) मुंड,-लोहं आयसम् २. पित्तलम् ३. तटः-टं-टी-टा ४. कोणः ५ अरः, अरम् ।

आर², सं. स्त्री. (सं. अलम् = डंक) वृश्चिकादीनां दंशः, दंशचंचुः २. अंकुशः ३. कीलः ।

आर³, सं. स्त्री. (सं. आरा) चर्मप्रभेदिका ।

आर⁴, सं. पुं. (हिं. अड़) आग्रहः, निर्बन्धः ।

आर⁵ सं. स्त्री. (अ.) संकोचः, लज्जा ।

आरक्त, वि. (सं.) ईषद्रक्त २. लोहित ।

आरण्य, वि. (सं.) वन्य, वनजात, वनसंबंधिन् ।

आरण्यक, वि. (सं.) दे. आरण्य । सं. पुं. (सं. न.) ग्रन्थभेदः ।

आरती, सं. स्त्री. (सं. आरात्रिकम्) नीराजनानम्, देवमूर्तिपरितो दीपचालनम् २. नीराजनापात्रम् ३. नीराजनास्तोत्रम् ।

आरपार, सं. पुं. (सं. आरपारम् >) तटद्वयंयी, पारावारं-रौ-रे । क्रि. वि., आवारपारम्, अवारात् पारं यावत् ; आद्यन्तं, समग्रम् ।

आरब्ध, वि. (सं.) उपक्रान्त, कृतारम्भ ।

आरभटी, सं. स्त्री. (सं.) क्रोधाद्युग्रभावानां चेष्टा २. रूपके यमकबहुलो वृत्तिभेदः ।

आरसी, सं. स्त्री. (सं. आदर्शः) दर्पणः, मुकुरः २. दक्षिणहस्तांगुष्ठभूषणभेदः ।

आरा, सं. पुं. (सं. आरा >) क्रकचः-चम् । करपत्रं, पत्रदारणः २. चर्मप्रभेदिका ३. अरः, अरम् ।

—कश, सं. पुं. (फ़ा.) क्राकचिकः, दारुदारणः ।

—कशी, सं. स्त्री., क्रकचेन काष्ठविपाटनम् ।

आराइश, सं. स्त्री. (फ़ा.) परिष्कृतिः (स्त्री.), अलंक्रिया, परिष्क्रिया, सज्जा ।

आराधक, वि. (सं.) उपासक, पूजक ।

आराधन, सं. पुं. (सं. न.) भक्ति (स्त्री.), सेवा, परिचर्या २. तर्पणं, तोषणं, प्रसादनम् ।

आराधना, सं. स्त्री. (सं.) दे. 'आराधन' ।

—करना, क्रि. स., पूज् (चु.), उपास् (अ. आ. से.), अभि-, अर्च् (भ्वा. प. से.), आराध् (प्रे.) ।

आराधनीय, वि. (सं.) आराध्य, सेवनीय, पूजनीय, अर्चनीय ।

आराम¹, सं. पुं. (सं.) उपवनं, उद्यानं, पुष्पवाटिका ।

आरामाधिपति, सं. प्र. (सं.) उपवन-उद्यान,-अधिकारिन्-आधिकारिकः ।

आराम², सं. पुं. (फ़ा.) सुखम् २. विश्रामः ३. स्वास्थ्यम् ।

—करना, क्रि. अ., १. कार्यात् निवृत् (भ्वा. आ. से.) २. विश्राम (दि. प. से.) ३. शी (अ. आ. से.) ।

—कुरसी, सं. स्त्री., विश्रामासन्दी ।

—तलब, वि., अलस, सुखेच्छुक ।

आरास्ता, वि. (फ़ा.) अलंकृत, परिष्कृत, सज्ज ।

आरी, सं. स्त्री. (हिं. आरा) लघुक्रकचः, क्रकचकं, करपत्रकम् २. दंडाग्रलग्नो लोहकीलः ३. आरा, चर्मप्रभेदिका ।

आरूढ, वि. (सं.) अधिरूढ, अध्यासीन, कृतारोहण २. दृढ, स्थिर ।

—होना, क्रि. अ., आ-अधि,-रुह् (भ्वा. प. अ.), अध्यास् (अ. आ. से.) ।

—करना, क्रि. स., आ-अधि,-रुह् (प्रे. आरोपयति) ।

आरोग्य, वि. (सं. आरोग्यम् >) नीरोग, स्वस्थ । सं. पुं. (सं. न.) दे. 'अरोगता' ।

आरोग्यता, सं. स्त्री. (सं. आरोग्यम्) स्वास्थ्यं, नीरोगता, अनामयम् ।

आरोप, सं. पुं. (सं.) आरोपणं, संस्थापनं, स्थिरीकरणम् २ स्थानान्तरे आरोपणं स्थापनं वा ३. भ्रमः ४. वस्तुनि वस्त्वन्तरधर्मकल्पनम् ।

आरोपना, क्रि. सं. (सं. आरोपणम्) (स्थानान्तरे) आरुह् (प्रे., आरोपयति), निविश् (प्रे.), सं-प्रति,-स्था (प्रे.).

आरोपित, वि. (सं.) स्थापित, निहित, निवेशित ।

आरोह, सं. पुं. (सं.) उद्गमः, उदयः, अधिरोहणम् २. आक्रमणम् ३. गजादिपृष्ठेऽधिरोहणम् ४. उत्तमयोनिप्राप्तिः (स्त्री.) ५. कारणात् कार्यप्रादुर्भावः ६. विकासः ७. स्वरोत्कर्षः ८. नितम्बः।

आरोहण, सं. पुं. (सं. न.) उद्गमनं, अधिरोहणम् २. अंकुरप्ररोहणम् ३. सोपानं, निःश्रेणी ।

आरोही, वि. (सं.-हिन्) आरोहक, उद्गामी २. उन्नतिशील । सं. पुं., उत्कर्षोन्मुखः स्वरः २. आरूढः, अश्वादिपृष्ठस्थः।

आर्जव, सं. पुं. (सं. न.) ऋजुता, सरलता, निष्कपटता २. सुकरता ३. व्यवहारशुद्धिः (स्त्री.)।

आर्जुनि, सं. पुं. (सं.) अर्जुनपुत्रः अभिमन्युः।

आर्ट, सं. पुं. (अं.) कला, शिल्पं, २. कौशलं, नैपुण्यम्।

आर्टिकल, सं. पुं. (अं.) निबन्धः, लेखः २. धारा, नियमः।

आर्टिस्ट, सं. पुं. (अं.) कलाकारः, कलाविद् २. चित्रकारः।

आर्डर, सं. पुं. (अं.) आदेशः, आज्ञा २. वस्तुनिर्माण-पदार्थप्रेषण,-आदेशः ।

आर्डिनैंस, सं. पुं. (अं.) अध्यादेशः २. युद्धास्त्राणि (न. बहु.)।

आर्त्त, वि. (सं.) व्यथित, पीडित २. दुर्गत ३. रुग्ण।

—नाद, सं. पुं., आर्त्तध्वनिः, आर्त्तस्वरः।

आर्ति सं. स्त्री. (सं.) पीडा, व्यथा २. आपद्-विपद् (स्त्री.)।

आर्थिक, वि. (सं.) धन-द्रव्य-वित्त,-विषयक, मौद्रिक।

आर्द्र, वि. (सं.) क्लिन्न, उन्न, उत्त, सिक्त।

आर्द्रता, सं. स्त्री. (सं.) क्लिन्नता, सरसता।

आर्द्रा, सं. स्त्री. (सं.) षष्ठनक्षत्रम् २. आषाढारम्भः ३. आर्द्रकम्।

आर्य, वि. (सं.) श्रेष्ठ, भद्र २. मान्य, पूज्य ३. कुलीन. सत्कुलज (आर्या स्त्री.)। सं. पुं. (सं.) सज्जनः, कुलीनमानवः २. पूज्यमनुष्यः ३. स्वामिन् ४. श्वशुरः ५. जातिविशेषः ६. आर्यजातीयः ७. गुरुः ८. मित्रम्।

—आवर्त सं. पुं. (सं.) विन्ध्यहिमाचलयोर्मध्यदेशः २. भारतवर्षम्।

—पुत्र, सं. पुं. (सं.) श्रेष्ठस्य पुत्रः २. पतिः।

—समाज, सं. पुं. (सं.) महर्षिदयानन्द-संस्थापितः समाजविशेषः।

आर्या, सं. स्त्री. (सं.) पार्वती २. श्वश्रूः (स्त्री.) ३. पितामही ४. छन्दोभेदः।

आर्ष, वि. (सं.) १-३. ऋषि,-संबंधिन्-प्रणीत-सेवित ४. वैदिक।

—प्रयोग सं. पुं. (सं.) प्राचीनग्रंथानामर्वाचीनव्याकरणविरुद्धाः प्रयोगाः।

आलंकरिक, वि. (सं.) अलंकारविषयक २. अलंकारयुत ३. अलंकारविद्।

आलंब, सं. पुं. (सं.) अवलंब, आश्रयः २. गतिः (स्त्री.), शरणम्।

आलंबन, सं. पुं. (सं. न.) अवलंबः, आश्रयः २. रसोत्पत्तौ विभावभेदः (सा.) ३. कारणं, साधनम्।

आलन, सं. पुं. (?). लेपनाय कर्दममिश्रितं तृणादिकम् २. शाकादिमिश्रितं चणकादिचूर्णम्।

आलमारी, सं. स्त्री., दे. 'अलमारी'।

आलय, सं. पुं. (सं.) गृहम् २. स्थानम्।

आलवाल, सं. पुं. (सं. न.) आवालं, आवापः।

आलस, सं. पुं., दे. 'आलस्य'।

आलसी, वि. (हिं. आलस) अलस, तन्द्रिल, तन्द्रालु, शीतक, तुंदपरिमृज, उद्योगविमुख।

आलस्य, सं. पुं. (सं. न.) मान्द्यं, तन्द्रिका, जाड्यं, कार्यद्वेषः ।

आला, सं. पुं. (सं. आलयः >) भित्तिस्तंभादिषु दीपकाद्यर्थं स्थानम् २. काष्ठफलकः।

आला, वि. (अ.) उत्तम, श्रेष्ठ।

आलान, सं. पुं. (सं. न.) गजबंधन,-स्तम्भः-रज्जुः (स्त्री.) २. बंधनं, रज्जुः।

आलाप, सं. पुं. (सं.) संलापः, संभाषणं, कथोपकथनं, वार्त्तालापः २. तानः, सप्तस्वर-साधनम् (संगीत)।

आलापना, क्रि. स. (सं. आलपनं >) गै (भ्वा. प. अ.)।

आलिंगन, सं. पुं. (सं. न.) परि (री) रंभः, परिष्वंगः, संश्लेषः, उपगूहनं, श्लिषा।

—करना, क्रि. स., आलिंग् (भ्वा. प. से.), आश्लिष् (दि. प. अ.)., उपगुह् (भ्वा. उ. से., उपगूहति)।

आलि, सं. स्त्री. (सं.) वयस्या, सखी, सहचरी २. पंक्तिः (स्त्री.) ३. सेतुः ४. रेखा।
आलि, सं. पुं. (सं.) वृश्चिकः २. भ्रमः।
आलिखित, वि. (सं.) लिखित २. अंकित ३. चित्रित।
आलिप्त, वि. (सं.) प्र-वि,-लिप्त, दिग्ध, अक्त।
आलिम, वि. (अ.) पंडित, विद्वस्, बहुश्रुत, बह्वधीत।
आली, सं. स्त्री. (सं.) सखी, वयस्या २. पंक्तिः, ततिः (स्त्री.)।
आलू, सं. पुं. (सं. आलुः.) सुकन्दं, शुभ्रालुः, शुक्लकन्दः-न्दम्।
—बुखारा, सं. पुं., आलूकं, आलुकं, रक्तफलं-भल्लूकम्।
आलूचा, सं. पुं. (फ़ा.)*आलूचः, वृक्षभेदः २. *आलूचम्, फलभेदः।
आलेख, सं. पुं. (सं.) लेखः, लेख्यं, लिखितम् २. लिपी, लिपिः (स्त्री.)।
आलेख्य, सं. पुं. (सं. न.) चित्रं, प्रतिरूपं। वि. लेखार्ह।
आलोक, सं. पुं. (सं.) भा, आभा, प्रभा, प्रकाशः २. त्विष्, दीप्तिः, कान्तिः (सब स्त्री.)।
आलोचक, वि. (सं.) समालोचक समीक्षक २. दर्शक।
आलोचन, सं. पुं. (सं. न.) गुणदोष,-परीक्षणं-निरूपणं-परीक्षा, सम्-, आलोचना २. दर्शनम्।
आलोचना, सं. स्त्री. (सं.) दे. 'आलोचन'।
आलोडन, सं. पुं. (सं. न.) मंथनं, मंथः २. प्रगाढविचारः।
आलोडित, वि. (सं.) मथित २. संक्षोभित ३. विचारित।
आल्हा, सं. पुं. (देश.) वीरच्छन्दस् (न.) २. महोबावासी प्राचीनो वीरविशेषः ३.विस्तृत-वर्णनम्।
आवभगत, सं. स्त्री. (हिं. आना + सं. भक्तिः) सत्कारः, उपचारः, सेवा, पूजा।
आवरण, सं. पुं. (सं. न.) आच्छादनं, पुटं २. आच्छादनवस्त्रं, प्रच्छदपटः ३.तिरस्करिणी, व्यवधानं ४. कोशः, कोषः, वेष्टनम् ५. चर्मन् (न.) फलकम् (हिं. ढाल)।
—पत्र, सं. पुं. (सं. न.) मुख,- पृष्ठं-पत्रम्।
आवर्त्त, सं. पुं. (सं.) जलभ्रमः, भ्रमरकः. भ्रमिः (स्त्री.) २. अवृष्टजलो मेघः ३. राजावर्त्तः, रत्नभेदः।
आवर्तक, वि. (सं.) आ-परि-वर्तमान, घूर्णायमान।
आवर्तन, सं. पुं. (सं. न.) परि-, भ्रामणं, व्या-परि,-वर्तनम् २. विलोडनम् ३. पुनः पुनर्भावः, आवृत्तिः (सब स्त्री.)।
आवर्तनी, सं. स्त्री. (सं.) वुषा, २. दर्वी, मुषा ३. चमसः-सम।
आवलित, वि. (सं.) ईषद्वक्र, वक्रीभूत।
आवली, सं. स्त्री. (सं.) आवलिः, पंक्तिः, ततिः (सब स्त्री.)।
आवश्य, सं. पुं. (सं. न.) आवश्यकता २-३. अनिवार्य,-कार्य-फलम्।
आवश्यक, वि. (सं.) अवश्यकर्तव्य, शीघ्रकार्य, गुर्वर्थ २. अनिवार्य।
आवश्यकता, सं. स्त्री. (सं.) आवश्यकत्वं, अपेक्षा ३. प्रयोजनम्।
आवश्यकीय, वि., दे. 'आवश्यक'।
आवा, सं. पुं., दे. 'आँवा'।
आवागमन, सं. पुं. (हिं. आना + सं. गमनम्) पुनरुत्पत्तिः (स्त्री.), पुनर्जन्मन् (न०), प्रेत्यभावः, देहान्तरप्राप्तिः (स्त्री.)।
आवाज, सं. स्त्री. (फ़ा.) शब्दः, नादः, स्वनः, ध्वनिः घोषः २. गानस्वरः ३. उच्चस्वरः।
—उठाना, मु., विपरीतं वद् (भ्वा. प. से.)।
—बैठना, मु., स्वरभंगः जन् (दि. आ. से.)।
आवारा, वि. स्त्री. (फ़ा.) परिभ्रमक, अकर्मण्य २. अज्ञातनिवास ३. दुर्वृत्त, जाल्म।
आवास, सं. पुं. (सं.) गृहं, गेहं, सदनम्।
आवाहन, सं. पुं. (सं. न.) मंत्रैर्देवताह्वानम्, आमंत्रणम् २. निमंत्रणम्।
आविर्भाव, सं. पुं. (सं.) प्रकाशनं प्राकट्यं, विवृतिः (स्त्री.) २. उत्पत्तिः (स्त्री.)।
आविर्भूत, वि. (सं.) प्रकटित, प्रकाशित २. उत्पन्न।
आविष्कर्ता, वि. (सं. कर्तृ) आविष्कारक, प्रकटयितृ, प्रकाशक, कल्पक।
आविष्कार, सं. पुं. (सं.) अज्ञाततत्त्वप्रकाशनम् २. अपूर्ववस्तुनिर्माणम् ३. प्रकाशः, प्राकट्यम्।
आविष्कारक, वि. (सं.) दे. 'आविष्कर्ता'।
आविष्कृत, वि. (सं.) प्रकटित, प्रकाशित २. प्रथमं निर्मित-रचित।

आविष्ट, वि. (सं.) भूतप्रेतादिपीडित २. अभिभूत ।

आवृत, वि. (सं.) प्र-समा-आ,-च्छादित, संवृत, पिहित २. परिवृत, वलयित ।

आवृत्ति, सं. स्त्री. (सं.) अभ्यासः, क्रिया,-सातत्यं-प्रवन्धः २. अध्ययनम् ।

आवेग, सं. पुं. (सं.) आवेशः, चित्तोद्वेगः, उत्तेजनं, उद्दीपनम् २. त्वरा ३. संचारिभाव-भेदः (सा.) ।

आवेज़ा, सं. पुं. (फ़ा.) प्रालम्बः, लोलकः ।

आवेदक, वि. (सं.) निवेदक, प्रार्थिन् । (सं. पुं.) अभियोगिन् , वादिन् ।

आवेदन, सं. पुं. (सं. न.) दे. 'निवेदन' ।

आवेश, सं. पुं. (सं.) आवेगः, आतुरता २. व्याप्तिः (स्त्री.), संचारः ३. प्रवेशः ४. भूतबाधा ५. अपस्माररोगः ।

आवेष्टन, सं. पुं. (सं. न.) गोपनं, निगूहनम् २. अवगुंठनं, पिधानं, पुटः, कोशः ।

आवेष्टित, वि (सं.) अवगुंठित, आवृत ।

आशंका, सं. स्त्री. (सं.) संदेहः, संशयः २. अनिष्टभावना ३. भयं, त्रासः ।

आशंकित, वि. (सं.) भीत, त्रस्त ३. संदेहात्मक ।

आशंसा, सं. स्त्री. (सं.) अपेक्षा, आशा २. इच्छा, वाञ्छा ३. कथनम्, चर्चा ।

आशंसित, वि. (सं.) अपेक्षित, आकाङ्क्षित, इष्ट २. कथित, वर्णित ।

आशंसी, वि. (सं.-सिन्) आशंसु, अपेक्षी, आकांक्षक, प्रत्याशिन् ।

आशना, वि. (फ़ा.) परिचित, अभिज्ञ । सं.पुं. जारः,प्रणयिन् । सं.स्त्री. प्रेयसी, कान्ता ।

आशनाई, सं. स्त्री. (फ़ा.) मैत्री, सख्यम् । २. प्रणयः, अनु-रागः ।

आशय, सं. पुं. (सं.) तात्पर्यं, अभिप्रायः, अर्थः २. वासना ३. स्थानं, आधारः ४. गर्तः ।

आशा, सं. स्त्री. (सं.) आशंसा, आकांक्षा, अपेक्षा २. स्पृहा, वाञ्छा, मनोरथः ३. दिशा ४. दक्षप्रजापतेः पुत्री ५. रागभेदः ।

—करना, क्रि. अ., आशंस् (भ्वा. आ. से.) उत्-प्रति अप,-ईक्ष् (भ्वा. आ. से.), आशास् (अ. आ. से.) ।

—अतीत, वि. (सं.) आशंसाधिक ।

—वाद, सं. पुं. (सं.) सदाशावत्तासिद्धान्तः ।

—वान्, वि. (सं.) साश, आशान्वित ।

आशिक, वि. (अ.) प्रणयिन् , अनुरागिन् , आसक्त, अनुरक्त ।

आशिष, सं. स्त्री. (सं. आशिस्) दे. 'आशीर्वाद'।

आशीर्वाद, सं. पुं. (सं.) आशिस् (स्त्री.) आशीर्वचनं, हिताशंसनं, मंगलप्रार्थना, आशास्यं, शुभकामना ।

—देना, क्रि. स., आशिषं दा (जु. उ. अ.), टि.-प्रायः लोट् व आशीर्लिङ् के रूपों से (उ. पुत्रं आप्नुहि आप्याः वा) ।

आशु, क्रि. वि. (सं.) शीघ्रं, द्रुतं, सत्वरं (सब अव्य.) ।

—कवि, सं. पुं. (सं.) सद्यः काव्यकारः ।

—तोष, सं. पुं. (सं.) शिवः ।

आशुग, वि (सं.) शीघ्र-द्रुत-तीव्र,-गामिन् । सं. पुं. (सं.) वायुः २. बाणः ।

आश्चर्य, सं. पुं. (सं. न.) विस्मयः, कौतुकं, चमत्कारः, चित्रं, अद्भुतम ।

—करना, क्रि. अ., विस्मि (भ्वा. आ. अ.) ।

—जनक, वि. (सं.) विस्मापक, अद्भुत, विचित्र ।

आश्रम, सं. पुं. (सं.) तपोवनं, मुनिवसतिः (स्त्री.) २. मठः, विहारः ३. विश्रामशाला ४. मनुष्यायुषः चत्वारो विभागाः (ब्रह्मचर्य-गृहस्थवानप्रस्थसंन्यासाश्रमाः) ।

आश्रय, सं. पुं. (सं.) अव-आ,-लंबः आधारः २. अवष्टम्भः, उपघ्नः ३. शरणं, गतिः (स्त्री.) गृहं, सदनम् ।

—दाता, वि. (सं.-तृ) रक्षक, रक्षितृ, त्रातृ ।

आश्रित, वि. (सं.) आश्रयप्राप्त, अवलंबित २. अधीन, शरणागत । सं. पुं., सेवकः, दासः ।

आश्वासन, सं. पुं. (सं. न.) सान्त्वनं, आशा-प्रदानं, समाश्वासनं, प्रोत्साहनं, उत्तेजनम् ।

आश्विन, सं. पुं. (सं.) आश्वयुजः शारदः, इषः ।

आषाढ, सं. पुं. (सं.) अषाढः, शुचिः ।

आस, सं. स्त्री. (सं. आशा) आशंसा २. लालसा ३. आश्रयः ४. दिशा ।

आसक्त, वि. (सं.) तत्पर, लीन, मग्न, प्रसित २. अनुरक्त, बद्धराग, प्राणयिन् ।

आसक्ति, सं. स्त्री. (सं.) तत्परता, लीनता, मग्नता २. अनुरागः, प्रेमन् , कामः ।

आसन, सं. पुं. (सं. न.) उपवेशनप्रकारः

२. स्थितिः (स्त्री.) ३. अष्टांगयोगस्य तृतीयमंगम् ४. उपवेशनाधारः, पीठं ५. साधुवसतिः ६. नितम्बः ७. शत्रुदुर्गादीनवरुध्य स्थितिः।
—डोलना, मु., चेतो विकृ (कर्म.)।
आसन्न, वि. (सं.) समीप, निकट, निकटस्थ।
—प्रसवा, वि. स्त्री. (सं.) निकटप्रसूतिः (स्त्री.)
—भूत, सं. पुं., वर्तमानसंपृक्तो भूतकालः।
आस-पास, क्रि. वि. (अनु. आस+सं. पार्श्वः) परितः, अभितः (दोनों द्वितीया के साथ), समंततः, समंतात्, विष्वक्, सर्वतः (सब अव्य.)।
आसमान, सं. पुं. (फ़ा., सं. अश्मानः >) गगनं, दे. 'आकाश' २. स्वर्गः।
—के तारे तोड़ना, मु., असंभवानि कार्याणि कृ।
—को चूमना, |मु., गगनं चुम्ब् (भ्वा. प. से.),
—से बातें करना| अभ्रं कष् (भ्वा. प. से)।
आसमानी, वि. (फ़ा.) आकाशीय २. ईषन्नील।
आसरा, सं. पुं. (सं. आश्रयः) अवलंबः, आधारः २. भरणपोषणाशा ३. आश्रयदः ४. शरणं, गतिः (स्त्री.) ५. प्रतीक्षा ६. आशा।
—देना, क्रि. स., रक्ष् (भ्वा. प. से.)।
—लेना, क्रि. अ., आश्रि (भ्वा. उ. से.), शरणं गम्।
आसव, सं. पुं. (सं.) मद्यभेदः २. सुरा, मदिरा ३. औषधप्रकारः ४. दे. 'अरक'।
आसा, सं. स्त्री., दे० 'आशा'।
आसा, सं. पुं. (अ. असा) सुवर्णदंडः, रजतयष्टिः (पुं. स्त्री.)।
आसाइश, सं. स्त्री. (फ़ा.) सुखं, सौख्यम्।
आषाढ़, सं. पुं. दे. 'आषाढ'।
आसादन, सं. पुं. (सं. न.) प्राप्तिः-उपलब्धिः (स्त्री.) २. निधानम् ३. आक्रमणम् ४. पश्चादागम्य प्रापणम्।
आसादित, वि. (सं.) प्राप्त, लब्ध २. निहित, स्थापित ३. आक्रान्त ४. पश्चादागम्य गृहीत।
आसान, वि. (फ़ा.) सुकर, सुगम, सुखसाध्य।
आसानी, सं. स्त्री. (फ़ा.) सुकरता, सुगमता।
आसाम, सं. पुं. (सं. असम >) कामरूपाः, असमप्रान्तः, भारतस्य प्रान्तविशेषः।
आसामी, वि. (हिं. आसाम) असमप्रदेश,-विषयक-सम्बन्धिन्। सं. पुं., असम-कामरूप,-वासिन्-वास्तव्य। सं. स्त्री असमीया भाषा, असमी।

आसावरी, सं. स्त्री. (सं. आशावरी) श्रीरागस्य रागिणीभेदः।
आसीन, वि. (सं.) निषण्ण, उपविष्ट।
आसीस, सं. स्त्री., दे. 'आशीर्वाद'।
आसुर, वि. (सं.) राक्षस, पैशाच, असुरसंबंधिन्। सं. पुं. (सं.) असुरः।
आसुरी, वि. स्त्री. (सं.) असुरसंबंधिनी, राक्षसी, पैशाची।
—चिकित्सा, सं. स्त्री., शल्यचिकित्सा।
—माया, सं. स्त्री. पैशाचं छलम्।
—संपत्, सं. स्त्री. (सं-द्) पैशाची वृत्तिः (स्त्री.)।
आसोज, सं. पुं. (सं. आश्वयुजः) दे. 'आश्विन'।
आस्तरण, सं. पुं. (सं. न.) कुथः, गजपृष्ठस्थं चित्रकंबलम् २. शय्या, कुशासनम्।
आस्तिक, वि. (सं.) ईशवेदपरलोकविश्वासिन्। २. ईश्वरसत्तावादिन् ३. श्रद्धालु।
आस्तिकता, सं. स्त्री. (सं.) ईशवेदपरलोकेषु विश्वासः २. ईश्वरप्रत्ययः।
आस्तनी, सं. स्त्री. (फ़ा.) पिप्पलः, कोशनालिका, चोलादीनां बाहुभागः।
—का साँप, मु. गूढशत्रुः, गुप्तवैरिन्।
आस्था, सं. स्त्री. (सं.) श्रद्धा, भक्तिः (स्त्री.), अर्हणा, आदरः २. सभा, आस्थानम् ३. आलंबनं, अपेक्षा।
आस्थान, सं. पुं. (सं. न.) उपवेशनस्थलं, समामंडपः २. सभा।
आस्थित, वि. (सं.) उषित, कृतवास २. आश्रित ३. लब्ध ४. वेष्टित।
आस्पद, सं. पुं. (सं. न.) स्थानम् २. कार्यम् ३. प्रतिष्ठा ४. वंशः कुलम्।
आस्य, सं. पुं. (सं. न.) वदनं, तुंडम् २. मुखमंडलं, मुखम्।
आस्वादन, सं. पुं. (सं. न.) स्वादनं, रसनम्।
आह, अव्य. (सं. अहह) कष्टं, हा; हन्त, आः, हा, अहो (सब अव्य.)।
आह, सं. स्त्री. (फ़ा) निःश्वासः, उच्छ्वासः, दीर्घश्वासः।
—भरना, क्रि. अ., दीर्घं उत्-नि,-श्वस् (अ. प. से.)।
आहट, सं. स्त्री. (हिं. आना+हट प्रत्य.) पादशब्दः, चरणनिक्षेपध्वनिः २. विद्यमानतासूचकध्वनिः।

आहत, वि. (सं.) क्षत, व्रणित, विद्ध, भिन्नदेह २. गुण्यसंख्या ३. परस्परविरुद्ध (वाक्य) ४. सद्यःक्षालित ५. जीर्ण ६. कंपित। सं. पुं., पटहः।

आहरण, सं. पुं. (सं. न.) आच्छेदनं, सहसा आकलनम् २. अपनयनम् ३. आनयनम् ४. ग्रहणम्।

आहरन, सं. पुं. (सं. आहननम् >) शूर्मिः (स्त्री.), शूर्मी, स्थूणा।

आहाँ, अव्य. (अनु.) मा, न, नो, नहि।

आहा, अव्य, (सं. अहह) अहो, ही, आः।

आहार, सं. पुं. (सं.) भक्षणं, भोजनं, जेमनं, जग्धिः (स्त्री.) २. खाद्य-भक्ष्य,-सामग्री।

—विहार, सं. पुं. (–रौ) चर्या, वर्तनं, वृत्तं, आचारव्यवहारौ।

आहार्य, वि. (सं.) भक्ष्य, खाद्य २. ग्रहीतव्य ३. आहरणीय ४. कृत्रिम। सं. पुं., चतुर्थोऽनुभावः (सा.)।

अभिनय, सं. पुं. (सं.) वचनचेष्टारहितोऽभिनयः (सा.)।

आहिस्ता, क्रि. वि. (फ़ा.-तः) शनैः, मन्दम्।

—आहिस्ता, क्रि. वि., शनैः शनैः, मन्दं मन्दम्।

आहुति, सं. स्त्री. (सं.) हवनं, देवयज्ञः होमः, होत्रम् २. हवनसामग्री ३. सामग्र्याः सकृद होतव्या मात्रा।

—देना, क्रि. स., हु (जु. उ. अ.), यज् (भ्वा. उ. अ.)।

आहू, सं. पुं. (फ़ा.) मृगः, हरिणः।

आहूत, वि. (सं.) आकारित, आ-नि,-मंत्रित।

आहूति, सं. स्त्री. (सं.) आकारणं, आमंत्रणम्।

आह्निक, वि. (सं.) दैनिक, दैनंदिन, प्रात्यहिक। क्रि. वि. अहरहः, अनु-प्रति,-दिनम्। सं. पुं., दिनस्य कार्यम् २. महाभाष्यखण्डः ३. अध्यापकः ४. दैनिकी भृतिः (स्त्री.)।

आह्लाद, सं. पुं. (सं.) आनंदः, हर्षः, मोदः।

आह्लादक, वि. (सं.) आह्लादप्रद, हर्षजनक, आनन्ददायक।

आह्लादित, वि. (सं.) प्रसन्न, मुदित।

आह्वान, सं. पुं. (सं. न.) आहूतिः (स्त्री.), आकारणं, आमंत्रणम् २. आह्वानपत्रम् (= सम्मन) ३. यज्ञे देवताकारणम्।

—करना, क्रि. स., आह्वे (भ्वा. उ. अ.) आकृ (प्रे.) २. देवतां आवह् (प्रे.)।

इ

इ, देवनागरीवर्णमालायाः तृतीयः स्वरः, इकारः।

इंक, सं. स्त्री. (अं.) मशी, मषी, मसी।

इंगला, सं. स्त्री. (सं. इडा) मानवशरीरे वामपार्श्वस्था वक्रा नाडी।

इंगलिश, वि. (अं.) आंग्लदेशीय। सं. स्त्री. आंग्लभाषा।

इंगलिस्तान, सं. पुं. (अं. इंगलिश + फ़ा. स्तान) आंग्लदेशः।

इंगित, सं. पुं. (सं. न.) इङ्गः, संकेतः आकारः, दैहिकचेष्टा। वि. संकेतित।

इंगुदी, सं. स्त्री. (सं.) तापसतरुः, शूलारिः।

इंच, सं. पुं. (अं.) अंगुलः २. अत्यल्पं, रेखामात्रम्।

इंजन, सं. पुं. (अं. एंजिन) यंत्रम् २. वाष्पशकटीकर्षकयन्त्रम्।

इंजीनियर, सं. पुं. (एंजीनियर) यंत्रकारः, यंत्रकलाभिज्ञः, वास्तुविद्याविशारदः।

इंजेक्शन, सं. पुं. (अं.) सूचीभरणम्।

इंट्रैंस, सं. पुं. (अं.) (एंट्रैंस) द्वारं २. प्रवेशः ३. आंग्लविद्यालयस्य नवमदशमकक्षे (द्वि.)।

—परीक्षा, सं. स्त्री., प्रवेशिका परीक्षा।

इंडुवा, सं. पुं. (सं. गेण्डुकः >) घटाद्याधारभूतं शीर्षस्थं वर्तुलवस्त्रम्।

इंतज़ाम, सं. पुं. (अ.) संविधा, प्रबन्धः।

इंदिरा, सं. स्त्री. (सं.) पद्मा, कमला दे. 'लक्ष्मी'।

इंदीवर, सं. पुं. (सं. न.) नील,-कमलं-उत्पलम् २. कमलम्।

इंदु, सं. पुं. (सं.) चन्द्रः २. कर्पूरः-रम्।

इंद्र, वि. (सं.) संपन्न २. श्रेष्ठ। सं. पुं., देवराजः, पाकशासनः, पुरंदरः, शक्रः, वज्रिन्, सुरपतिः, शचीपतिः, आखंडलः, सहस्राक्षः, नाकनाथः वज्रपाणिः २. सूर्यः ३. विद्युत् (स्त्री. ४. नृपः ५. ज्येष्ठानक्षत्रम् ६. चतुर्दशसंख्या ७. व्याकरणस्य आदिम आचार्यः ८. जीवः, प्राणाः।

—का अखाड़ा, सं. पुं. इन्द्रसभा २. संगीतसभा।

—जाल, सं. पुं. (सं. न.) मायाकर्मन् (न.), कुहकम्।

—जाली, वि. (सं.-लिन्) मायाविन्, कुहुककारिन्।
—जीत, सं. पुं. (सं.-जित्) मेघनादः।
—जौ, सं. पुं. (सं.-यवः) कुटज-शक्र,-बीजम्।
—धनुष, सं. पुं. (सं.-धनुस् न.) इन्द्रचापं. सुरधनुस्।
—नील, सं. पुं. (सं.) नील,-उपलः-मणिः (= नीलम)।
—नीलक, सं. पुं. (सं.) मरकतं, अश्मगर्भः, हरिन्मणिः (= ज़मुर्रद)।
—प्रस्थ, सं. पुं. (सं. न.) युधिष्ठिरनिर्मापितं दिल्लीसमीपवर्ति नगरम्।
—लोक, सं. पुं. (सं.) नाकः, स्वर्गः।
इंद्रा, सं. स्त्री. (सं.) दे. 'इन्द्राणी'।
इंद्राणी, सं. स्त्री. (सं.) शची, ऐन्द्री, पौलोमी, माहेन्द्री, पुलोमजा २. स्थूलैला ३. सूक्ष्मैला ४. निर्गुण्डी।
इंद्रानुज, सं. पु (सं.) विष्णुः।
इंद्रायन, सं. पुं. (सं. इन्द्राणी) सुरसा, निर्गुण्डी, सिंदुवारः।
—का फल, मु., बही रम्योऽन्तर्दुष्टः।
इंद्रायुध, सं. पुं. (सं. पुं. न.) इन्द्रचापः २. वज्र, पविः।
इंद्रिय, सं. स्त्री. (सं. न.) करणं, अक्षं, हृषीकं, ग्रहणं, विषयिन् (न.) २. जननेन्द्रियम् ३. वीर्यम् ४. 'पंच' इति संख्या।
—अर्थ, सं. पुं. (सं.) इंद्रियविषयः (रूपरसादि)।
—जित्, वि. (सं.) जितेन्द्रिय, हृषीकेशः।
—निग्रह, सं. पुं. (सं.) इन्द्रिय,-दमनं-जयः, दमः।
—वश, वि. (सं.) विषयिन्, विषयवशः।
इंधन, सं. पुं. (सं. न.) इध्मं. एधं, एधस् (न.)।
इं(एं)पायर, सं. पुं. (अं.) साम्राज्यम्, आधिराज्यम्।
इंपीरियलिज़्म, सं. पुं. (अं.) साम्राज्यवादः २. सम्राट्शासनम्।
इंपोर्ट, सं. पुं. (अं.) दे. 'आयात'।
इंसाफ, सं. पुं. (अ.) न्यायः, धर्मः २. निर्णयः विवेकः।
इन्स्टिट्यूट, सं. स्त्री. (अं.) संस्थानम्।
इन्स्टिट्यूशन, सं. स्त्री. (अं.) शिक्षालयः, विद्यालयः २. धर्मशाला ३. रीतिः (स्त्री.)

इन्स्ट्रूमेंट, सं. प्र. (अं.) उपकरणं, यन्त्रम् २. साधनम्।
इन्स्पेक्टर, सं. पुं. (अं.) निरीक्षकः, द्रष्टृ।
इक, वि., दे. एक।
इकट्ठा, वि, (सं. एकस्थ) एकीकृत, समवेत, गणीभूत।
—करना, क्रि. सं., एकत्र कृ; सं-नि,-चि (स्व. उ. अ.)।
इकट्ठे, क्रि. वि. (हिं. इकट्ठा) एकीभूय, संभूय, मिलित्वा।
इकतार, क्रि. वि. (सं. एकतारः >) सततं, निरन्तरम्।
इकतारा, सं. पुं. (सं. एकतारः >) एक,-तारः-तंत्रीकः. वाद्यभेदः।
इकतीस, वि. (सं. एकत्रिंशत् स्त्री. एक.) सं. पुं., उक्ता संख्या, तद्बोधकावंकौ (३१) च।
इकरार, सं. पुं. (अ.) प्रतिज्ञा, संगरः. प्रति-सं,-श्रवः २. अंगी-स्वी,-कारः।
—नामा, सं. पुं. (फ़ा.) प्रतिज्ञा-समय,-पत्रं-लेख्यम्।
इकलौता, सं. पुं. (सं. एकल >) भगिनी-भ्रातृ-हीनः, पित्रोः एकलः पुत्रः।
इकसठ, वि. (सं. एकषष्टिः स्त्री. एक.), सं. पुं. उक्ता संख्या, तद्बोधकावंकौ (६१) च।
इकसार, वि. (सं. एकसार >) समान, सदृश।
इकहत्तर, वि. (हिं. इक + सत्तर) एकसप्ततिः (स्त्री. एक.), सं. पुं. उक्ता संख्या तद्बोधकावंकौ (७१) च।
इकहरा, वि. (सं. एकस्तर) दे. 'एकहरा'।
इकाई, सं. स्त्री. (हिं. इक) एका व्यक्तिः (स्त्री.) २. एकांकः ३. त्रैराशिकम् (= इकाई का कायदा)।
इकानवे, वि. (हिं. इक + नवे) एकनवतिः (स्त्री. एक.), सं. पुं., उक्ता संख्या तद्बोधकावंकौ (९१) च।
इकावन, वि. (सं. एकपंचाशत् स्त्री. एक.) सं. पुं., उक्ता संख्या तद्बोधकावंकौ (५१) च।
इकासी, वि. (हिं. इक + अस्सी) एकाशीतिः (स्त्री. एक.) सं. पुं.- उक्ता संख्या तद्बोधकावंकौ (८१) च।
इकोतर, वि. (सं. एकोत्तर) एकाधिक।
इक्का, वि. (सं. एक) एकाकिन्, एकल।

२. अतुल्य, असम। सं. पुं., वाहन-यान-प्रवहण,-भेदः २. एकांकयुतं क्रीडापत्रम् ३. एकाकी योधः।

—दुक्का, वि. विरल २. मार्गभ्रष्ट ३. यूथभ्रष्ट।

इक्षु, सं. पुं. (सं.) मधु-गुड,-तृणः, महारसः, रसालः, पयोधरः।

—रस, सं. पुं. (सं.) मधुतृण,-सारः-द्रवः-निर्यासः।

—सार, सं. पुं. (सं.) गुडः।

इक्ष्वाकु, सं. पुं. (सं.) वैवस्वतमनोः पुत्रः सूर्यवंशीयः प्रथमनृपः।

—नंदन, सं. पुं. (सं.) श्रीरामचन्द्रः।

इख्तियार, सं. पुं. (अ.) प्रभावः, अधिकारः २. अधिकारक्षेत्रम् ३. सामर्थ्यम् ४. स्वामित्वम्।

इच्छा, सं. स्त्री. (सं.) स्पृहा, आकांक्षा, ईहा, वाञ्छा, अभिलाषः, मनोरथः, इष्टं, अभीष्टं, ईप्सितं, कामना।

—करना, क्रि. स. इष् (तु. प. से.), अभिलष्, वांछ् (दोनों भ्वा. प. से.) कम् (भ्वा. आ. से., कामयते), स्पृह् (चु., चतुर्थी के साथ), (सन्नंत रूपों से भी, उ. पढ़ने की इच्छा करता है=पिपठिषति)।

—अनुकूल, क्रि. वि. (सं. न.) यथारुचि, यथेच्छं, यथेष्टं, यथाकामम्।

—भेदी, सं. पुं. (सं.—दिन्) यथेष्टविरेचकमौषधम्।

इच्छित, वि. (सं.) अभीष्ट. वांछित, अभिलषित।

इच्छुक, वि. (सं.) इच्छु, अभिलाषिन्, आकांक्षिन्। (टि. सन्नंत रूपों से भी, उ० पढ़ने का इच्छुक=पिपठिषुः। तुमुन्नन्त रूप के बाद 'काम' वा 'मनस्' लगाकर भी, उ० जाने का इच्छुक=गन्तु,-कामः-मनाः)।

इजराय, सं. पुं. (अ.) प्रचालनं २. अनुष्ठानम्।

—डिगरी, सं. पुं. (अ.+अं. डिकरी) राजाज्ञासंपादनम्।

इजलास, सं. पुं. (अ.) अधिवेशनम् २. न्यायालयः।

इज़हार, सं. पुं. (अ.) प्रकाशनम् २. साक्ष्यम्।

इजाज़त, सं. स्त्री. (अ.) अनुमतिः (स्त्री.), अनुज्ञा २. आज्ञा, आदेशः।

इज़ाफ़ा, सं. पुं. (अ.) वृद्धिः (स्त्री.), दे.।

इजार, सं. स्त्री. (अ.) दे. 'पाजामा'।

—बंद, सं. पुं. (अ.+फ़ा.) दे. 'नाड़ा'

इजारा, सं. पुं. (अ.) पणः, समयः २. पट्टः, पट्टोलिका ३. स्वत्वम्।

इजारे (र) दार, सं. पुं. (अ.+फ़ा.) पणकर्तृ, नियमकृत्।

इज्जत, सं. स्त्री. (अ.) सं-,मानः, आदरः।

—उतारना, मु., लघू-नि,-कृ।

—रखना, मु., अपमानात् रक्ष् (भ्वा. प. से.)।

इज्या, सं. स्त्री. (सं.) यज्ञः, यागः, होमः २.पूजा, अर्चा।

इटा(टै)लिकूस, सं. पुं. (अ.) वक्रमुद्राक्षराणि (न. बहु.)

इटालियन, सं. पुं. (अं.) इटलीवासिन् २. इटलीतः, आगतः वस्त्रभेदः ३. इटलीभाषा। वि. इटलीसम्बन्धिन्।

इठलाना, क्रि. अ. (हिं. ऐंठ) सगर्वं चेष्ट् (भ्वा. आ. से.) २. हावं दृश् (प्रे.) ३. परक्लेशाय अज्ञवत् आचर् (भ्वा. प. से.)।

इठलाहट, सं. स्त्री. (हिं. इठलाना) आटोपः, गर्वः २. हावभावः।

इडा, सं. स्त्री. (सं.) भूमिः (स्त्री.) २. गौः (स्त्री.) ३. वाणी ४. स्तुतिः (स्त्री.) ५-७ यज्ञपात्रदेवता-आहुति,-विशेषः ८. अन्नं, हविस् (न.) ९. नभोदेवता १०. दुर्गा ११. पार्वती १२. कश्यपपत्नी १३. वसुदेवपत्नी १४. बुधपत्नी १५. स्वर्गः १६. नाडीभेदः।

इतना, वि. [सं. एतावत् वा हिं. ई (यह)+तना (प्रत्य.)] एतावत्, एतन्मात्र, इयत् (स्त्री., एतावती, इयती)।

इतने में, क्रि. वि. एतावन्मध्ये; अत्रान्तरे २. अस्मिन्नेव समये।

इतमीनान, सं. पुं. (अ.) तोषः सं, शान्तिः (स्त्री.)।

इतमीनानी, वि. (अ.) विश्वसनीय, विश्वास्य।

इतर्, सं. पुं. (अ. इत्र) दे. 'अतर'।

इतर, वि. (सं) अन्य, अपर, पर २. नीच ३. सामान्य, साधारण।

—इतर, क्रि. वि., परस्परं; अन्योन्यं, मिथः (सब अव्य.)।

इतराश्रय, सं. पुं. (सं.) अन्योन्याश्रयः।

इतराना, क्रि. अ. (सं. उत्तरणं >) गर्व् (भ्वा. प. से.), प्रगल्भ् (भ्वा. आ. से.) ।

इतवार, सं. पुं. (सं. आदित्यवारः) रवि आदित्य भानु,-वारः-वासरः ।

इति, अव्य. (सं.) इति शम् , इत्योम् , समाप्तिसूचकमव्ययम् । सं. स्त्री., अवसानं, अन्तः, समाप्तिः (स्त्री.) ।

—कर्तव्यता, सं. स्त्री. (सं.) कर्मानुष्ठानविधिः (पुं.) ।

—वृत्त, सं. पुं. (सं. न.) पुरावृत्तं, (पुरातनी) कथा ।

—श्री, सं. स्त्री. (सं.) अन्तः, समाप्तिः (स्त्री.)

इतिहास, सं. पुं. (सं.) पुरावृत्तं, पूर्ववृत्तान्तः, पुराभूतम् ।

इत्तफ़ाक, सं. पुं. (अ.) संघटनं-ना, संघट्टनं-ना २. सौहार्दम् , साम्मत्यम् ३. अवसरः, अवकाशः ।

इत्तला, सं. स्त्री. (अ.) विज्ञापनं, ख्यापनं, सूचना, बोधनम् ।

इत्थं, क्रि. वि. (सं.) एवं, अनेन प्रकारेण ।

इत्थंभूत, वि. (सं.) ईदृश, एतादृश ।

इत्यादि, अव्य. (सं.) आदि, प्रभृति, आद्य (सब समासान्त में; उ. पिककाकादयः) ।

इत्यादिक, वि (सं.) दे. 'इत्यादि' ।

इत्र, सं. पुं. (अ.) दे. 'अतर' ।

इधर, क्रि. वि. (सं. अत्र) इतः, एतत्स्थानं प्रति २. अत्र, इह, अस्मिन् स्थाने ।

—उधर, क्रि. वि., इतस्ततः, अत्र-तत्र, अनियतस्थले २. उभयतः, उभयत्र ३. अभितः, परितः. (दोनों के साथ द्वितीया), सर्वतः, विश्वतः, समंततः, समन्तात् ।

—उधर की बात, मु., जन,-प्रवादः-श्रुतिः (स्त्री.) ।

—की उधर लगाना, मु., कलहं उद्दी (प्रे.) ।

—की दुनिया उधर होना, मु., असंभवं भवेत् चेत् ।

इन, सर्व., (हिं. इस) एतद् , इदम् ।

—दिनों, क्रि. वि., वर्तमाने, अद्यत्वे ।

इन, सं. पुं. (सं.) सूर्यः २. स्वामिन् ।

इनकमटैक्स, सं. पुं. (अं.) आयकरः ।

इनक़लाब, सं. पुं. (अ.) बृहत्परिवर्तनं, परिवर्तः । २. राज्यविप्लवः, प्रजाक्षोभः ।

इनकार, सं. पुं. (अ.) प्रत्याख्यानं, प्रति-नि,-षेधः ।

—करना, क्रि. सं., प्रति-नि,-षिध् (भ्वा. प. वे.)

इनकिशाफ़, सं. पुं. (अ०) आविर्भावः, प्राकाश्यं, प्राकट्यम् ।

इनकिसार, सं. पुं. (अ०) विनयः, नम्रत्वं-ता ।

इनफ्लुएंजा, सं. पुं. (अं) शीतज्वरः ।

इनसान, सं. पुं. (अ.) मनुष्यः ।

इनसानियत, सं. स्त्री. (अ.) मनुष्यत्वम् २. सज्जनता, शिष्टता ।

इनहिसार, सं. पुं. (अ.) अवलंबः, आश्रयः ।

इनाम, सं. पुं. (अ. इनआम) पुरस्कारः, पारितोषिकम् ।

इनायत, सं. स्त्री. (अ.) कृपा २. उपकारः ।

इने-गिने, वि. (अनु० इन+हिं. गिनना) कतिचन, स्तोकाः २. अल्पसंख्याकाः ।

इबारत, सं. स्त्री. (अ.) लेखः २. लेखशैली ।

इमरती, सं. स्त्री. (सं० अमृतम् >) कंकणी, मिष्टान्नभेदः ।

इमली, सं. स्त्री. (सं. अम्लिका) आम्लि (ली)-का,-चिंचा, तिंतिडि (डी) का २. अम्लिका-चिंचा,-फलम् ।

इमाम, सं. पुं. (अ.) पुरोहितः २. नेतृ ।

—बाड़ा, सं. पुं. (अ.+हिं.) मुहर्रमपर्वानुष्ठानवाटः ।

इमारत, सं. स्त्री. (अ.) भवनं, गृहम् ।

इम्तहान, सं. पुं. (अ.) परीक्षा ।

इम्ला, सं. स्त्री. (अ.) श्रुतलेखः २. अक्षर-वर्ण,-विन्यासः ।

इयत्ता, सं. स्त्री. (सं.) सीमा, परिमाणम् ।

इरादा, सं. पुं. (अ.) संकल्पः, निश्चयः ।

इरावती, सं. स्त्री. (सं.) कश्यपसुता २. नदी-विशेषः (=रावी) ३. ओषधिभेदः (=पत्थरचट) ।

इर्द-गिर्द, क्रि. वि. (अनु० इर्द+फ़ा. गिर्द) परितः, अभितः, सर्वतः २. उभयतः, इतस्ततः ।

इलज़ाम, सं. पुं. (अ.) अभियोगः, दोष-, आरोपः ।

इलहाम, सं. पुं. (अ.) देववाणी ।

इला, सं. स्त्री. (सं.) पृथिवी २. पार्वती ३. वाणी ४. बुद्धिमती नारी ५. गौः (स्त्री.) ।

इलाका, सं. पुं. (अ.) प्रदेशः, भूभागः । २. संबंधः ।

इलाज, सं. पुं. (अ.) चिकित्सा, उपचारः २. औषधं, औषधिः (स्त्री.) ३. युक्तिः (स्त्री.) प्रती (ति) कारः।

इलायची, सं. स्त्री. (सं. एला) (बड़ी) एला, चंद्रवाला, बहुला, त्रिदिवा २. (छोटी) कुंतिः- त्रुटिः (स्त्री.). नंदिनी।

—दाना, सं. पुं., (हिं+फ़ा) एलाबीजम् २. कुंतिबीजम् २. तद्बीजयुक्तो मिष्टान्नभेदः।

इलाही, वि. (अ.) दैव, ईश्वरीय। सं. पुं., ईश्वरः।

इल्म, सं. पुं. (अ.) विद्या, ज्ञानम्।

इल्लत, सं. स्त्री. (अ.) रोगः २. बाधा ३. अपराधः ४. व्यसनम्।

इव, अव्य. (सं.) यथा, तुल्य, सदृश, समान,-वत्।

इशारा, सं. पुं. (अ.) संकेतः, इंगितम् २. संक्षिप्तकथनम् ३. गुप्तप्रेरणा।

इश्क, सं. पुं. (अ.) अनुरागः, प्रणयः।

इश्तहार, सं. पुं. (अ.) विज्ञापनं, विज्ञप्तिः (स्त्री.) २. घोषणा, ख्यापनम्।

इषु, सं. पुं. (सं.) बाणः, सायकः।

इषुधी, सं. पुं. (सं.-धिः) तूणीरः, तूणी।

इष्ट, वि. (सं.) वांछित, अभिलषित, आकांक्षित २. अभिप्रेत ३. पूजित। सं. पुं, (सं. न.) धर्मकृत्यं, अग्निहोत्रादिकर्माणि २. कुलदेवः ३. मित्रम् ४. अरिंडः ५. इष्टका।

—देव, सं. पुं. (सं.) कुलदेवता।

—देवता, सं. स्त्री. (सं.) आराध्यदेवः।

इष्टापूर्त, सं.पुं. (सं.न.) यज्ञखातादिकर्मन्(न.)।

इष्टि, सं. स्त्री. (सं.) अभिलाषः २. यज्ञः ३. पतंजलिकृतो व्याकरणनियमः।

इस, सर्व. (सं. एषः) एतद्, इदम्।

इसपंज, सं. पुं. (अं. स्पंज) शुषिरदेहपिंडः २. परान्नपुष्टः।

इसबगोल, सं. पुं. (फ़ा. यशबगोल) श्लक्ष्ण-स्निग्ध,-जीरकः।

इसरार, सं. पुं. (अ.) आग्रहः, दे०।

इसलाम, सं. पुं. (अ.) मोहम्मदीयधर्मः। २. ईश्वरेच्छा-,स्वीकारः।

इसलामी, मोहम्मदीयधर्मसम्बधिन्।

इसे, सर्व. (हिं. इस) १. (इसको) एतं (पुं.), एतां (स्त्री.), एतद् (न.), इमं (पुं.), इमां (स्त्री.), इदम् (न.) २. (इसके लिए) एतस्मै (पुं. न.), एतस्यै (स्त्री.) अस्मै (पुं. न.), अस्यै (स्त्री.)।

इस्तरी, सं. स्त्री. (सं. स्तरी >) स्तरणी, रजकलोहः-हम्।

इस्तिक़बाल, सं. पुं. (अ.)प्रत्युद्गमनं, प्रत्युद्व्रजनम्। स्वागतम्, सत्कारः।

इस्तिग़ासा, अभियोगः, भाषापादः।

इस्तीफ़ा, सं. पुं. (अ. इस्तैफा) त्यागपत्रम्।

इस्तेमाल, सं. पुं. (अ.) उपयोगः, व्यवहारः, प्रयोगः।

इह, क्रि. वि. (सं.) अत्र २. भूलोके। सं. पुं., भूलोकः।

—लीला, सं. स्त्री. (सं.) जीवनम्।

इहाता, सं. पुं. (अ.) वाटः-टी, प्रांगणं-नं, परिसरभूमिः (स्त्री.)।

ई

ई, देवनागरीवर्णमालायाः चतुर्थः स्वरवर्णः, ईकारः।

ईंगुर, सं. पुं. (सं. हिंगुलः-लम्) हिंगुलिः, हिंगुलु (पुं. न.), सिन्दूरम्।

ईंट, सं. स्त्री. (सं. इष्टका) इष्टिका। (पक्की) झरका, पक्वेष्टका, अमृतेष्टका २. इष्टकाकारो धातुखंडः।

—से ईंट बजाना, मु., ध्वंस्-उन्मूल्-विनश्-निपत् (सब प्रे.)।

—पत्थर, मु., नं किमपि, न किंचित्।

डेढ़ वा ढाई ईंट की मस्जिद अलग बनाना, मु., असामान्यं आचर(स्वा. प. से.)।

ईंधन, सं. पुं., दे. 'इंधन'।

ईक्षक, सं. पुं. (सं.) दर्शकः, वीक्षकः २. चिन्तकः।

ईक्षण, सं. पुं. (सं. न.) अवलोकनं, दर्शनम् २. नेत्रम् ३. विवेचनम्।

ईक्षा, सं. स्त्री. (सं.) दर्शनं, वीक्षणम्। विवेचनं, पर्यालोचनम्।

ईख, सं स्त्री. दे. 'इक्षु'।

ईज़ा, सं. स्त्री. (अ.) कष्टं, क्लेशः।

ईजाद, सं. स्त्री., दे. 'आविष्कार'।

ईठि, सं. स्त्री. (सं. इष्टिः) सख्यं, सौहार्दम् २. प्रयत्नः।

ईति, सं. स्त्री. (सं.) कृषेः षट् उपद्रवाः (यथा-अतिवृष्टिः, अनावृष्टिः, शलभाः, मूषिकाः, खगाः, शत्रोराक्रमणम्) २. विघ्नः ३. दुःखम् ।

ईथर, सं. पुं. (अं.) दक्षु (न.), आष्ट्रम् ।

ईद, सं. स्त्री. (अ.) यवनोत्सवभेदः ।

—का चाँद, मु., दिवाप्रदीपः, दुर्लभदर्शनः ।

ईदृश, क्रि. वि. (सं. न.) इत्थं अनेन प्रकारेण । वि., दे. 'ऐसा' ।

ईप्सा, सं. स्त्री. (सं.) इच्छा, अभिलाषः ।

ईप्सित, वि. (सं.) अभिलषित, इष्ट ।

ईमान, सं. पुं. (अ.) धर्मः २. सत्यम् । ३. आस्तिक्यबुद्धिः (स्त्री.) ४. श्रद्धा ।

—दार, वि. (अ.+फ़ा.) धार्मिक, न्यायवर्तिन् २. निष्कपट ३. आस्तिक ४. विश्वसनीय ।

ईरान, सं. पुं. (फ़ा.) पारसीकः ।

ईरानी, वि. पारस (—सी स्त्री.) । सं. स्त्री., पारसी, पारसीकभाषा । सं. पुं., पारसीकाः, पारसीकवासिनः (बहु.) ।

ईर्ष्या, सं. स्त्री. (सं.) मत्सरः, मात्सर्यं, परोत्कर्षासहिष्णुता, असूया ।

ईर्ष्यालु, वि. (सं.) मत्सरिन्, असूयक, ईर्ष्यिन्, परोत्कर्षासहन ।

ईश, सं. पुं. (सं.) प्रभुः, पतिः, स्वामिन् २. परमेश्वरः ३. नृपः ४. शिवः ५. 'एकादश' इति संख्या ।

ईशान, सं. पुं. (सं.) स्वामिन्, प्रभुः २. महादेवः, ३. पूर्वोत्तरदिक्कोणः ।

ईश्वर, सं. पुं. (सं.) परमेश्वरः, परमात्मन्, जगदीश्वरः, परमेशः २. स्वामिन् ३. शिवः । वि., आढ्य ।

—प्रणिधान, सं. पुं. (सं. न.) ईश्वरे श्रद्धातिशयः, स्वकर्मणामीश्वरार्पणम् ।

ईश्वरीय, वि. (सं.) दिव्य, दैव, ईशसंबंधिन् ।

ईषत्, अव्य. (सं.) अल्पं, स्तोकं, न्यूनम् ।

ईसबगोल, सं. पुं., दे. 'इसबगोल' ।

ईसवी, वि. (फ़ा.) खिस्तसंबंधिन् ।

—सन्, सं. पुं. (फ़ा+अ.) खिस्ताब्दः ।

ईसा, सं. पुं. (अ.) खिस्तः, जीसुः ।

ईसाई, वि. (फ़ा.) खिस्तानुयायिन् ।

ईहा, सं. स्त्री. (सं.) चेष्टा २. उद्योगः ३. अभिलाषः ४. लोभः (डि.) ।

उ

उ, देवनागरीवर्णमालायाः पंचमः स्वरवर्णः, उकारः ।

उंकुण, सं. पुं. (सं.) मत्कुणः, तल्पकीटः ओकणः ।

उँगली, सं. स्त्री. (सं. अंगुली), अंगुलः, अंगुरी, करशाखा (उँगलियों के क्रमशः नाम—अंगुष्ठः, तर्जनी, मध्यमा. अनामिका, कनिष्ठा) ।

—का पटाखा, सं. पुं., अंगुलीमोटनं, मुचुटी ।

उँगलियों पर नचाना, मु., यथेच्छं कृ (प्रे.) ।

—उठाना, मु., निन्द् (भ्वा. प. से.), अधिक्षिप् (तु. प. अ.) २. मनागपि अपकृ ।

कानी—, सं. स्त्री., कनिष्ठा ।

कानों में उँगली देना, मु., औदासीन्येन परवचनानि न श्रु (भ्वा. प. अ.) ।

दाँतों तले उँगली दबाना, मु., अत्यर्थं विस्मि (भ्वा. आ. अ.), चकितचकित (वि.) भू ।

पाँचों उँगलियाँ घी में होना, मु., सर्वथा समृध् (दि. प. से.) ।

उँचन, सं. स्त्री. (सं. उदंचनम् >) खट्वायाः पादभागस्था रज्जुः (स्त्री.) ।

उंचास, वि., दे. 'उनचास' ।

उंछ, सं. स्त्री. (सं. पुं.) उपात्तशस्यात् क्षेत्रात् शेषावचयनम्, उञ्छनम् ।

—वृत्ति, सं. स्त्री. (सं.) उञ्छेन जीवननिर्वाहः । वि., उञ्छशील ।

उँजियारी, उँज्यारी, सं. स्त्री. (हिं. उजारा) चन्द्रिका, ज्योत्स्ना । वि. स्त्री., चन्द्रिकाप्रकाश,-युता ।

उँजेरा, उँजेला, सं. पुं., दे. 'उजाला' ।

उँडेलना, क्रि. स. (सं. अव+हिं. डालना ?) प्र-, स्रु (प्रे.) निर्गल् (प्रे.), प्रस्यंद् (प्रे.), च्युत् (प्रे.) ।

उंदन, सं. पुं. (सं. न.) क्लेदनं, आर्द्रीकरणम् ।

उंदुर, सं. पुं. (सं. उंदरुः) मूष (षि) कः ।

उँह, अव्य. (अनु.) घृणोपेक्षानिषेधपीडादिसूचकमव्ययम्, धिक्, न, नहि, आः, हा इ० ।

उऋण, वि. (सं. उत्+ऋण) अनृण, ऋणमुक्त ।

उकड़ूँ, सं. पुं. (सं. उत्कुतोरु) उपवेशनप्रकारविशेषः ।

—बैठना, क्रि. अ., अवनतसक्थि आस् (अ. आ. से.) ।

उकताना, क्रि. अ. (सं. उत्क>) खिद्—निर्विद् (दि. आ. अ.) उद्विज् (तु. आ. अ.)।

उकताया हुआ, वि. खिन्न, निर्विण्ण।

उकसना, क्रि. अ. (सं. उत्कर्पणं>) सं-वि,-क्षुभ् (दि. प. से.), उत्-सं.,-तप् (दि. आ. अ.) २. उद्गम्, उन्नम् (भ्वा. प. अ.) ३. प्ररुह् (भ्वा. प. अ.) ४. विश्लिष् (दि. प. अ.)। सं. पुं., संक्षोभः, संतापः, उद्गमः, प्ररोहः, विश्लेषः।

उकसाना, क्रि. स. (हिं. उकसना) उत्तिज्, उद्दीप्, प्रोत्सह्, सं-वि,-क्षुभ्, प्रचुद् (सब प्रे.) २. उत्था-उद्गम् (प्रे.) ३. अपसृ (प्रे.)। सं. पुं., उत्तेजनं, उद्दीपनं, उत्थापनं, अपसारणम्।

उक्त, वि. (सं.) कथित, उदित, भाषित, लपित, व्याहृत, उदीरित।

उक्ति, सं. स्त्री. (सं.) कथनं, वचनम् २. अद्भुत-वाक्यम् ३. संमतिः (स्त्री.)।

उक्थ, सं. पुं. (सं. न.) सामवेदः २. स्तोत्रं ३. प्राणः।

उक्षा, सं. पुं. (सं. उक्षन्) वृषभः २. सूर्यः।

उखड़ना, क्रि. अ. (सं. उत्खननम्) उन्मूल्, उत्खन्, समूलं उद्वह् (सब कर्म.) २. (दृढ-स्थितेः) पृथक् भू ३. संधेः चल् (भ्वा. प. से.) वा त्रुट् (दि. प. से.) ४. स्वर-ताल,-च्युत (वि.) भू (संगीत) ५. अपसृ (भ्वा. प. अ.), विद्रु (भ्वा. प. अ.) ६. सीवनं त्रुट् सं. पुं., उन्मूलनं, उत्खननं; संधेश्चलनं; स्वर-ताल,-भंग; अपसरणं, सीवनत्रोटनम्।

दम—, मु., स्वरभंगः २. प्राणनिष्क्रमणम्।

पैर—, मु., विद्रवणं, पलायनम्।

उखड़वाना, क्रि. प्रे. (हिं. उखड़ना) अन्येन उन्मूल्—उत्पट्—उत्खन्—व्यपरुह्—उच्छिद् (सब प्रे.)।

उखली, सं. स्त्री. (सं. उलूखलम्) उदूखलम्।

उखा, सं. स्त्री., (सं.) स्थाली. दे. 'देग'।

उखाड़, सं. स्त्री. (हिं. उखाड़ना) उन्मूलनं, उत्पाटनं, उत्खननम्।

उखाड़ना, क्रि. स. (हिं. उखड़ना) उन्मूल्—उत्पट्—उत्खन्—व्यपरुह्—उच्छिद् (सब प्रे.) २. सन्धि चल् (प्रे.) ३. वि-परा,-जि (भ्वा. आ. अ.) ४. अपसृ (प्रे.) ५. विनश् (प्रे.)

गड़े मुर्दे—मु. विस्मृतकलहान् पुनः उद्दीप् (प्रे.)।

उगना, क्रि. अ. (सं. उद्गमनम्) उद्गम् (भ्वा. प. अ.), उदि (= उत्+इ; अ. प. अ.), उदय् (= उत्+अय्, भ्वा. आ. से.) २. स्फुट् (तु. प. से.), उद्भिद् (कर्म.) प्ररुह् (भ्वा. प. अ.) ३. उत्पद् (दि. आ. अ.), जन् (दि. आ. से.)। सं. पुं. उद्गमः, उदयः, उद्भेदः, प्ररोहः, प्र-, स्फुटनम्, उत्पत्तिः (स्त्री.)।

उगा हुआ, वि., उद्गत, उदित; उद्भिन्न, प्ररूढ; प्र-, स्फुटित, उत्पन्न।

उगलना, क्रि. स. (सं. उद्गिरणम्) उद्गॄ (तु. प. से.), वम् (भ्वा. प. से.), छर्द् (चु.)। २. अन्यायप्राप्तधनं प्रतिदा (जु. उ. अ.) ३. गोपनीयं प्रकाश् (प्रे.) ४. बहिष्कृ (तं. उ. अ.)।

ज़हर—, मु., अरुंतुदं वचनं वद् (भ्वा. प. से.)

उगलवाना, क्रि. प्रे. (हिं. उगलना) वम्-उद्गॄ (प्रे.) २. अपराधं स्वीकृ (प्रे.) ३. अन्यालब्धं धनं प्रतिदा (प्रे. प्रतिदापयति)।

उगाना, क्रि. स., (हिं. उगना) प्ररुह् (प्रे.), (अन्नादिकं) उत्पद् (प्रे.) ३. प्रहाराय शस्त्रादिकं उन्नम् (प्रे.)।

उगार, सं. पुं. (सं. उद्गार>) निपीडित-निर्गलित-निर्गालित्,-जलम्।

उगाल, सं. पुं. (सं. उद्गारः) मुखस्रावः, लाला २. कफः, श्लेष्मन् (पुं.) ३. जीर्ण-वस्त्रम्।

—दान, सं. पुं., प्रतिग्राहः, पतद्ग्रहः।

उगालना, क्रि. स. (हिं. उगलना) उद्गॄ (तु. प. से.) २. रोमंथायते (ना. धा.)।

उगाहना, क्रि. स. (सं. उद्ग्रहणम्>) (करं ऋणं वा) समाहृ (भ्वा. उ. अ.), संभृ (जु. उ. अ.), अव-वि-सं-नि,-चि (स्वा. उ. अ.)।

उगाही, सं. स्त्री. (हिं. उगाहना) (धनस्य) समाहारः, संभरणं, संग्रहणं, समुच्चयनम् २. संभृतं धनम् ३. भूमिकरः ४. ऋणादिकस्य अंशशः संग्रहणम् ५. कुसीदं, वार्द्धुष्यवृत्तिः (स्त्री.)।

उग्र, वि. (सं.) प्रचंड, तीव्र, प्रबल, घोर, रौद्र। सं. पुं. (सं.) शिवः २. विष्णुः ३. सूर्यः।

उग्रता, सं. स्त्री. (सं.) प्रचण्डता, भयंकरता, निर्दयता, उद्दण्डता ।
उग्रसेन, सं. पुं. (सं.) कंसजनकः ।
उग्रा, सं. स्त्री. (सं.) दुर्गा, महाकाली २. कर्कशा नारी ३. वचा ४. छिक्किकौषधम् ।
उघड़ना, क्रि. अ. (सं. उद्घटनम्) उद्घट् (कर्म.) अपा-वि,-वृ (कर्म.) २. नग्नी-विवस्त्री,-भू ३. प्रकाश् (भ्वा. आ. से.) ४. रहस्यं भिद् (कर्म.) ।
उघाड़ना, क्रि. स. (हिं. उघड़ना) उद्घट् (प्रे.) अपा-वि,-वृ (स्वा. उ. से.) २. नग्नी-विवस्त्री,-कृ ३. प्रकट् (प्रे.) ४. रहस्यं भिद् (प्रे.) ।
उघाड़ा, वि. (हिं. उघाड़ना) विवस्त्र, नग्न २. प्रत्यक्ष ३. प्रकाशित ।
उचकन, सं. पुं. (हिं. उचकना) आधारः, अवलंबः, पात्रादिकस्याधारभूतः प्रस्तरखंडः ।
—शार, —सारंग, —सार, सं. पुं. (सं.) मृगभेदः।

कृष्णता, सं. स्त्री. (सं.) कृष्णिमन् (पुं.), कालिमन् (पुं.), नीलत्वं, श्यामत्वं।

कृष्णा, सं. स्त्री. (सं.) द्रौपदी, पांचाली २. कालीदेवी ३. दक्षिणदेशे नदीविशेषः ४. कृष्णजीरकः ५. कृष्णद्राक्षा ६. नयनतारा।

कृष्णाष्टमी, सं. स्त्री. (सं.) श्रीकृष्णजन्मदिवसः, जन्माष्टमी, भाद्रमासस्य कृष्णपक्षस्याष्टमी तिथिः।

कृष्णी, सं. स्त्री. (सं.) कृष्ण,-रजनी-रात्रिः (स्त्री.)।

कृष्य, वि. (सं.) कर्षणीय, कृषियोग्य।

केंचुआ, सं. पुं. (सं. किंचुलुकः) महीलता, गंडूपदः, किञ्चिलिकः।

केंचुल, सं. स्त्री. (सं. कंचुकः) निर्मोकः, अहि-भुजंग-सर्प,-त्वच् (स्त्री.)।

केंचुली, वि. (हिं. केंचुल) कंचुक,-सदृश-तुल्य। सं. स्त्री. दे. 'केंचुल'।

केंद्र, सं. पुं. (सं. न.) मध्यः-ध्यं, मध्यभागः २. उदरं, गर्भः ३. मुख्य-प्रमुख,-स्थानम्।

केंद्री, वि. (सं. केन्द्रं >) मध्यम, मध्यस्थ, मध्य,-गत-वर्तिन्, मध्य, केन्द्रीय।

—करण, सं. पुं. (सं. न.) मध्यवर्तिनं कृ:, एकतंत्री कृ।

केंसर, सं. पुं. (अं.) कर्कट-कर्कटिका,-रोगः, कर्कस्फोटः।

के, प्रत्य., (हिं. का) दे. 'का'।

केकड़ा, सं. पुं. (सं. कर्कटः) कर्कटकः, कुलीरः।

केकय, सं. पुं. (सं.) १. वर्तमानकाश्मीरांतर्गतप्रदेशविशेषः २. दशरथश्वशुरः।

केकयी, सं. स्त्री. (सं. कैकेयी)।

केका, सं. स्त्री. (सं.) मयूरवाणी।

केकी, सं. पुं. (सं.-किन्) मयूरः, शिखिन्।

केत, सं. पुं. (सं.) भवनं, गृहं २. स्थानं ३. ध्वजः, केतनं ४. बुद्धिः (स्त्री.) ५. संकल्प ६. मंत्रणा ७. अन्नम्।

केतक[1], सं. पुं. (सं.) केतकीवृक्षः २. तत्पुष्पं।

केतक[2], वि. (सं. कति+एक) दे. 'कितने', 'कितना', बहुत'।

केतकी, सं. स्त्री. (सं.) सूचीपुष्पः, केतकः, क्रकचच्छदः, विफला, क्रकचा, गंधपुष्पा।

केतन, सं. पुं. (सं. न.) भवनं, गृहम् २. स्थानं ३. चिन्ह ४. ध्वजः ५. निमंत्रणं, आह्वानम्।

केतली, सं. स्त्री. (अं. केटल) उखा, स्थाली, लौहा, लौहभूः (स्त्री.)।

केतित, वि. (सं.) आमंत्रित, आहूत, आकारित २. जनाकीर्ण, लोकाध्युषित।

केतु, सं. पुं. (सं.) ग्रहविशेषः २. उल्का, उत्पातः ३. ज्ञानं ४. दीप्तिः (स्त्री.) ५. ध्वजः ६. चिह्नम् ७. राक्षसविशेषस्य कबंधः।

—तारा, सं. पुं. (सं. स्त्री.) धूमकेतुः (पुं.), उल्का।

—मान्, वि. (सं.-मत्) तेजस्विन् २. ध्वजिन् ३. बुधः।

—माल, सं. पुं. (सं. न.) जंबुद्वीपस्य नवखंडांतर्गतखंडविशेषः।

—रत्न, सं. पुं. (सं. न.) वैदूर्यमणिः (पुं.)।

केथीटर, सं. पुं. (अं.) मूत्रशलाका।

केलसियम, सं. पुं. (अं.) चूर्णातु (न.), खटिकम्।

केदार, सं. पुं. (सं.) व्रीहिक्षेत्रं २. हिमालये

तीर्थविशेषः ३. आलवालं ४. मेघरागपुत्रः ५. सपुष्पः क्षेत्रभागः।

केन, सं. पुं. (सं., 'किं' का तृतीया एकवचन) उपनिषद्विशेषः।

केमरा, सं. पुं. (अं.) छायाचित्रपेटिका।

केमिस्ट्री, सं. स्त्री. (अं.) रसायनम्।

केयूर, सं. पुं. (सं. पुं. न.) अंगदः-दं, वलयः-यं।

केराना, सं. पुं. दे. 'किराना'।

केराना, सं. पुं. (अं. क्रिश्चियन >) भारोपीयः २. लेखकः, कायस्थः, लिपिकारः।

केराया, सं. पुं. दे. 'किराया'।

किराये की गाड़ी, सं. स्त्री., पण्य-साधारण,-वाहनं-रथः।

केला, सं. पुं. (सं. कदलः), (वृक्ष) कदली, रंभा, मोचा, काष्ठीला, सकृत्फला, गुच्छफला, निःसारा, ऊरुस्तभा, मो(रो, लो)चकः, वारणवल्लभा। (फल) कदलीफलं, मोचं इ.।

केलि, सं. स्त्री. (सं.) क्रीडा, खेला २. रतिः (स्त्री.), मैथुनं ३. नर्मन् (न.), परि (री) हासः ४. पृथिवी।

—**कला**, सं. स्त्री. शारदावीणा २. रतिविज्ञानं।

केलोरी, सं. स्त्री. (अं.) उपम्।

केवट, सं. पुं. (सं. केवतः) नाविकः, पोतवाहः, औडुपिकः २. धीवरः, कैवर्तः, जालिकः, मत्स्याजीवः।

केवटी, सं. स्त्री. (हिं. केवट) मिश्रद्विद्वलं, वैदलसंकरः।

केवड़ा, सं. पुं. (सं. केविका) केवी, कविका, भृङ्गारिः (पुं.), महागंधा, नृपवल्लभा २. केवीपुष्पं इ. ३. महागंधासवः।

केवल, वि. (सं.) एक, अद्वितीय २. विशुद्ध ३. श्रेष्ठ। क्रि. वि.,-एव, केवलं,-मात्र (समासांत में) २. सामस्त्येन, संपूर्णतया।

केवलात्मा, सं. पुं. (सं.-त्मन्) परमेश्वरः, जगदीश्वरः २. शुद्धसत्त्वमनुष्यः, पूतात्मन्।

केवली, सं. पुं. (सं.-लिन्) मोक्षाधिकारी साधुः २. तीर्थंकरः (जैन.)।

केवाँच, सं. स्त्री. (सं. कच्छु >), (लता) कपिकच्छूः (स्त्री.) स्व-आत्म-,गुप्ता, कंडूरा, मर्कटी २. (फली)कपिकच्छू,-बीजकोशः-शिंबी।

केवाड़, सं. पुं., दे. 'किवाड़'।

केश, सं. पुं. (सं.) वालः, कचः, कुन्तलः, चिकुरः, शिरोरुहः, शिरसिजः, मूर्द्धजः, वृजिनः २. किरणः ३. वरुणः ४. विष्णुः ५. सूर्यः ६. विश्वं (७-८) अश्व-सिंह,-स्कंधकेशः।

—**कर्म** सं. पुं., केशकर्मन् (न.), केश,-विन्यासः-प्रसाधनम्।

—**कलाप,-पाश**, सं. पुं. (सं.) प्रसाधितकेशाः, अलकः, कुरलः।

—**प्रसाधनी**, सं. स्त्री. }
—**मार्जक**, सं. पुं. } कंकतिका, दे. 'कंघी'।

—**विन्यास**, सं. पुं. (सं.) दे. 'केशकर्म'।

केशक, वि. (सं.) केशकर्म-केशविन्यास,-कुशल, केशप्रसाधक।

केशरी, सं. पुं. (सं.-रिन्) सिंहः, मृगेन्द्रः २. घोटकः (३-४) पुन्नाग-नागकेशर,-वृक्षः।

केशाकेशी, सं. स्त्री. [सं.-शि(न.)] अन्योऽन्यकेशग्रहणपूर्वकप्रवृत्तं युद्धं।

केशिनी, सं. स्त्री. (सं.) सुकेशी-शा, सुकचीचा।

केशी, सं. पुं. (सं. केशिन्) सिंहः २. घोटकः २. सुकेशः (पुरुषः) ३. राक्षसविशेषः।

केस¹, सं. पुं., दे. 'केश'।

केस², सं. पुं. (अं.) व्यवहारपदं, कार्यं २. दुर्घटना ३. कोषः, पुटः।

केसर, सं. पुं. (सं. पुं. न.) काश्मीर्यं, काश्मीरजं, कुंकुमं, अग्निशिखं, वरं, वाह्नि (ह्री) कं, पीतनं, गौरं, रक्तं, लोहितचन्दनं, वर्ण्यं, संकोचं, धीरं, घस्रं, घुसृणं, घोरम् २. नागकेशरवृक्षः ३. अश्व-सिंह,-स्कन्धवालाः ४. स्वर्गः।

केसराचल, सं. पुं. (सं.) मेरुः, सुमेरुः, हेमाद्रिः।

केसरिया, वि. (सं. केसरं >) घनपीत, कुंकुमवर्ण।

—**बाना**, सं. पुं., कुंकुमवर्ण-घनपीत,-वेशः-वेषः।

केसरी, सं. पुं. (सं.-रिन्) दे. 'केशरी'।

केसू, सं. पुं. (सं. किंशुकः) पलाशः, रक्तपुष्पकः।

केहा, सं. पुं. (सं. केका >) मयूरः, दे. 'मोर'।

केहरी, सं. पुं. (सं. केशरिन्) सिंहः २. अश्वः।

कैंची, सं. स्त्री. (तु.) दे. 'कतरनी'।

—**करना**, मु., अग्राणि निकृत् (तु. प. से.)-लू (क्र्. उ. से.)-अवच्छिद् (रु. प. अ.)।

—सी जबान चलना, मु., शीघ्रं-सत्वरं-वेगेन भद् (भ्वा. प. से.)-भाष् (भ्वा. आ. से.)।
कैंचुली, सं- स्त्री., दे. 'केंचुली'।
कै, वि. (सं. कति) दे. 'कितने', 'कितनी'। अव्य., वा, अथवा, यद्वा २. अन्यतर।
—दफा,—वार,—वेर, कतिकृत्वः (अव्य.), कतिवारं।
कैंप, सं. पुं. (अ.) दे. 'कंपू'।
कै, सं. स्त्री. (अं.) वांतं, वमनोद्गारः २. वमनं, वमः, वमिः (स्त्री.), प्रच्छर्दिका, वमथुः (पुं.)।
—आना, क्रि. अ., वमनेच्छयां पीड् (कर्म.), विवमिषति (सन्नन्त.)।
—करना, क्रि. स. उद्,-वम् (भ्वा. प. से.) छर्द् (चु.), उत्क्षिप् (तु. प. अ.), उद्गॄ (तु. प. से.)।
कैतव, सं. पुं. (सं. न.) छलं, कपटं, वंचनं २. द्यूतं ३. वैदूर्यमणिः (पुं.) ४. धुस्तूरः। वि., छलिन्, कापटिक २. शठ, धूर्त्त ३. अक्ष-देविन्, कितव, (-वी. स्त्री.)।
कैथ-था, सं. पुं. (सं. कपित्थः) दधित्थः, मन्मथः, दधि-पुष्प-कुच-गन्ध-दन्त,-फलः।
कैद, सं. स्त्री. (अ.) बन्धनं, निग्रहः, निरोधः २. कारा,-निरोधः-बन्धनं-प्रवेशः-वासः, बंदी-करणं, प्रग्रहः, आसेधः ३. नियमः, समयः, प्रतिज्ञा, संकेतः।
—करना, क्रि. स., कारागृहे निक्षिप् (तु. प. अ.)-बन्ध् (क्र्. प. अ.)-निरुध् (रु. उ. अ.), बन्दीग्राहं ग्रह् (क्र. प. से.), बंदीकृ।
—होना, क्रि. अ., करायां निक्षिप्-बन्ध् निरुध्-वन्दीकृ (सब कर्म.)।
—खाना, सं. पुं. (फ़ा.) कारा, कारागारः-रं, कारावासः, बन्दि,-शाला-गृहं, बन्धनालयः, चारः, चारकः, गुप्तिस्थानं।
—तनहाई, सं. स्त्री. (अ+फ़ा) एकांत-विजन-निभृत,-आसेधः।
—महज, सं. स्त्री. (अ.) सरल सुगम-,प्रग्रहः-आसेधः।
—सख्त, सं. स्त्री. (अ. + फ़ा.) विषम-दुःसह,-आसेधः, इ.।
कैदी, सं. पुं. (अ.) बंदी-दिः (स्त्री.), बन्दिन् (पुं.), कारागुप्तः, ग्रहकः, प्रग्रहः, रुद्धः।
कैप, सं. पुं. (अं.) दे. 'टोपी'।

कैपिटल, पुं. (अं.) मूल-धनं-द्रव्यम्, २. धन,-पुंजः-राशिः, पुंजिः (स्त्री.) ३. राजधानी।
कैपिटलिस्ट, सं. पुं. (अं.) धनिकः, कोटीश्वरः, पुंजिपतिः।
कैबिनेट, सं. पुं. (अं.) मंत्रिमंडलम् २. कोष्ठकः ३. मंत्रणागृहम्।
कैफ़ियत, सं. स्त्री. (अ.) अवस्था, स्थितिः (स्त्री.), दशा २, विवरणं, वर्णनं ३. आश्चर्यो-त्पादकघटना।
कैरव, सं. पुं. (सं. न.) कुमुदं २. सितोत्पलं, श्वेतकमलं। (सं. पुं.) कितवः २. शत्रुः।
कैरी, सं. स्त्री. (देश.) दे. 'अँबिया'।
—आंख, सं. स्त्री., कपिल-पिंगल,-नयनं-नेत्रं।
कैलास, सं. पुं. (सं.) पर्वतविशेषः, शिव-कुबेर,-निवासः।
—नाथ, पति, सं. पुं. (सं.) शिवः।
—वास, सं. पुं. (सं.) मृत्युः।
कैवर्त, सं. पुं. (सं.) दे. 'केवट'।
कैवल्य, सं. पुं. (सं. न.) एकत्वं, असंसृष्टता २. अपवर्गः, मुक्तिः (स्त्री.) ३. उपनिषद्विशेषः।
कैसर, सं. पुं. (लै० सीज़र) सम्राज्, राजाधि-राजः, अधिराजः, अधीश्वरः।
कैसा, वि. (सं. कीदृश) कीदृक्ष, किंरूप, किंविध, किमाकार।
कैसी, वि. स्त्री. (सं. कीदृशी) कीदृक्षी, किंरूपा, किमाकारा, किंविधा।
कैसे, क्रि. वि. (हिं. कैसा) कथं, केन प्रकारेण, कया रीत्या।
कोंकण, सं. पुं. (सं.) दक्षिणदिशि प्रान्तविशेषः।
कोंपल, सं. स्त्री. (सं. कोमल >) पल्लवः-वं, अंकुरः, प्ररोहः, किस (श) लयः-यं, उद्भिद् (पुं.), उद्भिज्जः।
—निकलना या फूटना, क्रि. अ., प्ररुह् (भ्वा. प. अ.), स्फुट् (तु. प. से.) उद्भिद् (कर्म.) फुल्ल्-विकस् (भ्वा. प. से.)।
को, प्रत्य. (यह कर्म और संप्रदान कारक का प्रत्यय है, इसका अनुवाद प्रायः द्वितीया और चतुर्थी के रूपों से होता है। (राम को कह = उ., रामं ब्रूहि, ब्राह्मण को दे = विप्राय देहि)।
कोआ, सं. पुं. (सं. कोशः-षः), (पट्टकीट-) कोशः-षः २. दे. 'कोया'। ३. पनसखंडः-डं ४. दे. 'महुआ' (फल)।

कोई, सर्व (सं. कोऽपि) कश्चन, कश्चित् (पुं.), का,-अपि-चन-चित् (स्त्री.) किं,-अपि-चन-चित् (न.)।

—कोई, वि. स्तोकाः, कतिपयाः, परिमिताः।

—चीज़, सं. स्त्री., किमपि (वस्तु)।

—दम में, क्रि. वि., सपद्येव, तत्काले, झटिति, द्राक् (सब अव्य.)।

—दम का मेहमान, सं. पुं., मुमूर्षु, आसन्न,-मरण-मृत्यु, मरणाभिमुख, मरणोन्मुख।

—न कोई, एष वा परो वा, यः कश्चिदपि, कश्चित्तु।

—नहीं, न कोपि-कापि किंचिदपि इ.।

कोक[1], सं. पुं. (सं.) चक्रवाकः, द्वन्द्वचरः, रथांगः, चक्रः २. मंडूकः ३. विष्णुः (पुं.) ४. वृकः ५. खजरीवृक्षः। [कोकी (स्त्री.), चक्रवाकी, रथांगी इ.]।

कोक[2], सं. पुं. (अं.) न्यङ्गारः।

—शास्त्र, सं. पुं. (सं. न.) कोकपंडितरचितो रतिविज्ञानग्रन्थः।

साफ़्ट-, सं. पुं., मृदुन्यङ्गारः।

हार्ड-, सं. पुं. दृढन्यङ्गारः।

कोकनद, सं. पुं. (सं. न.) रक्तोत्पलं २. रक्त-कुमुदम्।

कोकनी, वि. (देश.) क्षुद्र, लघु।

कोका, सं. पुं. (अं.) वृक्षभेदः।

कोका, सं. पुं. स्त्री. (तु.) धात्री-उपमातृ,-पुत्रः-पुत्री, धात्रेयः-यी।

—बेली,-बेरी, सं. स्त्री. (सं. कोकनदं + हिं. बेला) नीलकुमुदं।

कोकाह, सं. पुं. (सं.) कर्कः, श्वेतघोटकः।

कोकिल, सं. स्त्री. (सं. पुं.) पिकः, पर,-भृतः-पुष्टः, कालः, गन्धर्वः, मधुगायनः, कलकंठः, कुहूरवः, काकलीरवः, वसन्तदूतः, वनप्रियः, ताम्राक्षः। दे. 'कोकिला'।

—बैनी, वि. स्त्री. (सं.+हिं.) सुकंठी, मधुर-भाषिणी।

कोकिला, सं. स्त्री. (सं.) मदनशलाका, पर,-भृता-पुष्टा, वनप्रिया, कलकंठी, ताम्राक्षी, वसंत-दूती।

कोकिलावास, सं. पुं. (सं.) कोकिलोत्सवः, आम्रः, रसालः।

कोकी, सं. स्त्री. (सं.) चक्रवाकी, चक्री, रथांगनाम्नी।

कोकीन, सं. स्त्री. (अं. कोकेन) कोकापत्र-निर्मितमादकपदार्थः * कोकीनम्।

कोको, सं. स्त्री. (अनु.) काकः, वायसः २. काल्पनिकभयहेतुः (पुं.)।

कोख, सं. स्त्री. (सं. कुक्षिः) गर्भाशयः, गर्भ-कोशः-षः।

—जली,-बन्द, वि., वंध्या, सन्तानहीना।

—की आँच, सं. स्त्री., अपत्यप्रेमन् (पुं.), वात्सल्यं, सन्ततिस्नेहः।

—मारी जाना, मु., च्युतगर्भा भू, गर्भः पत् (भ्वा. प. से.) च्यु (भ्वा. आ. अ.)।

—खुलना, मु. सन्तानः उत्पद् (दि. आ. अ.)।

कोचना, क्रि. स., दे. 'चुभाना', 'धँसाना'।

कोचबकस, सं. पुं. (अं. कोचबॉक्स) सूतासनं।

कोचवान, सं. पुं. (अं. कोच>) सारथिः (पुं.), सूतः, वाहकः।

कोजागर, सं. पुं. (सं.) आश्विनी-द्यूत,-पूर्णिमा, कौमुदी, शारदी, शरत्पर्वन् (न.)।

कोट[1], सं. पुं. (सं.) दुर्गं २. प्राचीरं ३. राज-प्रासादः।

—वाल, सं. पुं., कोटपालः, दुर्गाध्यक्षः।

कोट[2], सं. पुं. (अं.) प्रावारः-रकः, कंचुकः।

कोटर, सं. पुं. (सं. पुं. न.) निष्कुहः, तरु-विवरं, प्रान्तरं २. कोटरावणं, रक्षार्थं कृत्रि-मवनं।

कोटि, सं. स्त्री. (सं.) शतलक्षसंख्या, दे. 'करोड़' २. धनुरग्रं ३. अस्त्रादेः कोणः ४. वर्गः, श्रेणी।

कोटिक, वि. (सं. कोटिः स्त्री.) कोटी-टिः (स्त्री.) लक्षशतकं २. असंख्य, अगणित। सं. स्त्री., उक्ता संख्या तदंकाश्च।

कोटिशः, क्रि. वि. (सं.) बहुधा,-बहुधा २. अनेक-कोटिवारं। वि., बहुसंख्याक, अनेक।

कोटीश्वर, सं. पुं. (सं.) कोट्यधीशः, अति-धनाढ्यः।

कोठरी-ड़ी, सं. स्त्री. (हिं. कोठा) लघु-क्षुद्र,-कोष्ठः-शाला, अन्तःकोष्ठः, गर्भागारं।

कोठा, सं. पुं. (सं. कोष्ठः) गृहं, सदनं, आ-नि,-वासः, वेश्मन्-सद्मन् (न.) २. प्र-,कोष्ठः, शाला ३. पण्यागारं, पण्याधानं ४. धान्यागार, कुशूलः

कोसों दूर, क्रि. वि., अति,-दूरं-दूरे-दूरतः, सुदूरं ।

कोसों दूर रहना, मु., सुदूरं-पृथक् स्था (भ्वा. प. अ.)।

कोसना, क्रि. स., (सं. क्रोशनं >) आक्रुश् (भ्वा. प. अ.), गर्ह् (भ्वा. आ. से.), अभिशंस् (भ्वा. प. से.), शप् (भ्वा. उ. अ.)।

पानी पी पी कर कोसना, मु., अत्यतं आक्रुश् इ. ।

कोह, सं. पुं. (फ़ा.) पर्वतः, गिरिः ।

—नूर, सं. पुं. (फ़ा + अ.) हीरकविशेषः ।

कोहनी, सं. स्त्री., दे 'कुहनी' ।

कोहरा, सं. पुं., दे. 'कुहरा' ।

कोहान, सं. पुं. (फ़ा.) उष्ट्र-क्रमेलक,-ककुद्-ककुदम् ।

कोहिस्तान, सं. पुं. (फ़ा.) पर्वतीयप्रदेशः, शैली स्थली ।

कोहिस्तानी, वि. (फ़ा.) पर्वतीय, शैल (-ली स्त्री.), पर्वतमय (-यी स्त्री.), नगप्राय, सपर्वत । सं. पुं., पर्वत-गिरि-अद्रि,-वासिन् , शैलाटः ।

कौंच, सं. स्त्री. [सं. कच्छुः (स्त्री.) >] रोमवल्ली, शूकशिंबी, वृष्या, २. तस्याः बीजकोषः ।

कौंची, सं. स्त्री. (सं. कंचिका) वेणुशाखा, कुंचिका।

कौंध, सं. स्त्री. (हिं कौंधना >) विद्युद्विलासः, तडिद्द्युतिः, (स्त्री.) चंचलास्फुरणं ।

कौंधना, क्रि. अ. (सं. कननं = चमकना + अंध >) विद्युत् (भ्वा. आ. से.) विद्युत् विलस् (भ्वा. प. से.),-सहसा प्रकाश् (भ्वा.-आ. से.)-स्फुर् (तु. प. से.)।

कौंधा, सं. पुं., दे. 'कौंध'।

कौंसिल, सं. स्त्री. (अं.) सभा, संसद्, सदस् (सब स्त्री.) ।

कौआ, सं. पुं. दे. 'कौवा' ।

कौच, सं. पुं. (अं.) खट्टिका, सन्दी, निषद्या, पेचकः ।

कौटिल्य, सं. पुं. (सं.) चाणक्यः, चंद्रगुप्तमौर्यस्य महामंत्रिन् । (सं. न.) वक्रता, कुटिलता २. दुष्टता, छलं, कपटम् ।

कौटुंबिक, वि. (सं.) कुटुंब-गृहजन-परिवार,-संबंधिन्-विषयक, कौल, पारिवारिक, गृह्य ।

कौड़ा, सं. पुं. (सं. कपर्दकः) वराटः, बालक्रीडकः ।

कौड़ी, सं. स्त्री. (सं. कपर्दिका) वराटिका, काकिनी-णी । २. द्रव्यं, धनं ३. अक्षि-नयन,-गोलः-गोलं ४. मांसग्रंथिः (पुं.) ५. कृपाणाग्रं ६. अधीननृपतिभ्यो ग्राह्यः करः ७. उरोऽस्थि (न.) ।

(दो)—का,—काम का नहीं, मु. अल्पमूल्य, तृणप्राय, निरर्थक, असार ।

—भर, मु., अत्यल्प, किंचिद् , स्वल्प ।

——को मुहताज या तंग होना, मु., अकिंचनत्वं, अत्यंतदारिद्र्यं, नितान्तनिर्धनता ।

——चुकाना, मु., ऋणं निःशेषं परिशुध् (प्रे.)-अपाकृ ।

——जोड़ना, मु., धनं संचि (स्वा. प. अ.)-संग्रह् (क्र्. प. से.) ।

कानी या फूटी कौड़ी, मु. अत्यल्प,-वित्तं-द्रव्यम् ।

कौडियों के मोल, मु., अत्यल्पमूल्येन ।

कौतुक, सं. पुं. (सं. न.) कु(कौ)तूहलं, कुतुकं, जिज्ञासा २. आश्चर्यं ३. विनोदः, नर्मन् (न.) ४. हर्षः ५. खेला, क्रीडा ।

कौतुकी, वि. (सं.-किन्) सलील, सोल्लास, क्रीडाप्रिय, विनोदप्रिय, नर्मगर्भ ।

कौतूहल, सं. पुं., दे. 'कुतूहल' ।

कौन, सर्व. (सं. को नु) 'किं' के तीनों लिंगों के रूप (कः, का, किं इ.) ।

—कौन, कः कः इ. । दो में से—,कतरः, कतरा, कतरत् (पुं. सं. न.) बहुतों में से—, कतमः, कतमा, कतमत् (पुं. स्त्री. न.) ।

कौप, वि. (सं.) कूप-अवट,-विषयक-सम्बन्धिन् ।

कौपीन, सं. पुं. (सं. न.) मलमल्लकः, धटी, धटिका; कच्छा, कच्छटिका, २. गुदलिंगे, गुह्यांगानि ३. पापं ४. अकार्यम् ।

कौबेरी, सं. स्त्री. (सं.) उत्तरदिशा, उदीची ।

क़ौम, सं. स्त्री. (अ.) वर्णः, जातिः (स्त्री.) २. कुलं, वंशः ३. देशः, राष्ट्रं, विषयः ।

कौमार, सं. पुं. (सं. न.) कुमारावस्था (५ अथवा १६ वर्ष पर्यंत), बालत्वम् ।

कौमारिक, वि. (सं.) कुमार,-विषयक-सम्बन्धिन् । सं. पुं., कन्यानामेव जनकः ।

कौमारिकेय, सं. पुं. (सं.) अनूढा-कुमारी-कन्या,-पुत्रः-तनयः ।

क़ौमियत, सं. स्त्री. (अ.) राष्ट्रियता, जातीयता ।

क़ौमी, वि. (अ.) राष्ट्रि(ष्ट्री)य, देशीय, जातीय ।

—हुकूमत, सं. स्त्री., राष्ट्रियशासनं, स्वराज्यं ।

कौमुदी, सं. स्त्री. (सं.) ज्योत्स्ना, दे. 'चाँदनी' ।

कौर, सं. पुं. (सं. कवलः) ग्रासः, गुडकः, पिंडः ।

कौरव, सं. पुं. (सं.) कुरुराजसंतानः ।

—पति, सं. पुं., दुर्योधनः ।

कौल, वि. (सं.) दे. 'कुलीन' ।

कौल, सं. पुं., दे. 'कौर' ।

क़ौल, सं. पुं. (अ.) प्रतिज्ञा, समयः २. उक्तिः (स्त्री.) ।

कौवा, सं. पुं. (सं. काकः) वायसः, ध्वांक्षः, मौकुलिः (पुं.), एकाक्षः उलूकारिः (पुं.), करटः, कुणः, द्रोणः २. अलिजिह्वा, शुंडिका, लंबिका ३. धूर्तः ४. वंचकः ।

—परी, सं. स्त्री., अतिकुरूपिणी नारी ।

—उठाना, मु. वालशुंडिकां उत्स्था (प्रे.) ।

कौशल, सं. पुं. (सं. न.) चातुर्यं, दाक्ष्यं, नैपुण्यं २. कुशलं, मंगलम् ।

कौशलिक, सं. पुं. (सं. न.) उत्कोचः, ढौकनं लम्वा ।

कौशिक, सं. पुं. (सं.) इन्द्रः २. गाधिनृपः ३. विश्वामित्रः ४. कोषाध्यक्षः ५. कोशकारः ६. उलूकः ७. नकुलः ८. कौशेयवस्त्रं ९. मज्जा १०. उपपुराणविशेषः ।

कौशे(षे)य, वि. (सं.) कौश(ष), कौशि(षि)क । सं. पुं. (सं. न) क्षौमं, चीनांशुकं, पट्टः-ट्टं, पट्टांशुकं, दुकूलं, चीनवासस् (न.) ।

कौस्तुभ, सं. पुं. (सं.) विष्णुवक्षःस्थो मणिः (पुं.) ।

क्या, सर्व. (सं. किम्) ।

वि., कियत् , २. अत्यधिक ३. कीदृश, विचित्र ४. अत्युत्तम ।

अव्य. किम् ।

—कहना है या—बात है, मु., साधु, साधु-साधु, सुष्ठु, उत्तमं (सब अव्य.) ।

—खूब, मु., साधु, सुष्ठु इ. ।

क्यारी, सं. स्त्री. (सं. केदारः) राजिका ।

क्यों, क्रि. वि. (सं. किम्) किं, केन हेतुना-कारणेन, किन्निमित्तं, किमर्थं, कुतः, कस्मात् २. कया रीत्या, कथम् ।

—कर, कथं, केन प्रकारेण २. किमर्थं, किम् ।

—कि,—यतः, यत् , यस्मात् ।

—नहीं, निःसंदेहं, निःसंशयं, अवश्यं, ध्रुवम् ।

क्रंदन, सं. पुं. (सं. न.) रोदनं, रुदितं, अश्रु-पातः २. परिदेवना-नं, आ-वि,-क्रोशः ।

क्रतु, सं. पुं. (सं.) यज्ञः, यागः २. संकल्पः ३. अभिलाषः ४. विवेकः ५. इन्द्रियं ६. जीवः ७. विष्णुः ८. आषाढः ९. श्रीकृष्णपुत्रः ।

क्रम, सं. पुं. (सं.) अनुक्रमः, आनुपूर्वी-र्व्यं, पारंपर्यं, परंपरा, विन्यासः, व्यवस्था, संविधानं, विरचनं २. प्रकार, विधिः (पुं.) रीतिः (स्त्री.) ३. पादविन्यासः ४ काव्यालंकारभेदः ।

——करके या से, क्रि. वि., अनुक्रमं, यथाक्रमं, अनुपूर्वशः. आनुपूर्व्येण २. शनैः शनैः, अल्पाल्पशः, उत्तरोत्तरम् ।

क्रमण, सं. पुं. (सं.) पादः, चरणः २. अश्वः, घोटः । (सं. न.) गमनं, चलनम् २. उल्लंघनम्, अतिक्रमणम् ।

क्रमशः क्रि. वि. (सं.) दे. 'क्रम क्रम करके' ।

क्रमांक, सं. पुं. (सं.) क्रम,-संख्या-गणना ।

क्रमागत, वि. (सं.) क्रम-आनुपूर्व्येण,-आगत-प्राप्त २. आनुवंशिक, परंपरा-प्राप्त ।

क्रमानुसार, क्रि. वि. (सं.-रम्) क्रमशः, यथाक्रमं, आनुपूर्व्येण, अनुपूर्वशः (सब अव्य.) ।

क्रमिक, वि. (सं.) क्रम-परम्परा,-आगत-आयात, अनुपूर्व, क्रमबद्ध, आनुक्रमिक (-की स्त्री.) २. परम्परीय-ण, पैतृक (-की स्त्री.), पित्र्य ।

क्रमुक, सं. पुं. (सं.) दे. 'सुपारी' ।

क्रय, सं. पुं. (सं.) दे. 'ख़रीद' ।

—विक्रय, सं. पुं., दे. 'ख़रीद-फ़रोख़्त' ।

क्रव्य, सं. पुं. (सं. न.) दे. 'मांस' ।

क्रव्याद, सं. पुं. (सं.) राक्षसः, पिशाचः २. सिंहः ३. श्येनः ४. मांसाशिन् (पुं.) ।

क्रान्ति सं. स्त्री. (सं.) महत्परिवर्तनं, परिवर्तः, २. चरणन्यसनं ३. सूर्यभ्रमणमार्गः ४. राज,-द्रोहः-विरोधः, राज्यविप्लवः, प्रजाक्षोभः ।

क्रिकेट, सं. पुं. (अं.) पट्टगेन्दुकम् ।

क्रिया, सं. स्त्री. (सं.) कर्मन् (न.), कार्यं, व्यापारः २. चेष्टा ३. आरम्भः ४. व्यापार-निर्देशकः शब्दः (व्या.) ५. नित्यकर्मन् (न.) ६. श्राद्धादिकर्मन् ७. चिकित्सा ।

—कर्म, सं. पुं. (सं. न.) अन्त्येष्टि-मृतक-, क्रिया-कर्मन् ।

—विशेषण, सं. पुं. (सं. न.) क्रियाया भाव-कालरीत्यादिद्योतकः शब्दः (व्या.) ।

—इन्द्रिय, सं. स्त्री. (सं. न.) दे. 'कर्मेन्द्रिय'

क्रिस्टल, सं. पुं. (अं.) स्फटम् ।

क्रिस्ता(स्टा)न, सं. पुं. (अं. क्रिश्चियन्), खिस्तानुयायिन् ।

क्रीडा, सं. स्त्री. (सं.) खेला, लीला, कूर्दनं, खेलनं, विहारः २. कौतुकं, विनोदः विलासः ।

क्रीत, वि. (सं.) कृतक्रय, मूल्येन लब्ध ।

क्रीतक, सं. पुं. (सं.) क्रीतपुत्रः ।

क्रुद्ध, वि. (सं.) कुपित, रुष्ट, कोपिन्, सामर्ष, सकोप, सरोष, समन्यु, क्रोध-कोप,-युक्त ।

क्रूर, वि. (सं.) निर्दय, कठोर, नृशंस, पाषाण-कठिन,-हृदय, निर्घृण, क्रूरकर्मन्, निष्करुण २. परपीडक ३. कठिन ४. तीक्ष्ण ५. उष्ण ६. नीच ७. घोर ।

—कर्मा, वि. (सं.-र्मन्) घोर, निर्दय, दारुण ।

क्रूरता, सं. स्त्री. (सं.) निर्दयता, कठोरता, नृशंसता इ. । २. रौद्रता, तीक्ष्णता ३. दुष्टता ।

क्रोड, सं. पुं. (सं. न.) वाह्वोर्मध्यं, भुजांतरं, उपस्थः, उत्संगः, भोगः, अंकः २. उरस्-वक्षस् (न.), उत्तसम् ।

—पत्र, सं. पुं. (सं. न.) परिशिष्टं, अंकपत्रं, पूरकपत्रम् ।

क्रोध, सं. पुं. (सं.) कोपः, रोषः, अमर्षः, मन्युः (पुं.), प्रतिघः, भीमः, क्रुधा, रुषा, रुष्-क्रुध् (स्त्री.) दे. 'गुस्सा' ।

—करना, क्रि. अ., क्रुध् (दि. प. अ.), कुप् (दि. प. से.) ।

क्रोधित, वि. (सं.) दे. 'क्रुद्ध' ।

क्रोधी, वि. (सं.-धिन्) कोपिन्, रोषिन्, अमर्षिन्, दे. 'क्रुद्ध' ।

क्रोश, सं. पुं. (सं.) दे. कोस' ।

क्रौंच, सं. पुं. (सं.) क्रुंचः-न्चा, क्रौंचा, क्रुंच् (पुं.), कलिकः, कालि(ली)कः ।

क्लब, सं. पुं. (अं.) गोष्ठीगृहम् ।

क्लर्क, सं. पुं. (अं.) लिपि-पंजी,-कारः, लेखकः, कायस्थः, वोर(ल)कः ।

क्लांत, वि. (सं.) म्लान, खिन्न, परि,-श्रांत, जातखेद, आयस्त ।

—मना, वि. (सं.-नस्) दुर्मनस्क, विमनस्क, खिन्न ।

क्लांति, सं. स्त्री. (सं.) श्रमः क्लमः, आयासः, श्रान्तिः (स्त्री.), खेदः अवसादः ।

क्लाक, सं. पुं. (अं.) कुड्य-भित्ति,-घटी ।

—टावर, सं. पुं., घंटा,-आलयः-गृहम् ।

क्लिष्ट, वि. (सं.) दुःखित, क्लेशित, आर्त, पीडित २. दुष्कर, कठिन, दुस्साध्य ।

क्लीव, सं. पुं. (सं.) षं (शं) ढः, संडः, शंढः, नपुंसकः, पुरुषत्वहीन २. दे. 'कायर' ।

क्लीवता, सं. स्त्री. (सं.) शं(षं)ढता, नपुंसकता २. कातरता ।

क्लेद, सं. पुं. (सं.) आर्द्रता, स्तेमः, तेमः । २. प्रस्वेदः ।

क्लेश, सं. पुं. (सं.) दुःखं, कष्टं, पीडा, व्यथा, वेदना, चिंता, आस्रवः, आदीनवः ।

क्लेशित, वि. (सं.) दे. 'क्लिष्ट' (१) ।

क्लैव्य, सं. पुं. (सं. न.) दे. 'क्लीवता' ।

क्लोम, सं. पुं. (सं. न.) कोमं, क्लोमन् (न.), तिलकं, फुप्फुसं, दे. 'फेफड़ा' ।

क्लोरीन, सं. स्त्री. (अं.) नीरजी, हरिनम् ।

क्लोरोफार्म, सं. पुं. (अं.) मूर्च्छकम्, संज्ञालोपकम् (औषधभेदः) ।

क्वणित, वि. (सं.) ध्वनित, सरव, सशब्द । सं. पुं. (सं. न.) शब्दः, स्वनः ।

क्वथित, वि. (सं.) श्राण, श्रृत, श्रपित ।

क्वाथ, सं. पुं. (सं.) दे. 'काढा' ।

क्वारंटाइन, सं. पुं. (अं.) निषिद्धसंसर्गगृहं, २. संसर्गप्रतिबन्धः, गमनागमननिषेधः ।

क्वारा, वि. (सं. कुमार) दे. 'कुंवारा' ।

क्वार्टर, सं. पुं. (अं) (राज्यसंस्थादिनिर्मितं) गृहं, गेहं, सदनं, भवनम् । २. पादः, चतुर्थांशः ३. त्रिमासम्, वर्षपादः ।

क्वीन, सं. स्त्री. (अं.) राज्ञी, राजपत्नी ।

क्षंतव्य, वि. (सं.) क्षमार्ह, मर्षणीय, सोढव्य ।

क्षण, सं. पुं. (सं.) अत्यल्पसमयः, मुहूर्तः, निमेषः, पलं, त्रिंशत्कलापरिमितकालः २. समयः ३. अवसरः ४. उत्सवः ।

—प्रभा, सं. स्त्री., विद्युत् (स्त्री.), चंचला ।
—भंगुर, वि., विनश्वर, क्षणिक, अस्थिर ।
—भर, क्रि. वि., क्षणमात्रं, मुहूर्त-पल,-मात्रम् ।
क्षणिक, वि. (सं.) क्षणस्थायिन्, अनित्य, अस्थिर, वि-नश्वर, निस्सार, अस्थायिन् ।
क्षत, वि. (सं.) व्रणित, भिन्नदेह, ताडित, क्षतियुक्त, आहत ।
सं. पुं. (सं. न.) व्रणः, क्षतिः (स्त्री.), अरुस् (न.), आघातः, ईर्मं २. स्फोटः, पिटकः ।
—योनि, वि. स्त्री. (सं.) संभुक्ता, कृतसहवासा ।
—विक्षत, वि. (सं.) अतीव व्रणित-विद्ध-आहत ।
क्षति, सं. स्त्री. (सं.) क्षयः, नाशः २. अपचयः, हानिः (स्त्री.) ३. व्रणः, ईर्मम् ।
क्षत्र, सं. पुं. (सं. न.) बलं, शक्तिः (स्त्री.) २. राष्ट्र ३. धनं ४. शरीरं ५. जलं ६. तगर-वृक्षः । (सं. पुं.) क्षत्रियः ।
—पति, सं. पुं., नृपः ।
क्षत्राणी, सं. स्त्री. (सं. क्षत्रियाणी) (क्षत्रिय जाति की स्त्री) क्षत्रिया, क्षत्रिय(यि)का, क्षत्रि-याणी २.(क्षत्रिय की पत्नी) क्षत्रियाणी, क्षत्रियी ।
क्षत्रिय, सं. पुं. (सं.) वर्णविशेषः २. राजन्यः, बाहुजः, मूर्द्धाभिषिक्त, क्षत्रः ३. योधः, भटः, वीरः ।
क्षत्री, सं. पुं. दे. 'क्षत्रिय' ।
क्षपणक, सं. पुं. (सं.) दिगम्बरयतिः २. बौद्ध-भिक्षुः ३. कविविशेषः । वि., निर्लज्ज ।
क्षपा, सं. स्त्री. (सं.) रात्रिः (स्त्री.), निशा, यामिनी ।
—कर,-नाथ, सं. पुं. (सं.) चन्द्रः, सोमः ।
क्षम, वि. (सं.) शक्त, समर्थ, उपयुक्त, योग्य ।
क्षमता, सं. स्त्री. (सं.) योग्यता, सामर्थ्यं, शक्तिः (स्त्री.) ।
क्षमा, सं. स्त्री. (सं.) क्षांतिः (स्त्री.), तितिक्षा, सहिष्णुता, मर्षणं, सहनशीलता २. पृथिवी ३. खदिरवृक्षः, ४. दक्षकन्या ५. दुर्गा ६. वेत्र-वती नदी ७. राधिकासखी ८. वर्णवृत्तभेदः ।
—करना, क्रि. स., क्षम् (भ्वा. आ. वे; दि. प. वे.), सह् (भ्वा. आ. से.), मृष् (दि. उ. से.) ।
—शील, वि. (सं.) क्षमिन्, क्षमावत, क्षमितृ, सहिष्णु, सहन, क्षन्तृ, तितिक्षु, क्षमायुक्त ।
क्षमावान, वि. (सं.-वत्) दे. 'क्षमाशील' ।
क्षम्य, वि. (सं.) क्षन्तव्य, क्षमार्ह, क्षमोचित, मर्षणीय, सोढव्य ।
क्षय, सं. पुं. (सं.) अपचयः, ह्रासः २. कल्पांतः प्रलयः ३. नाशः, प्रध्वंसः ४. गृहं ५. यक्ष्मः, यक्ष्मन् (पुं.), राजयक्ष्मन् (पुं.) ६. रोगः ७. अंतः, अवसानं, क्षयरोगः, शोषः, रोगराजः, गदाग्रणीः (पुं.), अतिरोगः, रोगाधीशः नृपामयः ।
—कास, सं. पुं. (सं.) क्षयथुः, यक्ष्मकासः(पुं.) ।
—मास, सं. पुं. (सं.) मलिम्लुचः, मल-अधिक,-मासः ।
—रोग, सं. पुं., दे. 'क्षय' (५) ।
—रोगी, सं. पुं. (सं.-गिन्) क्षयिन्, यक्ष्मिन्, रोगराज-शोष,-ग्रस्तः ।
क्षयी, वि. (सं.-यिन्) अपचयिन्, ह्रासिन् २. शोषिन्, यक्ष्मिन्, रोगराजपीडित ।
—रोग, सं. पुं., दे, 'क्षय' (५) ।
क्षर, वि. (सं.) नश्वर, अनित्य ।
क्षरण, सं. पुं. (सं. न.) शनैः शनैः-बिंदुशः-विप्रुट्क्रमेण गलनं-स्यंदनं-स्रवणम् ।
क्षांत, वि. (सं.) क्षमाशील, क्षमावत्, क्षमिन् २. सहिष्णु, सहनशील ।
क्षांति, सं. स्त्री. (सं.) दे. 'क्षमा' (१) ।
क्षार, सं. पुं. (सं.) सर्जिका, विडलवणं २. लवणं ३. दे. 'शोरा' ४. दे. 'सुहागा' ५. भस्मन् (न.) ।
क्षिति, सं. स्त्री. (सं.) भूमिः (स्त्री.), पृथिवी २. क्षयः, ह्रासः, नाशः ।
—पाल, सं. पुं. (सं.) नृपः ।
क्षितिज, सं. पुं. (सं. न.) दिक्-चक्रं-तटं, दिगंतः, दिङ्मंडलं, अंबरांतः, आकाशकक्षा । २. मंगलग्रहः, कुजः ३. वृक्षः ४. दे. 'केंचुआ' ।
क्षिप्त, वि. (सं.) त्यक्त, विसृष्ट, प्रास्त २. विकीर्ण ३. अवज्ञात ४. पतित ५. वातरोगग्रस्त ।
क्षिप्र, क्रि. वि. (सं. न.) द्रुतं, सपदि, द्राक्, दे. 'शीघ्र' ।
वि., त्वरित, सत्वर, जवन, वेगवत्, शीघ्र ।
—हस्त, वि. (सं.) शीघ्रकारिन्, आशुकर्तृ ।
क्षीण, वि. (सं.) सूक्ष्म, प्र-,तनु, श्लक्ष्ण २. कृशांग, कृश, क्षाम, क्षीण-शुष्क,-मांस ३. नष्ट, ध्वस्त, क्षयंगत ।

क्षीणता, सं॰ स्त्री॰ (सं॰) दुर्बलता, निःशक्तता २. सूक्ष्मता, तनुता ३. कृशता, क्षामता ४. ह्रासः, अपचयः, नाशः ।

क्षीर, सं॰ पुं॰ (सं॰ न॰) दुग्धं, पयस् (न॰) २. जलं ३. पायसं-सः ।

—निधि, सं॰ पुं॰ (सं॰) सागरः ।

—नीर, सं॰ पुं॰ आलिंगनं २. मिश्रणम् ।

—सागर, सं॰ पुं॰ (सं॰) क्षीराब्धिः (पुं॰) दुग्ध,-सागरः-समुद्रः, क्षीरोदः ।

—सार, सं॰ पुं॰, दे॰ 'मक्खन' ।

क्षीरज, सं॰ पुं॰ (सं॰) चंद्रः २. शंखः ३. कमलं ४. दधि (न॰) ।

क्षीरजा, सं॰ स्त्री॰ (सं॰) दे॰ 'लक्ष्मी' ।

क्षीरधि, सं॰ पुं॰ (सं॰) सागरः, समुद्रः ।

क्षीरोद, सं॰ पुं॰ (सं॰) दे॰ 'क्षीरसागर' ।

क्षीव, वि॰ (सं॰) उन्मद, समद, मदोन्मत्त ।

क्षुण्ण, वि॰ (सं॰) प्रहृत, चूर्णीकृत, खंडशो भिन्न ।

क्षुद्र, वि॰ (सं॰) अधम, निकृष्ट, नीच २. अल्प, स्तोक ३. कृपण ४. कुटिल ५. दरिद्र ।

क्षुद्रता, सं॰ स्त्री॰ (सं॰) तुच्छता, निकृष्टता २. कुटिलता ३. दरिद्रता ।

क्षुधा, सं॰ स्त्री॰ (सं॰) दे॰ 'भूख' ।

क्षुधातुर, **क्षुधार्त**, **क्षुधित** } वि॰ (सं॰) दे॰ 'भूखा' ।

क्षुप, सं॰ पुं॰ (सं॰) क्षुपकः, क्षुद्रवृक्षः गुल्मः-मं ।

क्षुब्ध, वि॰ (सं॰) व्याकुल, विह्वल, आतुर, उद्विग्न २. चंचल ३. भीत, त्रस्त ४. क्रुद्ध ।

क्षुर, सं॰ पुं॰ (सं॰) नापितस्य लोमछेदकशस्त्रं, क्षौरी, क्षुरी, खुरः २. शफं-फः, गवादीनां पादाग्रम् ।

क्षुरी, सं॰ पुं॰ (सं॰-रिन्) नापितः, क्षौरिकः, मुंडः, मुंडिन् ।

क्षुल्लक, वि॰ (सं॰) स्वल्प, स्तोक २. दुष्ट, दुर्वृत्त ३. निर्धन, दरिद्र । सं॰ पुं॰, वालः, बालकः ।

क्षेत्र, सं॰ पुं॰ (सं॰ न॰) केद (दा) रः, भूमिः (स्त्री॰), वप्रः-प्रं । २. समभूमिः ३. उत्पत्ति-स्थानं, उद्भवः, उद्गमः ४. प्रदेशः ५. तीर्थस्थानं ६. राशिः (पुं॰, मेषादि) ७. पत्नी ८. शरीरं ९. अंतःकरणं १०. रेखावेष्टितं स्थानम् ।

—गणित, सं॰ पुं॰ (सं॰) गणितशाखाभेदः ।

—फल, सं॰ पुं॰ (सं॰ न॰) वर्गपरिमाणम् ।

क्षेत्रज, सं॰ पुं॰ (सं॰) नियोगजपुत्रः (धर्मशास्त्र) ।

क्षेत्रज्ञ, सं॰ पुं॰ (सं॰) जीवः २. ईश्वरः ३. कृपाणः । वि॰, ज्ञातृ, दक्ष, निपुण ।

क्षेप, सं॰ पुं॰ (सं॰) क्षेपणं, प्रेरणं, प्रासनं, विसर्जनं २. निन्दा ३. यापनं ४. दूरता ।

क्षेपक, वि॰ (सं॰) क्षेप्तृ, प्रासक, प्रेरक २. मिश्रित ३. निन्दनीय । सं॰ पुं॰, नाविकः २. प्रक्षिप्त-निवेशित,-लेखः ।

क्षेपण, सं॰ पुं॰ (सं॰ न॰) दे॰ 'क्षेप' (१-३) ।

क्षेपणी, सं॰ स्त्री॰ (सं॰) अस्त्रविशेषः २. नौका-दंडः, क्षेपणिः (स्त्री॰) ।

क्षेम, सं॰ पुं॰ (सं॰ पुं॰ न॰) लब्धरक्षणं प्राप्तरक्षा २. मंगलं, कुशलं ३. अभ्युदयः ४. आनंदः ५. मुक्तिः (स्त्री॰) ।

क्षोणि, सं॰ स्त्री॰ (सं॰) क्षोणी पृथिवी ।

—पति, —पाल, सं॰ पुं॰ (सं॰) नृपः, भूपः ।

क्षोद, सं॰ पुं॰ (सं॰) चूर्णं, पिष्टं २. पेषणं ३. जलं ।

क्षोभ, सं॰ पुं॰ (सं॰) अशांतिः-अनिर्वृतिः (स्त्री॰), चित्तचांचल्यं व्यग्रता, उद्वेगः, व्याकुलता २. भयं ३. शोकः ४. क्रोधः ।

क्षोभित, वि॰ (सं॰) दे॰ 'क्षुब्ध' ।

क्षोणी, सं॰ स्त्री॰ (सं॰) क्षोणिः (स्त्री॰), पृथिवी ।

क्षौद्र, सं॰ पुं॰ (सं॰ न॰) मधु (न॰) २. जलं ३. क्षुद्रता । (सं॰ पुं॰) चंपकवृक्षः ४. वर्णसंकरविशेषः ।

क्षौम, सं॰ पुं॰ (सं॰ पुं॰ न॰) अट्टः, अट्टालिका (२-४) पट्ट-अतसी-शणज,-वस्त्रं ।

क्षौर, सं॰ पुं॰ (सं॰ न॰) } दे॰ 'हजामत' ।
—कर्म, सं॰ पुं॰ (सं॰-र्मन् न॰) } दे॰ 'हजामत' ।

क्षौरिक, सं॰ पुं॰ (सं॰) दे॰ 'नाई' ।

क्ष्मा, सं॰ पुं॰ (सं॰) पृथिवी, अवनी ।

क्ष्वेड, सं॰ पुं॰ (सं॰) ध्वनिः, शब्दः २. विषं ३. कर्णरोगभेदः ।

ख

ख, देवनागरीवर्णमालाया द्वितीयव्यंजनवर्णः, खकारः ।

खं, सं॰ पुं॰ (सं॰ न॰) शून्यस्थानं २. छिद्रं ३. आकाशं ४. इंद्रियं ५. विंदुः (पुं॰), शून्यं ६. स्वर्गः ७. सुखं ८. ब्रह्मन् (न॰) ।

खंख, वि॰ (सं॰) रिक्त, शून्य २. निर्जन, वन्य ।

खँखरा, वि॰, दे॰ 'खाँखर' ।

खँखार, सं॰ पुं॰, दे॰ 'खखार' ।

खंगर, सं॰ पुं॰ (देश॰) एकीभूतोऽतिपक्वेष्टकाचयः । वि॰, अतिशुष्क ।

खँगालना, क्रि. स., (सं. क्षालनं) ईषत् धाव् (भ्वा., चु. उ. से.)-प्रक्षल् (चु.) ।

खंज, सं. पुं. (सं.) खोरः, खोलः, खोटः, खोडः, विकलगतिः २. पादरोगभेदः ।

खंजन, सं. पुं. (सं.) खंजरीटः, खंजखेलः, मुनिपुत्रकः, रत्ननिधिः (पुं.), गूढनीडः ।

खंजर, सं. पुं. (फ़ा.) दे. 'कटार' ।

खंजरी, सं. स्त्री. (सं. खंजरीट = एक ताल >) लघु, डमरुः-डिंडिमः ।

खंजरीट, सं. पुं. (सं.) दे. 'खंजन' ।

खँड, सं. पुं. (सं. खंडम्) दे. 'खाँड़' ।

खंड, सं. पुं. (सं. पुं. न.) लवः, शकलः-लं, अंशः, विभागः. वि-,दलं, भिन्नं २. देशः ३. नवसंख्या ४. रत्नदोषभेदः ५. अध्यायः ६. पाक्यः, कृष्णलवणं ७. दिशा । वि., अल्प, लघु, अपूर्ण ।

—करना, क्रि. सं. खंडशः-लवशः छिद् (रु. प. अ.)-लू (क्र. उ. से.)—कृत् (तु. प. से.) ।

—काव्य, सं. पुं. (सं. न.) लघुप्रबन्धकाव्यम् ।

—प्रलय, सं. पुं. (सं.) ब्रह्मांडस्य एकदेशीय-आंशिक,-नाशः-विध्वंसः-क्षयः ।

खंडन, सं. पुं. (सं. न.) भंजनं, भेदनं, छेदनं, कर्तनं, त्रोटनम् २. प्रत्याख्यानं, निराकरणं, निरसनम् ।

खंडनीय, वि. (सं.) भेत्तव्य, छेत्तव्य २. प्रत्याख्येय, निरसनीय ।

खंडर, सं. पुं. (सं. खंडः + हिं. घर) ध्वंसावशेषः, जर्जर-जीर्ण-शीर्ण,-गृहं-नगरम् ।

खंडरिच, सं. पुं., दे. 'खंजन' ।

खंडशः, अ. (सं.) विभागशः, अंशशः, अवयवशः (सव अव्य.) ।

खंडहर, सं. पुं., दे. 'खंडर' ।

खंडित, वि. (सं.) भग्न, त्रुटित, लून, छिन्न २. असमग्र, अपूर्ण ।

खंदक़, सं. स्त्री. (अ.) परिखा, खेयं, राजधान्यादिवेष्टनखातं, २. बृहत्,-श्वभ्रं-गर्तः-अवटः ।

ख़ंदा, वि. (फ़ा.) सहास, हासक । सं. पुं., हासः, हास्यम् ।

—पेशानी, वि. स्मेरानन, हास्यमुख ।

खंबा, खंभ, खंभा, सं. पुं. (सं. स्कंभः) उप-, स्तंभः, अवष्टंभः, स्थाणुः (पुं.), स्थूणा ।

ख, सं. पुं. (सं. न.) गर्तः-र्ता, अवटः २. रिक्तस्थानं ३. निर्गमः ४. बिलं, विवरं ५. इन्द्रियं ६. कूपः ७. इषुव्रणः ८. शकटचक्रनाभिच्छिद्रं ९. आकाशं १०. स्वर्गः ११. बिंदुः (पुं.), शून्यं १२. ब्रह्मन् (न.) १३. शब्दः १४. कंण्ठस्थ प्राणनाडी १५. सुखं १६. क्षेत्रं १७. पुरं । (सं. पुं.) सूर्यः ।

खक्खा[1], सं. पुं. (अनु.) अट्टहासः, उच्चैर्हासः, प्र-अति,-हासः ।

खक्खा[2], सं. पुं. (हिं. खत्री का 'ख') पांचनदः क्षत्रियः २. अनुभवी पुरुषः ३. महागजः ।

खखार, सं. पुं. (अनु.) कफः, श्लेष्मन् (पुं.), संघातः, सौम्यधातुः (पुं.), घनः ।

खखारना, क्रि. अ. (अनु.) कफं निःसृ (प्रे.)-उद्गॄ (तु. प. से.), निष्ठिव् (भ्वा. दि. प. से.) ।

खखोंडर, सं. पुं. (सं. खं + कोटरः >) तरुकोटरस्थः स्थं खगनीडः-डं २. उलूक,-निलयः-कुलायः ।

खग, सं. पुं. (सं.) पक्षिन् (पुं.), अंडजः, नीडजः २. गंधर्वः ३. देवः ४. बाणः ५. ग्रहः ६. मेघः ७. सूर्यः ८. चंद्रः ९. वायुः (पुं.) ।

—पति, सं. पुं. (सं.) खगेशः, वैनतेयः, गरुडः, खगकेतुः (पुं.), खगराजः ।

खगोल, सं. पुं. (सं.) आकाश-गगन,-मंडलं, गगनाभोगः ।

—विद्या, सं. स्त्री. (सं.) ज्योतिःशास्त्रं, ज्योतिषं ।

खचखच, सं. स्त्री. (अनु.) पंके चलनध्वनिः(पुं.) ।

खचना, क्रि. अ. (सं. खचनं) खच्-निवेश्-प्रतिवप् (कर्म.) ३. अंकित-चित्रित (वि.) + भू ।

खचर, सं. पुं. (सं.) सूर्यः २. मेघः ३. ग्रहः ४. नक्षत्रं ५. वायुः ६. पक्षिन् (पुं.) ७. बाणः ८. राक्षसः । वि. नभश्चर, गगनचारिन् ।

खचरा, वि. (हिं खचर) वर्णसंकर, मिश्रज २. दुष्ट, खल ।

खचाखच, क्रि. वि. (अनु.) निबिडं, गाढं, अविरलं, निरंतरं । वि. जनाकीर्ण, जनसंकुल ।

—भरना, क्रि. अ., सं-आ-कॄ (कर्म.), परिपॄ (कर्म.), संकुल-समाकुल (वि.) + भू ।

खचित, वि. (सं.) निवेशित, प्रत्युप्त २. लिखित, चित्रित ।

ख़च्चर, सं. पुं. (देश.) वेगसरः, वेस (श) रः, अश्वतरः (स्त्री. अश्वतरी)।

खज, सं. पुं. (सं.) खजकः, मंथनः, तक्राटः २. मंथनं, मंथः ३. युद्धं, संग्रामः ४. कंवी-विः (स्त्री.)।

ख़ज़ानची, सं. पुं. (फ़ा.) कोष-धन,-अध्यक्षः-अधीशः, अर्थाधिकारिन् ।

ख़ज़ाना, सं. पुं. (अ.) कोशः-षः, निधानं, निधिः (पुं.), द्रव्य,-राशिः (पुं.)-संग्रहः २. वित्तं, द्रविणं ३. कोशागारं, भांडागारं, कोश (ष) गृहम् ।

खजिल, वि. (फ़ा.) लज्जित, व्रीडित, त्रपित ।

खजुली, सं. स्त्री. (सं. खर्ज्जूः स्त्री.) दे. 'खुजली'।

खजूर, सं. पुं. स्त्री. (सं. खर्जूरः) (वृक्ष) खर्जूरी, दुष्प्रधर्षा, दुरारोहा, यवनेष्टा, हरिप्रिया २. (फल) खर्जूरं, खर्जूरीफलम् । ३. मिष्टान्न-भेदः, खर्जूरिका ।

खजूरी, वि. (हिं खजूर) खर्जूर,-विषयक-संबं-धिन्, खार्जूर २. वेणीरूपेणग्रथित, व्यावर्तित ।

खटक, सं. स्त्री. (अनु.) भय, त्रासः २. चिंता ।

खट[1] वि. (सं. षट्) दे. 'छः'।

खट[2], सं. पुं. (अनु.) संघट्टजो ध्वनिः (पुं.), खटितिशब्दः, खटाखटशब्दः ।

—से, क्रि. वि., सपदि, झटिति, क्षणेन ।

खटकना, क्रि. अ. (अनु.) खटखटायते (ना. धा.), खटखटा-शब्दं कृ २. मुहुः मुहुः पीड् (कर्म.)-उद्दीप् (दि. आ. से.) ३. अयुक्त-असमीचीन-अनुचित (वि.)+प्रति-इ (कर्म.) ४. भी (जु. प. अ.), त्रस् (दि. प. से.) ५. वैरायते-कलहायते (ना. धा.), विवद् (भ्वा. आ. से.) ६. अनिष्ट-अपकारं आशंक् (भ्वा. आ. से.)।

खटका, सं. पुं. (हिं. खटकना) खटखटा,-शब्दः-नादः-ध्वनिः २. भयं, त्रासः, आशंका ३. चिंता ४. कीलः-लं ५. अर्गलं, तीलकं ६. पादशब्दः ।

—लगना, क्रि. अ., त्रस् (दि. प. से.), चिंतित-व्यग्र (वि.)+भू ।

खटकाना, क्रि. स., दे. 'खटखटाना'।

खटकीड़ा, सं.पुं.(सं. खट्वाकीटः) दे. 'खटमल'।

खटखट, सं. स्त्री. (अनु.) खटखटा,-शब्दः-ध्वनिः (पुं.) नादः २. कलहः, विवादः ३. दे. 'झंझट'।

खटखटाना, क्रि. स. (अनु.) तीव्रं अभिहन् (अ. प. अ.)-तड् (चु.) प्रहृ (भ्वा. प. अ.) खटखटाशब्दं कृ २. स्मृ (प्रे.)।

खटगीर, सं. पुं., दे. 'खटमल'।

छटछप्पर, सं. पुं., दे. 'मसहरी'।

खटना, क्रि. स., दे. 'कमाना'।

खटपट, सं. स्त्री. (अनु.) कलहः, विवादः २. खटखटाशब्दः, शस्त्र,-घोषः-शिंजितम् ।

खटबुना, सं. पुं. (हिं. खाट+बुनना) खट्वा, वायः-वापः, मंच-पर्यंक,-वायः-वापः ।

खटमल, सं. पुं. (सं. खट्वामलं>) उद्दंशः, मत्कुणः, ओकणः, ओकोदनी ।

खटमीठा, वि. (हिं. खट्टा+मीठा) अम्ल-मधुर, शुक्तमिष्ट ।

खटराग, सं. पुं. (सं. षड्रागाः) मेघदीपकादयः षड्रागाः २. कलहः ३. विस्वरता, विसंवादः ३. व्यर्थवस्तुजातम् ।

खटाई, सं. स्त्री. (हिं. खट्टा) अम्लता, शुक्तता २. अम्लः, द्रावकं ३. अम्ल-शुक्त,-पदार्थः ।

—वढ़ना, सं. पुं., अम्लरोगः (अजीर्णभेदः)।

—में पड़ना, मु., चिरायते-मन्दायते (ना. धा.), व्याक्षिप् (कर्म.), अनिर्णीत (वि.) स्था (भ्वा. प. अ.)।

खटाका, सं. पुं. (अनु.) खट्कारः, खटिति शब्दः, महा,-शब्दः-रवः ।

खटखटा, सं. पुं. (अनु.) दे. 'खटखट' १. शिंजितं, क्वणितं । क्रि. वि., सखटखटाशब्दं २. अनवरतं, सपदि ।

खटापटी, सं. स्त्री. दे. 'खटपट' १. ।

खटाव[1], सं. पुं. (देश.) नौकाबन्धनकीलः-लम् ।

खटाव[2], सं. पुं., दे. 'निर्वाह'।

खटास[1], सं. पुं. (सं. खट्टासः-शः) गंधमार्जारः, वनेवासनः ।

खटास, सं. स्त्री. (हिं. खट्टा) अम्लता, शुक्तता ।

खटिक, सं. पुं., फलशाकविक्रेतृजातिभेदः, *खटिकः ।

खटिया, सं. स्त्री. (हिं. खाट) लघु,-खट्वा-पर्यंकः-मंचः, खट्विका, खट्वाका ।

खटीक, सं. पुं. (सं. खट्टिकः) सौनिकः, शौनिकः २. व्याधः, लुब्धकः, जालिकः ३. दे. 'खटिक'।

खटोलना, सं. पुं., दे. 'खटिया'।

खटोला, सं. पुं. (हिं. खाट) दे. 'खटिया'।

खट्टा, वि. (सं. कटु >) अम्ल, शुक्त।

सं. पुं., बीज-फल,-पूरः, दंतशठः, जम्भकः, जम्भलः छोलंगः।

—चूक, वि., अति-अत्यन्त,-अम्ल-शुक्त।

—मीठा, वि., दे, 'खटमीठा'।

—सा, वि., ईषदम्ल, आशुक्त।

जी—होना; मु., गतस्पृह-निर्विण्ण-वितृष्ण (वि.)+भू।

खट्टास, सं. स्त्री. (हिं. खट्टा) दे. 'खटास' (२)।

खट्टू, सं. पुं. (पं. खटना) धनार्जकः, वित्तोपार्जकः २. कर्म,-करः-कारः।

खट्वा, सं. स्त्री. (सं.) दे. 'खाट'।

खड, सं. (सं. खातं) गर्तः-र्ता, अवटः, बिलं, विवरं २. दरी, उपत्यका।

खड़कना, क्रि, अ. (अनु.) खड़खड़ा शब्दं कृ। दे. 'खटकना'।

खड़का, सं. पुं., दे. 'खटका'।

खड़काना, क्रि. स. } दे. 'खटखटाना'।
खड़खड़ना, क्रि. स. }

खड़खड़ाहट, सं. स्त्री. (हिं. खड़खड़) खड़खड़ा,-शब्दः-रवः-ध्वानः २. तुमुलरवः ३. कटु-कर्कश-परुष,-ध्वनिः (पुं.)।

खड़खड़िया, सं. स्त्री. (हिं. खड़खड़) दे. 'पालकी'।

खड़ग, सं. पुं. (सं. खड्गः) असिः, दे. 'तलवार'।

खड़गी, वि. (सं. खड्गिन्) आसिकः, खड्गधरः २. खड्गमृगः, दे. 'गैंडा'।

खड़बड़ाहट, सं. स्त्री. दे. 'गड़बड़ाहट'।

खड़बड़ी, सं. स्त्री. दे. 'गड़बड़ी'।

खड़मंडल, सं. पुं. दे. 'गड़बड़ी'।

खड़सान, सं. पुं. दे. 'खरसान'।

खड़ा, वि. (सं. खडक=खम्भा >) (दंडवत्) स्थित, उत्थित २. उच्छ्रित, उन्नत, उत्तान, ऊर्ध्व, लम्बरूप, खमध्य,-वर्तिन्-वेधिन् ३. स्थिर, अचल, स्तब्ध, निश्चल, निश्चेष्ट ४. उपस्थित, प्रस्तुत ५. सज्ज, संनद्ध, उद्यत ६. निर्मित, रचित ७. अपक्व, असिद्ध ८. अनुत्खात, अलून ९. समस्त, समग्र [खड़ी (स्त्री.) = स्थिता इ.]।

—करना, क्रि. सं., 'खड़ा होना' के प्रे. रूप।

—रहना, क्रि. अ., अचल-रुद्धगति (वि.)+स्था इ.)।

—होना, क्रि. अ. (पद्भ्यां) स्था (भ्वा. प. अ.), उत्-स्था, २. विरम् (भ्वा. प. अ.), निवृत् (भ्वा. आ. से.), स्तंभ् (कर्म.), स्थिरी-निश्चली,-भू ३. उपकृ, सहाय्यं कृ ४. उच्छ्रित-उन्नत-उत्तान (वि.)+भू ५. निर्मा-विरच् (कर्म.) ६. निधा-निवेश् (कर्म.)।

खड़े-खड़े, क्रि. वि., स्थित एव २. झटिति, सपदि, सद्यः (सब अव्य.)।

खड़ाऊँ खड़ाँव, सं. स्त्री. (अनु. खड़+हिं.+पाँव) कोशी-पी, (काष्ठ-) पादुका।

खड़ाका, सं. पुं. (अनु.) खडखडा,-शब्दः-ध्वानः।

खड़िया, सं. स्त्री. (सं. खडिका) खडी, कठिनी दे. 'चाक'[२]।

खड़ी, सं. स्त्री. (सं. खडी) दे. 'खड़िया'।

खड्ग, सं. पुं. (सं.) दे. 'खड़ग'।

खड्गी, सं. पुं. तथा वि., (सं. खड्गिन्) दे. 'खड़गी'।

खड्ड, खड्ढा, सं. पुं. (सं. खातं) दे. 'खड'[१]।

खड्डी, सं. स्त्री. (सं. खात >) तन्त्रवापः-पं, वाय(प) दण्डः, वेमः, वेमन् (पुं. न.), वानदण्डकः, वाणिः (स्त्री.)।

ख़त, सं. पुं. (अ.) संदेश,-पत्रं,-लेख्यं,-लेखः २. हस्तलेखः, स्वहस्ताक्षरं ३. अक्षरसंस्थानं, लिखितं, लिपिः-विः (स्त्री.) ४. रेखा, लेखा, रेषा ५. मुखरोमन् (न.), श्मश्रु (न.), कूर्चं ६. क्षौरं मुण्डनम्।

—आना, क्रि. अ., प्रथमतः मुखरोमाणि उद्भू।

—खींचना, क्रि. स., रेखां आ-अभि-लिख् (तु. प. से.)।

—बनाना, क्रि. स., मुंड् (भ्वा. प. से., चु.) क्षुरेण कृत् (तु. प. से.)-छिद् (रु. प. अ.)-लू (क्र्. उ. से.)।

—किताबत, सं. स्त्री., (अ.) पत्र,-व्यवहारः-विनिमयः।

—शिकस्ता, सं. पुं. (अ.+फ़ा.) वक्रलेखः।

ख़तना, सं. पुं. (अ.) शिश्नत्वक्छेदः (इस्लाम)।
ख़तम, वि. (अ. खत्म) समाप्त, पूर्ण।
—करना मु., मृ (प्रे.), हन् (अ. प. अ.)।
—होना, मु., मृ (तु. आ. अ.)।
ख़तर, सं. पुं. (अ.) दे. भयं, त्रासः।
—नाक, वि. भयानक, भयङ्कर।
ख़तरा, सं. पुं. (अ.) भयं, भीतिः (स्त्री.), दे. 'भय' २. संशयः, संदेहः।
खतरानी, सं. स्त्री., दे. 'क्षत्राणी'।
ख़ता, सं. स्त्री. (अ.) अपराधः, दोषः २. छलं वञ्चना ३. प्रमादः, स्खलितम्।
—वार, वि. (अ.+फ़ा.) अपराधिन्, दोषिन्।
खतियाना, क्रि. स. (हिं. खाता) आयव्यय-पञ्जिकायां यथास्थानं लिख् (तु. प. से.)।
खतियौनी, सं. स्त्री. (हिं. खतियाना) (वृहत्) आयव्ययपञ्जिका २. तत्र यथास्थानं लेखः ३. क्षेत्रपतिसूचीपत्रम्।
खत्ता, सं. पुं. (सं. खातं) अवटः, गर्तः २. धान्यागारं-रः ३. निधिः (पुं.) ४. राशिः (पुं.)।
ख़त्म, वि., दे. 'खतम'।
खत्री, सं. पुं. (सं. क्षत्रियः) पंचनदप्रांते आर्याणामुपजातिविशेषः २. दे. 'क्षत्रिय'।
खदबदाना, क्रि. अ. (अनु.) बुद्बुदायते (ना. धा.) मन्दं क्वथ् (कर्म.) दे. 'उबलना'।
ख़दशा, सं. पुं. (अ.) भयं, आशंका।
खदान, सं. स्त्री., दे. 'खान'।
खदिर, सं. पुं. (सं.) सारद्रुमः, कुष्ठारिः (पुं.), गायत्री, दंतधावनं, बाल,-तनयः-पत्रः, यज्ञांगः, सुशल्यः, वक्रकंटः। २. दे. 'कत्था' ३. चन्द्रः ४. इन्द्रः।
खदेड़, सं. स्त्री. (हिं. खेदना) अनुधावनं, खेटनं, आच्छोदनम्।
खदेड़(र)ना, क्रि. स. (हिं. खेदना) निः-अप-सृ (प्रे.), बहिष्कृ, निष्कस्-निर्वस् (प्रे.) २. अनुगम्, अनुधाव् (भ्वा. प. से.), मृग् (चु. आ. से.)।
खद्दर, दे० 'खादी'।
खद्योत, सं. पुं. (सं.) प्रभाकीटः, दे. 'जुगनूँ' २. सूर्यः
खनक, सं. पुं. (सं.) उंदुरुः (पुं.), मूष(षि)कः २. संधितस्करः ३. अवदारकः, खातकः ४. आकरः, ख(खा)निः-नी (स्त्री.) ५. भूतत्त्ववेत्तृ (पुं.)। सं. स्त्री. (अनु.), क्वणितं, शिंजितम्।
खनकना, क्रि. अ. (अनु.) शिंज् (अ. आ. से., चु.), क्वण् (भ्वा. प. से.), झणझणायते-खणखणायते (ना. धा.)।
खनकाना, क्रि. स., 'खनकना' के प्रे. रूप।
खनखनाना, क्रि. अ. तथा क्रि. स., दे. 'खनकना' तथा 'खनकाना'।
खनना, दे. 'खोदना'।
खनिज, वि. (सं.) धातुः (पुं.), आकरजः पदार्थः।
खनित्र, सं. पुं. (सं. न.) अवदारणम्।
खपची, सं. स्त्री., दे. 'खपाच'।
खपड़ा(रा), सं. पुं. (सं. खर्परः) १. कर्परः २. मृत्पट्टिका ३. भिक्षापात्रम्।
खपड़ी(री), सं. स्त्री. (सं. खर्परः) धान्यभर्जनार्थं मृत्पात्रम्।
खपत, खपती, सं. स्त्री. (हिं. खपना) समावेशः, व्याप्तिः (स्त्री.) २. विक्रयः, पणनं ३. व्ययः, विनियोगः।
खपना, क्रि. अ. (सं. क्षपणं >) प्र-उप,-युज् (कर्म.), व्यवहृ-व्यापृ (कर्म.) २. क्षि-परिहा (कर्म.), नश् (दि. प. से.) ३. क्लिश्-संतप्-पीड् (कर्म.)
खपरै(ड़ै)ल, सं. स्त्री. (हिं. खपड़ा) मृत्पट्टिकाभिः खर्परैः वा आच्छादितं पटलं ३. तादृशपटलयुक्तं गृहम्।
खपाच, सं. स्त्री. (तु. कमची) (काष्ठ-) खंडः-डं, वंशस्य शकलः-लं, २. अतिकृशः पुरुषः।
खपाना, क्रि. स. (हिं. खपना) प्र-उप,-युज् (रु. आ. अ., चु.), उपयुज्य-उपभुज्य निरवशेषीकृ, व्यवहृ-व्यापृ (प्रे.) २. व्यय्-विनियुज् (चु.) ३. वि,-नश् (प्रे.) ४. संतप्-पीड् (प्रे.)।
खपुर, सं. पुं. (सं. न.) गगनस्थो दैत्यनगरविशेषः २. गगनस्था हरिश्चन्द्रनगरी।
खपुष्प, सं. पुं. (सं. न.) गगनकुसुमं, असंभवं-असाध्यं वस्तु (न.), शश,-विषाणं-शृंगम्।
खप्पर(ड़), सं. पुं. (सं. खर्परः) मृत्पात्रभेदः

२. काल्याः रुधिरपानपात्रं ३. भिक्षाभाजनं ४. कपालः-लम् ।

खफ़क़ान, सं. पुं. (अ.) हृत्कम्पनं २. (हिस्टीरिया) गर्भाशयोन्मादः, वातोन्मादः, हर्षमोहः ।

खफ़गी, सं. स्त्री. (अ.) प्रसाद-प्रीति,-अभावः २. कोपः, क्रोधः ।

खफ़ा, वि. (अ.) रुष्ट, कुपित, क्रुद्ध २. विषण्ण ।

खफ़ीफ़, वि. (अ.) अल्प, न्यून २. लघु ३. क्षुद्र ४. लज्जित ।

खफ़ीफ़ा, सं. स्त्री. (फ़ा.) लघु,-न्यायालयः-धर्माधिकरणम् २. कुलटा, व्यभिचारिणी ।

ख़बर, सं. स्त्री. (अ.) समाचारः, उदंतः, वृत्तांतः वृत्तं, वार्ता, प्रवृत्तिः (स्त्री.) २. ज्ञानं, बोधः ३. संदेशः ४. संज्ञा, चैतन्यं ५. जनप्रवादः ।

—करना, देना या पहुँचाना, क्रि. सं., विज्ञा (प्रे.), नि-आ-विद् (प्रे.), संदिश् (तु. प. अ.), बुध्-अवगम् (प्रे.) ।

—लगाना, क्रि. सं., दे. 'ढूंढ़ना' ।

—देने वाला, सं. पुं., विज्ञापकः, आवेदकः, सूचकः ।

—ले जाने वाला, सं. पुं. दूतः, वार्ता-संदेश,-हरः ।

ख़बरगीरी, सं. स्त्री. (अ.+फ़ा.) अवेक्षा, रक्षणं, चिंता २. सहानुभूतिः (स्त्री.), सहायता ।

ख़बरदार, वि. (अ.+फ़ा.) दे. 'सावधान' ।

ख़बरदारी, सं. स्त्री. (अ+फ़ा.) दे. 'सावधानता' ।

ख़बीस, सं. पुं. (अ.) भयंकरः, खलः ।

ख़ब्त, सं. पुं. (अ.) उन्मादः, चित्त,-विप्लवः-भ्रमः २. उत्सूत्रता, सामान्यविरोधः ।

ख़ब्ती, वि. (अ.) उन्मादिन् २. उत्सूत्र, लोकबाह्य ।

खब्बा, वि. (पं., सं. खर्व>) वाम, सव्य, दक्षिणेतर २. वामहस्त, सव्यसाचिन् ।

ख़म, सं. पुं. (फ़ा) वक्रता, जिह्मता, आभुग्नता कुटिलता ।

—दम, सं. पुं., शौर्यं, विक्रमः ।

—दार, वि., आनमित, आभुग्न, कुञ्चित ।

ख़मसा, वि. (अ.) पंच,-विषयक-सम्बन्धिन् । सं. पुं., पंचकम् २. पद्यभेदः ३. अंगुली-पंचकम् ।

ख़मियाज़ा, सं. पुं. (फ़ा.) प्रतिफलं २. दण्डः ३. कष्टम् ४. हानिः (स्त्री.) ।

ख़मीदा, वि. (फ़ा.) वक्र, जिह्म, अराल ।

ख़मीर, सं. पुं. (अ.) किण्वः, जगलः, मासरः, मेदकः, कारोत्तरः, नग्नहूः (पुं.) ।

—उठाना, क्रि. सं. किण्वेन संमिश्र् (चु.) । सं. पुं. किण्वनं, किण्वीकरणं ।

ख़मीरा, वि. (अ.) किण्व-जगल,-मिश्रित २. घनमधुक्वाथः ३. तमाखुभेदः ।

ख़यानत, सं. स्त्री. (अ.) सकपटाहरणं, दुर्विनियोगः २. चौर्यं, वंचना ।

—करना, क्रि. स. कपटेन आत्मसात् कृ अथवा विनियुज् (रु. आ. अ.) ।

ख़याल, सं. पुं. दे. 'ख्याल' ।

ख़याली, वि., दे. 'ख्याली' ।

खर, सं. पुं. (सं.) गर्दभः, रासभः २. अश्वतरः, वेसरः ३. वकः ४. काकः ५. रावणभ्रातृ (पुं.) ६. तृणं, घासः ।

वि., कठोर, कक्खट, कीकस २. तीक्ष्ण ३. स्थूल ४. अमंगल, अमांगलिक ५. निशित ६. प्रवण, तिर्यंच् ।

ख़र, सं. पुं. (फ़ा.) गर्दभः, रासभः ।

—दिमाग़, वि., जड, अज्ञ, खरमति ।

ख़रख़र, सं. स्त्री. (अनु.) घर्घरः, घर्घर,-रवः-शब्दः ।

—करना, क्रि. स., घर्घरायते (ना. धा.), घर्घरध्वनिं कृ ।

खरखरा, वि. दे. 'खुरखुरा' ।

ख़रगोश, सं. पुं. (फ़ा.) शशः, शशकः, शूलिकः मृदुरोमन् (पुं.), रोमकर्णः ।

खरच, सं. पुं., दे. 'खर्च' ।

ख़रचना, क्रि. सं. (फ़ा. खर्च) व्यय् (चु.), उत्-वि,-सृज् (तु. प. अ.), विनियुज् (रु. आ. अ., चु.), क्षयं-व्ययं,-कृ ।

खरचा, सं. पुं. दे. 'ख़र्चा' ।

खरज, सं. पुं. दे. 'षड्ज' ।

खरब, वि. (सं. खर्वम्) सं. पुं., अर्बशतकम् (१००००००००००००) २. अर्बदशकम् (१०००००००००००) ।

ख़रबूज़ा, सं. पुं. (सं. खर्बूजं) दशांगुलं, षड्-भुजा-भुजं-रेखा-मुखा, वृत्तकर्कटी ।

ख़रमस्ती, सं. स्त्री. (फ़ा.) दुष्टता, कुचेष्टा ।

खरमास, सं. पुं., दे. 'खरवाँस' ।

खरल, सं. पुं. (सं. खल्लः) उदू (लू) खलं, औषधमर्दनभाजनम् ।

—करना, क्रि. सं. चूर्ण् (चु.), चूर्णीकृ, पिष् (रु. प. अ.), क्षुद् (रु. उ. अ.) ।

खरवाँस, सं. पुं. (सं. खरमासः >) पौषचैत्रौ । (इनमें मांगलिक कार्य वर्जित हैं) ।

खरसान, सं. स्त्री. (सं. खरशाणः) शाण-शाणी,-भेदः ।

खरहरा, सं. पुं. (हिं. खर = तिनका + हरना) अश्वमार्जनी ।

—करना, क्रि. स., अश्वं मृज् (अ. प. वे.) ।

खरहा, सं. पुं., दे. 'खरगोश' ।

खरही, सं. स्त्री. (हिं. खर = घास) (घासादेः) राशिः (पुं.) २. घासभेदः ।

खरा, वि. (सं. खर = तीक्ष्ण) तिग्म, तीक्ष्ण २. अमिश्रित, अविकृत, स्वच्छ, विशुद्ध, पवित्र, उत्तम ३. भंगुर, भिदुर ४. निष्कपट, निश्छल ५. स्पष्ट-यथार्थ,-वादिन्-वक्तृ ६. भूरि, बहु ६. कठिन, कीकस । खरी (स्त्री.), विशुद्धा इ. ।

—खेल, सं.पुं. निष्कपटव्यवहारः, सरलाचरणं ।

—पन, सं. पुं. विशुद्धता, पवित्रता, उत्तमता, ऋजुता, निष्कपटता इ. ।

खराई, सं. स्त्री. दे. 'खरापन' ।

ख़राद, सं. पुं. (अ. खर्रात से फ़ा. खर्राद) भ्रमयंत्रं, कुंदः-दं, भ्रमः, भ्रमिः (स्त्री.), चक्रं, यंत्रकम् ।

ख़रादना, क्रि. स. कुन्देन संस्कृ. ।

ख़रादी, सं. पुं. (फ़ा. ख़र्राद) कुंदिन् , चक्रिन् ।

ख़राब, वि. (अ.) निकृष्ट, गर्ह्य, निंद्य, हीन २. दीन, दुर्गत ३. पतित, च्युत ४. दुष्ट, पापिन् ।

—करना, क्रि. स. मलिनी-कलुषी-आविली,-कृ २. सत्पथात् भ्रंश् (प्रे.), कुमार्गे प्रवृत् (प्रे.) ।

ख़राबात, सं. पुं. (अ.) मदिरालयः २. द्यूतगृहम् ३. वेश्यावीथी ।

ख़राबाती, सं. पुं. (अ.) मद्यपः २. द्यूत कितवः ४. वेश्यागामिन् ।

ख़राबी, सं. स्त्री. (अ.) दोषः, अ... २. दुष्टता, नीचता ३. दुर्दशा, दुर्गतिः (...

खरारि(री), सं. पुं. (सं.-रिः पुं.) र... २. श्रीकृष्णः ३. विष्णुः ।

ख़राश, सं. स्त्री. (फ़ा.) दे. 'खरोंच' ।

खरिया, सं. स्त्री., दे. 'खड़िया' ।

खरिहान, सं. पुं. दे. 'खलियान' ।

खरी, सं. स्त्री. (सं.) गर्दभी, रासभी ।

ख़रीद, सं. स्त्री. (फ़ा.) क्रयः, मूल्येन ग्रहणं २. क्रीतपदार्थः ।

—व फ़रोख़्त, सं. स्त्री. (फ़ा.) क्रयविक्रयौ (द्वि.) ।

ख़रीदना, क्रि. स. (फ़ा. ख़रीदन) क्री (क्र्. उ. अ.), मूल्येन अधिगम् अथवा लभ् (भ्वा. आ. अ.) ।

ख़रीदार, सं. पुं. (फ़ा.) क्रयिकः, क्रेतृ (पुं.), ग्राहकः २. इच्छुकः, अभिलाषिन् (पुं.) ।

ख़रीदारी, सं. स्त्री. (फ़ा.) क्रयः, मूल्येनादानं ।

खरीफ़, सं. स्त्री. (अ.) शारदं-शारदीयं-शर-त्कालीनं शस्यं ।

खरोंच, सं. स्त्री. (सं. क्षुर् = खुरचना >) ईषत्क्षतं, त्वग्व्रणः ।

खरोंचना, क्रि. स. (पूर्व.) खुर-क्षुर् (तु. प. से.) वि-अव-दॄ (प्रे.), (नखेन) क्षण् (त. उ. से.) अंक् (चु.)-लिख् (तु. प. से.) ।

खरोट, सं. स्त्री., दे. 'खरोंच' ।

खरोटना, क्रि, स. दे. 'खरोंचना' ।

ख़र्च, सं. पुं. (अ. ख़र्ज) व्ययः, धन,-त्यागः-व्ययः-उत्सर्गः, विनियोगः २. मूल्यं, अर्घः, अर्हा ।

—करना, क्रि, स. दे. 'ख़रचना' ।

—होना, क्रि, अ., व्यय्-विसृज्-विनियुज् (सब कर्म.) क्षयं-व्ययं या (अ. प. अ.) ।

ख़र्चना, क्रि. स. दे. 'ख़रचना' ।

ख़र्चा, सं. पुं. (अ. ख़र्ज) दे. 'ख़र्च' २. अभि-योग-कार्य-व्यवहारपद,-व्ययः ।

ख़र्चीला, वि. (हिं ख़र्च) व्ययशील, अति-व्ययिन् , अमितव्यय ।

खर्जूर, सं. पुं. (सं.) दे. 'खजूर' २. वृश्चिकः, द्रोणः । (सं. न.) रजतं २. दे. 'हरताल' ।

. पुं. (सं.) दे. 'खप्पर'।
पुं., दे. 'खरब २. दे. 'खर्व'।
. पुं., दे. 'ख़रबूज़ा'।
. पुं. (अनु.) घर्घरः।
मरना या लेना, क्रि. अ., घर्घरायते, घर्घरशब्दं कृ, प्रगाढं स्वप् (अ. प. अ.)।

ख़ल, वि, (सं.) क्रूर, नृशंस २. अधम, नीच ३. दुष्ट, दुर्वृत्त ४. पिशुन ५. निर्लज्ज ६. छलिन्।
सं. पुं., दुर्जनः २. सूर्यः ३. तमालवृक्षः ४. पृथिवी ५. स्थानं ६. उलू (दू) खलं ७.-८. दे. 'खलियान' तथा 'तलछट'।

ख़लक़, सं. पुं. (अ.) जीवाः-प्राणिनः (बहु.) २. जगत् (न.), संसारः।

ख़लक़त, सं. स्त्री. (अ.) सृष्टिः (स्त्री.), संसारः २. जनौघः, जनसंमर्दः।

खलड़ी, सं. स्त्री. (हिं. खाल) त्वच् (स्त्री.), त्वचा, त्वचं, त्वचस् (न.), छदिस् (स्त्री.), संछादनी, असृग्धरा २. (पशुओं की) चर्मन् (न.) ३. (मरे पशुओं की) अजिनं, दृतिः, कृत्तिः (स्त्री.) ४. शिश्नाग्रचर्मन् (न.)।

खलता, सं. स्त्री. (सं.) कुचेष्टा, दुष्टता, दुर्वृत्तता, खलत्वम्।

खलना, क्रि. अ. (सं. खर = तीक्ष्ण >) अनुचित-अयुक्त-अयोग्य-अनुपपन्न (वि.) प्रतिभा (अ. प. अ.)-दृश् (कर्म.)।

खलबल, सं. स्त्री. (अनु.) क्षोभः विप्लवः, अशांतिः-अनिर्वृतिः (स्त्री.), प्रकोपः, कलहः, २. कोलाहलः, उत्क्रोशः ३. दे. 'कुलबुलाहट'।

खलबलाना, क्रि. अ. (हिं खलबल) बुदबुदायते (ना. धा.), दे. 'उबलना' २. क्षुभ् (दि. प. से., क्र्. प. से.), क्षुब्ध-विह्वल- (वि.) + भू ३. दे. 'कुलबुलाना'।

खलबली, सं. स्त्री., दे. 'खलबल'।

ख़लल, सं. पुं. (अ.) विघ्नः, अंतरायः, बाधा।

ख़लास, सं. पुं. (अ.) मोक्षः, मुक्तिः (स्त्री.), उद्धारः। वि., मुक्त, उद्धृत, निस्तीर्ण २. अवसित, समाप्त।

ख़लासी, सं. स्त्री. (अ.) उद्धारः, निस्तारः, मोक्षः। सं. पुं., पटमंडपरोपकः २. भारवाहः ३. पोतभृत्यः।

खलियान, सं. पुं. (सं. खल + स्थान) खलाधानं, खलः-लं २. धान्यागारं, कुशूलः ३. राशिः (पुं.) चयः।

खलियाना[1], क्रि. स. (हिं. खाल) निस्त्वचयति (ना. धा.) निस्त्वचीकृ, चर्मन् (न.) अपनी-निर्हृ (दोनों भ्वा. उ. अ.)।

खलियाना[2], क्रि. स. (हिं. खाली) शून्यी-रिक्ती,-कृ, रिच् (रु. उ. अ.)।

ख़लिश, सं. स्त्री. (फ़ा.) वेदना, पीडा २. वैरं, द्वेषः।

खलिहान, सं. पुं., दे. 'खलियान'।

खली-ल्ली, सं. स्त्री. (सं. खली) तैलकिट्टं, तिलकल्कं, पिण्याकः, खलिः (पुं.)।

ख़लीज, सं. स्त्री. (अ.) दे. 'खाड़ी'।

ख़लीफ़ा, सं. पुं. (अ.) अध्यक्षः, अधिकारिन् २. यवननृपवंशविशेषः ३. वृद्धजनः ४. सूदः, पाचकः ५. सौचिकः सूचिकः ६. नापितः।

खलु, अव्य. (सं.) निश्चयनिषेधजिज्ञासाऽनुनयादिबोधकमव्ययम्।

खलेल, सं. पुं. (सं. खलितैलं) सुगन्धतैल-किट्टम्।

ख़ल्क़, सं. स्त्री., दे. 'खलक'।

ख़ल्त-मल्त, दे. 'गडबड्ड'।

खल्ल, सं. पुं. (सं.) दे. 'खरल' २. चर्मन् (न.) ३. गर्तः ४. चातकः ५. दृतिः (स्त्री.)।

खल्लड़, सं. पुं. (सं.) चर्मन् (न.) २. अजिनं जलभस्त्रा ३. वृद्धः, जरठः, स्थविरः।

खल्ला, सं. पुं. (सं. खल्लः=चमड़ा >) जीर्णोपानह् (स्त्री.), पुराणपादत्रम्।

खल्लि (ल्ली)ट,-खल्वाट, वि. (सं.) दे. 'गंजा'। सं. पुं., दे. 'गंजापन'।

खवा, सं. पुं., दे. 'कंधा'।

खवैया, सं. पुं. (हिं. खाना) भक्षकः, खादकः, भोक्तृ (पुं.)।

खश, सं. पुं. दे., 'ख़स'।

ख़शख़(ख़ा)श, सं. पुं. दे. 'खसखस'।

खस, सं. स्त्री. (फ़ा. खस) उशीरः-रं, नलदं, जलवासं, वीरणमूलं, सेव्यं, शीत-सुगन्धि,-मूलकं, वीरं, वीरभद्रं, हरिप्रियम्।

खसकना, क्रि. अ. (अनु.) दे. 'खिसकना'।

खसकाना, क्रि. स., दे. 'खिसकाना'।

खसखस, सं. स्त्री. (सं. खस्खसः) खसतिलः, सूक्ष्म,-तंडुलः-बीजः, सुबीजः।
—रस, सं. पुं. (सं.) दे. 'अफ़ीम'।
खसखसा, वि. (अनु.) शुष्कचूर्णरूप, सिकतिल, शर्करिल।
खसखास, सं. स्त्री., दे. 'खसखस'।
ख़सम, सं. पुं. (अ.) पतिः (पुं.), भर्तृ (पुं.) २. स्वामिन् (पुं.), सेव्यः, नाथः।
ख़सरा[1], सं. पुं. (अ.) क्षेत्रसूची, केदारलेख्यम्।
ख़सरा[2], सं. पुं. (फ़ा. ख़ारिश) रोमान्तिका, त्वग्रोगभेदः २. खर्जू-कंडूति,-भेदः।
खसलत, सं. स्त्री. (अ.) प्रकृतिः (स्त्री.), स्वभावः, २. दे. 'आदत'।
ख़सारा, सं. पुं. (अ.) हानिः-क्षतिः (स्त्री.), दे. 'घाटा'।
खसिया, वि. (अ. ख़स्सी) लुप्तवृषण, छिन्नमुष्क। सं. पुं., क्लीवः, पंढः २. अजः।
खसोट, सं. स्त्री. (हिं. खसोटना) बलात्-अकस्मात्-सहसा ग्रहणं-अपहरणं-आच्छेदनं २. बलात् उत्पाटनं-उन्मूलनम्।
खसोटना, क्रि, स. (सं. कृष्ट>) असम्यक् उन्मूल्-उत्पट् (चु.)-कृष् (भ्वा. प. अ.) २. बलात्-सहसा अपहृ (भ्वा. उ. अ.)-आच्छिद् (रु. प. अ.)-ग्रह् (क्र. उ. से.)।
खसोटी, सं. स्त्री., दे. 'खसोट'।
ख़स्ता, वि. (फ़ा. ख़स्तः) भिदुर, भंगुर, भिदेलिम २. क्षत, त्रुटित।
—कचौड़ी, सं. स्त्री., भिदुर-स्निग्ध,-सुपिष्टिका-शष्कुली।
—दिल, वि. भग्न,-चित्त-हृदय।
—हाल, वि., दुर्गत, दरिद्र, दुःखित।
ख़स्सी, सं. पुं. (अ.) छिन्नमुष्कः अजः-छागः २. पंढः, क्लीवः। वि., लुप्तवृषण, छिन्नमुष्क।
—करना, क्रि. स., वृषणौ छिद् (रु. प. अ.) उत्पट् (चु.)।
ख़ाँ, सं. पुं. (तातारी, काङ्=सरदार) स्वामिन् (पुं.), अधीशः २. पठानजातेः उपाधिः (पुं.)।
—साहब,-बहादुर, सं. पुं., उपाधिभेदौ।
खांखर, वि. (सं. खं=छिद्र>) सच्छिद्र, सरंध्र २. रिक्त-शून्य,-गर्भ, अंतःशून्य।
खांगड़-ड़ा, वि. (सं. खड्गः>) शृंगिन्, विषाणिन् २. सशस्त्र ३. सबल ४. उद्दण्ड।
खाँचा, सं. पुं. (सं. कर्षणम्>) महा-,पेटकः-करंडः-कंडोलः २. बृहद्,- जरः-पंजरम्।
खांड़, सं. स्त्री. (सं. खण्डम्) अशोधित-असंस्कृत,-सिता-शर्करा।
खांडव, सं. पुं. (सं. न.) कुरुक्षेत्रप्रदेशे वनविशेषः।
—प्रस्थ, सं. पुं. (सं.) प्राचीननगरविशेषः।
खाँड़ा[1], सं. पुं. (सं. खड्गः>) द्विधार-, खडगः-असिः-निस्त्रिंशः-कृपाणः।
खांडा[2], सं. पुं. (सं. खंडः-डं) भागः, अंशः।
खाँसना, क्रि. अ. (सं. कासनं) कास् (भ्वा. प. से.), क्षु (अ. प. से.)।
खाँसी, सं. स्त्री. (सं. कासः) काशः, उत्कासः, क्षवथुः (पुं.)।
खाई, सं. स्त्री. (सं. खानिः>) परिखा, खातं, खातकम्।
खाऊ, वि. (हिं. खाना) अत्याहारिन्, बहुभोजिन्, अद्मर, घस्मर।
—उड़ाऊ, वि., मुक्तहस्त, अर्थनाशिन्।
ख़ाक, सं. स्त्री. (फ़ा.) धूलिः (पुं. स्त्री.), धूली, पांशुः सुः, रजस् (न.), रेणुः २. भस्मन् (न.), भसितं, भूतिः (स्त्री.)।
—रोब, सं. पुं., खलपूः (पुं.), संमार्जकः।
—सार, वि., नम्र, विनीत।
—सारी, सं. स्त्री., नम्रता, विनयः।
ख़ाका, सं. पुं. (फ़ा.) बाह्यरे(ले)खा, बाह्याकारः २. अपरिष्कृतालेख्यं, पांडुलेख्यं ३. प्रतिरूपं, प्रतिमानं ४. संकलनं, संख्यानम्।
—उड़ाना, मु., उप-अव,-हस् (भ्वा. प. से.)।
ख़ाकी, वि. (फ़ा.) मार्तिक, मृण्मय २. धूलिरजो,-वर्ण-रंग ३. सं. स्त्री., जलहीन-अनासिक्त,-भूमिः (स्त्री.)।
खाज, सं. स्त्री. [सं. खर्जुः (पुं.)] खर्जूः (स्त्री.), कंडूः-कंडूतिः (स्त्री.), खसः, पामा, विचर्चिका।
—होना, क्रि. अ., कंडूतिं-खसं अनुभू।
कोढ़ की खाज, मु., क्षते क्षारं, गंडे स्फोटकः।
खाजा, सं. पुं. (सं. खाद्यं) भक्ष्य-भोज्य-खाद्य,-वस्तु (न.)-पदार्थः २. भोजनं ३. मिष्टान्नभेदः।
खाट, सं. स्त्री. (खाटः>) खट्वा, शयनम्।

—खटोला, सं. पुं. गृह,-उपस्करः-परिच्छदः, पारिणाह्यम् ।

खाड़ी, सं. स्त्री. (सं. खातं >) समुद्रः, वंकः, अखातः-तम् ।

गेह, सं. पुं. (सं. पुं. न.) दे. 'गृह' ।
गेहुँअन, सं. पुं. (हिं. गेहूँ) गोधूमकः, फणिभेदः ।
गेहूँ, सं. पुं. (सं. गोधूमः) सुमनस् (पुं.), बहुदुग्धः, यवनः, म्लेच्छभोजनः, सितशिंबिकः, निस्तुषः, क्षीरिन् , अपूपः, रसालः २. नागरंगः ।
गेहुँआ, वि. (हिं. गेहूं) गोधूम,-वर्ण-रंग, २. गोधूममय, गोधूम-(समास में) २. घासभेदः ।

गैंड़ा, सं. पुं. (सं. गंडः) गंडकः, खड्गिन्, वज्रचर्मन् (पुं.), तुंग-क्रोडी,-मुखः, वार्ध्री-(ध्री)णसः, खड्गमृगः ।

गैंत-ती, सं. स्त्री. (देश.) दे. 'कुदाल' ।

ग़ैज़, सं. पुं. (अ.) अति,-कोपः-क्रोध,-रोषः ।

ग़ैब, सं. पुं. (अ.) परोक्ष-तिरोहित,-पदार्थः । वि., गुप्त, तिरोहित ।

—दाँ, वि., परोक्षविद्, सर्वज्ञ ।

गैवर, सं. पुं. (सं. गजवरः) गजोत्तमः, गजेन्द्रः, करीन्द्रः ।

ग़ैबी, वि. (अ. गैब) गुप्त, प्रच्छन्न, अज्ञात ।

गैया, सं. स्त्री. दे. 'गाय' ।

ग़ैर, वि. (अ.) अन्य, इतर, पर, अपर २. भिन्न, व्यतिरिक्त । सं. पुं. आगंतुकः, अभ्यागतः ।

—आबाद, वि., निर्जन, वसतिशून्य ।

—मनक़ूला, वि., स्थिर, स्थावर, अचर-ल ।

—मामूली, वि., विशिष्ट, असाधारण, विशेष ।

—मुनासिब,-वाजिब, वि., अनुचित, अयोग्य ।

—मुमकिन, वि., असंभव, अशक्य ।

—शख़्स, सं. पुं., परः, अनात्मीयः ।

—हाज़िर, वि., अनुपस्थित, अविद्यमान ।

—हाज़िरी, वि., अनुपस्थितिः. (स्त्री.) अविद्यमानता ।

गैरत, सं. स्त्री. (अ.) लज्जा, त्रपा ।

गैरिक, सं. पुं. (सं. न.) दे. 'गेरू' ।

ग़ैरीयत, सं. स्त्री. (अ.) अन्यता, परता, इतरता, अपरता ।

गैल, सं. स्त्री., दे. 'गली' ।

गैलन, सं. पुं. (अ.) *गैलनम्, द्रवद्रव्यपरिमाणभेदः, अर्द्ध प्रस्थः ।

गैस, सं. स्त्री. (अं.) वातिः (स्त्री.), वाष्पः ।

गोंड़ा, सं. पुं. (सं. गोष्ठं) व्रजः, अवरोधः, शाला २. ग्रामः ३. विस्तीर्णमार्गः ४. अजिरम् ।

गोंद, सं. पुं. (सं. कुंदः >, अथवा हिं. गूदा) निर्यासः ।

—दानी, सं. स्त्री. निर्यासधानी ।

गोंदीला, वि. (हिं. गोंद) निर्यास,-मय-तुल्य, सांद्र, स्यान ।

गो', सं. स्त्री. (सं.) दे. 'गाय' २. किरणः ३. इंद्रियं ४. वाच् (स्त्री.) ५. सरस्वती ६. नेत्रं ७. विद्युत् (स्त्री.) ८. पृथ्वी ९. दिशा १०. जननी ११. जिह्वा । सं. पुं. (सं.) वृषभः २. नंदीगणः ३. घोटकः ४. सूर्यः ५. चंद्रः ६. बाणः ७. गायकः ८. आकाशः-शं ९. स्वर्गः १०. जलं ११. लोमन् (न.) १२. शब्द १३. नवांकः ।

—कर्ण, सं. पुं. (सं.) धेनुश्रवणं २. शैवतीर्थविशेषः । ३. अश्वतरः ४. सर्पभेदः ५. किष्कुः-वितस्तिः (पुं. स्त्री.) (हिं. बित्ता) ५. मृगभेदः । वि., लंबकर्ण ।

—कुल, सं. पुं. (सं. न.) गोसमुदायः २. गोष्ठं ३. ग्रामविशेषः ।

—ग्रास, सं. पुं. (सं.) गो,-कवलः-(-लं)-पिंडः ।

—घात, सं. पुं. (सं.) गो,-हत्या-वधः-मारणम् ।

—घातक, सं. पुं. (सं.) गोघातिन्, गोघ्नः ।

—चर, वि. (सं.) इन्द्रियग्राह्य, इन्द्रियगम्य । सं. पुं., रूपादिविषयाः २. शाद्वलं, तृणावृतभूमिः (स्त्री.) ३. प्रांतः, देशः ।

—चरी, सं. स्त्री. (सं. गोचर >) भिक्षावृत्तिः (स्त्री.) ।

—ऽतीत, वि., अगोचर, अतींद्रिय, इन्द्रियातीत, इंद्रियागोचर ।

—दान, सं. पुं. (सं. न.) धेनु-गो,-विसर्जनं-त्यागः ।

—धू(ली)लि, सं. स्त्री. (सं.) संध्या-सायं,-कालः-समयः-वेला ।

—धेनु, सं. स्त्री. (सं.) दुग्धवती गौः (स्त्री.) ।

—पाल, सं. पुं. (सं.) गोपः, गोपालकः । २. श्रीकृष्णः ।

—मय, सं. पुं. (सं. न.) गो,-मलं-पुरीषं-विष्ठा।

—मुख, सं. पुं. (सं. न.) धेनुवदनं २. शंखभेदः । ३. दे. 'नरसिंहा' ४. गोमुखी, जपमालाकोषः । ५. चौरकृतं कुड्यरंध्रम् ।

—मूत्र सं. पुं. (सं. न.) गो,-जलं-प्रस्रावः-द्रवः-निष्यंदः ।

—मेद,-मेदक, सं. पुं. (सं.) राहुरत्नं, पुष्परागः, पीताश्मन् (पुं.) ।

—मेध, सं. पुं. (सं.) यज्ञभेदः ।

—रस, सं. पुं. (सं.) दुग्धं २. दधि (न.) ३. तक्रं ४. इन्द्रियसुखम् ।

—रोचन, सं. पुं. (सं.-चना) शुभा, शोभा, शोभना, रोचनी, शिवा, मंगला, पीता, रोचना ।

—लोक, सं. पुं. (सं.) श्रीकृष्णस्य नित्यधामन् (न.)।
—वर्द्धन, सं. पुं. (सं.) व्रजभूमौ पर्वतविशेषः।
—वर्द्धनधर, सं. पुं. (सं.) गोवर्धनधारिन् श्रीकृष्णः।
—विंद, सं. पुं. (सं.) श्रीकृष्णः।
—शाला, सं. स्त्री. (सं.) गोष्ठं, गोगृहं, व्रजः।
—साईं, सं. पुं., दे. 'गोस्वामी'।
—स्वामी, सं. पुं. (सं.-मिन्) गोपतिः २. प्रभुः।
—हत्या, सं. स्त्री. (सं.) दे. 'गोघात'।
गो[2], गो कि, अव्य. (फ़ा) अपि, यद्यपि।
गोका, सं. स्त्री. (सं.) लघु,-गौः-धेनुः (दोनों स्त्री.) २. वनधेनुः (स्त्री.), भिल्लगवी।
गोखरु, सं. पुं. (सं. गोक्षुरः) त्रिकंटः-टकः, गोकंटः-टकः (क्षुपविशेषः) २. तस्य कंटकः-कं ३. कटक-वलय,-प्रकारः।
गोचना, गोचनी, सं. पुं. सं. स्त्री. (हिं. गोहूँ + चना) गोधूमचणः-णम्, *गोचणः-णं-णी।
गोज़, सं. पुं. (फ़ा.) अपानवायुः, पर्दः।
गोजर, सं. पुं. दे. 'कनखजूरा'।
गोजरा, सं. पुं. (हिं. गेहूँ + जव) गोधूमयवाः।
गोझा, सं. पुं. (सं. गुह्यकः) १. पक्वान्नभेदः। २. वंश-काष्ठ,-कीलः ३. दे. 'जेब' ४. घासभेदः।
गोट[1], सं. स्त्री. (गोष्ठ > ?) वस्तयः-दशाः (स्त्री. बहु.), वसनप्रान्तः।
गोट[2], सं. स्त्री. (सं. गुटिका) शारः, शारिः (पुं.), खेलनी।
गोटा, सं. पुं. (हिं. गोट) सुवर्ण-रजत,-जाला-भरणं-वस्त्राभरणम्।
गोटी, सं. स्त्री. (गुटिका) पाषाणखंडः-डं, शर्करा २. दे. 'गोट[2]' ३. मसूरी-रिका, शीतलारोगः।
गोठ, सं. स्त्री. (सं. गोष्ठं) गोशाला २. पर्यटनं, भ्रमणं ३. श्राद्धभेदः।
गोड़ना, क्रि. स. दे. 'खोदना'।
गोड़ा, सं. पुं. दे. 'घुटना'।
गोणी, सं. स्त्री. (सं.) शाण,-कोषः-पुटः, स्यू-(स्यो)तः, प्रसेवः २. द्रोणीपरिमाणम्।
गोत, सं. पुं. (सं. गोत्रं) दे. 'गोत्र' २. गणः, समूहः।
ग़ोता, सं. पुं. (अ.) निमज्जनं, अवगाहः।
—देना, क्रि. स., व. 'गोता मारना' के प्रे. रूप।
—मारना, क्रि. अ. वि-अव-गाह् (भ्वा. आ. वे.) निमज्ज् (तु. प. अ.)।
—ख़ोर, सं. पुं. (अ. + फ़ा.) अवगाहकः, निमंक्तृ (पुं.)।
गोत्र, सं. पुं. (सं. न.) कुलं, वंशः, अन्वयः २. समूहः ३. संपत्तिः (स्त्री.) ४. बन्धुः ५. जातिविभागः।
—भिद्, सं. पुं. (सं.) इन्द्रः, देवराजः।
गोदंत, सं. पुं. (सं. न.) हरितालम्।
गोद, सं. स्त्री. (सं. क्रोडं) अंकः, उत्संगः।
—लेना, मु., पुत्रीकृ, (पुत्रत्वेन) परिग्रह् (क्र्. प. से.)।
गोदना, क्रि. स. (हिं. खोदना) सूच्या त्वचं रंज् (प्रे.), त्वचमनुविध्य पत्ररेखां निविश् (प्रे.) २. गोबीजं निविश् (प्रे.) ३. सूच्यग्रेण व्यध् (दि. प. अ.) ४. असकृत् प्रणुद्-प्रवृत् (प्रे.)। सं. पुं., त्वचि सूचीखातम् कृष्णचिह्नम्।
गोदनी, सं. स्त्री. (हिं. गोदन) वेधनी, सूचिः-ची (स्त्री.)।
गोदाम, सं. पुं. (अं. गोडाउन) पण्य-अगारं-आधानं, भाण्डागारम्।
गोदावरी, सं. स्त्री. (सं.) गोदा, गौतमी।
गोदी, सं. स्त्री., दे. 'गोद'।
गोधा, सं. स्त्री. (सं.) तला, तलं, ज्याघातवारणा २. गोधिका, निहाका।
गोधुम, गोधूम, सं. पुं. (सं.) दे. 'गेहूं' २. नागरंगः।
गोन, सं. स्त्री., दे. 'गोणी'।
गोनिया, सं. पुं., दे. 'गुनिया'।
गोप, सं. पुं. (सं.) आभीरः, गोपालः, २. नृपः ३. उपकारकः।
गोपन, सं. पुं. (सं. न.) गूहनं, गोहनं, प्रच्छादनं, संवरणम्।
गोपनीय, वि. (स.) गुह्य, संवरणीय, रहस्य, गोप्य।
गोपिका, सं. स्त्री. (सं.) दे. गोपी।
गोपी, सं. स्त्री. (सं.) गोपिका, गोपपत्नी, आभीरी, गोपालिका।
गोफन-ना, सं. पुं. (सं. गोफणा) सृगः, भिंदि(द)पालः।

गोबर, सं. पुं. (सं. गोमयं) दे. 'गोमय'।

—गणे(ने)श, वि., कुदर्शन, कुरूप। सं. पुं., मूर्खः, जडः।

गोबरी, सं. स्त्री. (हिं. गोबर) गोमयलेपः।

—करना, क्रि. स., गोमयेन लिप् (तु. प. अ.)।

गोबरैला, | **गोबरौंदा,** | सं. पुं. (हिं. गोबर) दे. 'गुबरैला'।

गोभी, सं. स्त्री. (सं. गोभी = घासविशेष >) गोभी।

गांठ—, ग्रंथिगोभी।

पात—, बंद—, } मुकुल-पत्र,-गोभी।

फूल—, मध्यपुष्पा, बृहद्दला, फुल्लगोभी।

गोया, क्रि, वि. (फ़ा.) इव, यथा, मन्ये (दि. आ. अ.)।

गोरखधंधा, सं. पुं. (हिं. गोरख + धंधा) गहन-जटिल,-कार्यं २. कूटं, प्रहेलिका ३. अशक्यनिर्गमः प्रदेशः।

गोरखा, सं. पुं. (सं. गोरक्षकः) नयपालदेशे प्रांतविशेषः २. तत्प्रान्तवासिन्।

गोरखाली, सं. स्त्री. (सं. हिं. गोरखा) नयपालदेशस्य जातिविशेषः, *गोरक्षाली २. गोरक्षालीजातेर्भाषा, *गोरक्षाली।

गोरा, वि. (सं. गौर) शुक्ल, श्वेत, सित, विशुद्ध। सं. पुं., गौरः, शुक्लः, श्वेतः, सितः, २. युरोपादिवासिन्, गौरः।

गोराई, सं. स्त्री. (हिं. गोरा) गौरता, शुक्लता, श्वेतता, सितता।

गोरिल्ला, सं. पुं. (अफ्री.) वानरभेदः, वनमानुषप्रकारः।

गोरी, सं. स्त्री. (सं. गौरी) गौरा, शुक्ला, श्वेता, सुरूपिणी, सुन्दरी।

गोलंदाज, सं. पुं. (फ़ा.) शतघ्नीचालकः, गोलक्षेपकः।

गोल[1], वि. (सं.) वर्तुल, निस्तल, वृत्त, वृत्त-मंडल-चक्र-वलय,-आकार-आकृति-रूप २. अस्पष्ट, संदिग्ध, अनिश्चित। सं. पुं., घटः २. मूर्खः।

—गप्पा, सं. पुं. (-+अनु. गप) *गोलगप्पः।

—मटोल, वि., पीनवामन, खर्वस्थूल।

—मिर्च, सं. स्त्री. [सं. गोलमरि(री)चं] मरिचं, कोलं, कोलकम्।

—माल, मु., अस्तव्यस्तता, क्रमभंगः।

—माल करना, मु., छलेन आत्मसात् कृ २. व्यवस्थां नश् (प्रे.)।

गोल[2], सं. पुं. (अ.) गणः, समुदायः।

गोलक, सं. पुं. (सं.) पिटक-संपुट-मंजूषा,-प्रकारः-भेदः २. निष्कर्षणी (हिं. दराज़) ३. पत्यौ मृते जारजपुत्रः ४. कंदुकः ५. महन्मृत्पात्रं ६. कनीनिका ७. नेत्रगोलः ८. निधिः, राशिः ९. टंकपेटिका।

गोला, सं. पुं. (सं. गोलः) गोला-लं, वर्तुलः-लं २. चक्रं, मंडलं, वृत्तं ३. अग्न्यस्त्रं, गोलः, बंबः-बं ४. नारिकेलः-रः ५. वायुगोलः, उदर-रोगभेदः ६. धान्य,-हट्टः-विपणी ७. पशुवृंदं ८. सेतुबंधः ९. धान्यकुंभः।

—मारना, क्रि. स. गोलैः-बंबैः ध्वंस् (प्रे.)-चूर्ण् (चु.)।

गोलाई, सं. स्त्री. (सं. गोल >) वृत्तता, वर्तुलता, गोलत्वं, मंडलत्वम्।

गोलाकार, वि. (सं.) दे. 'गोल'[1]।

गोलार्द्ध, सं. पुं. (सं. न.) अर्द्धगोलः।

गोली, सं. स्त्री. (हिं. गोला) लघुगोलः, गोलकः २. सीसकगुलिका ३. गुटिका, वटिका, गुलिका ४. काच-मर्मरोपल,-गुलिका।

—मारना, क्रि. स., गुलिकाक्षेपेण हन् (अ. प. अ.)-क्षण् (त. उ. से.)।

गोल्ड, सं. पुं. (अं.) सुवर्णं, स्वर्णं, कनकम्।

गोल्डन, वि. (अं.) दे. 'सुनहला'।

गोविंद, सं. पुं. (सं.) श्रीकृष्णः।

गोशा, सं. पुं. (फ़ा.) कोणः २. दिशा ३. रहः-स्थानं, विविक्तम्।

गोश्त, सं. पुं. (फ़ा.) मांसं, आमिषम्।

—खोर, सं. पुं., मांस-आमिष,-भक्षिन्-आदः-भक्षकः।

गोष्ठ, सं. पुं. (सं. पुं. न.) गो,-स्थानं-शाला-गृहं, व्रजः २. वृंदं, समूहः ३. विमर्शः, मंत्रणा।

गोष्ठी, सं. स्त्री. (सं.) गोष्ठिः-समितिः (स्त्री.), सभा, समाजः, २. वार्तालापः ३. विमर्शः।

गोस्तना—नी, (सं.) द्राक्षा, मृद्वीका।

गोह, सं. स्त्री. (सं. गोधा) गोधिका, निहाका २. (गोह का बच्चा) गौधारः, गौधेरः, गौधेयः।

गोहरा, सं. पुं. (सं. गोहल्लं >) दे. 'उपला'।

गोहूँ, सं. पुं., दे. 'गेहूँ'।

गोक्षुर, सं. पुं. दे. 'गोखरू'।

गौं, सं. स्त्री. (सं. गमः >) प्रयोजनं, अर्थः, कार्यं २. अवसरः, कार्यकालः, अवकाशः।

गौ, सं. स्त्री., दे. 'गाय' तथा 'गो'।

ग़ौग़ा, सं. पुं. (अ.) कोलाहलः २. जनश्रुतिः (स्त्री.)।

गौड़, सं. पुं. (सं.) वंगप्रांतस्य भागविशेषः २.-३. ब्राह्मण-कायस्थ,-भेदः ४. गौडवासिन्।

गौण, वि. (सं.) अप्रधान, द्वितीय, अवर २. सहायक। (गौणी स्त्री.)।

गौतम, सं. पुं. (सं.) ऋषिविशेषः २ बुद्धः।

गौतमी, सं. स्त्री. (सं.) अहल्या २. कृपाचार्य-पत्नी ३. गोदावारी ४. दुर्गा।

गौनहार, सं. स्त्री. (हिं. गौन) नवोढ़ासहगा-मिनी।

गौनहारी, सं. स्त्री. (हिं. गाना) गात्री, गायनी, गायिका, गायकी।

गौना, सं. पुं. (सं. गमनं >) द्विरागमनं, वध्वाः पतिगृहे गमनम्।

गौर, वि. (सं.) दे. 'गोरा' (वि.)। सं. पुं. १.-२. रक्त-पीत,-रंगः ३. चंद्रः ४. सुवर्णं ५. कुंकुमम्।

ग़ौर, सं. पुं. (अ.) विचारः, चिंतनं, ध्यानम्।

—करना, क्रि. स., विचार् (प्रे.), चिंत् (चु.)

गौरव, सं. पुं. (सं. न.) महत्वं, महिमन् (पुं.) २. गुरुता, भारवत्त्वं ३. आदरः, सम्मानः ४. अभ्युत्थानम्।

गौरवान्वित, वि. (सं.) गौरवित, सगौरव, सम्मानित, आदृत।

गौरांग, सं. पुं. (सं.) विष्णुः २. कृष्णः ३. चैतन्यदेवः। वि. सित, श्वेत, शुक्ल २. यूरोपीय।

—महाप्रभु, सं. पुं. (सं.) चैतन्यदेवः।

गौरी, सं. स्त्री. (सं.) पार्वती, गौरा, गिरिजा २. ३. शुक्ला (नारी अथवा गौ)।

—शंकर, सं. पुं. (सं.) शिवः २. हिमालयस्य उच्चतमं शिखरम्।

गौहर, सं. पुं. (फ़ा.) दे. 'मोती'।

ग्यान, सं. पुं., दे. 'ज्ञान'।

ग्यारह, वि. (सं. एकादशन्)। सं. पुं., उक्ता संख्या तदंकौ (११) च।

ग्यारहवां, वि., एकादशः (पुं.), एकादशं (न.) (-वीं (स्त्री.) = एकादशी)।

ग्रंथ, सं. पुं. (सं.) पुस्तकं, शास्त्रं २. ग्रंथनं ३ धनम्।

—चुंबन, सं. पुं. (सं. न.) क्षिप्र-त्वरित-, पठनं-अध्ययनं, शीघ्रपाठः।

—संधि, सं. स्त्री. (सं. पुं.) अध्यायः, परिच्छेदः।

—साहब, सं. पुं., शिष्यमतधर्मग्रंथः।

—कार, सं. पुं. (सं.) पुस्तक-ग्रंथ,-लेखकः-संपादकः-कर्तृ-प्रणेतृ।

ग्रंथन, सं. पुं. (सं. न.) ग्रथनं, गुंफनं, २. प्रणयनं, निबंधनम्।

ग्रंथि, सं. स्त्री. (सं. पुं.) दे. 'गाँठ'।

—बंधन, सं. पुं. (सं. न.) दे. 'गाँठ जोड़ना'

ग्रंथित, वि. (सं.) ग्रथित, गु(गुं)फित २. ग्रंथिमत्, ग्रंथिल।

ग्रसन, सं. पुं. (सं. न.) भक्षणं, निगलनं, २. ग्रहणं, धरणं ३. सूर्यादेः ग्रहणं, उपरागः।

ग्रसना, क्रि. स. (सं. ग्रसनं) (हस्तेन) धृ (भ्वा. उ. अ., चु.)-ग्रस्-अवलंब् (भ्वा. आ. से.) ग्रह् (क्र्. प. से.)।

ग्रसित, } **ग्रस्त**, } वि. (सं. ग्रस्त) धृत, गृहीत, उपात्त २. पीडित ३. भक्षित, निगीर्ण।

ग्रह, सं. पुं. (सं.) नक्षत्रभेदः।

ग्रहण, सं. पुं. (सं. न.) उपरागः, ग्रहः, ग्रासः, ग्रहपीडनं २. आदानं, अंगीकरणम्।

ग्राफ़, सं. पुं. (अं.) बिन्दुरेखाचित्रम्।

ग्राम, सं. पुं. (सं.) दे. 'गांव'।

ग्रामीण, सं. पुं. (सं.) ग्रामिकः, ग्रामिन्, ग्रामवासिन्।

ग्रामोफोन, सं. पुं. (अं.) ध्वनिलेखनवाद्यम्।

ग्राम्य, वि. (सं.) ग्रामीण, ग्रामिक, ग्रामीय २. असभ्य, अशिष्ट।

ग्रास, सं. पुं. (सं.) कवलः, पिंडः।

ग्राह, सं. पुं. (सं.) अवहारः, जलहस्तिन्।

ग्राहक, सं. पुं. (सं.) क्रेतृ (पुं.), क्रयिन्, क्रयिकः।

ग्राह्य, वि. (सं.) उपादेय, स्वीकार्य, २. ज्ञेय।

ग्रीवा, सं. स्त्री. (सं.) दे. 'गर्दन'।

ग्रीष्म, सं. पुं. (सं.) ग्रीष्म,-समयः-कालः, निदाघः, उष्णः-णकः, तपः, तापनः, उष्णा,-उप-गमः-आगमः-कालः।

ग्रीस सं. पुं. (अं.) यवनदेशः।

ग्रेटब्रिटेन, सं. पुं. (अं.) आंग्लद्वीपसमूहः ।
ग्रेविटी, सं. स्त्री. (अं.) भ्वाकृष्टिः (स्त्री.) ।
स्पेसिफिक—, आपेक्षिकभारः ।
ग्रेविटेशन, सं. पुं. (अं.) गुरुत्वाकर्षणम् ।
ग्रेजुएट, सं. पुं. (अं.) स्नातकः ।
ग्लाईकोजन, सं. पुं. (अं.) शर्कराजनम् ।
ग्लानि, सं. स्त्री. (सं.) विषादः, अवसादः, ग्लानिः (स्त्री.) खेदः ।
ग्लूकोज़ सं. पुं. (अं.) द्राक्षौजम् ।
ग्लोब, सं. पुं. (अं.) गोलम् ।
ग्वाल-ग्वाला, सं. पुं. (सं. गोपालः) गोपः, आभीरः ।
ग्वालिन, सं. स्त्री. (हिं. ग्वाला) गोपी, गोपिका, आभीरी ।

घ

घ, देवनागरीवर्णमालायाश्चतुर्थो व्यंजनवर्णः, घकारः ।
घंगोलना, घंघोरना, घंघोलना, क्रि. स., (हिं. घना + घोलना) विली (प्रे. विलापयति-ते), विद्रु (प्रे.) २. आविली-कलुषी,-कृ ।
घंट, सं. पुं. (सं. घटः) कुम्भः ।
घंट, घंटा, सं. पुं. (सं. घण्टा) कांस्यनिर्मितवाद्यभेदः २. घंटा,-शब्दः-रवः ३. होरा, नाडिका, अहोरात्रस्य चतुर्विंशतितमो भागः ४. महाघटी ।
—घर, सं. पुं., घंटालयः, घंटागृहम् ।
घंटिका, सं. स्त्री. (सं.) क्षुद्रघंटा २. किंकि(क)णी ।
घंटी, सं. स्त्री. (हिं. घंटा) घर्घरा, घर्घरिका, क्षुद्रघंटा, घंटिका, २. घंटिकाशब्दः ३. किंकिणीणीका ४. नूपुरं ५. कृकाग्रं, स्वरयन्त्रम् ६. अलिजिह्वा, लम्बिका ।
घंट्ठु, सं. पुं. (सं.) तापः, दाहः, २. प्रकाशः, आलोकः, ३. गजघंटा ।
घघरा, सं. पुं. (अनु.) बृहच्चंडातकः-कम् ।
घघर , सं. स्त्री. (हिं. घघरा) चलनी, क्षुद्र,-चंडातकः-कं, घर्घरी ।
घचाघच, सं. स्त्री. (अनु.) घचघच,-शब्दः-ध्वनिः (पुं.) । वि., स्थूल, पीन ।
घट[1], सं. पुं. (सं.) कुंभः, कलशः-शं (-सः-सी), पुटग्रीवः, घटी, कलशी, कुटः-टं, ...नपः २. शरीरं ३. हृदयम् ।
घट[2], सं. स्त्री. (हिं. घटना) न्यूनता, अल्पता ।
—बढ़, सं. स्त्री., न्यूनताधिकता ।
घटक, सं. पुं. (सं.) मध्यस्थः, माध्यमिकः, मध्यवर्तिन् २. कुलाचार्यः २. योजकः ४. घटः ५. परविवाहसाधकः ।
घटका, सं. पुं. (अनु.) मरणोन्मुखस्य कृच्छ्र,-श्वासः-श्वसितं-श्वासप्रश्वासम् ।
घटती, सं. स्त्री. (हिं. घटना) न्यूनता, अवनतिः (स्त्री.), क्षीणता २. अनादरः, मानहानिः (स्त्री.) ।
घटन, सं. पुं (सं. नं.) उपस्थितिः (स्त्री.), उपागमः २. रचनं, निर्माणम् ।
घटना[1], क्रि. अ. (सं. घटनं) घट्-वृत् (भ्वा. आ. से.), उपस्था (भ्वा. उ. अ.), समापद् (दि. आ. अ.), उपनम् (भ्वा. प. अ.) २. युज् (कर्म.), उपपद् (दि. आ. अ.) । सं. स्त्री. (सं.) प्रसंगः, वृत्तं, वृत्तांतः, व्यतिकरः । ३. दुर्घटना ।
घटना[2], क्रि. अ. (हिं कटना) परिक्षि-अपचि (कर्म.),ह्रस् (भ्वा. प. से.), न्यूनी-अल्पी,-भू ।
घटनावली, सं. स्त्री. (सं.) वृत्तावली, घटनासमूह ।
घटबढ़, सं. स्त्री. (हिं घटना + बढ़ना) न्यूनताधिकते, अपचयोपचयौ, हानिलाभौ (सब द्वि.) । वि. न्यूनाधिक, हीनातिरिक्त ।
घटवार-ल, सं. पुं. (हिं. घाटवाला) तरपण्यतार्य,-ग्राहिन् २. नाविकः, औडुपिकः, घट्टजीविन् ।
घटा, सं. स्त्री. (सं. >) कादंबिनी, मेघमाला, घटपटली २. समूहः, वृंदम् ।
घटाटोप, सं. पुं. (सं. >) दे. 'घटा' (१) २. शिविकाच्छादनं ३. शकटावरणम् ।
घटाना, क्रि. स., (हिं. घटना) न्यूनी-अल्पी,-कृ, ऊन् (चु.), ह्रस् (प्रे.), लघूकृ, अपचि (स्वा. उ. अ.) २. वियुज्-विवृज्-व्यवकल् (चु.) ३. गर्वं हृ-(भ्वा. प. अ.), अपकृष् (भ्वा. प. अ.) ।
घटाव, सं. पुं. (हिं. घटना) न्यूनता, अल्पता, हीनता ३. अवनतिः (स्त्री.), अपचयः ।

घटवाना, क्रि. प्रे. (हिं. घटना) व. 'घटना' के प्रे. रूप ।

घटिका, सं. स्त्री. (सं.) क्षुद्र-लघु,-कुंभः-घटः । २. कालमानयंत्रं, यामनाली, घटी ३. चतुर्विंशतिकलात्मकः कालः, मुहूर्तार्द्धम् ।

घटित, वि. (सं.) निर्मित, रचित, संपादित ।

घटिया, वि. (हिं. घटना) अवर, अधर नि-अप,-कृष्ट, जघन्य २. सुलभ, अल्पमूल्य ।

घटी, सं. स्त्री. (सं.) दे. 'घटिका' १-३ ।

घड़त, सं. स्त्री., दे. 'गठन' ।

घड़ना, क्रि. स., दे. 'गढ़ना'

घड़ा, सं. पुं. (सं. घटः) दे. 'घट' (१) ।

घड़ाई, सं. स्त्री. दे. 'गढ़ाई' ।

घड़ाना, क्रि. प्रे. दे. 'गढ़ाना' ।

घड़िया, (सं. घटिका >) तैजसावर्तनी, मू-(मु)षा-षी २. मधुकोशः, करंडः ३. गर्भाशयः ४. मृच्छावकः ।

घड़ियाल, सं. पुं., दे. 'घंटा' (१) ।

घड़ियाल, सं. पुं., दे. 'ग्राह' ।

घड़ी, सं. स्त्री. (सं. घटी) घटिकायामनाली, कालमानयन्त्रं २. दे. 'घटिका' (३) ३. दे. 'घटिका' (१) ४. समयः ।

—घड़ी, क्रि. वि. मुहुर्मुहुः, पुनः पुनः, असकृत् (सब अव्य.) ।

—दिआ, सं. पुं. (हिं. घड़ी + दिआ) *घटीदीपः, मृतक-रीतिविशेषः ।

—भर, क्रि. वि., मुहूर्तं, क्षणं, क्षण-मुहूर्त,-मात्रम् ।

—साज़, सं. पुं. (हिं. + फ़ा.) घटी-घटिका,-कारः ।

घतिया, सं. पुं. (सं. घातः >) दे. 'घाती[२]' ।

घन, सं. पुं. (सं.) मेघः, जलदः, पयोदः २. लोहमुद्गरः, अयोघनः, ३. दे. 'घंटा' (१) ४. सजातीयांकत्रयस्य पूरणं (गणित, उ. २×२×२ = ८ घन) ५. समूहः ६. शरीरम् । वि. सान्द्र, निविड २. कठिन, संहत, स्थूल, ३. अधिक, प्रचुर ।

—गरज, सं. स्त्री. (- + हिं) गर्जितं, स्तनितं २. शतघ्नी-तोप,-भेदः ।

—घोर, वि. (सं.) अति,-सान्द्र-निविड २. भीषण, भयावह । सं. पुं. भीषण,-रवः-ध्वनिः २. स्तनितं, गर्जितम् ।

—घोर घटा, सं. स्त्री. (सं.) अविरलजलदावली, नीरन्ध्रकादम्बिनी ।

—चक्कर, सं. पुं. (सं. घनचक्रं >) चंचल-अस्थिर, मतिः-बुद्धिः २. मूर्खः ३. परिभ्रमिन्, यथेच्छविहारिन् ४. कृच्छ्रं, संकटम् ।

—नाद, सं. पुं. (सं.) दे. 'घनगरज' ।

—फल, सं. पुं. (सं. न.) दे. 'घन' (४) ।

—मूल, सं. पुं. (सं. न.) पूरितसजातीयांकत्रयस्याद्याङ्कः, घनपदं (उ. आठ का घनमूल दो) ।

—श्याम, वि. (सं.) जलदनील, मेघमेचक । सं. पुं., श्रीकृष्णः ।

—सार, सं. पुं. (सं.) कर्पूरं २. पारदः ।

घनता, सं. स्त्री. (सं.) सांद्रता, निबिडता ।

घनत्व, सं. पुं. (सं. न.) स्थूलता, संहतिः (स्त्री.) ३. पदार्थस्य आयामविस्तारस्थूलत्वानि (बहु.) ।

घना, वि. (सं. घन) सांद्र, निविड, संहत, नीरन्ध्र २. गाढ, निकटवर्तिन् ३. अत्यधिक, अतिशय ।

घनाक्षरी, सं. स्त्री. (सं.) दंडकवृत्तं, कवित्ताख्यं छंदः (छंद.) ।

घनिष्ठ, वि. (सं.) अत्यंत-अति,-सांद्र-निविड-घन २. प्रगाढ, अतिनिकटस्थ ३. अत्यधिक, अतिशय ।

घनेरा, वि. (हिं. घना) अत्यधिक, अतिशय (बहु., घनेरे = असंख्य, अनेक) ।

घनोदय, सं. पुं. (सं.) मेघागमः, वर्षाकालारम्भः ।

घनोपल, दे. 'ओला' ।

घपला, सं. पुं. (अनु.) छलं, कपटं २. (संख्याने) स्खलितं, भ्रांतिः (स्त्री.) ३. क्रमभंगः ४. संकुलं, प्र-सं,-कीर्णकम् ।

घबरा(ड़ा)ना, क्रि. अ. तथा क्रि. स. दे. 'गड़बड़ाना' ।

घबराहट, सं. स्त्री. (हिं. घबराना) व्या-आ,-कुलता, अशांतिः (स्त्री.), उद्वेगः २. व्यामोहः, किंकर्तव्यमूढता, चित्तविक्षेपः ३. त्वरा, तूर्णिः (स्त्री.), तरस् (न.) संभ्रमः ।

घमंड, सं. पुं. (सं. गर्वः ?) अहंकारः, गर्वः, दर्पः, आटोपः, मदः, अवलेपः ।

—करना, क्रि. अ., गर्व् (भ्वा. प. से.), प्रगल्भ् (भ्वा. आ. से.), दृप् (दि. प. वे.) ।

घमंडी, वि. (हिं. घमंड) अवलिप्त, दृप्त, गर्वित, अहंमानिन्, अहंकारिन्, उत्सिक्त ।

घमघमाना, क्रि. अ. (अनु.) घमघमायते (ना. धा.), गंभीरं स्वन् (भ्वा. प. से.) । क्रि. स. (मुष्टिभिः) तड् (चु०) ।

घमस, सं. स्त्री. } **घमसा**, सं. पुं. } (सं. घर्मः >) दे. 'उमस' ।

घमसान, सं. पुं. (अनु.) घोर-दारुण-क्रूर, युद्धं संग्रामः-रणः-समरः ।

घमाका, सं. पुं. (अनु. घम) घमिति,-शब्दः-ध्वनिः (पुं.), प्रहारजः शब्दः ।

घमाघम, सं. पुं. (अनु.) घमघमध्वनिः (पुं.), घमघमायितं, घमघमाशब्दः २. लोहमुद्गर-घन,-शब्दः ३. आडंबरः, श्रीः (स्त्री.), शोभा ।

घमासान, सं. पुं. दे. 'घमसान' ।

घर, सं. पुं. (सं. गृहं) दे. 'गृह' २. जन्म,-भूमिः (स्त्री.)-स्थानं ३. कुलं, वंशः ४. कार्यालयः ५. कोष्ठः, आगारं ६. कोषः, आवेष्टनं ७. मूलं, कारणं ८. गृहपरिच्छदः ९. छिद्रं, विलम् ।

—आवाद करना, मु, वि-उद्-वह् (भ्वा.उ.अ.), परिणी (भ्वा. प. अ.) ।

—करना, मु., वस् (भ्वा. प. अ.) २. स्थिरीभू ।

—का आदमी, मु., विश्वसनीयमनुष्यः २. संबंधिन् ।

—का न घाट का, मु., निर्गुण, निरर्थक, कुत्सित, अधम २. अस्थिरवास ।

—फूक तमाशा देखना, मु. आमोदप्रमोदेषु स्वधनं अपव्यय् (चु.) ।

—फोड़ना, मु., गृहकलहं जन् (प्रे.) ।

—बसाना, मु., दे. 'आवाद करना' ।

—बारी, मु., गृहस्थः, गृहिन् ।

—में डालना, मु., उपपत्नीत्वेन परिग्रह् (रु. उ. से.) ।

—में पड़ना, मु., उपपत्नी भू ।

—वाला, मु., पतिः २. गृहिन् ।

—वाली, मु., पत्नी २. गृहिणी ।

—सिर पर उठाना, मु., कोलाहलं कृ ।

ऊँचा—, मु., उच्च-सु,-कुलं, सद्वंशः ।

बड़ा—, मु., समृद्ध-संपन्न-आढ्य,-कुलं २. कारागारम् ।

घरट्ट, सं. पुं. (सं.) घरट्टकः २. पेषणी-चक्री ।

घरणी,-नी, सं. स्त्री. (सं. गृहिणी) गृहपत्नी, भार्या, कलत्रम् ।

घरफोरी, सं. स्त्री. (हिं. घर+फोड़ना) गृहभेदिनी, वंशविनाशिनी ।

घराट, सं. पुं., दे. 'घरट्ट' ।

घराती, सं. पुं. (हिं. घर) 'बराती' का अनुकरण)(विवाहे) वधू-कन्या,-पक्षीयः-सम्बधिन् ।

घराना, सं. पुं. (हिं. घर) वंशः, कुलं, अन्वयः ।

घरेलू, वि. (हिं. घर) गृह्य, गृह,-निर्मित-संबंधिन् २. नैज, आत्मीय २. दे. 'पालतू' ।

घर्घर, (सं. पुं.) गद्गद-घर्घर,-शब्दः-स्वनः ।

घर्घराना, क्रि. अ. (सं. घर्घरः >) घर्घररवं कृ, गद्गदं नद् (भ्वा प. से.), घर्घरायते (ना. धा.) ।

घर्घराहट, सं. स्त्री. (हिं. घर्घराना) दे. 'घर्घर' ।

घर्म सं. पुं. (सं.) सूर्य,-आतपः-आलोकः २. उष्णता, दाहः, तापः ३. ग्रीष्मः ४. प्रस्वेदः । वि., तप्त, उष्ण ।

घर्राटा, सं. पुं. (अनु.) घर्घरः, घर्घररवः ।

घर्षण, सं. पुं. (सं. न.), अभ्यंजनं, संवाहनं २. संघट्टः, समाघातः ।

घसना, क्रि. अ. तथा क्रि. स., दे. 'घिसना' ।

घसियारा, सं. पुं. (सं. घासः >) घास-हारः-रिन् , घासविक्रेतृ (पुं.) २. घास-तृण, छेदकः-लावकः । (-रिन (स्त्री.) = घासहारी-रिणी इ.) ।

घसीट, सं. स्त्री. (हिं. घसीटना) शीघ्र-द्रुत-त्वरित,-ले(लि)खनं ३. द्रुत-शीघ्र-त्वरित-लेख-लेख्यं २. (भूमौ) कर्षणम् ।

घसीटना, क्रि. स. (सं. घृष्ट) आ-वि-कृष् (भ्वा. प. अ.) बलात् हृ (भ्वा. उ. अ.) २. शीघ्रं-सत्वरं,-लिख् (तु. प. से.) ६. बलात् समाविश् (प्रे.) ।

घस्सा, सं. पुं., दे. 'घिस्सा' ।

घहर(रा)ना, क्रि. अ. (अनु.) दे. 'गरजना' ।

घाई[1], सं. स्त्री. (सं. गभस्तिः >) अंगुली-संधिः, गभस्तिकोणः २. कांडशाखासंधिः ।

घाई[2] सं. स्त्री. (हिं. घाव) आघातः, प्रहारः २. छलं, कपटम् ।

घाऊघप, वि. (हिं. खाऊ+अनु) औदरिक, घस्मर, गृध्नु २. गूढचित्त, गुप्तभाव ।
घाग, घाघ, वि. (एक प्रसिद्ध अनुभवी पुरुष था) बहुदर्शिन्-अत्यनुभविन् (-नी स्त्री.), बहुदृश्वन् (-वरी स्त्री.) २. मायाविन् , कापटिक (-की स्त्री.) । सं. पुं., जरठः, वृद्धः ।
घाघरा, सं. पुं., (सं. घर्घरः) १. सरयूनदी २. दे. 'घघरा' ।
घाट, सं. पुं. (सं. घाटः) घट्टः, घट्टी, तरः, तर-तरण,-स्थानं २. तीर्थं, अवतारः ४. पर्वतः ५. दिशा ६. विधिः(पुं.) प्रकार ७. असिधारा ।
—घाट का पानी पीना, मु. आजीविकार्थं इतस्ततः भ्रम् (भ्वा. प. से.) ६. अनुभवातिशयं प्राप् (स्वा. प. अ.) ।
—मारना, मु., प्रतिषिद्धभांडानि आ,-नी-हृ (भ्वा. उ. अ.) ।
घाटा, सं. पुं. (हिं. घटना) हानिः-क्षतिः (स्त्री.), क्षयः, अपचयः, अत्ययः ।
—उठाना या पड़ना, मु., वियुज्-विहा-परिहा (कर्म.) ।
—भरना, क्षतिं समा-प्रतिसमा,-धा (जु.उ.अ.), हानिं सं-वि-परि-शुध् (प्रे.) ।
घाटिया, सं. पुं. (हिं घाट) गंगापुत्रः, तीर्थपुरोहितः ।
घाटी, सं. स्त्री. (हिं. घाट) संकट-संबाध,-पथ-मार्गः २. दरी, द्रोणी, उपत्यका ।
घात, सं. पुं. (सं.) आ-अभि-निर्,-घातः, प्रहारः २. वधः, हत्या ३. अहितं, अमंगलं ४. गुणनफलं (गणित) । सं. स्त्री., सुयोगः, सदवसरः, सुवेला २. निभृतावस्थितिः (स्त्री.) ३. छलं कूटोपायः ।
—में बैठना, मु., (वधाय लुंठनाय वा) मार्गे निभृतं प्रतीक्ष् (भ्वा. आ. से.), पथि अवस्कंद् (भ्वा. प. अ.) ।
घातक, सं. पुं. (सं.) वधकारिन्, मारकः, मारयितृ-हंतृ (पुं.) २. शत्रुः, अरिः, ३. वधकः, दंडपाशिकः । वि., प्राणहर, अंतकर ।
घातिनी, सं. स्त्री. (सं.) हंत्री, घातिका, मारयित्री ।
घाती[1], सं. पुं. (सं. घातिन्) दे. 'घातक' ।
घाती[2], वि. (हिं. घात) विश्वासघातिन्, असत्यसंध २. मायाविन् ।

घातुक, वि. (सं.) नाशक, हिंसक, मारक । (घातुकी स्त्री.) ।
घात्य, वि. (सं.) हननीय, हन्तव्य, मारणीय, वधार्ह ।
घान, सं. पुं. (सं. घनः) ।
घानी, सं. स्त्री. स्थालीचक्र्यादिषु सकृत्क्षेपणीया मात्रा ।
घाम, सं. पुं. (सं. घर्मः) सूर्य,-आतपः-आलोकः २. सूर्य,-तापः-दाहः ।
घामड़, वि. (हिं. घाम) मूर्ख, अज्ञ, मूढ, २. अलस, कर्मविमुख ३. घर्म-आतप,-पीड़ित (पशु) ।
घायल, वि. (सं. घातः >) क्षत, व्रणित, विद्ध, भिन्नदेह, आहत, प्रहृत ।
—करना, क्रि. सं., व्रण् (चु०), आ-अभिहन् (अ. प. अ.), क्षण् (त. उ. से.), तुद् (तु. उ. अ.) ।
—होना, क्रि. अ., व. उपर्युक्त धातुओं के कर्म. रूप ।
घार, सं. पुं. (सं.) आसेकः प्रोक्षणम्, कणविकरणम् ।
घाल, सं. पुं. (सं. घारः >) *घारः, ग्राहकाय मूल्यं विना दत्तं वस्तु (न.) ।
घालक, सं. पुं. (हिंः घालना) घातकः, मारकः; २. नाशकः, ध्वंसकः ।
घाव, सं. पुं. (सं. घातः) क्षतं-तिः (स्त्री.), व्रणः, आघातः, प्रहारः, ईर्मं, अरुस् (न.) ।
—करना, क्रि. स., दे. 'घायल करना' ।
—खाना, क्रि. अ., दे. 'घायल होना' ।
—भरना, क्रि. अ., व्रण; रुह् (भ्वा. प. अ.) ।
घास, सं. स्त्री. (सं. पुं.) य(ज)वसः, यव (वा)-सं, शादः, तृणम् ।
—पात, सं. पुं. (सं. घासपत्रं) तृणपत्रं २. दे. 'कूड़ा-करकट' ।
—फूस, सं. पुं., पलालः-लं २. दे. 'कूड़ाकरकट' ।
—काटना या खोदना, मु., व्यर्थ-क्षुद्र-तुच्छ,-कार्यं कृ ।
घिग्घी, सं. स्त्री. (अनु.) हिक्का, हिध्मा २. गद्गदवाच् (स्त्री.), स्खलद्वाक्यं, स्वरभंगः ।
—बंध जाना, क्रि. अ., (भयशोकादिभिः) हिक्क् (भ्वा. उ. से.), सगद्गदं वद् (भ्वा. प. से.) ।
घिघियाना, क्रि. अ. (हिं. घिग्घी) करुणं

प्रार्थ् (चु. आ. से.), सवाष्पं निविद् (प्रे.), दे. 'गिड़गिड़ाना'।

घिचपिच, सं. स्त्री. (सं. घृष्टपिष्ट अथवा अनु०) स्थानसंकीर्णता, अवकाशाल्पत्वम्। वि०, संकुल, वैशद्यशून्य, अस्पष्ट।

घिन, सं. स्त्री., (सं. घृणा दे.)।

घिनाना, क्रि. अ., दे. 'घृणा करना'।

घिनावना, घिनौना, वि. (हिं. घिन) घृणार्ह, गर्हित, गर्हणीय, वीभत्स, अरुचिकर, कुत्सित, उद्वेगकरः (–री स्त्री.)।

घिया, सं. पुं.. दे. 'कद्दू'।

—कश, सं. पुं. दे. 'कद्दूकश'।

—तोरी, सं. स्त्री., महाकोशातकी, हस्तिघोषा महाफला, घोषकः, हस्तिपर्णा।

घिरना, क्रि. अ. (सं. ग्रहणं >) परि,-वृ-क्षिप् गम्-वेष्ट्-सृ (कर्म.) २. एकत्र मिल् (तु. प. से.), संनिपत् (भ्वा. प. से.)।

घिरनी, सं. स्त्री. (सं. घूर्णिः) १. घूर्णिः (स्त्री:), घूर्णनं, भ्र(-भ्रा)मरं २. परिभ्रमणं, परिवर्तः ३. रज्जुव्यावर्तनचक्रं ४. दे. 'गड़ारी'।

घिसघिस, सं. स्त्री. (हिं. घिसना) मांद्य, दीर्घसूत्रता, कार्यजडता, कालक्षेपः।

घिसना, क्रि. अ. (सं. घर्षणं) जर्जरीभू, जॄ (दि. प. से.), (संघर्षणेन) अपचि-क्षि (कर्म.), संघृष् (भ्वा. प. से.), संघट् (भ्वा. आ. से.)। क्रि. सं., घृ (प्रे.), मृद् (क्र्. प. से. या प्रे.) अभि-,अंज् (रु. प. वे.), लिप् (तु. प. अ.)। सं. पुं., घर्षणं, मर्दनं, अभ्यंजनम्।

घिसवाना, घिसाना, क्रि. प्रे.. व. 'घिसना' (क्रि. स.) के प्रे. रूप।

घिसाई, सं. स्त्री. (हिं. घिसना) घर्षणं, मर्दनं २. घर्षण-मर्दन,-भृत्या-भृतिः (स्त्री.)।

घिसाव, सं. पुं. | **घिसावट**, सं. स्त्री. | (हिं. घिसना) संघर्षः, परस्पर,-घर्षणं-मर्दनं, संमर्दः, संघट्टः।

घिस्सा, सं. पुं. (हिं. घिसना) घर्षः, संघट्टः, संमर्दः २. प्रसारणं, प्रचोदना ३. बालक्रीडाभेदः।

घी, सं. पुं. (सं. घृतः-तं) आज्यं, आजं, आयुस्-सर्पिस् (न.), पवित्रं, अमृतं, अभिघारः; होम्यं, तैजसं, नवनीतकम्।

—के चिराग़ या दिये जलना, मु., सफलमनोरथ-पूर्णकाम-कृतकृत्य, (वि.)+भू।

—खिचड़ी होना, मु., प्रगाढ-घनिष्ठ,-मैत्री-अनुरागः भू।

पाँचों उँगलियाँ घी में होना, मु., उत्सन्नः वृत् (भ्वा. आ. से.), सर्वथा समृद्ध (वि.) अस् (अ. प.)।

घीकुवाँर, सं. पुं. (सं. घृतकुमारी) कुमारी, तरुणी, गृह,-कन्या-कन्यका, अजरा, अमरा।

घुँइयाँ, सं. स्त्री. (देश.) दे. 'कचालू'।

घुँघ(ग)ची, सं. स्त्री., (सं. गुंजा) गुञ्जिका, रक्तिका, रक्ता, कृष्णला, काक,-चिंचिका-जंघा-तिक्ता। २. गुञ्जा-रक्ता,-बीजं इ.।

घुँघनी, सं. स्त्री. (अनु.) भर्जितार्द्रचणकादि।

घुँघरारे-ले, वि., दे. 'घूँघरवाले'।

घुँघरू, सं. पुं. (अनु. घुन) घर्घरा-रिका, क्षुद्र,-घंटा-घंटिका, क्षुद्रिका, कंकणी,-णीका, किंकिणी २. मंजीरः-रं, पुनूरं-रः। ३. मरणासन्नस्य कंठे घर्घरशब्दः।

घुंडी, सं. स्त्री. (सं. ग्रंथिः पुं.) १. दे. 'गांठ'। २. वस्त्रमय,-गंडः-कुडुपः।

घुग्घी, सं. स्त्री. (देश.). दे. 'पंडुक' २. त्रिकोणरूपेण व्यावर्तितः कंबलः।

घुग्घू, घुघुआ, सं. पुं. (सं. घूकः) दे. 'उल्लू'।

घुघुआना, क्रि. अ. (अनु.) घूघू-शब्दं कृ। उलूकवत्-घूकवत् रु (अ. प. से.)-क्रुश् (भ्वा. प. अ.)।

घुटकना, क्रि. स. (अनु.) अल्पशः पा (भ्वा. प. अ.) २. दे. 'निगलना'।

घुटना[1], सं. पुं. (सं. घुंटः-रखना >) जानु (न.), ऊरु,-पर्वन् (न.) संधिः (पुं.), अष्ठीवत् (पुं. न.), चक्रिका।

घुटना[2], क्रि. अ. (हिं. घूँटना) कंठः-श्वासः रुध् (कर्म.)।

घुटना[3], क्रि. अ. (हिं. घोटना) चूर्ण्-पिष् (कर्म.) २. सम्यक् पच् (कर्म.) ३. श्लक्ष्णी भू ४. सख्यं जन् (दि. आ. से.) ५. स्निग्धालापे व्याप् (तु. आ. अ.) ६. केशाः मूलतः मुंड्-क्षुर् (कर्म.) ७. अभ्यस् (कर्म.)।

घुटा हुआ, मु. धूर्त्त, दक्ष, विचक्षण।

घुटन्ना, सं. पुं. (सं. घुटः >). घुटानाहः, पादायामः।

घुटाई, सं. स्त्री. (हिं. घोटना) चूर्णनं, पेषणं, मर्दनं २. श्लक्ष्णीकरणं ३. चूर्णन-श्लक्ष्णीकरण,-भृत्या ४. क्षौरं, मुंडनं ५. आवर्तनं, अभ्यासः ।

घुट्टी, सं. स्त्री., दे. 'घूँटी' ।

घुड़, सं. पुं. (सं. घोटः) घोटकः ।

—चढ़ा, सं. पुं., दे. 'घुड़सवार' ।

—चढ़ी, सं. स्त्री., अश्वारूढा (नारी) २. अश्वारोहणं, वैवाहिकरीतिभेदः ३. शतघ्नीभेदः ।

—दौड़, सं. स्त्री., अश्व-घोटक,-चर्या-धावनं २. जवाश्व-जवन,-धावनं, द्यूतभेदः ३. चर्याभूमिः (स्त्री.) ।

—वहल, सं. पुं., घोटक,-रथः-स्यंदनः ।

—सवार, सं. पुं., सादिन्, तुरगिन्, हय-तुरग-अश्व,-आरूढः-रथः ।

—सवारी, सं. स्त्री., अश्वारोहण,-कौशलं-विद्या ।

—साल, सं. स्त्री. (सं. घोटशाला) मंदुरा, वाजि-अश्व,-शाला ।

घुड़कना, क्रि. स. (सं. घुर्) भर्त्स् (चु. आ. से.), वाचा दंड् (चु.), अव-अधि-क्षिप् (तु. उ. अ.) ।

घुड़की, सं. स्त्री. (हिं. घुड़कना) अधिअव,-क्षेपः, वाग्दण्डः, भर्त्सनं-ना ।

घुणाक्षर, सं. पुं. (सं.) घुणलिपिः (स्त्री.), घुणवल्मीकादिभिः पत्रकाष्ठादिषु कृता रेखा ।

घुन, सं. पुं. (सं. घुणः) काष्ठ,-वेधकः-कीटः-लेखकः

—लगना, क्रि. अ., घुणैः अद् (कर्म.) ।

घुनघुना, सं. पुं. (अनु.) दे. 'झुनझुना' ।

घुन्ना, वि. (अनु. घुनघुनाना) तूष्णीक, गूढ-संवृत,-भाव (घुन्नी स्त्री.) ।

घुप, वि. (सं. कूपः >) निबिडः-सूचीभेद्यः (अंधकारः) ।

घुमड़ना, क्रि. अ. (हिं घूम + सं. अटनं >) मेघा आकाशं आच्छद् (चु.) ।

घुमरी, सं. स्त्री. (हिं. घूमना) भ्र(भ्रा)मरं, भ्रमिः घूर्णि; (स्त्री.) ।

घुमाना, क्रि. स. (हिं. घूमना) व. 'घूमना' के प्रे. रूप ।

घुमाव, सं. पुं. (हिं. (घूमना) परि-,भ्रमः, घूर्णिः (स्त्री.), व्या-परि-आ,-वर्तः ।

घुरघुराना, क्रि. अ. (अनु.) घुरघुरायते (ना. धा.), घुर् (तु. प. से.) ।

घुलना, क्रि. अ. (सं. घूर्णनं >) वि-प्र-, ली (दि. आ. अ.), द्रवीभू, क्षर्-गल् (भ्वा. प. से.), विद्रु (भ्वा. प. अ.) २. पूतीभू, दुर्गंध-(वि.) भू, विगल् ३. कृश-क्षीणमांस-(वि.) भू, अंगैः परिहा (कर्म.) । सं. पुं., विलयनं, द्रवीभावः, पूतीभवनं, क्षयः इ. ।

घुलने योग्य, वि., विलेय, क्षरण-विलयन,-शील, विद्राव्य ।

घुलवाना, क्रि. प्रे. / **घुलाना**, क्रि. स. } व. 'घुलना' के प्रे. रूप ।

घुलाव, सं. पुं. / **घुलावट**, सं. स्त्री. } दे. 'घुलना' सं. पुं. ।

घुषित, घुष्ट, वि. (सं.) प्रकाशित, प्रकटीकृत, आ-उद्-वि,-घोषित, प्रख्यापित ।

घुसड़ना, क्रि. अ., दे. 'घुसना' ।

घुसना, क्रि. अ. (सं. कोसनं या घर्षणं > ?) (बलात्) आ-प्र-, विश् (तु. प. अ.), (अंतः) पदं कृ अथवा निधा (जु. उ. अ.), आगम् २. निर्, भिद् (रु. प. अ.), व्यध् (दि. प. अ.) । सं. पुं., प्रवेशः, आगमनं, निर्भेदनं इ. ।

घुसाना, / **घुसेड़ना**, } क्रि. स., व. 'घुसना' के प्रे. रूप ।

घूँघट, सं. पुं. (सं. गुंठनं >) अवगुंठनं-ठिका, मुखावरकः-कम् ।

—काढ़ना, या मारना, क्रि. स., अवगुंठ् (चु.), मुखमाच्छद् (चु.) ।

—वाली, सं. स्त्री., अवगुंठनवती ।

घूँघर, सं. पुं. (हिं. घुमरना) अलकः, कुरलः, चूर्णकुतलः ।

—वाले, वि. आकुंचित, जिह्मी-वक्री,-भूत, कुंतलाकीर्ण, कुरलिन् (प्रायः केशों के लिए) ।

घूँट, सं. पुं. (अनु. घुट घुट) गंडूषमात्रं पेयं, चलुः, च(चु)लुकः ।

—लेना या पीना, क्रि. स., आचम् (भ्वा. प. से.), उपस्पृश् (तु, प. अ.), अल्पशः-इषत् पा (भ्वा. प. अ.) ।

घूँटना, क्रि. स., दे. 'घूँट लेना' ।

घूँटी, सं. स्त्री. (हिं. घूँट) शिशुभेषजं, बालौषधम् ।

घूँस, सं. स्त्री., दे. 'घूस' ।

घूँसमघूँसा, सं. पुं. (हिं. घूँसा) मुष्टीमुष्टि (अव्य.), मुष्टियुद्धं, बाहूबाहवि (अव्य.) ।

घूसा, सं. पुं. (हिं. घिस्सा) मुष्टिः (पुं. स्त्री.), मुष्टी, बद्धमुष्टिः २. मुष्टि,-घातः-प्रहारः।

—लगाना या मारना, क्रि. स., मुष्टिना प्रह (भ्वा. उ. अ.)-तड् (चु.)।

घूआ, सं. पुं. (देश.) काशशरकाण्डादीनां पुष्पम् २. कर्दमस्थकीटभेदः ३. खट्वाछिद्रम्।

घूक, सं. पुं. (सं.) दे. 'उल्लू'। (घूकी स्त्री.)

घूघ, सं. पुं., दे. 'खोद'।

घूघू, सं. पुं. (सं. घूकः) दे. 'उल्लू' २. जडः, मंदमतिः।

घूम, सं. स्त्री., दे. 'घुमाव'।

घूमना, क्रि. अ. (सं. घूर्णनं) परि-,भ्रम्-अट् (भ्वा. प. से.), सं-वि-चर् (भ्वा. प. से.) २. वि-धा-आ-परि-वृत् (भ्वा. आ. से.), चक्रवत् भ्रम्, वि-परि-,घूर्ण् (तु. प. से.) ३. नि-प्रतिनि-प्रत्या-वृत्, पुनर्-, या-इ (अ. प. अ.)। सं. पुं., परि-,भ्रमणं-अटनं, परिवर्तनं, घूर्णनं, प्रतिनिवर्तनं, चक्र,-आवर्तः-गतिः (स्त्री.)।

घूमने वाला, वि., पर्यटन-भ्रमण,-शील, चक्रावर्तिन्, चक्रगतिः, परिवर्तिन्, परिभ्रमिन्।

घूमघूमेला, वि. (हिं. घूम घूम) दे. 'घूमनेवाला'।

घूरना, क्रि. स. (सं. घूर्णनं>) कटाक्षेण-तिर्यक्-साचि,-ईक्ष् (भ्वा. आ. से.)-दृश् (भ्वा. प. अ.) २. सकोपं-निर्निमेषं अवलोक् (भ्वा. आ. से.; चु.)।

घूराघारी, सं. स्त्री. (हिं. घूरना) कटाक्षः, कटाक्ष,-अवेक्षणं-, दर्शनम्, अपांग,-वीक्षणम्-अवलोकनम्।

घूस, सं. स्त्री. (हिं. घुसना या घूँसा) उत्कोचः, उपायनम्।

—खोर, सं. पुं. (हिं.+फ़ा.) उत्कोचग्राहिन्।

घृणा, सं. स्त्री. (सं.) अरुचिः, कुत्सा, गर्हा, जुगुप्सा, वि-,द्वेषः, निर्वेदः।

घृणित, वि. (सं.) अरुचिकर-उद्वेगकर (—करी स्त्री.) २. कुत्सित, गर्ह्य, बीभत्स।

घृत, सं. पुं. (सं. न.) दे. 'घी'।

घेरना, क्रि. स. (ग्रहणं>) परिवेष्ट् (भ्वा. आ. से., प्रे.), परिवृ (स्वा. उ. से.; प्रे.), परि-इ (अ. प. अ.) २. अव-उप,-रुध् (रु. उ. अ.)। सं. पुं., परिवेष्टनं, परिवारणं, उपरोधः इ.।

घेरने वाला, सं. पुं., परिवेष्टकः, उपरोधकः।

घेरा, सं. पुं. (हिं. घेरना) परिधिः (पुं.), परि,-वेषः-वेशः-णाहः, मण्डलं २. प्राचीरं, प्राकारः, वेष्टनं, वरणः ३. परिवृतस्थानं ४. मण्डलं ५. अव उप,-रोधः।

—डालना, मु., परिवेष्ट् (प्रे.), दे. 'घेरना' (२)।

घेवर, सं. पुं. (सं. घृतवरः) घृतपूरः, घार्तिकः।

घैया, सं. स्त्री. (हिं. घी) स्तननिर्गत-दुग्धधारा २. प्रत्यग्र-दुग्धनवनीतम्।

घोंघा, सं. पुं. (देश.) शंबु(बू)कः, कोष-कवच,-स्थः, कीटभेदः २. शुक्तिः (स्त्री.)। वि., जड, स्थूलबुद्धि।

घोंटना, क्रि. स., दे. 'घोटना'।

घोंपना, क्रि. स. (अनु. घुप) प्र-नि-विश् (प्रे.), निर्भिद्-व्यध् (प्रे.)।

घोंसला, सं. पुं. (सं. कुशालयः अथवा हिं. घुसना) कुलायः, नीडः-डं, खगालयः, पक्षिगृहम्।

घोख(क)ना, क्रि. स. (सं. घोषणं>) कंठस्थ-(वि.) कृ, स्मृतिपथं नी (भ्वा. उ. अ.), अभ्यस् (दि. उ. से.)।

घोट, घोटक, सं. पुं. (सं.) दे. 'घोड़ा'।

घोटना, क्रि. स. (सं. घोटनं>) क्षुद्-पिष् (रु. प. अ.), चूर्ण्-खण्ड् (चु.), मृदू (क्र. प. से.) २. मुंड् (चु.), क्षुर् (तु. प. से.) ३. घर्षणेन श्लक्ष्णीकृ ४. गलहस्तयति (ना. धा.), गलं निष्पीड्य व्यापद् (प्रे.), कंठं निष्पीड् (चु.) ५. दे. 'घोखना'। सं. पुं. पेषणं, मर्दनं, मुण्डनं, श्लक्ष्णीकरणं इ.। २. मुस(श)लः-लं, (पेषण-) दंडः।

घोटनी, सं. स्त्री. (हिं. घोटना) मर्दनी, मुसलकम्।

घोटवाना, क्रि. प्रे., व, 'घोटना' के प्रे. रूप।

घोटा, सं. पुं. (हिं. घोटना) मार्जकः, घर्षकः २. मार्जितवस्त्रं ३. घर्षणं ४. मुसलः, दंडः ५. पेषणं ६. क्षौरं, केशवपनम्।

घोटाला, सं. पुं. (देश.) दे. 'गड़बड़' सं. पुं.।

घोड़साल, सं. पुं. (सं. घोटशाला) दे. 'घुड़' के नीचे 'घुड़साल'।

घोड़ा, सं. पुं. (सं. घोटः) घोटकः, तुरगः, तुरंगः,-गमः, अश्वः, वाहः, हयः, वजिन्, अर्वन् (पुं.),

सैंधवः, सप्तिः (पुं.), गन्धर्वः, जवनः । २. चतुरंग,-शारःशारिः (पुं.) ३. अश्वचक्रघोटः ।
—गाड़ी, सं. स्त्री., अश्व-हय,-रथः-शकटः ।
घोड़े बेच कर सोना, मु., गाढं निद्रा-स्वप् (अ. प. अ.)-शी (अ. आ, से,)-संविश् (तु. प. अ.) ।
घोड़िया, सं. स्त्री. (हिं. घोड़ा) घोटकः, अश्वकः, लघु,-अश्वः-घोटः २. नागदन्तः,-न्तकः ।
घोड़ी, सं. स्त्री. (सं. घोटी) अश्वा, वडवा, तुरगी, वाजिनी वामिनी, घोटिका २. वडवारोहणं, वैवाहिकरीतिभेदः ३. विवाहगीतिका ।
—चढ़ना, मु., वरो वडवामारुह्य वधूगृहं गम् ।
—टप्पा, सं. पुं., बालखेलाभेदः, घोटीलंघनम् ।
घोणा, सं. स्त्री. (सं.) नासा, नासिका, गन्धवहा । २. शूकर-अश्व,-प्रलंबमुखं-लाम्बास्यम् । ३. छिक्का-क्षुत,-आवहः बालतरुभेदः ।
घोणी, सं. पुं. (सं.-णिन्) शूकरः, वराहः, रोमशः ।
घोर, वि. (सं.) भयंकर, भीषण, भीम २. दुर्गम, गहन, निविड ३. परुष, कर्कश, ४. गाढ़, दृढ ५. निकृष्ट, अधम ६. अत्यन्त, अत्यधिक ।
—निद्रा, सं. स्त्री. (सं.) गाढ़निद्रा, सुनिद्रा ।
घोलघुमाव, सं. पुं., दे. 'टालमटोल' ।
घोलना, क्रि. सं. (हि. घुलना) विद्रु-विलीगल् (प्रे.) ।
घोलमेल, सं. पुं. (हिं. घुलना + सं. मेलः >) मिश्रणं, संसर्गः, सम्पर्कः ।
घोष, सं. पुं. (सं.) शब्दः, नादः, रवः, स्वनः, ध्वनिः (पुं.) २. गर्जितं, स्तनितं ३. आभीरवसतिः (स्त्री.) ४. आभीरः, गोपः ५. गोष्ठं, गोशाला ६. तटः-टं-टी ७. वाह्यप्रयत्नभेदः (व्या.) ।
घोषणा, सं. स्त्री. (सं.) प्रख्यापनं, ज्ञापनं, प्रकाशनं २. घोषः,-षणं, उत्कीर्तनं ३. नादः, ध्वनिः, शब्दः ।
—पत्र, सं. पुं. (सं. न.) विज्ञप्तिः (स्त्री.), सूचनापत्रम् ।
घोसी, सं. पुं. (सं. घोषः >) यवन,-गोपः-आभीरः ।
घ्राण, सं. पुं. (सं. न.) नासिका, नासा, नसा २. आघ्राणं, गन्धग्रहणं ३. आघ्राणशक्तिः (स्त्री.) ।
—इन्द्रिय, सं. स्त्री. (सं. न.) दे, 'घ्राण' (१-३)

ङ

ङ, देवनागरीवर्णमालायाः पञ्चमो व्यञ्जनवर्णः ङकारः ।

च

च, देवनागरीवर्णमालायाः षष्ठो व्यञ्जनवर्णः, चकारः ।
चंक्रमण, सं. पुं. (सं. न.) चंक्रमः-मा, परि,-भ्रमणं-अटनम्, विहरणम्, विचरणम् । शनैः शनैः मन्दगत्या वा गमनम् ।
चंग[1], सं. स्त्री. (फ़ा.) डिंडिमप्रकारः, *चंग २. नखः-खं, नखरः-रं ३. गंजीफ़ा-क्रीडायां रंगभेदः ।
चंग[2], सं. स्त्री. (सं. चः=चाँद + गम् >) दे. 'गुड्डी' (१) ।
—पर चढ़ाना, मु., अनुकूलयति (ना. धा.) २. अभिमानिनं विधा (जु. उ. अ.) ।
चंगा, वि. (सं. चंग) सुस्थ, स्वस्थ, नीरोग, निरामय २. शोभन, सुन्दर ३. निर्मल, शुद्ध ।
—करना, क्रि. स., व्याधेः मुच् (प्रे.), शम् (प्रे. शमयति) ।
भला,-वि., कुशलिन्, नीरुज-ज् २. भद्र, अच्छ ।
चंगुल, सं. पुं. (हिं. चौ = चार + अंगुल) नखः-खं. नखरः-रं, २. धरणं, ग्रहणं, हस्तग्राहः ।
चंगेर-री, सं. स्त्री. (सं. चंगेरिका) स्थालाकारः करण्डः २. फुल्लकण्डोलः, पुष्पकरंडः ३. भाजनं, आधारः ४. चर्मपुटः, दृतिः (पुं.) ५. हिंदोलः, दोला ।
चंगोली, सं. स्त्री., दे. 'चंगेरी' ।
चंचरीक, सं. पुं. (सं.) भ्रमरः, षट्पदः ।
चंचल, वि. (सं.) चल, चलाचल, चपल, तरल, लोल, प(पा)रिप्लव, चटुल, २. व्या-पर्यासमा,-कुल, अशान्त, अनिर्वृत ३. अधीर, अस्थिर, चलचित्त, लोलबुद्धि ४. विनोदिन्, लीलापर । सं. पुं., वायुः २. कामुकः ।
चंचलता, सं. स्त्री. (सं.) चापल्यं, चांचल्यं,

लौल्यं, चटुलता, तरलता २. कुचेष्टा-ष्टितं, सलीलत्वं, लीलापरता ।

चंचला, सं. स्त्री. (सं.) लक्ष्मीः (स्त्री.), इन्दिरा २. विद्युत् (स्त्री.), सौदामिनी । वि., स्त्री., अशांता, चलचित्ता ।

चंचलाहट, सं. स्त्री., दे. 'चंचलता' ।

चंचु, सं. स्त्री. (सं.) चन्चुका, चन्चूः (स्त्री.), त्रोटी ।

चंट, वि. (सं. चण्ड >) चतुर, दक्ष २. धूर्त, मायाविन् ।

चंड, वि. (सं.) क्रूर, रौद्र (-द्री स्त्री.), दारुण, भैरव, (-वी स्त्री.), भीषण, उग्र २. कोपिन् क्रोधिन्, संरभिन्, अमर्षिन् ३. परुष, प्रखर, तीव्र, तीक्ष्ण, घोर ४. बलवत्, दुर्दमनीय ५. कठिन, कठोर ।

—क्रर, सं. पुं. (सं.) सूर्यः, चण्डांशुः ।

—कौशिक, सं. पुं. (सं.) (१-३) मुनि-नाटक-सर्प-,विशेषः ।

चंडता, सं. स्त्री. (सं.) उग्रता, भीषणता, क्रूरता २. तीक्ष्णता, प्रखरता, तीव्रता ।

चंडा, सं. स्त्री. (सं.) रुद्राणी, चंडी, दुर्गा, २. नायिकाभेदः ३. शतपुष्पा, मधुरा । वि. स्त्री. (सं.) निष्ठुरा, कर्कशा, उग्रा, कठोरा ।

चंडाल, सं. पुं. (सं.) चांडालः, मातंगः, दिवाकीर्तिः (पुं.) निषादः, श्वपचः-च् (पुं.), पुक्कसः-शः-पः । वि. क्रूर-पाप,-कर्मन् २. दुष्कुलीन, हीन,-जाति-वर्ण ।

—चौकड़ी, सं. स्त्री., चंडालचतुष्कं दुष्ट-चतुष्टयम् ।

चंडालिन, चंडालिनी, चंडाली, सं. स्त्री. (सं. चंडाली) चांडाली, मातंगी, निषादी २. पापिनी, दुष्टा ।

चंडिका, सं. स्त्री. (सं.) दुर्गा २. विवादशीला नारी ३. गायत्रीदेवी ।

चंडी, चंडा, सं. स्त्री. (सं.) पार्वती २. क्रोधिनी नारी ३. कलहप्रिया कामिनी ।

चंडू, सं. पुं. (सं. चंडः तीक्ष्ण >) अहिफेन-निर्मितमादकद्रव्यभेदः, *चंडूः (पुं.) ।

—ख़ाना, सं. पुं. (हिं + फ़ा.) चंडू,-गृहं-शाला ।

—बाज़, सं. पुं. (हिं. + फ़ा.) चंडूपः, चंडू,-पायिन्-सेविन् ।

चंडूल, सं. पुं. (देश.) भ(भा)रद्वाजः, मारयः, व्याघ्राटः ।

चंद[1], सं. पुं. (सं. चंद्रः) दे. 'चंद्र' । २. हिंदीकविविशेषः ।

—मुखी, सं. स्त्री. (सं. चंद्रमुखी) शशिवदनी, चंद्रानना ।

चंद[2], वि. (फ़ा.) दे. 'कुछ' ।

चंदन, सं. पुं. (सं. पुं. न.) मलयजः, श्रीखंडं, गंधसारः, सुगंधं, सर्पावासं, शीतलं, गंधाढ्यं, शीतगंधः । २. चंदनकाष्ठं ३. चंदनलेपः ।

—लाल, रक्त-कु,चंदनं, रंजनं पत्रांगम् ।

—सफ़ेद, तैलपर्णिकं, श्वेतचंदनम् ।

चंदला, वि. पुं. (हिं. चांद = खोपड़ी) खल्वाटः, विकेशः (-शी स्त्री.) ।

चँदवा[1], सं. पुं. (हिं. चंद) उल्लोचः, वितानं, आच्छादनं, पिधानम् ।

चंदवा[2] सं. पुं. (सं. चंद्रकः) बर्हनेत्रं, मेचकः २. वर्तुलवस्त्रखंडः-डं ३. मत्स्यभेदः ।

चंदा सं. पुं. (फ़ा. चंद) धनसहायता, आर्थिकसाहाय्यं २. धनभागः. अर्थांशः । २. स्वांशः, उद्धारः ।

—करना, क्रि. स., अर्थांशं संग्रह (क्र्. प. से.) ।

—देना, स्वस्वांशं दा (जु. उ. अ.) ।

चँदिया, सं. स्त्री. (हिं. चांद) शीर्ष-शिरो-मस्तक,-अग्रं, मुंडं २. कपालः-लं, शिरोऽस्थि (न.) ३. (अंत्य-) रोटिका ।

चंदिर, सं. पुं. (सं.) चद्रः सुधांशुः २. गजः द्विप ३. कर्पूरः-रं, घनसारः ।

चंद्र, सं. पुं. (सं.) सोमः, शशांकः, शशिन्, विधुः, रजनी-निशा-शर्वरी-क्षपा,-करः-नाथः-पतिः, मृगांकः, कलानिधिः (पुं.), ग्लौः (पुं.), हिम-शीत-शुभ्र-सुधा,-अंशुः-दीधितिः (पुं.), इंदुः (पुं.), चंदमस् (पुं.), शशधरः । २. जलं ३. सुवर्णं ४. कर्पूरं ५. 'एक' इति संख्या ६. चंद्रकः, बर्हनेत्रम् ।

वि., आह्लादक, आनंदप्रद २. सुंदर ।

—आनन, वि. (सं.) दे. 'चंद्रमुख' ।

—कला, सं. स्त्री. (सं.) चंद्र,-रेखा-लेखा ।

—कांत, सं. पुं. (सं.) चंद्र,-मणिः (पुं.)-रत्नं-उपलः ।

—किरण, सं. पुं. (सं.) चंद्रपादः, शशिकरः ।

—ग्रहण, सं. पुं. (सं. न.), विधु-इन्दु-चंद्र,-ग्रहणं-ग्रहः-ग्रासः-उपरागः ।

—प्रभा, सं. स्त्री. (सं.) दे. 'चंद्रिका' ।

—बिंदु, सं. पुं. (सं.) अनुनासिकचिह्नम् (ँ) ।

—भागा, पुं. स्त्री. (सं.) चंद्रभागी, चंद्रिका, पंचनदप्रांते नदीविशेषः ।

—मुख, वि. (सं.) चंद्रानन, विधु-शशि,-वदन । (-मुखी (स्त्री.) = चंद्रमुखा, चंद्र-शशि-विधु,-वदना-वदनी-आनना-आननी) ।

—रे(ले)खा, सं. स्त्री. (सं.) दे. 'चंद्रकला' ।

—वंश, सं. पुं. (सं.) सोमकुलम् ।

—शाला, सं. स्त्री., शिरोगृहं, वडभी ।

—शेखर, सं. पुं. (सं.) चंद्र,-मौलिः (पुं.)-भूषणः-धरः, शिवः ।

—हार, सं. पुं. (सं.) वर्तुलस्वर्णखंडहारः ।

चंद्रक, सं. पुं. (सं.) १. 'चंद्र' २. चंद्रिका, कौमुदी ३. कर्पूरः-रं ४. बर्हनेत्रं, चंद्रिका ५. नखः-खम् ।

चंद्रमा, सं. पुं. [सं. चंद्रमस् (पुं.)] दे. 'चंद्र' ।

चंद्रहास, सं. पुं. (सं.) असिः, खड्गः २. रावणखड्गः ।

चंद्रातप, सं. पुं. (सं.) चन्द्रिका, ज्योत्स्ना, कौमुदी २. दे. 'चँदवा[१]'

चंद्रिका, सं. स्त्री. (सं.) ज्योत्स्ना, शशि-चंद्र,-प्रभा-कांतिः (स्त्री.) कौमुदी, चंद्र,-आलोकः-प्रकाशः २. चंद्रकः, बर्हनेत्रं (३-४) स्थूल-सूक्ष्म,-एला ।

—उत्सव, सं. पुं. (सं.) शरत्पूर्णिमोत्सवः ।

चंद्रोदय, सं. पुं. (सं.) चंद्र-सोम,-उदयः-उद्गमः-उद्गमनम् ।

चंपई, वि. (हिं. चंपा) चंपक-पीत,-वर्ण-रंग ।

चंपक, सं. पुं. (सं.) (पौधा) चांपेयः, दीप-स्वर्ण-स्थिर-पीत,-पुष्पः-पुष्पकः, शीतलः, सुभगः, भृङ्गमोहिन् वनदीपः । (फूल) हेमपुष्पं, चंपकं इ. । (सं. न.) कदलीफलभेदः ।

चंपा, सं. पुं. (सं. 'चंपक' दे.) ।

—कली, सं. स्त्री., सं. चंपककलिका, चंपक कोरकः २. कंठाभरणभेदः, चंपककली ।

चंपत, वि. (सं. चंप्) तिरो-अंतर्,-हित, लुप्त, गूढं अपसृत ।

चंपू, सं. पुं. (सं. स्त्री.) गद्यपद्यमयं काव्यम् ।

चंबेली, सं. स्त्री., दे. 'चमेली' ।

चंमच, सं. पुं., दे. 'चमचा' ।

चँवर, सं. पुं. (सं. चमरं) चामरम् ।

चक, सं. पुं. (सं. चक्रं) बृहत्क्षेत्रं, महाभूखंडः-डं २. ग्रामटिका, लघुग्रामः ३. रथांगं, मंडलं, चक्रं ४. पट्टः, पट्टोलिका, भूमिकरग्रहणव्यवस्थापकः पत्रभेदः ।

चकई[१], सं. स्त्री., दे. 'चकवी' ।

चकई[२], सं. स्त्री. (हिं, चक) *चक्रकी, क्रीडनकभेदः । वि., गोल, वर्तुल ।

चकचौंध, सं. स्त्री., दे. 'चकाचौंध' ।

चकचौंधना, क्रि. अ., दे. 'चुँधियाना' ।

चकछूँदी, सं. स्त्री., दे. 'छछूँदर' ।

चकती, सं. स्त्री. (सं. चक्रवती >) वस्त्र-चर्म,-खंडः-खंडं-शकलः-शकलम् ।

बादल में–लगाना मु., असंभवं साध् (स्वा. प. अ.) ।

चकत्ता, सं. पुं. (सं. चक्रवर्तः >) त्वक्तिलकः-कं, चर्म,-लांछनं-चिह्नं । २. दंतक्षतम् ।

—भरना या मारना, मु., दंश् (भ्वा. प. अ.) ।

चकनाचूर, वि., (हिं. चिकना + सं.चूर्णः-र्णं <) सुचूर्णित, शकली-चूर्णी, कृत-भूत, सूक्ष्मखंडशः कृत २. भूरिश्रांत, अति,-क्लांत-आयस्त ।

—करना, क्रि. स., चूर्ण् (चु.), खंडशः भंज् (रु. प, अ.)-त्रुट् (चु. आ. से.) ।

—होना, क्रि, अ., अणुशः त्रुट्-चूर्ण्-भंज् (कर्म.) ।

चकपक, वि. (सं. चक् >) चकित, विस्मित २. संभ्रान्त, व्यामूढ ।

चकपकाना, क्रि. अ.(हिं. चकपक) दे.'चौकना' ।

चकम(मा)क, सं. पुं. (तु.) अग्निग्रावन् (पुं.), पावकप्रस्तरः ।

चकमा, सं. पुं., दे. 'धोखा' ।

चकराना, क्रि. अ., (सं. चक्रं>) (शीर्षं) भ्रम् (भ्वा. दि. प. से.), घूर्ण् (भ्वा. आ. से.; तु. प. से,) २. व्यामुह् (दि. प. वे.), आकुली भू ३. चकित (वि.) + भू । क्रि. स., चकित (वि.) + कृ ।

चकरानी, सं. स्त्री. (फ़ा. चाकर) सेविका, परिचारिका ।

चकरी, सं. स्त्री. (सं. चक्री) पेषणी, पेषण,-यन्त्रं-चक्रं २. चक्री,-पट्टः-पट्टं ३. दे. 'चकई' ।

चकला, सं. पुं. (सं. चक्रं>) चक्रकः

वेश्यावीथी, गणिकाहट्टः ३. दे. 'जिला'। वि., विस्तीर्ण, परिणाहवत्।

चकलाना, क्रि-सं. प्रष्ट-विस्तृ (प्रे०), प्रथ् (चु.)।

चकली, सं. स्त्री. (हिं. चकला) चक्री. दे. 'गराड़ी' २. चक्री, चक्रिका, गोलपट्टिका, घर्षणी।

चकल्लस, सं. स्त्री. (अनु० चक) कलहः, विवादः २. परिहासः, विनोदः, कौतुकम्।

चकवा, सं. पुं. (सं. चक्रवाकः) कोकः, चक्रः, रथांग-आह्वय-नामकः, द्वंद्वचारिन्, कामिन्, कामुकः।

चकवी, सं. स्त्री. (हिं. चकवा) चक्रवाकी, कोकी, चक्री, रथांगनाम्नी इ.।

चकाचक, सं. स्त्री. (अनु.) दे. 'घचाघच' वि., (सं. चक् = तृप्तिः) सम्यक् सिक्त, परिपूर्ण। क्रि. वि., भृशं, भूरिः प्रचुरं (सब अव्य.)।

चकाचौंध, सं. स्त्री. (सं. चक् = चमकना, चौं = चारों तरफ, अंध >) चाकचक्येन नेत्रतेजःप्रतिघातः, अतिशयदीप्त्या दृष्टेरस्थैर्यम्।

चकित, वि. (सं.) विस्मित, आश्चर्यान्वित, विस्मयाकुल, साश्चर्य, विस्मय,-उपहत-अन्वित। २. संभ्रांत, व्यामूढ, व्याकुल, ३. सशंक, त्रस्त।

चकोटना, क्रि. स., (हिं. चिकोटी) अङ्गुल्यग्रेण पीड् (चु.)।

चकोतरा-त्रा, सं. पुं. (सं. चक्र >) (वृक्ष) मधुकर्कटी, मातुलुङ्गः, सुगंधा, सदाफलः, महाजंभीरः। (फल) मधुकर्कटिकं, मातुलुंगम् इ.।

चकोर, सं. पुं. (सं.) कौमुदीजीवनः, चंद्रिकापायिन्।

चकोरी, सं. स्त्री. (सं.) चंद्रिकापायिनी।

चक्कर, सं. पुं. (सं. चक्रं) रथांगं, मंडलं २. गोलः-लं वृत्तं वलयः-यं ३. वात,-आवर्त्तः-भ्रमः, वात्या ४. जल-,आवर्त्तः, जलगुल्मः। ५. उभयसंभवः, विकल्पः ६. संभ्रमः, व्यामोहः ७. कृच्छ्रं, संकटं ८. कौटिल्यं, वक्रत्वं ९. पर्यटनं, वि-आ-वर्तः १०. भ्रमिः-घूर्णिः (स्त्री.), भ्रामरम्।

—खाना, मु., परिभ्रम् (भ्वा. दि. प. से.), घूर्ण् (तु. प. से.)।

—मारना, मु., विचर्-पर्यट् (भ्वा. प. से.)।

—में आना, मु., कृच्छ्रे पत् (भ्वा. प. से), संकटे मस्ज् (तु. प. अ.)।

—में डालना, मु., कृच्छ्रे-संकटे,-पत्-मस्ज् (प्रे.)।

चक्का, सं. पुं. (सं. चक्रं) दे. 'चक्कर' (१, २)। ३. बृहद्वर्तुलखंडः-डं ४. इष्टक-प्रस्तर,-राशिः (पुं.)।

चक्की, सं. स्त्री. (सं. चक्री) यन्त्रपेषणी, दे. 'चकरी' (१-२) ३. जानुफलकम्।

—पीसना, क्रि. स., चक्र्या पिष् (रु. प. अ.)-क्षुद् (रु. उ. अ.) चूर्ण् (चु.)। मु., घोरं-अत्यधिकं परिश्रम् (दि. प. से.)-उद्यम् (भ्वा. प. अ.)।

चक्कू, सं. पुं. दे. 'चाकू'।

चक्र, सं. पुं. (सं. न.) दे. 'चक्कर' (१-४)। ५. तैलपेषणी ६. कुलाल-कुम्भकार,-चक्रं-पट्टः ७. अस्त्रभेदः ८. गणः, समूहः।

—धर, सं. पुं. (सं.)
—धारी सं. पुं. (सं.-रिन्)
—पाणि, सं. पुं. (सं.)
} विष्णुः, चक्रभृत्।

—वर्ती,—सं. पुं. (सं.-र्तिन्) राजाधिराजः, मंडलेश्वरः, सम्राज् (पुं.), अधि;-राजः-ईश्वरः।

—वाक, सं. पुं. (सं.) दे. 'चकवा'।

—वृद्धि, सं. स्त्री. (सं.) चक्रवार्द्धुष्यम्।

—व्यूह, सं. सं. (सं.) मंडलाकारः सैन्य-संनिवेशः।

—हस्त, सं. पुं. (सं.) विष्णुः।

चक्रांक सं. पुं. (सं.) (भुजादिषु) चक्र,-चिह्नं-लक्षणम्-अभिज्ञानम्।

चक्रांकित, वि. (सं.) चक्रचिह्नयुक्त, सचक्र-चिह्न। सं. पुं. वैष्णवसम्प्रदायभेदः।

चक्राकार, सं. पुं. (सं.) गोल, मंडलाकृति।

चक्री, सं. पुं. (सं.-क्रिन्) चक्र,-धर-धारिन् २. विष्णुः ३. कुलालः ४. गुप्तचरः ५. तैलिकः, तैलिन् ६. सर्पः ७. चक्रवाकः ८. चक्रवर्तिन्।

चक्षु, सं. पुं. [सं. चक्षुस् (न.)] नेत्रं, नयनम्।

चखना, क्रि. स. (सं. चषणं) आ-,स्वाद् (भ्वा. आ. से.), चष् (भ्वा. उ. से.), रस् (चु.), रसं परीक्ष् (भ्वा. आ. से.), रसनया स्पृश् (तु. प. अ.)।
सं. पुं., आस्वादनं, चषणं, रसनं, ईषदशनम्।

चखाना, क्रि. प्रे., ब. 'चखना' के प्रे. रूप ।

चगलना, क्रि. स. (अनु. चग > अथवा चर्वणं + गिलनं >) क्षुधां विना भक्ष् (चु.) ।

चचा, सं. पुं. दे. 'चाचा' ।

चची, सं. स्त्री., दे. 'चाची' ।

चचेरा, वि. (हिं. चचा) पितृव्यसंबंधिन् ।

—भाई, सं. पुं., पितृव्यपुत्रः, पितृव्यजः ।

चचेरी बहिन, सं. स्त्री., पितृव्यपुत्री, पितृव्यजा ।

चचोड़ना, क्रि. स. (अनु.) दंतैः निपीड्य आ,-चूष् (भ्वा. प. से.), बलवत् स्तन्यं धे (भ्वा. प. अ.) ।

चट, क्रि. वि.
चटपट, „
चटसे „
} (सं. झटिति) क्षणेन, क्षण-निमेष,-मात्रेण, सपदि, द्राक्, अंजसा, क्षणात्-सद्यः,-एव, तत्क्षणं-णे-णेन ।

—करना, मु., अशेषं निगल् (भ्वा. प. से.) २. परद्रव्यमात्मसात् कृ ।

—पट करना, क्रि. अ., त्वर् (भ्वा. प. से.), आशु कृ ।

चटक, सं. स्त्री. (सं. चटुल >) शोभा, श्रीः-कांतिः-द्युतिः-दीप्तिः (स्त्री.) ।

—मटक, सं. स्त्री., प्रसाधनं, अलंकरणं, मंडनं २. हावभावाः, विलसितं, विलासः ।

चटक(ख)ना, क्रि. अ. (अनु. चट) स्फुट् (तु. प. से.), दॄ-भंज्-भिद् (कर्म.), वि-,दल् (भ्वा. प. से.) । सं. पुं., चपेटः-टिका ।

चटकनी, सं. स्त्री. (अनु. चट) कीलः-लं, अर्गलं, तीलकम् ।

चटकाना, क्रि. स. (हिं चटकना) ब. 'चटकना' के प्रे. रूप २. अंगुलीः स्फुट् (प्रे.) ।

जूतियां—' मु., व्यर्थं दारिद्र्येण वा भ्रम् (भ्वा. दि. प. से.) ।

चटकारा वि. दे. 'चटकीला' २. चपल, चंचल ।

चटकीला, वि. (हिं चटक) भासुर, उज्ज्वल, प्रभावत् २. चित्र, नानावर्ण ३. दे. 'चटपटा' ।

चटनी, सं. स्त्री. (हिं. चाटना) अवलेहः, उप-अव,-दंशः, व्यंजनं, उपस्करः ।

चटपटा, वि. (हिं. चाट) स्वादु, सुरस, सरस, रुच्य, रुचिकर २. तीक्ष्ण, तिक्त ।

चट(टा)पटी, सं. स्त्री. (हिं. चटपट) त्वरा, तूर्णिः (स्त्री.), शीघ्रता, क्षिप्रता । २. उत्सुकता आकुलता ।

चटरजी, सं. पुं. (बं.) चट्टोपाध्यायः, वंगप्रांतीयब्राह्मणभेदः ।

चटवाना, क्रि. प्रे., ब. 'चाटना' के प्रे. रूप ।

चटशाल, चटसार-ल, सं. स्त्री., (हिं. चट्टा = चेता + सं. शाला) पाठशाला, विद्यालयः ।

चटाई, सं. स्त्री. (सं. कटः ?) किलिंजकः, किलंजं, तृणपूली, पादपाशी, आस्तरः ।

चटाक, चटाका-खा, सं. पुं. (अनु.) विरावः, सशब्द,-भंगः-स्फोटनं, परुषस्वनः, चटाक,-शब्दः-ध्वनिः (पुं.) ।

चटाचट, सं. स्त्री. (अनु.) चटपटा,-शब्दः-नादः, चटचटायितं, चटचटात् ,-कारः-कृतिः (स्त्री.)-कृतम् ।

चटाना, क्रि. प्रे., ब. 'चाटना' के प्रे. रूप ।

चटुल, वि. (सं.) चंचल, चपल, लोल २. सुंदर ।

चटोर-रा, वि. (हिं. चाटना) अद्मर, घस्मर, अत्याहारिन् , बहुभोजिन् २. स्वादरस,-प्रिय-लोलुप, जिह्वालोल ।

चटोरपन, सं. पुं. (हिं. चटोर) घस्मरता, औदरिकता २. स्वादलोलुपता, जिह्वालौल्यम् ।

चट्टा, सं. पुं. (सं. चेटः >) छात्रः, शिष्यः ।

—बट्टा, सं. पुं. (हिं. चटटू + बट्टा) क्रीडनकसमूहः ।

एक ही थैली के चट्टे बट्टे, मु. समस्वभावाः-तुल्यशीलाः मानवाः ।

चट्टान, सं. स्त्री. (हिं चट्टा = चकत्ता) शिलोच्चयः, स्थूलशिलाः, शैलः, महाप्रस्तरः ।

चट्टी[1], सं. स्त्री. (अनु. चटचट) पादत्रं, पादुका, पादूः (स्त्री.) ।

चट्टी[2], सं. स्त्री. (हिं. चाँटा) हानिः-क्षतिः (स्त्री.) २. दंडः, अपकारशुद्धिः-क्षतिनिष्कृतिः (स्त्री.) ।

चट्टू, सं. पुं. (हिं. अनु. चट) पाषाणमयं बृहदुदू(लू)खलम् ।

चड्डा, सं. पुं. (देश.) जंघामूलं, ऊरुसंधिः (पुं.); विदूषकः । वि. मंदबुद्धि, मूर्ख ।

चढ़ना, क्रि, अ. (सं. उच्चलनं) उदि-उद्या (अ. प. अ.), उपरि-उद् , गम् , अधि-आ-रुह् (भ्वा. प. अ.), अधिक्रम् (भ्वा. प. से., भ्वा. आ. अ.) २. उत्था (भ्वा. प. अ.), समुत्था (भ्वा. आ. अ.) ३. सं-,ऋध् (दि.

प. से.), उप-प्र-ची (कर्म.) ४. आक्रम् , अभिद्रु-अवस्कंद् (भ्वा. प. अ.) ५. उत्पत् (भ्वा. प. से.), उड्डी (भ्वा. आ. से.) ६. उपहारी-उपायनी,-कृ (कर्म.),उपहृ-निवप्- (कर्म.) ७. प्रवृत् (भ्वा. आ. से.) । सं. पुं. उदयनं, उद्गमनं, अधिरोहणं; उत्थानं, आक्रमणं, उड्डयनं इ. ।

चढ़ने योग्य, वि. उदेतव्य, आरोहणीय; आक्रमणीय ।

चढ़ने वाला, सं. पुं. उदेतृ-अधिरोढृ-अभिद्रावक ।

चढ़ा हुआ, वि., उदित, उद्गत, अधिरूढ, आक्रांत ।

चढ़वाना, क्रि. प्रे., व. 'चढ़ना' के प्रे. रूप ।

चढ़ाई, सं. स्त्री. (हिं. चढ़ना) उद्गमनं, आरोहणं २. उद्गमः, उदयः ३. आरोहः ४. आक्रमः, अवस्कंदः ।

चढ़ाउतरी, सं. स्त्री. (हिं. चढ़ना + उतरना) असकृत् आरोहणावरोहणं-णे ।

चढ़ाउपरी, सं. स्त्री. (हिं. चढ़ना + ऊपर) प्रतिस्पर्द्धा, अहंपूर्विका ।

चढ़ा-चढ़ी, सं. स्त्री. (हिं. चढ़ना) दे. 'चढ़ा-उपरी' ।

चढ़ाना, क्रि. स., व. 'चढ़ना' के प्रे. रूप ।

चढ़ाव, सं. पुं. (हिं. चढ़ना) आरोहः, उद्गमः, उत्थानं २. वृद्धिः (स्त्री.), उपचयः ।

—उतार, सं. पुं.. आरोहावरोहौ, उद्गमावगमौ ।

चढ़ावा, सं. पुं. (हिं. चढ़ाना) उपहारः, उपायनं, उत्सर्गः, बलिः (पुं.) २. दे. 'बढ़ावा' ।

चढ़ैत, सं. पुं. (हिं. चढ़ना) आ-अधि.-रोहिन्-रोहक-रोढृ ।

चढ़ैता, सं. पुं., (हिं. चढ़ना) हय-अश्व-आरोहः-आरोहिन् , सादिन् , तुरगिन् ।

चणक, सं. पुं. (सं.) दे. 'चना' ।

चतुःशाख, सं. पुं. (सं. न.) शरीरं, देहः, कायः, तनुः-नूः (स्त्री.)

चतुरंग, सं. पुं. (सं. न.) अक्षक्रीडाभेदः २. चत्वारि सेनांगानि (हस्त्यश्वरथपदातय) इति ३. चतुरंगिणी सेना । वि., अंगचतुष्टययत् ।

चतुरंगिणी, सं. स्त्री. (सं.) हस्त्यश्वरथपदातिरूपिणी सेना । वि. स्त्री., अंगचतुष्टयवती ।

चतुर, वि. (सं.) निपुण, दक्ष, प्रवीण, कुशल, विचक्षण, विशारद २. धीमत् , बुद्धिमत् , प्रज्ञ, प्राज्ञ ३. कापटिक-छाद्मिक [-की (स्त्री.)], कितव, धूर्त्त ।

चतुरता, सं. स्त्री. (सं.) नैपुण्यं, दाक्ष्यं, कौशलं, प्रावीण्यं २. बुद्धिमत्त्वं, प्राज्ञता ३. कैतवं, कापट्यं इ० ।

चतुराई, सं. स्त्री., दे. 'चतुरता' ।

चतुरानन, सं. पुं. (सं.) चतुर्मुखः, ब्रह्मन् (पुं.) ।

चतुर्थ, वि. (सं.) तुर्य, तुरीय ।

चतुर्थी, वि. स्त्री. (सं.) तुर्या, तुरीया २. पक्षस्य तुरीया तिथिः ३. दे. 'चौथा' ।

चतुर्दिक् , सं. पुं., दे. 'चतुर्दिश' ।

चतुर्दिश, सं. पुं. (सं. न.) दिक्चतुष्टयम् , चतुर्दिक्समूहः । क्रि. वि., चतुर्दिक्षु, सर्वतः, समंततः, विश्वतः, समंतात्, सर्वत्र (सब अव्य.) ।

चतुर्भुज, वि. (सं.) चतुर्बाहु, चतुर्हस्त २. चतुष्कोण, चतुरस्र । सं. पुं. (सं.) विष्णुः २. चतुष्कोणः, चतुरश्रः-स्रः ३. चतुर्भुजं, वर्गः, सम, चतुर्भुजः-चतुरस्रः ।

चतुर्मुख, सं. पुं. (सं.) दे. 'चतुरानन' । क्रि. वि., सर्वतः, परितः, समंतात् (सब अव्य.) ।

चतुर्युग, सं. पुं. (सं. न.) युग,-चतुष्कं-चतुष्टयम् ।

चतुर्युगी, सं. स्त्री. (सं.) दे. 'चतुर्युग' ।

चतुर्वर्ग, सं. पुं. (सं.) धर्मार्थकाममोक्षाः ।

चतुर्वर्ण, सं. पुं. (सं.) ब्राह्मणक्षत्रियवैश्यशूद्राः, चातुर्वर्ण्यं, वर्ण,-चतुष्टयं-चतुष्कम् ।

चतुष्कोण, वि. (सं.) चतुरस्र, चतुरश्र, चतुर्भुज २. सम, चतुर्भुज-चतुरश्र । सं. पुं. (सम–) चतुर्भुजः-चतुरश्रः ।

चतुष्टय, सं. पुं. (सं. न.) चतुःसंख्या, चतुष्कं, चतुर्वस्तुसमूहः, चतुष्कम् ।

चतुष्पथ, सं. पुं. (सं. पुं. न.) दे. 'चौराहा' ।

चतुष्पद, सं. पुं. तथा वि. (सं.) दे. 'चौपाया' ।

चद्दर, सं. स्त्री. (फ़ा. चादर) शयनास्तरणं शय्याच्छादनं, प्रच्छद,-पटः-वस्त्रं, प्रच्छदः उत्तरच्छदः २. (धातकी) फलकः-कं, पत्रम् ।

चना, सं. पुं. (सं. चणः) हरि,-मंथः-मंथकः-मंथजः, सुगंधः, बालभोज्यः, वाजिभक्ष्यः, कंचुकिन् , कृष्णचंचुकः ।

नाकों चने चबवाना, मु., अत्यंतं सं-परि-तप् (प्रे.) ।

लोहे का चना, मु., दुष्करं कर्मन् (न.) ।

चनाव, सं. स्त्री. (सं. चन्द्रभागा) चान्द्र चन्द्र-भागा-भागी ।

चपकन, सं. पुं. (हिं. चिपकना) कंचुक-उत्तरीय,-भेदः ।

चपकना, दे. 'चिपकना' ।

चपकलश, सं. स्त्री. (तु.) खड्ग-असि-कृपाण,-युद्धम् २. कलहः, उपद्रवः ।

चपटा, वि., दे. 'चिपटा' ।

चपड़चपड़, सं. स्त्री. (अनु.) चपड़चपड़-ध्वनिः (पुं.) ।

चपड़ा, सं. पुं. (हिं. चपटा) अलक्तः-क्तकः, रा(ला)क्षा २. लाक्षा-अलक्त,-पत्रं ३. रक्तकीट-भेदः ।

चपत, सं. पुं. (सं. चपटः)चपेटः-टिका, चपट-करतल,-आघातः प्रहारः २. क्षतिः-हानिः (स्त्री.)।

चपनी, सं. स्त्री. (सं. चपनं = दबाना >) पुटः-टं-टी, छदः, छदनं, पिधानं २. शरावः, वर्धमानकः ३. जानुफलकम् ।

चपरास, सं. स्त्री. (फ़ा. चप = वायाँ + रास्त = दायाँ) * प्रेष्य,-पट्टः-पट्टकः ।

चपरासी, सं. पुं. (हिं. चपरास) प्रेष्यः, भृत्यः, नियोज्यः, किंकरः, चोलकिन् ।

चपल, वि. (सं.) दे. 'चंचल' (१-४)५. क्षणिक, अचिरस्थायिन् ६. शीघ्र-आशु,-कारिन् , अवि-लंबिन् ७. शीघ्र, तूर्ण, क्षिप्र,द्रुत ८. मायाविन् , समाय ९. चतुर, अवसरज्ञ १०. धृष्ट, निर्लज्ज ।

चपलता, सं. स्त्री. (सं.) दे. 'चंचलता' (१-२) ३. धृष्टता, धाष्टर्य, वैयात्यम् ।

चपला, सं. स्त्री. (सं.) लक्ष्मीः (स्त्री.), कमला २. विद्युत (स्त्री.), चंचला ३. जिह्वा ४. पुंश्चली, कुलटा । वि. स्त्री., चंचला २. शीघ्रकारिणी ।

चपली, सं. स्त्री. (हिं० चपटी) पन्नद्धा, पन्नध्री ।

चपाती, सं. स्त्री. (सं. चर्पटी) पोली, पोलिका, रोटी(ट)का ।

चपेट, सं. स्त्री. (सं. चपेटः) दे. 'चपत' (१-२) ३. आघातः, प्रहारः ।

चप्पन, सं. पुं.. दे. 'चपनी'(१) ।

चप्पल, सं. पुं. (हिं. चपटा) पादूः (स्त्री.), पादुका, कोशी-षी ।

चप्पा, सं. पुं. (सं. चतुष्पाद्-द >) चतुर्थांशः तुर्य-तुरीय,-भागः, २. अंगुलीचतुष्टयपरिमाणं ३. किष्कुः (पुं. स्त्री.), वितस्तिः (पुं.) ४. अल्पांशः ।

चप्पी, सं. स्त्री. (सं. चप् = दबाना >) सं,-वाहः-वाहनं-वाहना, चरणसेवा ।

चप्पू, सं. पुं. (हिं. चाँपना) नौका-नौ,-दंडः, क्षेपणी-णिः (स्त्री.) ।

—मारना, क्रि. स., क्षेपण्या चल्-वह् (प्रे.) ।

चबवाना, क्रि. प्रे. व. 'चबाना' के प्रे. रूप ।

चबाना, क्रि. सं. (सं. चर्वणं) चर्व् (भ्वा. प. से.), संदंश् (भ्वा. प. अ.), दंतैः निष्पिष् (रु. प. अ.) । सं. पुं., चर्वणं, दंतैः निष्पेषणं, संदंशनम् ।

चबा चबा कर बात करना, मु., मंदं सस्वरं च वद् (भ्वा. प. से.) ।

चबे को चबाना, मु., पिष्टपेषणं, चर्वितचर्वणम् ।

चबूतरा, सं. पुं. (सं. चत्वरम् >) वेदिः (स्त्री.)-दिका, वितर्दिः(स्त्री.)र्दी-र्दिका, उन्नत-स्थली २. दे. 'कोतवाली' ।

चबेना, सं. पुं. (हिं. चबाना), भृष्ट-भ्रष्ट,-अन्न-धान्यं, चर्वणम् ।

चबेनी, सं. स्त्री. (हिं० चबेना) भृष्टान्नोप-हारः २. जलपानसामग्री ।

चभक, सं. पुं. (अनु.) निमज्जन-ध्वनिः,-शब्दः ।

चमक, सं. स्त्री. (हिं. चमकना) कांतिः-दीप्तिः-द्युतिः-रुचिः (स्त्री.), आभा, प्रभा २. आलोकः, प्रकाशः ३. कटि-श्रोणी,-पीडा ।

—दमक, सं. स्त्री., अतिशय,-शोभा-श्रीः-कांतिः-दीप्तिः-द्युतिः- विभूतिः (स्त्री.) ।

—दार, वि. उज्ज्वल, भासुर, भास्वर, अति-महा,-तैजस-शोभन-दीप्तिमत्-प्रभ ।

चमकना, क्रि. अ. (सं. चमत्करणं) प्रकाश्-विद्युत्-भास्-शुभ्-भ्राज्-भ्राश्-भ्लाश् (भ्वा. आ. से.), प्र-, भा (अ. प. अ.), चकास् (अ. प. से.), दीप् (दि. आ. से.), विलस् (भ्वा. प. से.) २. समृद्धि-वृद्धिं या (अ. प. अ.), सं-,ऋध् (दि. तथा स्वा. प. से.) ३. अक-स्मात् कंप्-स्पंद् (भ्वा. आ. से.), संत्रस्त-भयचकित (वि.) भू ।

सं. पुं., प्रकाशनं, विद्योतनं, विलसनं, समृद्धिः (स्त्री.), प्र-उप,-चयः, सहसा स्पंदनं-कंपनम् ।

चमकाना, क्रि. प्रे., व.. 'चमकना' के प्रे. रूप ।

चमकारा, सं. पुं. (हिं. चमक) कान्तिः-दीप्तिः-

द्युतिः (स्त्री.) २. चाकचक्यं, तीव्र,-आलोकः-प्रकाशः ।

चमकी, सं. स्त्री. (हिं. चमक) आपातरमणीयं वस्तु (न.) ।

चमकीला, वि. (हिं. चमक) दे. 'चमकदार' ।

चमक्को, सं. स्त्री. (हिं. चमकना) कुलटा, पुंश्चली २. कलह-कलि-कारी-कारिणी-प्रिया ।

चमचिड़ी, सं. स्त्री.
चमगा(गी)दड़, सं. पुं.
चमगिदड़ी, सं. स्त्री.
} (सं. चर्मचटी) चर्मचट(टि)का, चतु(तू)का, जतु, नी, चर्मपत्रा, अजिनपत्रिका, चार्म्मिः (स्त्री.) ।

चमचम, सं. स्त्री. (देश.) चमचमाख्यः मिष्टान्नभेदः । वि., दे. 'चमकदार' ।

चमचमाना, क्रि. अ., दे. 'चमकना' (१) ।

चमचमाहट, सं. स्त्री., दे. 'चमक' (१-२) ।

चमाच, सं. पुं. (सं. चमसः-सं) कंवा-विः (स्त्री.), खजः, खजाका । (लकड़ी का) दारुहस्तकः, तर्दुः- तर्दूः (स्त्री.) ।

—भर, क्रि. वि., चमस,-मात्रं-परिमाणम् ।

चमचिचड़, वि. (हिं. चाम + चिचड़ी) अत्याग्रहिन् , प्रतिनिविष्ट, अत्याग्रहशील ।

चमड़ा, सं. पुं. [सं. चर्मन् (न.)] त्वच्-रोमभूमिः (स्त्री.), त्वचं-चा, असृग्,-धरा-वरा, छली-ल्ली । (मृत प्राणी का) अजिनं, कृत्तिः-दृतिः (स्त्री.) ।

—उधेड़ना, क्रि. स., निस्त्वचीकृ, त्वचं-चर्म अपनी-निर्हृ (भ्वा. प. अ.) ।

चमड़ी, सं. स्त्री. (हिं. चमड़ा) दे. 'चमड़ा' ।

चमत्कार, सं. पुं. (सं.) विस्मयः, आश्चर्यं, अद्भुतं, चमत्कृतिः (स्त्री.) २. अलौकिक-अतिमानुष-लोकोत्तर-कर्मन् (न.) ।

चमत्कारक, वि. (सं.) आश्चर्य-विस्मय,-जनक-उत्पादक, अतिमानुष (-षी स्त्री.), दिव्य, विलक्षण, अद्भुत, आश्चर्य, चमत्कारिन् ।

चमत्कृत, वि. (सं.) आश्चर्य-विस्मय,-अन्वित-आपन्न-उपहृत, विस्मित ।

चमन, सं. पुं. (फ़ा.) कुसुमाकरः, पुष्प-,वनं-वाटः-वाटिका ।

चमर, सं. पुं. (सं.) चमरगौः (पुं.) धेनुगः, बालधिप्रियः, वन्यः, व्यजनिन् २. च(चा)मरम् ।

चमरस, सं. पुं. (सं. चर्मरसः >) चर्मपादुका-जनितं चरणव्रणं, *चर्मरसः ।

चमरी, सं. स्त्री. (सं.) चमरगवी, गिरिप्रिया, दीर्घबाला २. च(चा)मरं ३. मञ्जरी ।

चमरौट, सं. पुं. (हिं. चमार) शस्ये चर्मकारभागः ।

चमस, सं. पुं. (सं. पुं. न.) दे. 'चमचा' ।

चमार, सं. पुं. (सं. चर्म्मकारः) चर्मकृत् , चर्मरुः (पुं.) २. पादू-पादुका,-कृत्-कारः ३. पादुकासंधातृ (पुं.) । [चमारी-रिन (स्त्री.) = चर्मकारी इ.]

चमेली, सं. स्त्री. [सं. चम्पकवेल्लिः (स्त्री.)] (पौधा) मनोहरा, मनोज्ञा, जाती, मालती, सुकुमारा, सुरभि-हृद्य,-गंधा २. (फूल) जाती-मालती,-पुष्पम् ।

चमोटा, सं. पुं.
चमोटी, सं. स्त्री.
} (हिं. चाम) क्षुरतेजनी, चर्मपट्टी ।

चय, सं. पुं. (सं.) समूहः, गणः, राशिः (पुं.) २. मृत्तिकाचयः, क्षुद्रपर्वतः ३. दुर्गं ४.प्राकारः, वप्रः-प्रं ५. वेदी-दिका ६. चरण-पाद,-पीठः-पीठं ७. गृह-भित्ति-,मूलं, पोटः ।

चयन, सं. पुं. (सं. न.) संग्रहणं, समाहरणं, राशी-एकत्र,-करणम् ।

चर[1], सं. पुं. (सं.) चारः, स्पशः, प्रणिधिः (पुं.) गूढपुरुषः २. मंगलग्रहः, कुजः ३. खञ्जनः ४. कपर्दकः ।
वि. अस्थिर, जंगम, चल २. प्राणिन् , चेतन, सजीव ।

—अचर, वि., चलाचल, जडजंगम, स्थावरजंगम २. जडचेतन, सजीवनिर्जीव , सप्राणनिष्प्राण ।

चर[2], सं. पुं. (अनु.) वस्त्रादिविदरणध्वनिः (पुं.) चरितिशब्दः ।

चरक, सं. पुं. (सं.) मुनिविशेषः २. तत्कृत-वैद्यकग्रन्थः ३. दे. 'चर' (१) । ४. अध्वगः, यात्रिन् ५. भिक्षुकः ।

चरकटा, सं. पुं. (हिं. चारा + काटना) यवस-घास,-कर्तकः-छेदकः । २. क्षुद्रः, नीचः, जाल्मः ।

चरका, सं. पुं. (फ़ा. चरकः) ईषत्क्षतं, क्षुद्र,-व्रणः-व्रणं २. हानिः (स्त्री.) ३. छलम् ।

चरख़ा, सं. पुं. (फ़ा चर्ख) तांतवचक्रं, चक्रं २. आवापनम् ।

—कातना, क्रि. स., तंतून् कृत (रु. प. से)-सृज् (तु. प. अ.), तांतवचक्रं चल्-भ्रम् (प्रे.)।

चरख़ी, सं. स्त्री. (हिं. चरखा) लघुचक्रं, चक्री, चक्रिका ३-४. दे. 'गड़ारी' तथा 'बेलन'।

चरचर, सं. (स्त्री.) चरचराशब्दः, चरचरायितं २. व्यर्थ-अनर्थक,-आलापः, प्रजल्पः-पनम्।

चरचराहट, सं. स्त्री., दे. 'चरचर'।

चरट, दे. 'खंजन'।

चरण, सं. पुं. (सं. पुं. न.) पादः, पदः-दं, पद्-पाद् (पुं.), वि,-क्रमः, क्रमणः, चलनः, अंघ्रिः (पुं.)। २. चरणः, पदं (छन्द.) ३. चतुर्थांशः ४. गमनं, चलनं ५. आचारः ६. (तृण-) भक्षणं ७. अनुष्ठानं ८. विहरण-स्थलं ९. सूर्यादेः किरणः १०. क्रमः।

—चिह्न, सं. पुं. (सं. न.) पाद-पद,-मुद्रा-चिह्नं-लक्षणम्।

—दासी, सं. स्त्री. (सं.) भार्या, पत्नी २. उपानह् (स्त्री.), पादुका।

—सेवा, सं. स्त्री. (सं.) परि-उप,-चर्या, शुश्रूषा।

—छूना, मु., पादयोः पत् (भ्वा. प. से.). चरणौ स्पृश् (तु. प. अ.)।

चरणामृत, सं. पुं. (सं. न.) चरणोदकं, पादोदकम्।

—लेना, मु., चरणामृतं आचम् [भ्वा. प. से., आच(चा)मति]।

चरना, क्रि. स. (सं. चरणं) यवसं-तृणं खाद् (भ्वा. प. से.)=भक्ष् (चु.)-भुज् (रु. आ. अ.), चर् (भ्वा. प. से.)। २. पर्यट्-भ्रम् (भ्वा. प. से.)।

चरनी, सं. स्त्री. (हिं. चरना) दे. 'नाँद' (२) २. गो,-चरः-प्रचारः।

चरपट, सं. पुं. दे. 'चपत'।

चरपरा, वि. (अनु.) तिक्त, उष्ण, तीव्र, तीक्ष्ण।

चरबी, सं. स्त्री. (फ़ा.) मांस,-सारः-स्नेहः, वपा, वशा-सा, मेदस् (न.)।

—की झिल्ली, सं. स्त्री., (१-२) गर्भ-अंत्र,-आवेष्टनम्।

—चढ़ना, मु., दे. 'मोटा होना'।

—छाना, मु., मदांध-अतिगर्वित (वि.) भू।

चरम, वि. (सं.) अन्तिम, अन्त्य, पश्चिम, अवम।

—काल, सं. पुं. (सं.) निधन-मृत्यु,-समयः-कालः।

—सीमा, सं. स्त्री. (सं.) परिनिष्ठा, परमावधिः (पुं.)।

चरवाई, सं. स्त्री. (हिं. चरवाना) पशुचारण,-भृत्या-वेतनं २. पशुचारणं, गोपालनम्।

चरवाना, क्रि. प्रे., ब. 'चरना' के प्रे. रूप।

चरवाहा, सं. पुं. (हिं. चरना) पशु-गो,-चारकः-पालकः-पालः-रक्षकः।

चरस, सं. पुं. (सं. चर्मन् >) १. चर्म,-द्रोणी-सेचनी २. चर्ममयः महा,-पुटः-कोषः ३. गंजा-निर्यासः, मादकद्रव्यभेदः।

चरसा, सं. पुं. (हिं. चरस) गोमहिषादेः चर्मन् (न.), २-३. दे. 'चरस' (१-२)।

चरसी, सं. पुं. (हिं. चरस) चरस,- पः-पायिन् २. चर्म,-सेचकः-सेक्तृ (पुं.)।

चराई, सं. स्त्री. (हिं. चरना) चरणं, यवस-तृण,-भक्षणं २-३. दे 'चरवाई' (१-२)।

चराग़, दे. 'चिराग'।

चराग़ान, सं. पुं. (फ़ा.) दीपोत्सवः।

चरागाह, सं. स्त्री. (फ़ा) गोप्रच(चा)रः, यवसक्षेत्रं, शाद्वलं, तृणावृतभूमिः (स्त्री.)।

चराचर, वि. (सं.) दे. 'चर' के नीचे।

चराना, क्रि, प्रे. (हिं. चरना) ब. 'चरना' के प्रे. रूप २. मुह्-वंच् (प्रे.), प्र-वि-लुभ् (प्रे.)।

चरिंदा, सं. पुं. (फ़ा.) तृणभक्षक-यवसाद,-पशुः।

चरित, सं. पुं. (सं. न.) दे. 'चरित्र'।

चरितार्थ, वि. (सं.) कृतार्थ, कृतकृत्य, पूर्णमनोरथ, सफल २. उचित, योग्य, अनुरूप।

चरित्र, सं. पुं. (सं. न.) आचारः, आचरणं, चरितं, वृत्तं, वृत्तिः (स्त्री.) चारित्र्यं, शीलं, सौजन्यं २. स्वभावः, प्रकृतिः (स्त्री.) ३. कार्य, कर्मन् (न.), चेष्टितं ४. जीवन,-चरितं-चरित्रं, जीवनी।

—नायक, सं. पुं. (सं.) प्रधानपुरुषः, चरितनायकः।

चरित्रवान्, वि. (सं.-,वत्) सदाचारः,-रिन् , आचारवत् ।

चरी, सं. स्त्री. (हिं. चरना) घासः, यवसः,-सं., जवसः-सं, तृणादिकम् ।

चर्च, सं. पुं. (अं.) दे. 'गिरजा' २. संप्रदायः ।

चर्चरी, सं. स्त्री. (सं.) गीति-भेदः २. होलिकोत्सवः ३. करतलध्वनिः (पुं.) ४. आमोद-प्रमोदाः ५. वाद्यभेदः ।

चर्चा, सं. स्त्री. (सं.) चर्चः, अभिधानं, आख्यानं, कथनं, कीर्तनं, निर्देशः, वर्णनं २. वार्ता,-आलापः, सं,-भाषणं-कथा, कथाप्रसंगः ३. किंवदन्ती, जनप्रवादः, ४. लेपनं, अभ्यंजनम् ।

—करना, क्रि. स., संभाष् (भ्वा. आ. से.), संवद् (भ्वा. प. से.)

चर्चित, वि. (सं.) अभ्यक्त, लिप्त २. विचारित ।

चर्म, सं. पुं. (सं. चर्मन्) दे. 'चमड़ा' ।

—कार, सं. पुं. (सं.) दे. 'चमार' ।

—दंड पुं. पुं. (सं.) दे. 'चाबुक' ।

चर्मी, वि. (सं. चर्मिन्) चर्म,-मय-निर्मित-संबंधिन् , चर्मण्य । सं. पुं. चर्मधारि-फलकभृद्-योधः ।

चर्य, वि. (सं.) गमनीय, गन्तव्य (स्थानादि) २. आचरणीय, करणीय ।

चर्या, सं. स्त्री. (सं.) कृत्यानुष्ठानं, कर्तव्यपालनं २. चलनं, गमनं, ३. आचारः, आचरणं ४. सेवा ५. आजीविका, वृत्तिः (स्त्री.) ।

चर्राना, क्रि. अ. (अनु.) चरचरायते (ना. धा.) चरचरशब्द कृ २. तप् (कर्म.), व्यथ् (भ्वा. आ. से.) ३. अत्यन्तं अभिलष् (भ्वा. उ. से.) ।

चर्वण, सं. पुं. (सं. न.) संदंशनं, दंतैः निष्पेषणं २. चर्व्यपदार्थः ३. दे. 'चबेना' ।

चर्वणा, सं. स्त्री. (सं.) चर्वणं, दन्तैः निष्पेषणं, संदंशनम् २. रसास्वादनं, रसानुभूतिः (स्त्री.) ३. चर्वण,-दन्तः-रदः ।

चर्वित, वि. (सं.) दंतनिष्पिष्ट, संदष्ट ।

चर्व्य, वि. (सं.) चर्वणीय, दन्तैः निष्पेषणीय । सं. पुं. (सं. न.) भृष्ट,-अन्नं-धान्यम् ।

चर्स, सं. पुं., दे. 'चरस' ।

चल, वि. (सं.) चर, चरिष्णु, जंगम, गमनशील २. चंचल, अस्थिर, अधीर । सं. पुं., शिवः २. विष्णुः ३. पारदः, रसः ।

—चलाव, सं. पुं., यात्रा, प्रस्थानं, २. महाप्रस्थानं, मृत्युः (पुं.) ।

—चित्त, वि. (सं.) लोल-अस्थिर-चंचल,-मति-बुद्धि-चित्त ।

—विचल, वि. (सं.) अव्यवस्थित, अक्रम ।

चलता, वि. (हिं. चलना) चलत्-गच्छत्-चरत् (शत्रंत), गतिमत् २. प्रचलित, सर्वसंमत ३. समर्थ, शक्तिमत् ४. व्यवहारकुशल, कार्यपटु । [चलती (स्त्री.) = चलंती, प्रचलित इ.] ।

चलती, सं. स्त्री. (हिं. चलना) प्रभावः, अधिकारः ।

चलन, सं. पुं. (सं. चलनं) गतिः (स्त्री.), गमनं, यानं, प्रस्थानं २. रीतिः (स्त्री.), क्रमः, अनुसारः ३. व्यवहारः, उपयोगः, प्रचारः ।

—सार, वि. चिर-,स्थायिन् , दीर्घ-चिर,-काल-स्थायिन् २. प्रचलि(रि)त ।

चलना, क्रि. अ. (सं. चलनं) चल्-चर्-व्रज् (भ्वा. प. से.), या-इ (अ. प. अ.), गम् , २. सक्रिय-सचेष्ट-सगतिक (वि.) भू , स्फुर् (तु. प. से.), कंप् (भ्वा. आ. से.) ३. सृ-सृप् (भ्वा. प. अ.) ४. (पद्भ्यां-पादाभ्यां) चल्-चर्-गम्-या, परि-,क्रम् (भ्वा. प. से., भ्वा. आ. अ.) ५. प्र-,वह् (भ्वा. उ. अ.), प्र-,स्रु (भ्वा. प. अ.) ६. वा (अ. प. अ.). वह् ७. प्रवृत् (भ्वा. आ. से.), स्था (भ्वा. प. अ.) ८. उपयुज्-व्यवहृ (कर्म.) ९. कलहायते (ना. धा.), विवद् (भ्वा. आ. से.) १०. सफलीभू , कृतार्थ-कृतकृत्य(वि.)भू । सं. पुं., चलनं, चरणं, गमनं, प्रस्थानं, स्फुरणं; वहनं इ. ।

चलने वाला, सं. पुं., चलितृ-गंतृ-यातृ (पुं.) इ. ।

चल पड़ना, मु., प्र-,स्था (भ्वा. आ. अ.), चल्-या ।

चल बसना, मु., मृ (तु. आ. अ.), पंचत्वं या ।

चले चलना, मु. चल्-गम् ।

चलनी, सं. स्त्री., दे. 'छलनी' ।

चलवाना, क्रि. प्रे., व. 'चलना' के प्रे. रूप ।

चला, सं. स्त्री. (सं.) पृथिवी २. दामिनी ३. लक्ष्मीः (स्त्री.) ।

चलाऊ, वि. (हिं. चलना) दीर्घ-चिर,-कालस्थायिन् , दृढ़, स्थिर ।

चलाचल, वि. (सं.) चपल, चंचल, लोल २. जडचेतन ३. स्थावरजंगम ।
चलाचली, सं. स्त्री. (हिं, चलना) प्रस्थान-प्रयाण--त्वरा-संभ्रमः २. प्रस्थानं, प्रयाणं, अप,-यानं-गमः ३. प्रस्थान,-कालः-समयः ४. प्रयाणोपकल्पनम् ।
च(चा)लान, सं. स्त्री. पुं. (हिं. चलना) प्रचलनं, प्रस्थानं, प्रयाणं, अप,-यानं-गमः-गमनं २. प्रचालनं, प्रस्थापनं, प्रेषणं-णा, प्रयापणं-नं ३. अभियोजनं, अभियुज्य अधिकरणे प्रेषणम् ।
चलाना, क्रि. स., व. 'चलना' के प्रे. रूप । २. (गोली आदि) लोह,-गोलान्-गुलिकाःप्रक्षिप्-विसृज् (तु. प. अ.) ३. प्रारम्भ् (भ्वा. आ. अ.), प्रवृत् (प्रे.) ।
चलायमान, वि. (हिं. चलना) चलत्-गच्छत्-सर्पत् (शत्रंत) २. चंचल, अस्थिर ।
चलाव, सं. पुं. (हिं. चलना) प्रस्थानं, प्रयाणं २. यात्रा ३. रीतिः (स्त्री.), क्रमः ।
चलित, वि. (सं.) दे. 'चलायमान' (१-२) ३. प्रचलित ।
चवन्नी, सं. स्त्री. [हिं. चौ (= चार)+आना] चतुराणी, रुच्यः ।
चवर्ग, सं. पुं. (सं.) चकारादयः पंचवर्णाः ।
चवाई, सं. पुं. (हिं. औ+वाई = हवा) निंदकः, अप-परि,-वादकः २. पिशुनः, कर्णेजपः ।
चवालीस, वि. (सं. चतुश्चत्वारिंशत्) । सं. पुं. उक्ता संख्या, तदङ्कौ (४४) च ।
चवालिसवां, वि., (हिं. चवालीस) चतुश्चत्वारिंशत्तमः (मी-मम्) ।
चश्म, सं. स्त्री. (फ़ा.) नेत्रं, नयनम् ।
—दीद, वि. (फ़ा.) दृष्ट, अवलोकित, प्रत्यक्ष ।
—दीद गवाह, सं. पुं. (फ़ा.) प्रत्यक्ष,-साक्षिन्-दर्शिन्-प्रत्यक्षिन्-देश्यः ।
चश्मा, सं. पुं. (फ़ा.) दे. 'ऐनक' २. उत्सः, निर्झरः, प्रस्रवणं, स्रोतस् (न.) ३. कु-क्षुद्र,-नदी-सरित् (स्त्री.) ।
चषक, सं. पुं. (सं. पुं. न.) मद्यपानपात्रम्, अनुतर्षणं, सरकः, गल्वर्कः २. मधु (न.) ।
चषण, सं. पुं. (सं. न.) भक्षणं, खादनम् २. हननं, मारणम् ।
चसक, सं. स्त्री. (देश.) दे. 'कसक' ।
चसकना, क्रि. अ. दे. 'कसकना' ।
चसका, सं. पुं. (सं. चषकः >) आ-,स्वादः, रसः, प्रवृत्तिः (स्त्री.) अभि-,रुचिः (स्त्री.) । बुरा—,व्यसनम् ।
चस्पाँ, वि. (फ़ा.) लग्न, संश्लिष्ट ।
चहक, सं. स्त्री. (हिं. चहकना) कूजनं, कूजितं, कलरवः, चुंकारः, खग,-विरुतं-विरावः ।
चहकना, क्रि. अ. (अनु.) कूज् (भ्वा. प. से.), विरु (अ. प. से.) ।
चहचहा, सं. पुं., दे. 'चहक' ।
चहचहाना, क्रि. अ. (अनु.) दे. 'चहकना' ।
चहचहाहट, सं. स्त्री. दे. 'चहक' ।
चहबच्चा, सं. पुं. (फ़ा. चाह = कूप + हिं. बच्चा) कूपकः, जल,-कुंडं-आशयः ।
चहल, सं. स्त्री. (अनु. चहचह) आनन्दोत्सवः ।
चहलकदमी, सं. स्त्री. (हिं. चहल+फा. क़दम) विचरणं, विहारः, परि,-क्रमणं-भ्रमणं-अटनम् ।
चहल-पहल, सं. स्त्री. (अनु.) आनन्दः, उत्सवः, उल्लासः, प्र,-मोदः हर्षः ।
चहारदीवारी, सं. स्त्री. दे. 'चारदीवारी' ।
चाँई, वि. (देश. चई = डाकू जाति) अपहरणशील, चौर्यवृत्ति । धूर्त्त, छलिन् ।
चाँचल्य, सं. पुं. (सं. न.) दे. 'चंचलता' ।
चाँटा, सं. पुं. (अनु. चट) दे. 'चपत' ।
चाँडाल, सं. पुं. (सं.) दे. 'चंडाल' ।
चाँडाली, सं. स्त्री. (सं.) दे. 'चंडाली' ।
चाँद, सं. पुं. (सं. चंद्रः) दे. 'चंद्र' २. चन्द्रकलाकारः आभूषणभेदः, *चन्द्रः ३. मासः ४. लक्ष्यं-क्षं, शरव्यं । सं. स्त्री., शिरोऽग्रं, कपालशिखरं २. शिरोऽस्थि (न.), कपालः-लम् ।
—मारी, सं. पुं., लक्ष्यवेधः, शरव्यनिर्भेदः ।
चाँदना, सं. पुं. (हिं. चाँद) आलोकः, प्रकाशः २. दे. 'चंद्रिका' ।
—पाख, सं. पुं. पूर्व-शुक्ल-शुद्ध-सित,-पक्षः ।
चाँदनी, सं. पुं. (हिं. चाँदना) दे. 'चंद्रिका' २. श्वेत-सित,-प्रच्छदः । ३. शुक्लोल्लोचः ४. तगराख्यं पुष्पम् ।
—चौक, सं. पुं. (हिं.+सं. चतुष्कं) मुख्यमार्गः, प्रधानहट्टः, २. दिल्लीनगरस्य प्रधानहट्टः,* चन्द्रिकाचतुष्कम् ।

—रात, सं. स्त्री., ज्योतिष्मती, ज्योत्स्नी ।

चाँदी, सं. स्त्री., (हिं. चाँद) रजतं, रूप्यं, दुर्वर्णं, श्वेतं, कलधौतम् । २. धनं, वित्तं ३. आर्थिकलाभः ४. दे. 'चाँद', (सं. स्त्री.) ।

—का, वि, राज-रौप्य [-ती,-प्यी (स्त्री.)], रजत-रूप्य,-निर्मित-रचित, रजत ।

—सा, वि., रूप्योपम, रजतवर्ण, अतिधवल ।

—का जूता, मु., दे. 'घूँस' ।

चाँद्र, वि. (सं.) चाँद्रमस [-सी(स्त्री.)] ऐंदव [-वी (स्त्री.)] चंद्र,-सोम- ।

—मास, सं. पुं. (सं.) चंद्र-सोम-विधु,-मासः ।

—वत्सर, सं. पुं. (सं.) सौम्य-चान्द्रिक- चान्द्रमस,-वर्षः-अब्दः-हायनः ।

चांद्रमस, वि. (सं.) चान्द्र, चान्द्रिक, सौम्य, सौमिक (स्त्री. चांद्री, चान्द्रिकी, सौम्या, सौमिकी) ।

चांद्रायण, सं. पुं. (सं. न.) व्रतभेदः, इंदुव्रतम् ।

चाँप, सं. स्त्री. (हिं. चँपना) नि-, पीडनं, निर्बंधः, अतिभारः २. प्रेरणं-णा, प्रचोदना ३. लोहनाडी-अग्न्यस्त्र,-तालकं ४. चरण-पाद,-शब्दः ।

चाँपना, क्रि. स. दे. 'दबाना' ।

चाँयँ-चायँ चाँवँ-चाँवँ, सं. स्त्री. (अनु.) प्रलापः, प्रलपितं, प्रजल्पः-पितं, बाल, आलापः भाषणम् ।

चाक[1], सं. पुं. (फ़ा.) विदरः, रंध्रं, भेदः ।

—करना, क्रि. स., विदॄ (प्रे.), छिद् (रु. प. अ.) ।

चाक[2], सं. पुं. (अं.) खटी, खटिका, कठिनी ।

चाक[3], वि. (तु.) सबल, स्वस्थ, दृढतनु ।

—चौबंद, वि., हृष्टपुष्ट, पुष्टांग [-गी (स्त्री.)] २. अतंद्र, क्षिप्रकारिन् , लघु ।

चाक[4] सं. पुं. (सं. चक्रं) कुलाल-कुम्भकार-चक्रि,-चक्रं २. रथांगं, मंडलं ३. दे. 'गड़ारी' ४. पेषणचक्रं, पेषणीपाषाणः ५. शाणः-णी ।

चाकचक, वि. (तु. चाक) सुदृढ, सुरक्षित, दुर्गम ।

चाकचक्य, सं. स्त्री. (सं. न.) आभा, प्रभा, द्युतिः-कान्तिः(स्त्री.) २. सौन्दर्यं, शोभा ।

चाकना, क्रि. सं. (हिं. चाक) रेखाभिः परिवृ-परिवेष्ट् (प्रे.)

चाकर, सं. पुं. (फ़ा.) किंकरः, दासः, सेवकः ।

चाकरानी, सं. स्त्री. (फ़ा. चाकर) दासी, सेविका ।

चाकरी, सं. स्त्री. (फ़ा. चाकर) सेवा, परिचर्या ।

चाकसू, सं. पुं. (सं. चक्षुष्या) कुलाली, (अरण्य-) कुलत्थिका, लोचनहिता, दृक्-प्रसादा । २. चक्षुष्याबीजम् ।

चाकी, सं. स्त्री. (हिं. चाक) दे. 'चक्की' ।

चाक़ू, सं. पुं. (फ़ा.) छुरिका, कृपाणिका, असि,-पुत्रिका, धेनुका, शस्त्री, शस्त्रिका ।

चाक्षुष, वि. (सं.) नेत्र,-संबंधिन्-विषयक, २. चक्षुर्-नेत्र,-ग्राह्य ।

चाचर, सं. पुं. / चाचरि, सं. स्त्री. (सं. चर्चरी) चर्चरिका, राग-गीति,-भेदः २. होलिकोत्सवः ३. आमोदप्रमोदाः ४. उपद्रवः, क्षोभः, कलहः ।

चाचा, सं. पुं. (सं. तातः >) पितृव्यः, पितृसोदरः २. (छोटा) खुल्लतातः ।

चाची, सं. स्त्री (हिं. चाचा) पितृव्या, पितृव्यपत्नी ।

चाट, सं. स्त्री. (हिं. चाटना) स्वादलोलुपता, रसलालसा २. दे. 'चसका' ३. लालसा, उत्कटाभिलाषः ४. दे. 'आदत' ५. अव-उप,-दंशः, व्यंजनम् ।

—लेना, दे. 'चाटना' ।

चाटना, क्रि. स. (अनु. चटपट) अव-आ-परि-सं.-, लिह् (अ. उ. अ.) २. ग्रस्-ग्लस् (भ्वा. आ. से.) ।

चाटी, सं. स्त्री. (देश.) मंथनी, गर्गरी, दधि-मंथनपात्रम् ।

चाटु, सं. पुं. (सं. पुं. न,) चाटूक्तिः (स्त्री.), चाटुवादः, प्रिय-मधुर,-वचनं, मिथ्या,-प्रशंसा-संस्तावः-स्तवः-स्तुतिः (स्त्री.), उपलालनम् ।

—कार, सं. पुं. (सं.) मिथ्याप्रशंसकः, चाटुवादिन् ।

—कारी, सं. स्त्री. (सं. चाटुकारः >) चाटुवादित्वं, सांत्ववादित्वं, दे. 'चाटु' ।

चाणक्य, सं. पुं. (सं.) कौटिल्यः, विष्णुगुप्तः, द्रोमिणः, अंशुलः, चंद्रगुप्तमौर्यस्यामात्यः, चणकात्मजः ।

चातक, सं. पुं. (सं.) मेघजीवनः, तोककः, स्तोककः, सा(शा)रंगः ।

चातकानन्दन, सं. पुं. (सं.) मेघः, जलदः, वारिदः २. प्रावृष् (स्त्री.), मेघागमः, वर्षाकालः ।

चातुरी, सं. स्त्री. (सं.) दे. 'चतुरता' ।

चातुर्य्य, सं. पुं. (सं. न.) दे. 'चतुरता' ।

चादर, सं. स्त्री. (फ़ा.) दे. 'चद्दर' ।

चाप[1], सं. पुं. (सं.) धनुष् (न.), इष्वासः २. अर्द्धवृत्तम् (गणित) ।

चाप[2], सं. स्त्री. दे. 'चाप' (१, ४) ।

चापड़, सं. स्त्री. (सं. चर्पटः >) कठिन-कीकस,-भूमिः (स्त्री.) । वि., समतल, सपाट ।

चापना, क्रि. स., दे. 'दबाना' ।

चापलूस, सं. पुं. (फ़ा.) दे. 'चाटुकार' ।

चापलूसी, सं. स्त्री. (फ़ा.) दे. 'चाटुकारी' ।

चाबना, क्रि. स., दे. 'चबाना' ।

चाबी-भी, सं. स्त्री. (हिं. चाप = दबाव) साधारणी, कूचिका, तालिका, ताली, कुंचिका, अंकुटः, उद्धाटकः ।

—देना, क्रि. स., कुंचिकां आ-परि-वृत् (प्रे.), कुच्-कुंच् (भ्वा. प. से.) ।

चाबुक, सं. पुं. (फा.) अश्वताडनी, कशा-षा, प्रतिष्कशः-षः, प्रतोदः ।

—मारना, क्रि. स., कशया तड्-तुद्-दंड्(चु.) ।

—सवार, सं. पुं., वाजिविनेतृ (पुं.), अश्वशिक्षकः ।

चाम, सं. पुं. [सं. चर्मन् (न.)] दे. 'चमड़ा' ।

चामर, सं. पुं. (सं. पुं. न.) चमरं, चामरा-री ।

चामीकर, सं. पुं. (सं. न.) सुवर्णं २. धुस्तूरः ।

चाय, सं. स्त्री. (चीनी, चा), चा, चविका ।

—पानी, पुं. स्त्री., जलपानं, *चापानं, अल्प-स्तोक,-आहारः; कल्यवर्त्तः ।

चार, वि. (सं. चतुर्) [सदा बहु. ; चत्वारः (पुं.); चतस्रः (स्त्री.); चत्वारि (न.)] । २. अनेक, बहु ३. कतिपय । सं. पुं., उक्ता संख्या तद्बोधको अंकः (४) च ।

—का समूह, चतुष्टयं-यी, चतुष्कम् ।

—कोना, वि. चतुष्कोण, चतुरस्र-श्र ।

—खाना, वि. चित्र, वर्गित । सं. पुं., वर्गित-चित्रित,-वस्त्रम् ।

—गुना, वि., चतुर्गुण-णित ।

—दीवारी, सं. स्त्री., वप्रः-प्रं, वरणः, प्राकारः ।

—प्रकार से, क्रि. वि., चतुर्धा, प्रकारचतुष्टयेन ।

—बार, क्रि. वि., चतुः (अव्य), चतुर्वारम् ।

—आँख, मु. समागमः, संमिलनम् ।

—आदमी, मु., जनः-नाः, लोकः-काः ।

—दिन की चाँदनी, मु. क्षणिकसुखम्, नश्वरानन्दः ।

चारज, सं. पुं. (अं. चार्ज) कार्यभारः, उत्तरदायित्वं, २. रक्षणं, अवेक्षा ।

चारजामा, सं. पुं. (फ़ा.) दे. 'ज़ीन' ।

चारण, सं. पुं. (सं.) बं(वं)दिन्, मागधः, वैतालिकः, स्तुतिपाठकः, संस्तावकः ।

चारपाई, सं. स्त्री. (सं. चतुष्पाद् >) खट्वा, मंचिका, पर्यंकिका ।

—पर पड़ना, मु., व्याधित-रोगग्रस्त(वि.) भू ।

चारवाक, सं. पुं. (सं. चार्वाकः) अनीश्वरवादी आचार्यविशेषः ।

चारा, सं. पुं. (हिं. चरना) दे. 'चरी' ।

चारा, सं. पुं. (फ़ा.) उपचारः, उपायः, प्रति-(ती)कारः ।

—जोई, सं. स्त्री. (फ़ा) अभियोगः, व्यवहारः ।

—जोई करना, कि. स., राजकुले निविद् (प्रे.), अभियुज् (रु. आ. अ.; चु.) ।

चारित्र, सं. पुं. (सं. न.) चारित्र्यम्, चरित्रम्, वृत्तं, चरितम्, दे. 'चरित्र' ।

चारु, वि. (सं.) सुंदर, मनो,-हर-रम, रुचिकर ।

चारों तरफ़, क्रि. वि., चतुर्दिशं, समंतात्, समंततः, परितः, सर्वत्र ।

चाल, सं. स्त्री. (सं. चालः >). गमनं, चलनं, स्पन्दनं, स्फुरणं, सरणं, २. प्र-,गतिः (स्त्री.), चारः, गमनप्रकारः ३. आचारः, व्यवहारः ४. उपायः, युक्तिः (स्त्री.) ५. छलं, कपटं ६. विधिः (पुं.), प्रकारः ७. रीतिः (स्त्री.), संप्रदायः ८. पर्यायः, वारः, परिवृत्तिः (स्त्री.) ।

—चलन, सं. पुं., चरित्रं, आचरणं, वृत्तं, आचारः ।

—ढाल, सं. स्त्री., आचारः, चरितम् ।

—बाज़, वि. (हिं.+फ़ा.) मायाविन्, कापटिक ।

—बाज़ी, सं. स्त्री., कपटं, माया, वंचनं-ना ।

—चलना, मु., वंच् (चु.), व्यामुह् (प्रे.) ।

—में आना, मु., वंच्-व्यामुह्-विप्रलभ् (कर्म.) ।

चालना, क्रि. स., दे. 'छानना' ।

चालनी, सं. स्त्री. (सं.) दे. 'छलनी'।

चाला, सं. पुं. (सं. चालः >) प्रस्थानं, गमनं २. यात्रामुहूर्ते नवोढायाः प्रथमवारं पतिगृहे ततः पितृगृहे वा गमनम्।

चालाक, वि. (फ़ा.) धूर्त, मायिक २. निपुण, दक्ष।

चालाकी, सं. स्त्री. (फ़ा.) धूर्तता, कापट्यं २. नैपुण्यं, चातुर्यम्।

चालान, सं. पुं. दे., 'चलान'।

चालीस, वि. (सं. चत्वारिंशत्)। सं. पुं., उक्ता संख्या, तद्बोधकावंकौ (४०) च।

चालीसवां, वि. (हिं. चालीस) चत्वारिंश [-शी. (स्त्री.)] चत्वारिंशत्तम [-मी. (स्त्री.)]।

चालीसा, सं. पुं. (हिं. चालीस) चत्वारिंशत्पदार्थसमूहः २. चत्वारिंशद् दिवसाः वर्षाणि वा ३. चत्वारिंशत्पद्यात्मकग्रन्थः।

चाव, सं. पुं. (हिं. चाह) अभिलाषः, लालसा, उत्कटेच्छा २. अनुरागः, प्रेमन् (पुं. न.) ३. अभिरुचिः (स्त्री.) ४. उत्साहः ५. लालनम्।

—चोचला, सं. पुं., उप-,लालनं, परिष्वंगः।

—निकालना, मु., अभिलाषं-इच्छां पूर् (चु.)-निवृत् (प्रे.)

चावड़ी, सं. स्त्री. दे. 'पड़ाव'।

चावल, सं. पुं. (सं. तंडुलः) धान्यास्थि (न.), धान्य-शालि,-सारः दे. 'धान', 'भात' २. गुञ्जायाः अष्टमभागमितः तोलः।

—का धोवन, सं. पुं., तण्डुलोदकम्, तण्डुलोत्थम्।

चाशनी, सं. स्त्री. (फ़ा.) गुड-सिता-शर्करा,-रसः २. दे. 'चसका'।

चाह, सं. स्त्री. (सं. इच्छा) दे. 'चाव' (१-२)। ३. आदरः, प्रतिष्ठा ४. आवश्यकता, प्रयोजनम्।

चाहता, वि. (हिं. चाह) दयित, प्रिय, कांत।

चाहना, क्रि. स. (हिं. चाह) अभिलष् (भ्वा. दि. प. से.), इष् (तु. प. से.), रुच्-कम् (भ्वा. आ. से., कामयते), (सन्नंत या '-काम' से भी अनुवाद करते हैं; उ. वह जाना चाहता है = स गंतुकामः अथवा जिगमिषति) २. स्निह् (दि. प. वे.), अनुरंज् (कर्म.), अनुरागवत्-मोहित (वि.) भू ३. प्र,-यत् (भ्वा. आ. से.,) ४. दे. 'ढूँढ़ना'। सं. स्त्री., अभिलापः, इच्छा; अनुरागः, स्नेहः; आवश्यकता इ.।

चाहनेयोग्य, वि., अभिलषितव्य, एषणीय; दयित, प्रिय इ.।

चाहनेवाला, वि., इच्छु-च्छुक, अभिलाषिन्; अनुरागिन्, स्नेहिन्।

चाहिए, अव्य. (हिं.-चाहना) उचितं, उपयुक्तं, न्याय्यं। (-तव्य,-अनीय, ण्यत् आदि से भी इसका अनुवाद करते हैं; उ. करना चाहिए=कर्तव्यं करणीयं, कार्यं इ.)।

चाही, वि. (फ़ा. चाह) कूप,-सिक्त-संबंधिन्।

चाहे, अव्य. (हिं. चाहना) यथाकामं, यथाभिलाषं, स्वैरं, स्वच्छंदं २. वा, अथवा, यद्वा।

चिउँटा, सं. पुं. (हिं चिमटना) पिपीलकः, पीलकः।

चिउँटी, सं. स्त्री. (हिं चिउँटा) (पुं.) पिपीलः, पीलुकः, पिपीलिकः। [पिपीली, पिपीलका (स्त्री.)]।

—की चाल, मु., मंद-मंथर,-गतिः (स्त्री.)।

—के पर निकलना, मु., आसन्नमृत्यु, निधनोन्मुख।

चिंघाड़, सं. स्त्री. (सं. चीत्कारः) बृंहितं २. महानादः, तुमुलध्वनिः (पुं.)।

चिंघाड़ना, क्रि. अ. (हिं. चिंघाड़) बृंह् (भ्वा. प. से.,) २. उच्चैः नद् (भ्वा. प. से.)।

चिंचा, सं. स्त्री. (सं.) अम्लिका, तिंतिडि(डी)-का २. अम्लिका-चिंचा,-फलम् ३. रक्ता, गुंजा।

चिंतक, वि. (सं.) विचारक, विवेचक, ध्यातृ। सं. पुं. (सं.) तत्त्वज्ञः, दार्शनिकः।

चिंतन, सं. पुं. (सं. न.) चिंतना, ध्यानं, स्मरणं २. विचारणं, विवेचनम्।

चिंतनीय, वि. (हिं.) चिंताप्रद, उद्वेगकर (-री स्त्री.), २. ध्येय, भावनीय ३. विचार्य, विवेचनीय।

चिंता, सं. स्त्री. (सं.) उद्वेगः, औत्सुक्यं, व्यग्रता, रणरणकः, आकुलता, उत्कलिका, मनस्तापः २. आ-,ध्यानं- चिंतनम्।

—आतुर, वि. (सं.) सचिंत, चिंतित, चिंतामग्न, उद्विग्न, व्याकुल।

—जनक, वि., चिन्ता-आकुलता,-प्रद-उद्भावक।

—मणि, सं. पुं. (सं.) स्पर्शमणिः।

चिंतित, वि. (सं.) दे. 'चिंतातुर' २. विचारित, ध्यात।

चिंत्य, वि. (सं.) दे. 'चिंतनीय' (२-३)

चिंदी, सं. स्त्री. (देश.) खंडः, लवः।

चिंपाज़ी, सं. पुं. (अं.) अफ्रीकामहाद्वीपस्य वनमानुषभेदः।

चिक, सं. स्त्री. (तु. चिक) तिरस्करिणी, प्रतिसीरा, व्यवधा, व्यवधानं, आवरणं, मांसिकः, विशसितृ, शौ (सौ) निकः।

चिक[२], सं. पुं. (अं. चेक) देयादेशः।

चिक[३], सं. स्त्री. (अनु.) आकस्मिकी कटिव्यथा।

चिकन, सं. पुं. (फ़ा.) कार्मिकवस्त्रभेदः, *चिक्कणम्।

चिकना, वि. (सं. चिक्कण) तैलमय (-यी स्त्री.), तैलाक्त, तैल,-युक्त-वत् २. स्निग्ध, मसृण, श्लक्ष्ण ३. परिष्कृत, संस्कृत ४. पिच्छिल, मेदुर ५. सम, सपाट। [चिकनी (स्त्री.) चिक्कणा इ.]।

—घड़ा, सं. पुं., निर्लज्ज-अपत्रप,-मनुष्यः।

—मिट्टी, सं. स्त्री., मृत्तिका, मृद् (स्त्री.)।

—चुपड़ी बातें करना, मु., चाटुवादैः वंच् (चु.)-प्रतृ (प्रे.)।

चिकनाई, सं. स्त्री. (हिं. चिकना) चिक्कणता, स्निग्धता, श्लक्ष्णता २. समता, सपाटता ३. घृतादयः स्निग्धपदार्थाः।

चिकनापन, सं. पुं. } (हिं. चिकना) दे.
चिकनाहट सं. स्त्री. } चिकनाई (१-२)।

चिकित्सक, सं. पुं. (सं.) वैद्यः,-द्यकः, रोग,-हृत-हारिन् (पुं.), अगदंकारः, भिषज् (पुं.)।

चिकित्सा, सं. स्त्री. (सं.) औषध-,उपचारः, उपक्रमः, रोगप्रतीकारः २. वैद्यकं ३. औषधं, भेषजम्।

चिकित्सालय, सं. पुं. (सं.) आतुरालयः।

चिकुटी, सं. स्त्री., दे. 'चुटकी'।

चिकुर, सं. पुं. (सं.) केशः, मूर्धजः, शिरसिजः २. पर्वतः ३. काष्ठमार्जारः, दे. 'गिलहरी'।

चिक्कण, वि. (सं.) दे. 'चिकना'।

चिखुरी, सं. स्त्री. (सं. चिकुरः >), 'गिलहरी'।

चिचड़ी, सं. स्त्री. (देश.) पशुयूका, कीटभेदः।

चिचिंडा, सं. स्त्री. (सं. चिर्चिंडः) अहिफला, दीर्घफला, सुदीर्घः, गृहकूलकः।

चिट, सं. स्त्री. (सं. चित्र >) पत्रखंडः-डं २. वस्त्रशकलः-लम्।

—नवीस, सं. पुं. (हिं. + फ़ा.) लेखकः, कायस्थः, लिपिकरः।

चिटकना, क्रि. अ. (अनु.) स्फुट् (तु. प. सु.) दॄ-भंज-भिद् (कर्म.) २. सचिटचिटशब्दं ज्वल् (भ्वा. प. से.) ३. दे. 'खीझना'।

चिटकाना, क्रि. स., व. 'चिटकना' के प्रे. रूप।

चिट्टा, वि. (सं. सित) श्वेत, शुक्ल, धवल २. दे. 'रुपया'।

चिट्ठा, सं. पुं. (हिं. चिट) आयव्यय-देयादेय, पंजिः (स्त्री.)-पंजी-पंजिका, दे. 'वही-खाता' २. व्ययसूची ३. सूची ४. लाभालाभ-हानिलाभ,-पत्रम्।

कच्चा—, सं. पुं., गुह्य-गुप्त,-वृत्तांतः।

चिट्ठी, सं. स्त्री. (हिं. चिट्ठा), (संदेश-) पत्रं, लेखः-ख्यं २. लिखितः पत्रखंडः ३. प्रमाणपत्रं ४-५ आज्ञा-निमंत्रण,-पत्रम्।

—पत्री, सं. स्त्री., पत्रव्यहारः, पत्र-,विनिमयः-संवादः।

—रसाँ, सं. पुं. (हिं. + फ़ा.) पत्रवाह-हकः, लेखहारः-रकः।

चिड़, सं. स्त्री.. दे. 'चिढ़'।

चिड़चिड़ा, वि. (हिं. चिडचिड़ाना) शीघ्रकोपिन् , सुलभकोप, क्रोधन, कोपन।

चिड़चिड़ाना, क्रि. अ. (अनु.) ईषत् कुप्-रुष् (दि. प. से.)-क्रुध् (दि. प. अ.), संतप्-क्लिश् (कर्म.)।

चिड़चिड़ाहट, सं. स्त्री. (हिं. चिड़चिड़ाना) सुलभकोपता, दुर्मनायितं, कोपनता।

चिड़वा, सं. पुं. (सं. चिपिटः) चिपटः, पृथुकः, चिपि(पु)टः-टकः।

चिड़ा, सं. पुं. (सं. चटकः) कलविंकः-गः, गृहनीडः, चित्रपृष्ठः, कामुकः।

चिड़िया, सं. स्त्री. (हिं. चिड़ा) पक्षिन्, खगः, २. क्रीडापत्ररंगभेदः ३. दे. 'चिड़ी'।

—घर, सं. पुं., जन्त्वागारं, प्राणिशाला २. पक्षिशाला, पंजरम्।

चिड़ी, सं. स्त्री. (हिं. चिड़ा) चट(टि)का, चटकका, कलविंकी-गी २-३. दे. 'चिड़िया' (१-२)।

—का बच्चा, सं. पुं., चाटकैरः।

—की बच्ची, सं. स्त्री., चटका।

—मार, सं. पुं., जालिकः, शाकुनिकः, लुब्धकः, पक्षिग्राहकः।

चिढ़, सं. स्त्री. (हिं. चिड़चिड़ाना) घृणा, अरुचिः (स्त्री.), जुगुप्सा, विद्वेषः।

चिढ़ना, क्रि. अ., दे. 'चिड़चिड़ाना'।

चिढ़ाना, क्रि. स., व. 'चिड़चिड़ाना' के प्रे. रूप।

चित[1], सं. पुं. (सं. चित्तं) मानसम्।

—चोर, सं. पुं., मनोहरः, चित्ताकर्षकः २. प्रियः, दयितः, कांतः।

—देना या लगाना, मु., अवहित (वि.) भू, अवधा (जु. उ. अ.)।

—से उतरना, मु., विस्मृ (कर्म), दे. 'भूलना'।

चित[2], वि. (सं. चित >) उत्तान, उत्तान-अवपृष्ठ,-शय-शायिन्।

—करना, मु., (शत्रुं मल्लयुद्धे) अवपृष्ठशायिनं कृ; विजि (भ्वा. आ. अ.)।

—होना, मु., मूर्च्छ् (भ्वा. प. से.)।

चित, वि: (सं.>) उत्तान, ऊर्ध्वास्यशयित।

चितकवरा, वि. (सं. चित+कर्बुर >) चित्र, कर्बुर, चित्रविचित्र, कर्बुरित, चित्रित, शवल, चित्रांग (-गी स्त्री.)।

चितला, वि. दे. 'चितकवरा'।

चितवन, सं. स्त्री. (हिं. चेतना) दृक् नयन-दृष्टि,-पातः, आलोकितं, वीक्षितं, २. कटाक्षः, अपांगदृष्टिः (स्त्री.), नयनोपांत-साचि,-विलोकितम्।

चिता, सं. स्त्री. (सं.) चित्या, चिती-तिः (स्त्री.), चित्यं, चैत्यं, चिताचूडकं, काष्ठमठी।

—भूमि, सं. स्त्री. (सं.) श्मशानं, पितृ,-वनं काननम्।

—साधन, सं. पुं. (सं. न.) श्मशाने मंत्रानुष्ठानम्।

चिताना, क्रि स. (हिं. चेतना) (पूर्व-प्राक्) प्रबुध् (प्रे.)-अनुशास् (अ. प. से.), उपदिश् (तु. प. अ.) २. अनु-,स्मृ (प्रे.), उद्-अनु-बुध् (प्रे.)।

चितावनी, सं. स्त्री., दे. 'चेतावनी'।

चितेरा, सं. पुं. [सं. चित्रक(का)रः] चित्रकः, रङ्गजीवकः, रंजकः, सत्सारः, चित्र,-लेखकः-कृत् (पुं.), आलेखकः, तौलिकः।

चितेरी-रिन, सं. स्त्री. (हिं. चितेरा) चित्र,-करी-लेखिका, तौलिकी २. चित्रकारपत्नी।

चित्त, सं. पुं. (सं. न.) अंतःकरणं, चेतम्-मनस्-हृद् (न.), हृदयं, मानसं २. धीः-बुद्धिः-मति (स्त्री.), प्रज्ञा, शेमुषी ३. अवधानं, मनोयोगः, अवेक्षा ४. स्मृतिः (स्त्री.), धारणा।

—उद्रेक, सं. पुं. (सं.) गर्वः, दर्पः, मदः, अहंकारः, अहंमानः।

—विक्षेप, सं. पुं (सं.)मनश्चांचल्यं, मनःक्षोभः।

—विभ्रम, सं. पुं. (सं.) चित्तव्यामोहः, मनोभ्रांतिः (स्त्री.) २. उन्मादः।

—वृत्ति, सं. स्त्री. (सं.) मनो,-गतिः-वृत्तिः (स्त्री.), चित्तावस्था।

—करना, मु., अभिलष् (भ्वा. प. से.), इष् (तु. प. से.)।

चित्ति, सं. स्त्री. (सं.) बुद्धिः (स्त्री.), प्रज्ञा २. चिन्तनम् ३. ख्यातिः (स्त्री.) ४. कर्मन् (न.) ५. भक्तिः (स्त्री.) ६. प्रयोजनम्।

चित्ती, सं. स्त्री. (सं. चित्रं <)विंदुः (पुं.), अंकः, चिह्नं २. चित्रा, चित्रसर्पः ३. क्षत,-चिह्नं-अंकः।

—दार, वि. (हिं.+फ़ा.) विंदुचिह्नित, चित्र।

चित्र, सं. पुं. (सं. न.) प्रति,-कृतिः (स्त्री.)-छंदकं-च्छाया-रूपं, आलेख्यं, प्रतिमा। वि., कर्बुर, शवल, विविधवर्ण।

—कला, सं. स्त्री. दे. 'चित्रकारी'।

—कार, सं. पुं. (सं.) दे. 'चितेरा'।

—कारी, सं. स्त्री. (सं. चित्रकार <) चित्र,-कला-क्रिया-कर्मन् (न.)-विद्या २. आ-चित्र,-लेखनम्।

—मय, वि. (सं.) सचित्र, चित्रबहुल, चित्रांकित।

—वत्, वि. (सं.) चित्र-आलेख्य,-तुल्य-सम-सदृश २. निश्चल, स्तब्ध, स्थिर।

—विचित्र, वि. (सं.) शवल, कर्बुर, बहुरंग।

—शाला, सं. स्त्री. (सं.) आलेख्य,-शाला-भवनम्।

चित्रक, सं. पुं. (सं.) चित्र,-कायः,-व्याघ्रः, मृगांतकः, क्षुद्रशार्दूलः, उपव्याघ्रः, २. दे. 'चितेरा'।

चित्रकूट, सं. पुं. (सं.) पर्वतविशेषः।

चित्रगुप्त, सं. पुं. (सं.) यमलेखकः ।

चित्रा, सं. स्त्री. (सं.) चतुर्दशनक्षत्रं । वि., कर्बुर, शबल ।

चिथड़ा, सं. पुं. (हिं. चीथना) चीरं, चीवरं, कर्पटः, नक्तकः ।

चिनक, सं. स्त्री. (हि. चिनगी) सदाहा पीडा २. मूत्रनाड्याः पीडा ।

चिनगारी, सं. स्त्री. (सं. चूर्ण+अंगारः >) क्षुद्रांगारः-रं २. अग्नि-ज्वलन,-कणः-कणिका, वि-,स्फुलिंगः-गं-गा ।

चिनगी, सं. स्त्री. (हिं. चिनगारी) दे. 'चिनगारी' चपलबालः ।

चिनाई, सं. स्त्री. (हिं. चिनना) इष्टका-चयनं । २-३. भित्ति-गृह,- निर्माणम् ।

चिन्मय, वि. (सं.) ज्ञानमय । सं. पुं. परमेश्वरः ।

चिन्ह, सं. पुं. दे. 'चिह्न' ।

चिन्हित, वि., दे. 'चिह्नित' ।

चिपकना, क्रि. अ. (अनु. चिपचिप) संश्लिष् (दि. प. अ.), संलग् (भ्वा. प. से.) अनु-आ-सं.-संज् (कर्म.) ।

चिपकाना, क्रि. स., व, 'चिपकना' के प्रे. रूप ।

चिपचिप, सं. स्त्री. (अनु.) चिपचिपशब्दः ।

चिपचिपा, वि. (अनु.) श्यान, सांद्र, संलग्नशील ।

चिपचिपाना, क्रि. अ. (अनु. चिपचिप) संलग्नशील-सांद्र(वि.)भू २. दे. 'चिपकना' ।

चिपचिपाहट, सं. स्त्री. (हिं. चिपचिपाना) संलग्नशीलता, श्यानता, सांद्रता ।

चिपटना, क्रि. अ. (सं. चिपिट) दे, 'चिपकना' २. आलिंग् (भ्वा. प. से.), परिस्वंज् (भ्वा. आ. अ.) ।

चिपटा, वि. (सं. चिपिट<) अभुग्न, समरेख, सम, समस्थ, सपाट ।

चिपटाना, क्रि. स., ब. 'चिपटना' के प्रे. रूप ।

चिबुक, सं. पुं. (सं. चिबु(बु)कं) दे. 'ठोड़ी' ।

चिमटना, क्रि. अ. (हिं. चिपटना) दे. 'चिपटना' (१-२) ।

चिमटा, सं. पुं. (हिं. चिमटना) संदंशः-शकः, कंक,-मुखं-वदनम् ।

चिमटाना, क्रि. स., ब. 'चिपटना' के प्रे. रूप ।

चिमटी, सं. स्त्री. (हिं. चिमटा) संदंशिका, लघु-,कंकमुखः-खम् ।

चिमड़ा, वि., दे. 'लचीला' ।

चिमनी, सं. स्त्री. (अं.) धूम,-नाली-रंध्रं २. अग्निकुण्डं, चुल्ली-ल्लिः (स्त्री.) ।

चिरंजीव, वि. (सं.) दीर्घ-चिर-,-जीविन्-आयुस् २. दीर्घायुः भव ।

चिरंतन, वि. (सं.) चिरत्न [–त्नी (स्त्री.)], पुरातन [–नी (स्त्री.)], प्राचीन, प्राक्तन [–नी (स्त्री.)] ।

चिर, वि. (सं.) दीर्घ-चिर,-कालिक-कालीन २. चिरकाल-दीर्घकाल,-स्थायिन् ३. दे. 'चिरंतन' ।

—काल, सं. पुं. (सं.) दीर्घसमयः, महान् कालः ।

—कालिक,—कालीन, वि. (सं.) दे. 'चिरंतन' । (रोग) अविसर्गिन्, कालिक, दीर्घस्थायिन् ।

—जीवी, वि. (सं.-विन्) दे. 'चिरंजीव' ।

—स्थायी, वि. (सं.-विन्) दीर्घकाल, ध्रुव, स्थिर, अशीघ्रनाशिन् ।

चिरकना, क्रि. अ. (अनु०) अल्प-स्तोकं हद् (भ्वा. आ. अ.) २. असकृत् अल्पमलं उत्सृज् (तु. प. अ.) ।

चिरकुट, (सं. चीरम्) दे. 'चिथड़ा' ।

चिरचिरा, वि., दे. 'चिड़चिड़ा' ।

चिरत्न, वि. (सं.) पुराण, पुरातन, प्रतन, प्रत्न ।

चिरना, क्रि. अ. (सं. चीर्ण >) स्फुट् (तु. प. से.), विद्-विभिद्-भंज् (कर्म.) ।

चिरवाई, सं. स्त्री. (हिं. चिरवाना) विदलनं, विदारणं, विपाटनं, २. विदारण,-वेतनं-भृत्या ।

चिरवाना, क्रि. प्रे., ब. 'चीरना' के प्रे. रूप ।

चिराइता, सं. पुं., दे. 'चिरायता' ।

चिराई, सं. स्त्री. (हिं. चिराना) दे. 'चिरवाई' ।

चिराग़, सं. पुं. (फ़ा. चराग़) दीपः, दीपकः ।

—दान, सं. पुं., दीप,-आधारः-वृक्षः ।

चिराना, क्रि. प्रे., ब. 'चीरना' के प्रे. रूप ।

चिरायँध, सं. स्त्री. (सं. चर्मगंधः) चर्मवसादि-ज्वलनगंधः, दुर्-पूति,-गंधः ।

चिरायता, सं. पुं. (सं. चिरतिक्तः) भूर्निबः, सु,-तिक्तकः, किरातकः ।

चिरायु, वि. (सं. चिरायुस्) दे. 'चिरंजीव' (१)।

चिरौंजी, सं. स्त्री. (सं. चारबीजं >) (वृक्ष) चारः, चारकः, खरस्कंधः, बहुवल्कलः, प्रियालः २. तस्य फलं ३. तद्बीजगर्भः।

चिलक, सं. स्त्री., दे. १. 'चमक' २. 'टीस'।

चिलकना, क्रि. आ., दे. 'चमकना' २. दे. 'टीस मारना'।

चिलग़ोज़ा, सं. पुं. (फ़ा.) जलगोजकं, निकोचकं, चारुफलं, संकोचम्।

चिलम, सं. स्त्री. (फ़ा.) धूमपानचषकः।

चिलमची, सं. स्त्री. (फ़ा.) हस्तधावनी, करक्षालनी।

चिलमन, सं. स्त्री. (फ़ा.) दे. 'चिक' (१)।

चिल्लपों, सं. स्त्री. (हिं. चिल्लाना + अनु.) कोलाहलः, उत्क्रोशः, वि,-रावः, कलकलः।

चिल्ला[१], सं. पुं. (फ़ा.) चत्वारिंशद्दिवसात्मकः कालः २. चत्वारिंशद्दिनव्रतम्

चिल्ला[२], सं. पुं. (देश.) ज्या, मौर्वी, प्रत्यंचा, धनुर्गुणः।

—चढ़ाना, क्रि. स., चापं अधिज्यं कृ, धनुषि मौर्वीं आरुह् (प्रे. आरोपयति)।

चिल्लाना, क्रि. अ. (अनु. चिलचिल) कलकलं-कोलाहलं कृ, वि-, रु (अ. प. से.), उत्क्रुश् (भ्वा. प. से.) २. चीत्कारं कृ, उच्चैः आक्रन्द् (भ्वा. आ. से.) ३. दे. 'रोना'।

चिल्लाहट, सं. स्त्री. (हिं. चिल्लाना) दे. 'चिल्लपों'।

चिल्लिका, सं. स्त्री. (सं.) चिल्ली, झिल्ली, भृङ्गारी २. शाकराजः, राजशाकः ३. विद्युत्-तड़ित् (स्त्री.)।

चिह्न, सं. पुं. (सं. न,) लक्षणं, लाञ्छनं, लिंगं, अभिज्ञानं, अंकः।

चिह्नित, वि. (सं.) अंकित, स,-चिह्न-लक्षण-लांछन।

चींटा, सं. पुं., दे. 'चिउंटा'।

चींटी, सं. स्त्री., दे. 'चिउंटी'।

चीकट, सं. स्त्री. (हिं. कीचड़) तैलमलं, दे. 'तलछट'। वि., तैलमय [-यी (स्त्री.)]।

चीख़, सं. स्त्री. (सं. चीत्कारः) उत्क्रोशः, आक्रंदितं, उच्च-कर्कश,-रवः-रावः।

चीखना, क्रि. स. (सं. चषणं) दे. 'चखना'।

चीख़ना, क्रि.अ.(सं. ची.करणं) दे. 'चिल्लाना'। (२) उच्चैः वद्-लप (भ्वा. प. से.)।

चीज़, सं. स्त्री. (फ़ा.) वस्तु (न.), द्रव्यं, पदार्थः।

—वस्तु, सं. स्त्री. (फ़ा.+सं.) वस्तुजातं, सामग्री २. गृहोपस्करः २. आभूषणादिकम्।

चीड़-ढ़, सं. पुं. (सं. चीड़ा) दारुगंधा, मङ्गल्या, भूतमारी, गन्धद्रव्यभेदः २. चीरपर्णः शालः, सर्जः, दीर्घशाखः (वृक्ष)।

चीतल, वि., (सं. चित्रल) दे. 'चितकबरा'। सं. पुं., चित्रमृगः २. चित्रसर्पः, अजगरभेदः।

चीता[१], सं. पुं. (सं. चित्रकः) दे. 'चित्रक'।

चीता[२], वि. (हिं. चेतना) विचारित, चिंतित।

चीत्कार, सं. पुं. (सं.) दे. 'चीख़' २. दे. 'चिल्लपों'।

चीथड़ा, सं. पुं., दे. 'चिथड़ा'।

चीथना, क्रि. स. (सं. चोर्ण >) दे. 'फाड़ना' तथा 'पीसना'।

चीन, सं. पुं. (सं.) देशविशेषः २. अंकुशभेदः ३. मृगभेदः।

चीनी, वि. (सं. चीनः) चीन,-वासिन्-संबंधिन्, चैन। सं. स्त्री., सिता, शुक्ला।

चीपड़, सं. पुं. (अनु. चिप) दूषी-षिः (स्त्री.), दूषिका, पिंचोडकं, पिंज(जे)टः, नेत्रमलम्।

चीफ़, सं. पुं. (अं.) पुरोगः, प्रधानपुरुषः, नायकः, अध्यक्षः। वि., प्रधान, मुख्य, श्रेष्ठ, विशिष्ट।

—एडिटर, सं. पुं. (अं) मुख्य-प्रधान,-सम्पादकः।

—कमिश्नर, सं. पुं. (अं) मुख्यायुक्तः।

—कोर्ट, सं. पुं. (अं) मुख्यन्यायालयः।

—जज, सं. पुं. (अं) मुख्यन्यायाधीशः।

—जस्टिस, सं. पुं. (अं) मुख्यन्यायाधिपतिः।

चीमड़, वि. (हिं. चमड़ा) दे. 'लचीला'।

चीर[१], सं. पुं. (सं. न.) जीर्णवस्त्रखंडः-डं, कर्पटः, नक्तकः, चीवरं २. वसनं, वस्त्रं ३. वृक्ष-त्वच् (स्त्री.) ४. मुनि,-भिक्षु-वस्त्रम्।

चीर[२], सं. पुं. (हिं. चीरना) दीर्घ,-छेदः-भेदः-स्फोटः-भिदा।

—फाड़, सं. स्त्री., अंगच्छेदः, व्यवच्छेदः।

चीरना, क्रि. स. (सं. चीर्ण) क्रकचेन छिद् (रु. प. अ.)-दॄ (क्र. प. से., प्रे.)-पट् (चु) २. विशॄ (क्र. प. से.), खंड् (चु.), भिद् (रु. प. अ.)। सं. पुं., विदारणं, छेदनं, भेदनं, स्फोटनम्।

चीरने वाला, सं. पुं., विदारकः, छेदकः इ.।

चीरा हुआ, वि., विदारित, छेदित, भेदित, चीर्ण, विदीर्ण।

—फाड़ना, सं. पुं., अंगच्छेदनं, व्यवच्छेदनम्।

चीरा[1], सं. पुं. (हिं. चीरना) शस्त्र,-उपचारः-उपायः-कर्मन् (न.)-क्रिया २. व्रणः,-णम्।

—देना, क्रि. स., शस्त्रेण उपचर् (भ्वा. प. से.)-साध् (प्रे.)।

चीरा[2], सं. पुं. (सं. चीरं >) चित्रोष्णीषः-षं, चीरम्।

चीर्ण, वि. (सं.) विदारित, छेदित, दीर्ण २. अनुष्ठित-कृत, सम्पादित।

—पर्ण, सं. पुं. (सं.) खर्जूरः, दुरारोहा, यवनेष्टा २. निम्बः, अरिष्टः, तिक्तकः।

चील, सं. स्त्री. (सं. चिल्लः) चिल्ला, आतापिन्, शकुनिः (पुं.), कंठनीडकः, चिरंभण, सत्काण्डः।

—का मूत, मु., दुर्लभ-अप्राप्य,-वस्तु (न.)।

चीवर, सं. पुं. (सं. न.) दे. 'चीर' (१, २. ४)।

चीस, सं. स्त्री., दे. 'टीस'।

चुंगल, सं. पुं. दे. 'चंगुल'।

चुंगी, सं. स्त्री. (हिं. चुंगल) नगर,-करः-शुल्कः-कं २. किंचिन्मात्रं-अल्पपरिमाणं वस्तु (न.)।

—खाना, सं. पुं., शुल्कशाला।

चुंचुना, सं. पुं., दे. 'चुनचुना'।

चुंधला, सं. पुं. (हिं. चुँधलना) निमेषकः, निमीलकः।

चुंधलाना, क्रि. अ. (हिं. चौ=चार + सं. अंध >) चाकचक्येन अस्पष्टं-मंदं-ईषत् दृश् (भ्वा. प. अ.),-ईक्ष् (भ्वा. आ. से.), नेत्रतेजः प्रतिहन् (कर्म.)।

चुंधा, वि. (हिं. चौ + सं. अंध >) ईषदंध, मंददृष्टि २. चिल्ल, पिल्ल ३. दे. 'चुँधला' ४. क्षुद्रनयन।

चुंधियाना, क्रि. अ., दे. 'चुँधलाना'।

चुंबक, सं. पुं. (सं.) निंसकः, चुंबितृ-निंसितृ [-त्री (स्त्री.)] २. कामुकः, लंपटः ३. धूर्तः ४. चुंबक,-प्रस्तरः-मणिः (पुं.), लोह,-कांतः-चुम्बकः, अयस्कांतः, अयोमणिः।

चुंबन, सं. पुं. (सं. न.) चुम्बः-बा २. निंसनं, अधरपानम्।

चुंबा, सं. स्त्री. (सं.) दे. 'चुम्बन'।

चुंबित, वि. (सं.) निंसित, ओष्ठस्पृष्ट २. लालित ३. स्पृष्ट।

चुंबी, वि. (सं. चुंबिन्) चुम्बक, निंसक २. स्पर्शक, स्पर्शिन्। (प्रायः समासांत में; उ. गगनचुम्बी इ.)।

चुकंदर, सं. पुं. (फ़ा.) कन्दभेदः।

चुकता, वि. (हिं. चुकना) समाप्त, निःशेष।

चुकती, सं. स्त्री. (हिं. चुकना) समाप्तिः-अवसितिः (स्त्री.)।

चुकना, क्रि. अ. (सं. च्युत + कृ >) पूर्-समाप् अवसो (कर्म. अवसीयते), अंतं-समाप्तिं गम्, निष्-सं-पद् (दि. आ. अ.)। २. दे. 'चूकना'।

चुकाना, क्रि. स. (हिं. चुकना) ऋणं दा-शुध् (प्रे.) २. (विवादं) प्र,-शम् (प्रे., शमयति), सं-समा-धा (जु. उ. अ.) ३. सं-निष्-पद (प्रे.), संपूर् (चु), अवसो (प्रे., अवसाययति)।

चुकौता, सं. पुं. (हिं. चुकना) ऋण,-परिशोधः-शुद्धिः (स्त्री.) २. सं-समा.-धानं, ३. निर्धारणं-,णा, निश्चयः।

चुक्र, सं. पुं. (सं. न.) तिंतड़ीकं, वृक्षाम्लं, महाम्लं, चुक्रकं २. दे. 'कांजी' ३. अम्लता।

चुगना, क्रि. स. (सं. चयनं) चंच्वा आदा (जु. आ. अ.)-ग्रह् (क्र. प. से.)-भक्ष् (चु.) २. चंच्वा प्रह् (भ्वा. प. अ.)-अभिहन् (अ. प. अ.)। सं. पुं., चंच्वा आदानं-ग्रहणं,-तुंडेन प्रहरणम्।

चुग़लखोर, सं. पुं. (फ़ा) पिशुनः, पृष्ठमांसादः, परोक्षे निंदकः-परिवादपरः, कर्णेजपः।

चुग़लखोरी, सं. स्त्री. (फ़ा) चुग़लखोर) पैशुन्यं, पिशुनता, परोक्ष,-निंदा-परिवादः, उपजापः।

चुग़ली, सं. स्त्री. (फ़ा) दे. 'चुगलखोरी'।

करना या खाना, क्रि. स., परोक्षे-पृष्ठतः निंद् अथवा अप-परि-वद् (दोनों भ्वा. प. से.)-अवि-आ-क्षिप् (तु. प. अ.)।

चुगवाना, क्रि. प्रे., व. 'चुगना' के प्रे. रूप ।

चुगा, चुग्गा, सं. पुं. (हिं. चुगना) खग,-पक्षि,-भक्ष्यं-खाद्यम् ।

चुगाई, सं. स्त्री. (हिं. चुगाना) चंच्वा आदापनं-आग्राहः २. तस्य भृत्या वेतनं वा ।

चुगाना, क्रि. सं., व. 'चुगना' के प्रे. रूप । पक्षिभ्यः अन्नकणान् विकॄ (तु. प. से.) ।

चुचाना, क्रि. अ., दे. 'टपकना' ।

चुटकला, सं. पुं. दे. 'चुटकला' ।

चुटकी, सं. स्त्री. (अनु. चुट चुट) छोटिका, मु(कु)चुटी २. अंगुलीपीडनं ३. चरणांगुलीयकम् ।

—बजाना, मु., छोटिकां कृ अथवा दा ।

—बजाते, मु., आशु, द्राक्, सपदि, सद्यः (सव अव्य.) ।

—भर, मु., अत्यल्पं, किंचिन्मात्रम् ।

—भरना, मु., छोटिकया पीड् (चु.) ।

चुटकियों में उड़ाना, मु., सुकरं-साधारणं-परिहासमिव मन् (दि. आ. अ.) ।

—लेना, मु., अव-उप-हस् (भ्वा. प. से.) ।

चुटकुला, सं. पुं. (हिं. चुटकी) नर्मन् (न.), परिहास-नर्म,-वाक्यं-उक्तिः (स्त्री.)-आलापः-भाषणं २. अमोघ-विशिष्ट,-योगः-कल्पः ।

चुटिया, सं. स्त्री., दे. 'चोटी' ।

चुटीला, चुटैला, } वि. (हिं. चोट) आहत, व्रणित, क्षत ।

चुड़िहारा, सं. पुं. (हिं. चूड़ी) चूड़ाहारः, वलयविक्रयिन् २. चूड़ा-कंकण,-कारः ।

चुड़ैल. सं. स्त्री. (सं. चूड़ा >) पिशाची-चिका, डाकिनी, शाकिनी, भूतभार्या, प्रेतपत्नी, २. कुरूपिणी, जरती, स्थविरा ३. चंडी, कोपनी, क्रूरा (नारी) ।

चुनचुना, सं. पुं. | (हिं. चुनचुनाना) विट्-
चुनचुनी, सं. स्त्री. | उदर,-कृमिः,गुदकीटकः ।

चुनचुनाना, क्रि. अ. (अनु.) तीक्ष्णव्यथां अनुभू, व्यथ् (भ्वा. आ. से.), तप (कर्म.) ।

चुनट-त, } सं. स्त्री. (सं. चून् >) वस्त्र,-भंगः-पुटः-
चुनन, } भंगी-गिः (स्त्री.), ऊर्मिः (स्त्री.) ।

चुनना, क्रि. स. (सं. चुण् तथा चि) (फूलादि) चुण् (तु. प. से.), चि (स्वा. उ. अ.), आदा (जु. आ. अ.), उद्धृ-समाहृ (भ्वा. प. अ.), छिद् (रु. प. अ.) २. पृथक् कृ, उद्ग्रह् (क्र्. प. से.) उद्धृ । ३. वृ. (स्वा. उ. से.), नियुज् (रु. आ. अ.; चु.), निरूप् (चु.), निधृ ४. यथाक्रमं रच् (चु.)-स्था (चु. स्थापयन्ति) ५. अलंकृ, मंड् (चु.) ६. (दीवारादि) निर्मा (जु. आ. अ.; प्रे. निर्मापयति), विरच् (चु.) । सं. पुं., चयनं, उद्धरणं; पृथक्करणं, वरणं, यथास्थानं स्थापनं; अलंकरणं; निर्माणं इ. । दे. 'चुनाई' ।

चुनने योग्य, वि., चेय, समाहार्य; उद्ग्राह्य; वरणीय; स्थाप्य; अलंकार्य; निर्मेय इ. ।

चुनने वाला, सं. पुं., चेतृ, समाहर्तृ, वरितृ, पृथक्कर्तृ इ. (सव पुं.) ।

चुना हुआ, वि., चित, समाहृत; वृत; रचित २. श्रेष्ठ, उत्तम ।

चुनरी, सं. स्त्री. (सं. चूण >) चित्र-शबल-कर्बुर,-वस्त्रम् ।

चुनवाँ, वि. (हिं. चुनना) वृतः, अभीष्ट चित २. उत्तम, श्रेष्ठ ।

चुनवाना, चुनाना, क्रि. प्रे., व. 'चुनना' के प्रे. रूप ।

चुनाई, सं. स्त्री. (हिं. चुनना) दे. 'चुनना' सं. पुं. २. कुड्य-भित्ति,-निर्माणं ३. चयन, वेतनं-भृत्या ।

चुनाव, सं. पुं. (हिं. चुनना) चितिः-समाहृतिः (स्त्री.), उद्ग्राहः, उद्धारः (२) वृतिः-पृथक्कृतिः (स्त्री.), निर्धारणम् ।

चुनावट, सं. स्त्री., दे. 'चुनट' ।

चुनिंदा, वि. (फ़ा. चुनीदा) दे. 'चुनवाँ' ।

चुनौटी, सं. स्त्री. (हिं. चूना) चूर्णपुटः ।

चुनौती, सं. स्त्री. (हिं. चुनना) समर-, आह्वानं, अभिग्रहः २. उत्तेजनं, उद्दीपनं, उत्थापनम् ।

चुन्नट-त-न, सं. स्त्री., दे. 'चुनट' ।

चुन्नी[1], सं. स्त्री. (सं. चूर्ण >)क्षुद्र-, माणिक्यं-पद्मरागः २. रत्न,-खंडः-लवः, रत्नकं ३. अन्न,-कणः-कणिका ४. काष्ठचूर्णम् ।

चुन्नी[2], सं. स्त्री., दे. 'चुनरी' ।

चुप, वि. (सं. चुप्=निःशब्द गमन >) अवाक्, निःशब्द, नीरव, मौनिन्, तूष्णीक, अनालापिन् । सं. स्त्री., नीरवता, दे. 'चुप्पी' २. निस्तब्धता ।

—करना या होना, क्रि. अ., वाचं यम् (भ्वा. प. अ.)-निरुध् (रु. उ. अ.), मौनं आकल् (चु.)-भज् (भ्वा. उ. अ.)।
—रहना, क्रि. अ., मौनं-तूष्णीं-जोषं आस् (अ. आ. से.)-स्था (भ्वा. प. अ.)।
—चाप, क्रि, वि., जोषं, तूष्णीं, निशब्दं, मौनं २. गुप्तं, गूढं, निभृतं, प्रच्छन्नम्।
चुपका, वि. (हिं. चुप) दे. 'चुप' (वि.)।
चुपके से, क्रि. वि., दे. 'चुपचाप'।
चुपकी, सं. स्त्री. (हिं. चुप) दे. 'चुप्पी'।
चुपड़ना, क्रि. स. (अनु. चिपचिप) अंज् (रु. प. से.), उप-, दिह् (ज. प. अ.). लिप् (तु. प. अ.), अनु-आ-वि २. दोषं गुह् (भ्वा. उ. से.)-प्रच्छद् (चु.) ३. दे. 'खुशामद करना'। सं. पुं., अंजनं, उपदेहनं, लेपनम् इ.।
चुपड़ा, वि. (हिं. चुपड़ना) (घृतादिभिः) उपलिप्त, अभ्यक्त, दिग्ध।
चुप्पा, वि. (हिं. चुप) वाचंयम, अल्प-मित,-भाषिन, वाग्यत।
चुप्पी, सं. स्त्री. (हिं. चुप) निःशब्दता, नीरवता, मौनं, तूष्णींभावः २. निःस्तब्धता, निश्चलता, निश्चेष्टता।
चुभकी, सं. स्त्री. दे. 'डुबकी'।
चुभना, क्रि. अ. (अनु.) संलग् (भ्वा. प. से.), संज् (कर्म.), अनु-आ-सं.; सलग्नी-संसक्तीभू, व्यध्-निर्भिद् (कर्म.)।
चुभना, चुभोना, क्रि. स. (हिं. चुभना) व्यध् (दि. प. अ.), निर्भिद् (रु. प. अ.), तुद् (तु. प. अ.), नि-प्र-विश् (प्रे.)। सं. पुं., वेधः-धनं, छेदः-दनं, निर्भेदः-दनम्।
चुभानेवाला, सं. पुं., वेधकः, छेदकः, निर्भेदकः इ.।
चुमकार, सं. स्त्री. (हिं. चूमना + सं. कारः >) चुचुत्कारः, चुंबनध्वनिः (पुं.)।
चुमकारना, क्रि. स. (हिं. चुमकार) सचुचुत्कारं उपलल्-उपच्छंद् (चु.)।
चुरचुरा, वि. दे. 'चुरमुरा'।
चुर(रु)ट, सं. पुं., दे. 'सिगार'।
चुरमुर, सं. पुं. (अनु.) चुरमुरशब्दः।
चुरमुरा, वि. (हिं. चुरमुर) भंगुर, भिदुर, भिदेलिम।
चुरवाना, क्रि. प्रे., (१-२) व. 'चुराना' तथा 'पकाना' के प्रे. रूप।
चुराना, क्रि. स. (सं. चोरणं) चुर्-स्तेन् (चु.), अपहृ (भ्वा. प. अ.), मुष् (क्र्. प. से.) २. गुह् (भ्वा. उ. से.), प्रच्छद् (चु.)। सं. पुं., चोरण, मोषणं, अपहरणं; गूहनं, प्रच्छदनं, दे. 'चोरी'।
चुराने योग्य, वि., चोरयितव्य, मोषणीय।
चुराने वाला, सं. पुं., दे. 'चोर'।
चित्त चुराना, मु., मनो हृ (भ्वा. प. अ.), वि-परि-मुह् (प्रे.)।
चुरि, चुरी, सं. स्त्री. (सं.) कूपकः, खातकः, लघु,-कूपः-अवटः।
चुल, सं. स्त्री., दे. 'खुजली'।
चुलबुल, सं. स्त्री. (अनु.) दे. 'चंचलता'।
चुलबुला, वि. (पूर्व.) दे. 'चंचल' तथा 'नटखट'।
चुलबुलाना, क्रि. अ. (पूर्व.) चपल-चञ्चल (वि.) भू।
चुलबुलापन, सं. पुं. } दे. 'चंचलता'।
चुलबुलाहट, सं. स्त्री. }
चुलाना, क्रि. स., व. 'टपकना' के प्रे. रूप।
चुलाव, सं. पुं., अमांस-निर्मांस,-ओदनः-नम्।
चुल्ली, सं. स्त्री. (सं.) दे. 'चूल्हा' २. चिता।
चुल्लू, सं. पुं. (सं. चुलुकः) चुल्लकः, अंजलिः (पुं.), चलुकः, गंडूषः-षा।
—भर, वि. चुल्लक-चुलुक,-मात्र, अंजलि-गंडूष,-मात्र (जलादि)।
—भर पानी में डूब मरना, मु., अत्यंतं लज्ज् (तु. आ. से.)-त्रप् (भ्वा. आ. वे.)।
चुवाना, क्रि, स., व. 'टपकना' के प्रे रूप।
चुसकी, सं. स्त्री. (हिं. चूसना) गंडूषः, चुलुकः, चुल्लकः २. ईषत्-शनैःशनैः,-पानं ३. तमाखुधूमकर्षः।
चुसनी, सं. स्त्री., दे. 'चूसनी'।
चुसवाना, क्रि. प्रे., } व. 'चूसना' के प्रे. रूप।
चुसाना, क्रि. प्रे. }
चुस्त, वि. (फ़ा.) उद्यमिन्, उद्योगिन्, क्षिप्रकारिन्, स्फूर्तिमत् २. जागरूक, दक्ष ३. आलस्य-शैथिल्य,-शून्य, सुसंहत ३. दृढांग, सबल।
—चालाक, वि., दक्षानलस, चतुरातन्द्र।
चुस्ता, सं. पुं. (फ़ा.) अजमेषशावकानां आमाशयः २. मलाशयः ३. दे. 'सिलवट'।

चुस्ती, सं. स्त्री. (फ़ा. चुस्त) क्षिप्रकारिता, स्फूर्ति (स्त्री.), उद्यमः, उद्योगः १. शैथिल्याभावः, सुसंहतिः (स्त्री.) ३. दृढता, सबलता ।

चुहचुहाना, क्रि. अ. (अनु.) दे. 'चहचहाना' २. रंगवत् दीप् (दि. आ. से.)-प्रकाश् (भ्वा. आ. से.)।

चुहचुही, सं. स्त्री. (अनु.) फुल्लचुही, *चुहचुही, कृष्णचटकाभेदः, फुल्लशिंधिनी ।

चुहल, सं. स्त्री. (अनु. चुहचुह >) हास्यं, परिहासः, विनोदः, कौतुकं, प्रमोदः, विलासः, मनोरंजनम् ।

चुहिया, सं. स्त्री. (हिं. चूहा) गरिका, बालमूषिका, क्षुद्र,-मूषकः-आखुः (पुं.) २. दे. 'चूही' ।

चुहुटना, क्रि. अ., तथा वि. दे. 'चिपकना' तथा 'चिपचिपा' ।

चूँ, सं. पुं. (अनु.) चुंकारः, चुंकृतिः (स्त्री.)।

—चां, सं. पुं.- दे. 'चूँचरा' ।

—करना, मु., किमपि वद् (भ्वा. प. से.) २. विरुद्धं वद् अथवा प्रतिवद् ।

चूँकी, अव्य. (फ़ा.) यत्, यतः, यस्मात्, हि ।

चूँगी, सं. स्त्री., दे. 'चुंगी' ।

चूँचरा, सं. पुं. (फ़ा.) प्रतिवादः. प्रत्याख्यानं, विरोधः २. आपत्तिः (स्त्री.), अपवादः ३. व्याजः, मिषम् ।

चूँचूँ, सं. स्त्री., (अनु.) चुंकारः, चुंकृतिः (स्त्री.), चाटकेरशब्दः २. कलरवः, विरुतं ३. चूँ-चूँ-शब्दः ४. क्रीडनकभेदः ।

चूक[१], सं. स्त्री. (हिं. चूकना) अपराधः, स्खलितं, दोषः, प्रमादः २. मार्गभ्रंशः, व्यतिक्रमः ।

चूक[२], सं. पुं. (सं. चुक्रः) अम्लः २. अम्लद्रव्यभेदः ३. चुक्रकं, चुक्रिका, अम्लशाकभेदः । वि, अत्यम्ल, अतिशुक्त ।

चूकना, क्रि. अ. (सं. च्युत् कृ >) अपराध् (दि., स्व. प. अ.), स्खल् (भ्वा. प. से.), प्रमद् (दि. प. से., प्रमाद्यति) २. लक्ष्यात्-सत्पथात् भ्रंश् (भ्वा. आ. से.)-भ्रश् (दि. प. से.) ३. सदवसरं या (प्रे. यापयति)-अतिवह् (प्रे.)।

चूका, सं. पुं., दे. 'चूक' (३) ।

चूची, सं. स्त्री. (सं. चूचुकं) चूचुकं, चुचूकं, कुचाग्रं, कुचाननं, स्तनवृंतं २. स्तनः, कुचः, पयोधरः ।

—पीना, मु., स्तनं-स्तन्यं पा (भ्वा. प. से.) ।

चूज़ा, सं. पुं. (फ़ा.) कुक्कुटशावः-वकः । वि., अल्पवयस्क ।

चूडांत, सं. पुं. (सं.) चरम,-सीमा-अवधिः (पुं.) अ., अत्यधिकं, अत्यन्तं वि., परम, गाढ, उत्कट ।

चूडा, सं. स्त्री. (सं.) शिखा, जु(जू)टिका, केशपाशी २. मयूरशिखा ३. शिखरं, अग्रं ४. कूप, ५.चूडाकरणसंस्कारः । सं.पुं. (सं.स्त्री.) वलयः-यं, कंकणं २. वलयावली, चूडावली ।

—करण, सं. पुं. (सं. न.) चूडाकर्म-मुंडन,-संस्कारः ।

—मणि, सं. पुं. (सं.) शिरोरत्नं, शीर्षफुल्लम् । २. प्रधानः, अग्रगण्यः ३. गुंजा ।

चूडी, सं. स्त्री. (सं. चूडा) वलयः-यं, करभूषणं, कौशुकम् ।

—दार, वि., (हिं.+फ़ा.) पुटीकृत, वलीयुत, संकुचित ।

चूडियां पहनना, मु., स्त्रीवत् आचर् (भ्वा. प. से.) ।

चूत, सं. पुं. (सं.) रसालः, आम्रः, कोकिलोत्सवः २. (सं. न.) अपानः-नं, गुदं, च्युतिः-बुलिः (स्त्री.) । (हिं.) योनिः (स्त्री.) भगं, नारीगुह्यम् ।

चूतड़, सं. पुं. (सं. चूतं >) नितंबः, कटि(टी)-प्रोथः, स्फिच्-चा (स्त्री.), पूलः, पूलकः, स्थिकः ।

चून, सं. पुं. (सं. चूर्ण) दे. 'आटा' तथा 'चूना' ।

चूनर-री, सं. स्त्री., दे. 'चुनरी' ।

चूना[१], सं. पुं. (सं. चूर्णः-र्णं) चूर्णकम् ।

चूने का पानी, सं. पुं. चूर्णकजलं, चूर्णोदकम् ।

—दानी, सं. स्त्री., चूर्णाधानी, चूर्णपुटकः ।

अनबुझा—, अशान्तचूर्णकम् ।

बुझा—, शान्तचूर्णकम् ।

चूने की भट्ठी, सं. स्त्री., चूर्ण,-आपाकः-पाकपुटी।

चूना[२], क्रि. अ. (सं. च्यवनं) दे. 'टपकना' । वि., सच्छिद्र, स्फुटित, सरंध्र ।

चूनी, सं. स्त्री. (सं. चूर्णिका) धान्य-अन्न,-कणः-णी-णिका २. रत्न-मणि,-कणः-कणिका ।

चूमना, क्रि स. (सं. चुंबनं) (मुख) चुंब् (भ्वा. प. से.), निंस् (अ. आ. से.) २. ओष्ठा-

भ्यां स्पृश् (तु. प. अ.) ३. (ओठ) अधरं-अधररसं पा (भ्वा. प. अ.) ४. (सिर) शिरः आ-उपा-समा-घ्रा (भ्वा. प. अ.)। सं. पुं., चुंबनं, निंसनं, अधरपानं, शीर्षाघ्राणम्।

चूमने योग्य, वि., चुंबनीय, निसितव्य।

चूमने वाला, सं. पुं., चुंबकः, चुंबिन्, निंसकः, निंसितृ (पुं.)।

चूमा हुआ, वि. दे. 'चुम्बित।

—चाटना, मु., उप-,लल् (चु.) चुंब्।

चूमा, सं. पुं., चुंबनं, चुंबः-बा।

—चाटी, सं. स्त्री., विलासः, विहारः, क्रीडा।

चूर, सं. पुं. (सं. चूर्णः-र्णं) क्षोदः, पिष्टं, रजस् (न.), कणाः-कणिकाः-अणवः-लवाः (बहु.)। वि., मग्न-,लीन,-परायण, अभिनि-नि,-विष्ट २. मत्त, क्षीव, मदोन्मत्त ३. श्रांत, खिन्न, क्लांत।

—चूर, वि., चूर्णित, पिष्ट, क्षुण्ण।

चूरन, सं. पुं. (सं. चूर्णः-र्णं) दे. 'चूर्ण' २. चूर्णं, अग्निवर्द्धक-पाचक,-चूर्णम्।

चूरमा, सं. पुं. (सं. चूर्णः-र्णं) मिष्टान्नभेदः, मिष्टचूर्णः।

चूरा, सं. पुं. (सं. चूर्णः-र्णं) क्षोदः, पिष्टं। दे. 'चूर' (सं. पुं.)।

—करना, क्रि. सं., चूर्ण् (चु.), चूर्णीकृ, पिष् क्षुद् (रु. प. अ.)।

चूर्ण, सं. पुं. (सं. पुं. न.) क्षोदः, पिष्टं २. दे. 'चूरन' ३. रजस् (न.), धूलिः (स्त्री.)।

—कुंतल, सं. पुं. (सं.) अलकः, कुरलः।

चूर्णक, सं. पुं. (सं.) भृष्टपिष्टान्नम् २. सक्तुकः, भृष्टयवचूर्णम्। (सं. न.) सुगन्धि-सुगन्धित,-चूर्णम् २. कटुवर्णरहितम् अल्पसमासयुक्तं गद्यम्।

—चूर्णन सं. पुं. (सं. न.) पेषणं, मर्दनं, खंडनम्।

चूर्णित, वि. (सं.) पिष्ट, क्षुण्ण, चूर्णीभूत।

चूल[१], सं. पुं. (सं. चूलः) केशः, शिखा।

चूल[२], सं. स्त्री. (देश.) विवर्तनकीलः २. काष्ठाग्रम्।

चूलें ढीली होना, मु., अत्यंतं क्लम्-आयस्-(भ्वा. दि. प. से.)-खिद् (दि. आ. अ.)-श्रम् (दि. प. से.)।

चूल्हा, सं. पुं. / **चूल्ही**, सं. स्त्री. } [सं. -चुल्ली-ल्लिः (स्त्री.)] अंति(दि)का, अधिश्रयणी, उद्धानं, उध्मानं, अश्मंतं, अश्मंतकः-कम्।

चूसना, क्रि. स. (सं. चूषणं) आ-, चूष (भ्वा. प. से.), पा (भ्वा. प. अ.) २. उच्छुष् (प्रे.), आ-नी-पा (भ्वा. प. अ.)। सं. पुं., चोषणं, चोषः, उच्छोषणम्।

तलना, क्रि. सं. (सं. तलनं), (घृततैलादिषु) भ्रस्ज् (तु. उ. अ. भृज्जति, चु. भर्जयति)-पच् (भ्वा. प. अ.)-भृज् (भ्वा. आ. से., भर्जते), तल् (भ्वा, प. से., पाकराजेश्वर) ।

सं. पुं., (घृतादिपु) भर्जनं-पचनम् ।
तला हुआ, वि., भ्रष्ट, भर्जित, घृतपक्व इ. ।
तलफना, क्रि. अ., दे. 'तड़पना' ।
तलफी, सं. स्त्री. (फ़ा.), ध्वंसः, विनाशः २. क्षतिः-हानिः (स्त्री.) ।
तलफ़्फ़ुज, सं. पुं. (अ.) उच्चारणम्, भाषण-विधिः (पुं.) ।
तलब, सं. स्त्री. (अ.) वेतनं, भृतिः (स्त्री.) २. आकारणं, आह्वानं ३. लिप्सा ।
तलबगार, वि. (फ़ा.) इच्छुक २. प्रार्थिन् ।
तलबाना, सं. पुं. (फ़ा.) *आकारण-आह्वान,-शुल्कः-कं २. साक्ष्यशुल्कः-कम् ।
तलबी, सं. स्त्री. (अ.) आकारणं-णा, आह्वानम् ।
तलवा, सं. पुं. (पुं. तलः-लं) चरण-पाद,-तलम् ।
—चाटना,
—तले हाथ रखना, } मु, दे. 'खुशामद करना'।
—सहलाना,
—तलवार, सं. स्त्री. [सं. तरवारिः (पुं.)] खड्गः, असिः. निस्त्रिंशः, चंद्रहासः, कौक्षेयकः, करवा(पा)लः, कृपाणः-णी, ऋ(रि)ष्टि. (पुं.), श्रीगर्भः, विजयः, दुरासदः, धर्मपालः ।
—खींचना, क्रि. स., असिं कोशात् उद्धृ-निष्कृष् (भ्वा. प. अ.) ।
—चलाना, क्रि. स., खड्गं चल् (प्रे.), असिना प्रहृ (भ्वा. प. अ.) ।
—चलानेवाला, सं. पुं., आसिकः, खड्गधरः, खड्गिन् ।
तला, सं. पुं. (सं. तलः-लं) अधोभागः, बुध्नः २. उपानत्तलम् ।
तलाक, सं. पुं. (अ.) विवाह-दांपत्य-उच्छेदः-निराकरणं, त्यागः ।
तलाश, सं. स्त्री. (तु.) अन्वेषणं, मार्गणम् ।
तलाशी, सं. स्त्री. (फ़ा.) देह-गेह-परिच्छद,-अन्वेषणा-निरीक्षा ।
—लेना, क्रि. स., देहं-गेहं-परिच्छदं अन्विष् (दि. प. से.)-निरूप् (चु.)-निरीक्ष् (भ्वा. आ. से.) ।
तली, सं. स्त्री., दे. 'तल' तथा 'तला' ।
तलुआ, सं. पुं., दे. 'तलवा' ।
तले, क्रि. वि. (सं. तलं >) अधः, अधस्तात्, नीचैः (सब अव्य.) ।
—ऊपर या ऊपर तले, क्रि. वि., अन्योन्यस्य अधः, अधस्तात्, उपरि, उपरिष्टात् वा २. अक्रमं, विपर्यस्तं, संकीर्णं, अव्यवस्थितम् ।
तलैया, सं. स्त्री. (हिं. ताल) क्षुद्र-लघु,-तडागः-कासारः-सरस् (न.),
तल्प, सं. पुं. (सं. पुं. न.) आस्तरः, आस्तरणम् *विस्तरः २. पत्नी, भार्या ।
—कीट, सं. पुं. (सं.) ओकणः, मत्कुणः, उद्दंशः ।
—ज, सं. पुं. (सं.) नियोगज,-पुत्रः-सुतः, क्षेत्रजः ।
तल्ला, सं. पुं. (सं. तलः-लम्) उपानत्तलम् । २. दे. 'मंज़िल' ।
तवर्ग, सं. पुं. (सं.) तकारादिवर्णपंचकम् ।
तवा, सं. पुं. (हिं. तवना) तप्तकम् ।
तवाज़ा, सं. स्त्री. (अ.) सत् ,-कारः-कृतिः-(स्त्री.)-क्रिया, अतिथि,-सेवा-सत्कारः, आतिथ्यं २. निमंत्रणम् ।
तवारीख़, सं. स्त्री. (अ., तारीख का बहु.) दे. 'इतिहास' ।
तवी, सं. स्त्री. (हिं. तवा) ऋची(जी)षम् ।
तशख़ीस, सं. स्त्री. (अ.) रोग,-निर्णयः-निदानम् ।
तशरीफ़, सं. स्त्री. (अ.) महत्त्वं, गुरुत्वं, प्रतिष्ठा ।
—रखना, मु. उपविश् (तु. प. अ.), विराज् (भ्वा. आ. से.)
—लाना, मु., आगम् , आया (अ. प. अ.) ।
—ले जाना, मु., प्रस्था (भ्वा. आ. अ.), प्रया (उक्त दोनों मुहावरों में आदरार्थ बहुवचन का प्रयोग करना चाहिए । उ. आप तशरीफ़ रखिए = उपविशन्तु श्रीमंतः इ.) ।
तश्तरी, सं. स्त्री. (फ़ा.) शराविका, *स्थालकम् ।
तसकीन, सं. स्त्री. (अ.) आ-समा,-श्वासः-श्वासनं, धैर्यम् ।
तसदीक़, सं. स्त्री. (अ.) सत्यापनं, सत्याकारः ।
—करना, क्रि. स., सत्यापयति (ना. धा.), प्रमाणी कृ ।
तसबीह, सं. स्त्री. (अ.) जपमाला, माला ।
तसमा, सं. पुं. (फ़ा) चर्म,पट्टः-बंधः, वध्री, नध्री २. उपानद्बंधः ।
तसला, सं. पुं. (फ़ा. तश्त) ऋचीकम् ।
तसलीम, सं. स्त्री. (अ.) नमस्ते, नमस्कारः, प्रामणः २. अभ्युपगमः, अंगी-स्वी,-कारः ।

तसल्ली, सं. स्त्री. (अ.) सांत्वना, आश्वासनं २. शांतिः (स्त्री.), धैर्यम्।

तसवीर, सं. स्त्री. (अ.) चित्रं, आलेख्यम्।

तस्कर, सं. पु. (सं.) चौरः २. दस्युः।

तस्सू, सं. पुं. (सं. त्रिशूकः>) पञ्चाङ्गुलमानम्।

तह, सं. स्त्री. (फ़ा.) तलं, अधस्तलं, अधोभागः, मूलं २. बुध्नः, उपष्टंभः ३. तलं, पृष्ठं, पृष्ठभागः ४. स्तरः ५. व्यावृत्तिः (स्त्री.), व्यावर्तनं, पुटः-टं, भंगः ६. तत्त्वं, सारः।

—करना, क्रि. स., पुटयति (ना. धा.), व्यावृत् (प्रे.), गुणी-पुटी कृ।

—तक पहुँचना, मु., तत्त्वं अवगम्, रहस्यं विद् (अ. प. से.)।

तहक़ीक़ात, सं. स्त्री. (अ. तहक़ीक़ का बहु.) अनुसंधानं, अन्वेषणं, गवेषणा।

तहख़ाना, सं. पुं. (फ़ा.) भूमिगृहं, तलगृहं, गुप्तिः (स्त्री.), आंतर्भौमकोष्ठः।

तहज़ीब, सं. स्त्री. (अ.) सभ्यता, शिष्टाचारः।

तहमत, सं. स्त्री. (फ़ा. तहबंद) *पुटबंधः, *धौतिका।

तहरीर, सं. स्त्री. (अ.) लेखः, लिखितं २. लेखशैली ३. नि-प्र,-बंधः ४. प्रमाणपत्रम्।

तहलका, सं. पुं. (अ.) दे. 'खलबली'।

तहस-नहस, वि. (देश.) वि-, नष्ट,प्र-वि-,ध्वस्त।

तहसील, सं. स्त्री. (अ.) करोद्ग्राहः, राजस्वसंग्रहः, समाहरणं २. राजस्वं, आयः, आगमः, उदयः ३. उपमंडलं ४. उपमंडलेश्वरकार्यालयः।

—दार, सं. पुं., उपमंडलेशः-श्वरः।

—दारी, सं. स्त्री. उपमंडलेश्वर,-कार्य-पदम्।

नायब तहसीलदार, सं. पुं. (फ़ा.+अ.+फ़ा.) उपमंडलेश्वरसहायकः।

तहाँ, क्रि. वि. (सं. तद्>) तत्र, तस्मिन् स्थाने, तत्स्थाने।

ताँगा, सं. पुं., दे. 'टाँगा'।

तांडव, सं. पुं. (सं. न.) पुरुषनृत्यं २. उद्धतनृत्यं ३. शिवनृत्यं ४. तृणभेदः।

ताँत, सं. स्त्री. (सं. तंतुः) आंत्र,-सूत्रं-गुणः २. मौर्वी, प्रत्यञ्चा, धनुर्गुणः ३. सूत्रं, गुणः ४. वीणातंत्रं-त्री।

ताँता, सं. पुं. [सं. ततिः [(स्त्री.)] पंक्तिः (स्त्री.), श्रेणी-णिः (स्त्री.)।

ताँती, सं. स्त्री. (हिं ताँता) आवली-लिः (स्त्री.), पंक्तिः (स्त्री.) २. संततिः (स्त्री.)।

ताँती, सं. पुं. (हिं. ताँत) तंतुवायः-पः, पटकारः।

तांत्रिक, सं. पुं. (सं.) तंत्रशास्त्रविद् (पुं.), २. मोहिन्, कुहककारः। वि. तंत्रसंबंधिन्।

ताँबा, सं. पुं. (सं. ताम्रं) ताम्रकं, म्लेच्छमुखं, रवि,-लोहं-प्रियं, मुनिपित्तलं, लोहितायसम्।

तांबूल, सं. पुं. (सं. न.) पर्णं, नागवल्लीदलं, दे. 'पान' २. पर्णवीटी-टिका-टिः (स्त्री.) ३. पूगं, पूगफलम्।

ताई[1], सं. स्त्री. (हिं. ताया) ज्येष्ठपितृव्या।

ताई[2], सं. स्त्री., दे. 'तवी'।

ताईद, सं. स्त्री. (अ.) समर्थनं, अनुमोदनं, पुष्टिः (स्त्री.), दृढी,-करणं-कारः, उपोद्बलनम्।

ताऊ, सं. पुं., दे. 'ताया'।

बछिया के ताऊ, मु., बलीवर्दः २. मूर्खः।

ताऊन, सं. पुं. (अ.) दे. 'प्लेग'।

ताऊस, सं. पुं. (अ.) मयूरः शिखंडिन् २. मयूराकारो वाद्यभेदः।

तख्त ताऊस, सं. पुं., मयूरासनं २. शाहजहानस्य मयूरसिंहासनम्।

ताक[1], सं. पुं. (अ.) कुडयविवरं, भित्तिगर्तः-र्तं, आलयः २. कुडय,-फलकः-कं ३. असमः विषम,-संख्या-अंकः। वि. अनुपम, अद्वितीय, निपुण।

—जुफ़्त, सं. पुं. (अ.+फ़ा.) समविषमक्रीडा, द्यूतभेदः।

—पर रखना, मु., परित्यज् (भ्वा. प. अ.), उज्झ् (तु. प. से.)।

ताक[2], सं. स्त्री. (हिं. ताकना) अवलोकनं, ईक्षणं, दर्शनम् २. अनिमिषदृष्टिः (स्त्री.) ३. अवसरप्रतीक्षा ४. अन्वेषणम्।

—झाँक, सं. स्त्री., असकृदवलोकनं २. निभृतं वीक्षणं ३. निरीक्षणं ४. अन्वेषणम्।

ताकत, सं. स्त्री. (अ.) बलं, शक्तिः (स्त्री.)।

—वर, वि. (अ.+फ़ा.) बलवत्, शक्तिमत्।

ताकना, क्रि. स. (सं. तर्कणं>) अनिमि(मे)षं दृश् (भ्वा. प. अ.)-अवलोक् (चु.) २. निभृतं (छिद्रेण) ईक्ष् (भ्वा. आ. से.) ३. अव-निर्,-ईक्ष् ४. हंतुं निभृतं स्था (भ्वा. प. अ.)।

ताकि, अव्य. (फ़ा.) तथा…यथा, यथा।
ताकीद, सं. स्त्री. (अ.) प्रबलानुरोधः, दृढादेशः, पुनः स्मारणम्।
—करना, क्रि. स., सानुरोधं आदिश् (तु. प. अ.),-पुनः-दृढं स्मृ (प्रे.)।
ताग-गा, सं. पुं. (सं. तार्कव>) तंतुः (पुं.), डोरः, गुणः, शुल्वम्।
तागड़ी, सं. स्त्री., दे. 'करधनी'।
ताज, सं. पुं. (अ.) राज-म(मु)कुटं, किरीटः-टम्।
—पोशी, सं. स्त्री. (अ.+फ़ा.) राज्याभिषेकः, मुकुटपरिधापनम्।
ताज़गी, सं. स्त्री. (फ़ा.) हरितत्वं २. प्रफुल्लता ३. नवीनता।
ताज़ा, वि. (फ़ा.) हरित, सरस, २. नव, नूतन, प्रत्यग्र ३. श्रान्तिशून्य, सज्ज।
मोटा—, वि., दृढांग, बलिष्ठ, सबल।
ताज़ियाना, सं. पुं. (फ़ा.) अश्वताडनी, कशा-षा, प्रतोदः।
ताज़ी, सं. पुं. (फ़ा.) *अरबाश्वः २. मृगयाकुक्कुरः, विश्वकद्रुः (पुं.)। वि., अरबदेशीय।
ताज़ीम, सं. स्त्री. (अ.) सत्कारः संमानना।
ताज़ीर, सं. स्त्री. (अ.) दंडः, अर्थदंडः, निग्रहः।
ताज़ीराते-हिंद, सं. स्त्री., भारतीयदण्डसंहिता।
ताज्जुब, सं. पुं., (अ. तअज्जुब) आश्चर्य; विस्मयः।
ताड़, सं. पुं. (सं. तालः) दीर्घस्कन्धः, ध्वजद्रुमः, तरुराजः, महोन्नतः, लेख्यपत्रः २. ताडनं, प्रहारः ३. महा,-रवः-ध्वनिः (पुं.)।
ताड़का, सं. स्त्री. (सं.) राक्षसीविशेषः, सुकेतुकन्या।
ताड़न, सं. पुं. (सं. न.) प्रहरणं, आहननं, आघातः, प्रहारः २. तर्जनं ३. दण्डः, शासनं ४. गुणनम्।
ताड़ना[1], क्रि. स. (सं. ताडनं) तड् (चु.), अभिहन् (अ. प. अ.), आहन् (अ. प. अ.), तुद् (तु. उ. अ.), प्रहृ (भ्वा. प. अ.), २. दंड् (चु.), शास् (अ. प. से.) ३. तर्ज्-निर्भर्त्स् (चु. आ. से.)। सं. स्त्री., दे. 'ताड़न' (१-३)।
ताड़ने योग्य, वि., ताडनीय, आहन्तव्य, दंड्य, तर्जनीयं इ.।
ताड़नेवाला, सं. स्त्री., ताडकः, दंडयितृ, तर्जकः।
ताड़ा हुआ, वि., ताडित, अभिहत, दंडित, तर्जित।
ताड़ना[2], क्रि. स. (सं. तर्कणं) तर्क् (चु.), अनु-मा (जु. आ. अ.), ऊह् (भ्वा. आ. से.)।
ताड़ी, सं. स्त्री. (सं. ताली) तालकी, ताल,-रसः-आसवः-मद्यं, तारिका।
तात, सं. पुं. (सं.) पितृ (पुं.), जनकः २. पूज्यः, गुरुः (पुं.) ३. (प्रायः छोटों के लिए संबोधन में) वत्स, प्रिय, अंग।
तातार, सं. पुं. (फ़ा.) दे. 'तूरान'।
तातील, सं. स्त्री. (अ.) अवकाशः, अनध्याय-विश्राम,-दिवसः।
तात्कालिक, वि. (सं.) तत्कालभव २. समकालीन, यौगपदिक।
तात्त्विक, वि. (सं.) वास्तविक, यथार्थ, परमार्थ।
तात्पर्य, सं. पुं. (सं. न.) अर्थः, आशयः अभिप्रायः, भावः २. तत्परता, तत्परायणता।
तादात्म्य, सं. पुं. (सं. न.) अभेदः, अभिन्नता, सायुज्यम्, तद्रूपता।
तादाद, सं. स्त्री. (अ. तअदाद) संख्या, गणना।
तादृश, वि. (सं.) तादृक्ष, तत्,-सदृश-तुल्य-समान, तथाविध।
तान, सं. स्त्री. (सं.) गानांगविशेषः, आलापः, लयविस्तारः २. विस्तृतिः-ततिः (स्त्री.), विस्तारः।
—पूरा, सं.पुं. (सं. तुंबरं) *तानपूरः, वीणाभेदः।
तानना, क्रि. स. (सं. तननं) प्र-वि-तन् (त. उ. से.), आयम् (भ्वा. प. अ.) दीर्घी कृ. विस्तृ-विस्तॄ (प्रे.) लंब्-प्रसृ (प्रे.)।
तानकर, मु., बलेन, पूर्णशक्त्या।
तानकर सोना, मु., निश्चितं स्वप् (अ. प. अ.)।
ताना[1], सं. पुं. (हिं. तानना) तान्तवम्, अन्वानाहतंतवः (पुं. बहु.)।
—बाना, अन्वानाहतिर्यक्तंतवः (पुं. बहु.), तान्तवौतू (पुं. द्वि.)।
ताना,[2] सं. पुं. (अ.), व्यंग्य-वक्र-छेक-भंगि,-वचनं-वाक्यं-उक्तिः (स्त्री.), कटाक्षाक्षेपः।
ताना,[3] क्रि. स. (सं. तापनं) दे. 'तपाना'।
—मारना, क्रि. स., भंग्या-व्यंग्येन आक्षिप् (तु. प. अ.), वक्रोक्त्या-कटाक्षेण उपन्यस (दि. प. से.)-व्याहृ (भ्वा. प. अ.)।

तानाशाह, सं. पुं. (हिं+फ़ा.) एक,-अधिपतिः-शासकः, अधिनायकः ।

तानाशाही, सं. स्त्री. अधिनायकत्वं, ऐकाधिपत्यम् ।

ताप, सं. पुं. (सं.) उ(ऊ)ष्मन् (पुं.), उष्णता, उष्मः, उत्-परि-सं,-तापः, दाहः २. ज्वरः ३. दुःखं, कष्टं ४. वेदना, मानसक्लेशः ।

—तिल्ली, सं. स्त्री., प्लीहाभिवृद्धिः (स्त्री.), प्लीहोदरम् ।

तापना, क्रि. अ. (सं. तापनं) पावकं-सूर्यातपं आ-नि-सेव् (भ्वा. आ. से.) । क्रि. स., दे. 'तपाना' ।

तापमान, सं. पुं. (सं. न.) ऊष्ममानम् ।

—यंत्र, सं. पुं. (सं. न.) १-२. ताप-ज्वर,-मापकम् ।

तापस, सं. पुं. (सं.) दे. 'तपस्वी' ।

ताब, सं. स्त्री. (फा. । मि. सं. तापः) ऊष्मः, उष्णता २. दीप्तिः (स्त्री.), आभा ३. सामर्थ्यं, साहसम् ।

ताबड़तोड़, क्रि. वि. (अनु.) अनवरतं, अविश्रान्तं, सततं, अनवच्छिन्नम् ।

ताबूत, सं. पुं. (अ.) शव,-पेटकः-संपुटः ।

ताबे, वि. (अ.) अधीन, वशवर्तिन् ।

ताबेदार, वि. (अ.+फ़ा.) आज्ञा,-पालकः-कारिन् ।

तामजान, सं. पुं. (हिं. थामना+सं. यानं) शिविकाभेदः ।

तामरस, सं. पुं. (सं. न.) रक्तोत्पलं, कोकनदं, २. सुवर्णं ३. ताम्रम् ।

तामस, वि. (सं.) तमोगुणिन्, तमोगुणयुक्त २. काल, कृष्ण ३. अज्ञ ४. दुष्ट । सं. पुं., सर्पः २. उलूकः ३. क्रोधः ४. अंधकारः ।

तामसिक, वि. दे. 'तामस' वि. ।

तामिल, सं. स्त्री. (देश.) द्रविडजातिभेदः २. भाषाविशेषः ।

तामिस्र, सं. पुं. (सं.) नरकविशेषः २. कृष्ण-पक्षः ३. क्रोधः ४. द्वेषः ।

तामील, सं. स्त्री. (अ.) आज्ञापालनं २. निष्पत्तिः-सिद्धिः (स्त्री.) ।

ताम्र, सं. पुं. (सं. न.) ताम्रकं, मुनिपित्तलम् ।

—कार, सं. पुं. (सं.) ताम्र,-कुट्टः-उपजीविन् ।

—चूड़, सं. पुं. (सं.) कुक्कुटः ।

—पत्र, सं. पुं. (सं. न.) ताम्रपट्टः-ट्टं २. ताम्रफलकः-कम् ।

ताया, सं. पुं. (सं. तातः>) ज्येष्ठःतातः, ज्येष्ठ-पितृव्यः, पितुरग्रजः ।

तार, सं. पुं. (सं. न.) रूप्यं, रजतं २. तारः, धातु,-तंतुः-(पुं.)-सूत्रं ३. तड़ित्-विद्युत्,-संदेशः-वार्त्ता ४. सूत्रं, गुणः, तंतुः (पुं.) ५. सततक्रमः, परंपरा ६. नक्षत्रं, तारा, ग्रहः ७. सप्तकभेदः (संगीत) । वि., उच्च, महत् (ध्वनि आदि) २. भासुर ३. निर्मल, स्वच्छ ।

—देना, क्रि. स., विद्युत्संदेशं प्रेष् (प्रे.)-प्रहि (स्वा. प. अ.) ।

—कश, सं. पुं. (हिं+फ़ा.) तारकर्षः-र्षकः ।

—घर, सं. पुं., तारगृहम् ।

—तार, वि., जीर्ण, विदीर्ण ।

—बर्की, सं. स्त्री., तड़ित्-विद्युत्,-तारः ।

—तार करना, मु., (वस्त्रादिकं) तन्तुशः विद्ध (प्रे.)-खंड् (चु.) ।

—टूटना, मु., क्रमः-परम्परा त्रुट् (दि. प. से.) ।

—बाँधना, मु., निरन्तरं विधा(जु.उ.अ.)-कृ ।

तारक, सं. पुं. (सं.) तारः-रं-रा, भं., नक्षत्रं २. नेत्रं ३. कनीनिका, नयनतारा ४. मोचकः, मुक्तिदः ५. कर्णधारः ।

तारका, सं. स्त्री. (सं.) नक्षत्रं, उडुः २. कनी-निका, बिंबिनी ३. वालिपत्नी ।

तारकेश्वर, सं. पुं. (सं.) शिवः, महेशः ।

तारकोल, सं. पुं. (अं. कोलटार दे.)

तारण, सं. पुं. (सं. न.) पारनयनं, उत्तारणं, संतारणं २. मोचनं, उद्धारणं, निस्तारणम् । सं. पुं., तारकः उद्धारकः, भवभयमोचकः २.विष्णुः ।

तारतम्य, सं. पुं. (सं. न.) न्यूनाधिकता, उत्कर्षापकर्षौ २. अन्तरं, भेदः ।

तारना, क्रि. स. (हिं तरना) पारं नी (भ्वा. प. अ.), उत्-सं-, तॄ (प्रे.) उत्-, लंघ् (प्रे.) २. मोक्ष् (चु.), निस्तॄ (प्रे.), उद्-,हृ-धृ (भ्वा. प. अ.), (पापेभ्यः, भवभयात्) मुच् (प्रे.) ।

तारनेवाला, सं. पुं., मोक्षकः, मोचकः, निस्तारकः, उद्धारकः, मुक्तिदः ।

तारपीन, सं. पुं. (अं. टरपेंटाइन) सरल-चीरपर्ण,-तैलं,सरल,-द्रवः-रसः-स्यन्दः, शीतलः, श्री,-वासः-वेष्टः ।

तारल्य, सं. पुं. (सं. न.) तरलत्वं, तरलता, द्रवत्वं, प्रवाहिता २. कामुकता, लंपटता, कामान्धता।

तारा, सं. पुं. (सं. स्त्री.) तारः-रं, तारका, उडुः (पुं.), नक्षत्रं, ऋक्षं, भं, ज्योतिस् (न.) २. कनीनिका, बिंबिनी ३. भाग्यं, नियतिः (स्त्री.)। सं. स्त्री., बालिपत्नी २. बृहस्पति-भार्या।

—टूटना, क्रि. अ., नक्षत्र-उल्का पत् (भ्वा. प. से.)।

—अधिप, सं. पुं. (सं.) चंद्रः २. बालिः(पुं.)।

—मंडल, सं. पुं. (सं. न.) उडु-भ-नक्षत्र,-गणः।

—होना, मु., नभः चुंब् (भ्वा. प. से.), गगनं स्पृश् (तु. प. अ.)।

तारीक, वि. (फ़ा.) काल, कृष्ण २. सतिमिर, निष्प्रभ।

तारीकी, सं. स्त्री. (फ़ा.) कृष्णता २. अंधकारः, तिमिरम्।

तारीख़, सं. स्त्री. (फ़ा.) तिथिः (पुं. स्त्री.), दिवसः २. नियततिथिः।

तारीफ़, सं. स्त्री. (अ.) लक्षणं, परिभाषा २. स्तुतिः-नुतिः (स्त्री.) ३. वर्णनं ४. गुणः, विशिष्टता।

तारुण्य, सं. पुं. (सं. न.) यौवनं, कौमारम्।

तारेश, सं. पुं. (सं.) विधुः, सुधांशुः, चन्द्रः।

तार्किक, सं. पुं. (सं.) तर्कशास्त्रविद् (पुं.) २. तत्त्वज्ञः, दार्शनिकः।

तार्क्ष्य, सं. पुं. (सं.) गरुड़, वैनतेयः, विष्णु-रथः २. अरुणः ३. अश्वः ४. सर्पः ५. खगः।

ताल[1], सं. पुं. (सं. तल्लः) दे. 'तालाब'। २. करतलः-लं, प्रहस्तः ३. ताली, करतलध्वनिः (पुं.), करतालः-लकं ४. संगीते काल-क्रिया,-मानं ५. मल्लयुद्धे करतलेन बाहुजंघयोरास्फा-लनं ६. दे. 'झाँझ'।

ताल[2], सं. पुं. (सं.) तृणराजः, मधुरसः, आसवद्रुः (पुं.)।

—से बेताल होना, मु., विताल (वि.) भू।

तालमखाना, सं. पुं. (हिं. ताल+मक्खन) कोकिलाक्षः, काकेक्षुः, कांडेक्षुः, इक्षुरः।

तालव्य, वि. (सं.) काकुद-तालु,-संबंधिन्।

—वर्ण, सं. पुं. (सं.) तालूच्चार्यवर्णाः। (इ, ई, चवर्ग, य्, श्)।

ताला, सं. पुं. (सं. तालकं) तालः, ताल-द्वार,-यंत्रम्।

—लगाना, क्रि. स., तालकेन निरुध (रु. उ. अ.)-पिधा (जु. उ. अ.)-बंध् (क्र्. प. अ.)।

तालाब, सं. पुं. (हिं. ताल+फ़ा. आब.) तडा(टा) गः-गं, कासारः-रं, सरस् (न.), पुष्करिणी।

तालिका, सं. स्त्री. (सं.) दे. 'ताली' २. सूची-चिः (स्त्री.), अनुक्रमणी-णिका, नामावली-लिः (स्त्री.)।

तालिब, सं. पुं. (अ.) अन्वेषकः, अनुसंधातृ (पुं.) २. इच्छुकः, अभिलाषिन्।

—इल्म, सं. पुं. (अ.) विद्यार्थिन्, छात्रः।

ताली[1], सं. स्त्री. (सं.) तालिका, कुंचिका, कूचिका, अंकुटः, उद्घाटनी, साधारणी।

ताली[2], सं. स्त्री. (सं. तालिका) करतालः-लकं, करतल,-शब्दः-ध्वनिः (पुं.)।

—बजाना, क्रि. स., करतालं वद् (प्रे.)-दा, करतलध्वनिं जन् (प्रे.)।

तालीम, सं. स्त्री. (अ.) शिक्षा, विद्या।

तालीशपत्र, सं. पुं. (सं. न.) तालीशं, नीलं, धात्रीपत्रम्।

तालु, सं. पुं. [सं. तालु (न.)] काकुदं, तालुकम्।

—मूल, सं. पुं. (सं. तालुमूलम्) काकुदमूलम् २. गलग्रन्थिः।

ताल्लुक, सं. पुं. (अ. तअल्लुक़) सम्बन्धः, संसर्गः।

ताव, सं. पुं. (सं. तापः) दाहः, उ(ऊ)ष्मः-ष्मन् (पुं.), उष्णः-ष्णं २. अन्तर्वेगः, आवेशः ३. त्वरा ४. व्यावर्तनं, मोटनं, आकुञ्चनम्।

तावान, सं. पुं. (फ़ा.) दण्डः, अर्थ-धन,-दण्डः, निष्कृतिः (स्त्री.), निस्तारः।

—देना, क्रि, स., निष्कृतिं दा., निस्तॄ (प्रे.)।

तावीज़, सं. पुं. (अ. तअवीज़) यंत्रं, कवचः, क्षारः २. यंत्रसंपुटः।

ताश, सं. पुं. (अ. तास) क्रीडापत्राणि (न. बहु.), क्रीडापत्रावली २. पत्र,-क्रीडा-खेला ३. दे. 'जरबफ्त'।

तासीर, सं. स्त्री. (अ.) गुणः, प्रभावः।

तास्सुब, सं. पुं. (अ. तअस्सुब) धार्मिक-जातीय,-पक्षपातः, २. पक्षपातः ३. मतान्धता ।

ताहम, अव्य. (फ़ा.) दे. 'तथापि' ।

तिकोन, सं. पुं. (त्रिकोणः) त्रिभुजः, त्र्यस्रम् ।

तिकोना-निया, वि. (हिं. तिकोन) त्रिकोण, त्र्यस्र, त्रिकोण-त्रिभुज,-आकार ।

तिक्त, सं. पुं. (सं.) रसभेदः । वि., तिक्त,-रसस्वाद, तीक्ष्ण, तीव्र ।

तिखूँट, सं. स्त्री. (हिं. तीन+खूँट) दे. 'तिकोन' ।

—नाप, सं. स्त्री., त्रिकोणमितिः (स्त्री.) ।

तिखूँटा, वि., दे. 'तिकोना' ।

तिगुना, वि. (सं. त्रिगुण) त्रिगुणित, त्रिरावृत्त, त्रिगुणीकृत ।

—करना, क्रि. स., त्रिगुणीकृ, त्रिः आवृत्(प्रे.) ।

तिजारत, सं. स्त्री. (अ.) वाणिज्यं, क्रयविक्रयौ (द्वि.) ।

तिजारी, सं. स्त्री. (सं. त्रि+ज्वरः) तृतीयकज्वरः ।

तितरबितर, वि. (हिं. तिथर+अनु.) आ-प्र-वि,-कीर्ण, विक्षिप्त २. अव्यवस्थित, क्रमशून्य, अस्तव्यस्त ।

तितली, सं. स्त्री. (हिं. तीतर अथवा सं. तिल) चित्रपतंगः, *तित्तिरी ।

तितिक्षा, सं. स्त्री. (सं.) सहिष्णुता, सहनं २. क्षमा, क्षांतिः (स्त्री.) ।

तितिक्षु, वि. (सं.) सहनशील, सहिष्णु २. क्षांत, क्षमाशील ।

तिथि, सं. स्त्री. (सं. पुं. स्त्री.) मितिः (स्त्री.), मास-पक्ष,-दिनं-दिवसः, चांद्रदिवसः ।

तिनकना, क्रि. अ., दे. 'चिड़चिड़ाना' ।

तिनका, सं. पुं. (सं. तृणं), नालः-लं, पलः, पलालः-लं, त्रिणं, खटं, खेट्टं, हरितं, तांडवं, अर्जुनम् ।

—दाँतों में दबाना या लेना, मु., दे. 'गिड़गिड़ाना' ।

तिनके का सहारा, मु., ईषत् साहाय्यम् ।

तिनके को पहाड़ समझना, मु., तिले तालं पश्यति ।

तिपाई, सं. स्त्री. (सं. त्रिपादिका) त्रिपदिका, त्रिपदम् ।

तिबारा, क्रि. वि. (सं. त्रिवारं) त्रिः (अव्य.) ।

तिब्ब, स्त्री. (अ.) चिकित्साविज्ञानम्, २. यवनचिकित्साशास्त्रम् ।

तिब्बत, सं. पुं. (सं. त्रिवि (पि) ष्टपं >) त्रिविष्टपम् ।

तिब्बती, वि. त्रैविष्टप, त्रिविष्टप,-सम्बन्धि-विषयक । सं. पुं., त्रिविष्टपीयः, त्रिविष्टप,-वासिन्-वास्तव्यः । सं. स्त्री. त्रिविष्टपभाषा, *त्रिविष्टपी ।

तिमंज़िला, वि. (सं. त्रि + अ. मंज़िल) त्रिभूमिक ।

तिमिर, सं. पुं. (सं. न.) अंधकारः, तमस् (न.) ।

तिरछा, वि. (सं. तिर्यंच्) अवसर्पिन्, प्रवण, तिरश्चीन, वक्र, कुटिल, २. वेषाभिमानिन् ।

—देखना, क्रि. अ., तिर्यक्-वक्रं वीक्ष् (भ्वा. आ. से.) ।

तिरछी चितवन या नज़र, मु., तिर्यग्-वक्र,-दृष्टिः (स्त्री.) २. कटाक्ष-अपांग-नयनोपांत,-वीक्षणं-वीक्षितं, कटाक्षः, भ्रूविलासः ।

तिरछापन, सं. पुं. (हिं. तिरछा) प्रवणता, तिरश्चीनता, वक्रता, कुटिलता ।

तिरछे, क्रि. वि. (हिं. तिरछा) तिरः, साचि, जिह्मं (सब अव्य.) ।

तिरपन, वि. [सं. त्रिपंचाशत् (नित्य स्त्री.)] । सं. पुं., उक्ता संख्या, तदंकौ (५३) च ।

तिरपाई, सं. स्त्री. (सं. त्रिपादिका) त्रिपदिका, त्रिपदम् ।

तिरपाल, सं. पुं. (अं. टारपालिन) तिंदुलिप्तपटः ।

तिरसठ, वि. [सं. त्रिषष्टिः (नित्य स्त्री.)] । सं. पुं., उक्ता संख्या, तदंकौ (६३) च ।

तिरस्कार, सं. पुं. (सं.) अनादरः, अपमानः, निकृतिः (स्त्री.), न्यक्कारः, अवज्ञा, अवमानना, तिरस्क्रिया, मानभंगः २. भर्त्सना, तर्जनं ३. सापमानं त्यागः ।

तिरस्कृत, वि. (सं.) न्यक्कृत, अनादृत, अप-अव,-मत-मानित, अवज्ञात इ. २. सापमानं त्यक्त ३. आच्छादित ।

तिरहुत, सं. पुं. (सं. तीरभुक्तिः>) मिथिला-प्रदेशः ।

तिरहुतिया, वि. (हिं. तिरहुत) मैथिल, मिथिला-सम्बन्धिन् । सं. पुं., मैथिलः, मिथिला-वासिन् । सं. स्त्री., मिथिलाभाषा, मैथिली ।

तिरानवे, वि. [सं. त्रिणवतिः (नित्य स्त्री.)]। त्रयोणवतिः । सं. पुं., उक्ता संख्या, तदंकौ (९३) च ।

तिरासी, वि. [सं. त्र्यशीतिः (नित्य स्त्री.)]। सं. पुं., उक्ता संख्या, तदंकौ (८३) च।

तिराहा, सं. पुं. (सं. त्रि + फ़ा. राह) त्रिपथम्।

तिरिया, सं. स्त्री. (सं. स्त्री) नारी, रामा।

—चरित्तर, सं. पुं. (सं. स्त्रीचरित्रं) रामारहस्यं, वामावैदग्ध्यं, नारीचरितम्।

तिरोधान, सं. पुं. (सं. न.) अदर्शनं, अंतर्धानं, गोपनं, गूहनं, संवरणम्।

तिरोभाव, सं. पुं. (सं.) दे. 'तिरोधान'।

तिरोभूत, वि. (सं.) अदृष्ट, अंतर्हित, लुप्त।

तिरोहित, वि. (सं.) गूढ, निलीन, आच्छादित, संवृत, निभृत, गुप्त।

तिर्यंची, सं. स्त्री. (सं.) तिरश्री, पशु-खग,-योषा–अंगना–वधूः (स्त्री.)।

तिर्यक्, अव्य. (सं.) वक्रं, कुटिलं, तिरस्, जिह्मं, असरलम् (सब अव्य.)।

तिलंगाना, सं. पुं. (सं. तैलंगः) प्रदेशविशेषः।

तिलंगी, वि. (सं. तिलंगाना>) तैलंगदेशीय।

तिल, सं. पुं. (सं.) पवित्रः पितृतर्पणः, पूत-होम,-धान्यं, पापघ्नः, स्नेहफलः। २. तिलकः, कालकः, जड्ड (डु), लः, पिप्लुः (पुं.)। ३. क्षणः-णं, पलं ४. तारा-रकं, कनीनिका।

—का तेल, सं. पुं., तिल,-तैलं-रसः-स्नेहः।

—किट्ट, सं. पुं. (सं. न.) तिल,-खली-चूर्णम्।

—कुट, सं. स्त्री., तिलकुट्टम्।

—चटा, सं. पुं., रक्तवर्णकीटभेदः।

—भुग्गा, सं. पुं., तिलभुक्तम्।

—पपड़ी-शकरी, सं. स्त्री., तिलपट्टी, *तिलशर्करी। तिल की ओट पहाड़, मु.,* विन्दौ सिन्धुः, *तिले गिरिः।

तिल का ताड़ करना, मु., तिले तालं पश्यति।

तिल-तिल, मु., अल्पाल्प, किंचित्किंचित्।

तिल धरने की जगह न होना, मु., स्थानाभावः।

तिलभर, मु., ईषदिव, किंचिदिव।

तिलक, सं. पुं. (सं. पुं. न.) दे. 'टीका'' (१. २ ६. ८. ९. ११.)।

—लगाना, क्रि. स., दे. 'टीका' लगाना'।

तिलड़ा, सं. पुं. } (सं.त्रि+हिं. लड़) त्रिसूत्रो
तिलड़ी, सं. स्त्री. } हारः।

तिलवा, सं. पुं. (सं. तिल>) *तिलमोदकः।

तिलहन, (हिं तेल + धान्य) सं. पुं. तैल-स्नेह,-बीजं-बीजकं-रोहिः।

तिला, सं. पुं. (फ़ा. । मि. सं. तैलं) मर्दनौषधं २. लिंगलेपः।

तिलाक, सं. पुं., दे. 'तलाक'।

तिलि (ल) स्म, सं. पुं. (यू. टेलिस्मा) दे. 'इन्द्रजाल'।

तिल्ली, सं. स्त्री. (सं. तिलकं>) प्लीहन् (पुं.), प्लीहा, गुल्मः २ दे. 'तिल' १.।

ताप—, सं. स्त्री, दे. 'ताप' के नीचे।

तिवारी, सं. पुं. (सं. त्रिपाठी), दे. 'त्रिवेदी'।

तिस, सर्व., दे., 'उस'।

तिहत्तर, वि. [सं. त्रिसप्ततिः (नित्य स्त्री.)]। सं. पुं., उक्ता संख्या, तदंकौ (७३) च।

तिहरा, वि. दे. 'तेहरा'।

तिहराना, क्रि. स. (हिं. तिहरा) त्रिः कृ, तृतीयं वारं विधा (जु. उ. अ.)।

तिहवार, सं. पुं. (सं तिथिवारः)। पर्वन् (न.), उत्सवः, उद्धर्षः, उद्धवः, क्षणः, महः।

तिहाई, सं. स्त्री. (सं. त्रिभाग>) तृतीय,-अंशः-भागः।

तिहारा, सर्व., दे. 'तुम्हारा'।

तीक्ष्ण, वि. (सं.) नि,-शात-शित, तीव्र, प्र,-खर, सूच्यग्र, तीक्ष्ण-शित,-धार २. (बुद्धि) कुशाग्र, सूक्ष्म-शीघ्र-,ग्राहिन्, सूक्ष्म, तीव्र ३. उग्र, प्रचंड ४. दे. 'चरपरा' ५. (शब्द) कर्णकटु, अप्रिय ६. उद्यमिन्, अतंद्र, क्षिप्रकर्मन् ७. असह्य, दुःसह।

तीक्ष्णता, सं. स्त्री. (सं.) तीव्रता, प्रखरता, प्रचंडता इ.।

तीखा, वि., दे. 'तीक्ष्ण'।

तीखुर, सं. पुं., दे. 'तबाशीर'।

तीज, सं. स्त्री. (सं. तृतीया) कृष्णा शुक्ला वा तृतीया तिथिः (स्त्री.) २. श्रावण-भाद्र,-शुक्लतृतीया।

तीत-ता, वि. (सं. तिक्त) दे. 'तिक्त' २. कटु।

तीतर, सं. पुं. (सं. तित्तिरः) तिति (त्ति) रिः (पुं.), तैतिरः, याज्ञुषोदरः।

तीन, वि. [सं. त्रीणि (न. बहु.)] त्रयः (पुं.), तिस्रः (स्त्री.), त्रीणि (न.)। सं. पुं., उक्ता संख्या, तदंकः (३) च।

—तेरह करना, मु., विद्रु (प्रे.), अवा-आ-प्र-वि,-कृ (तु. प. से.)।
—पाँच करना, मु., कलहायते (ना. धा.), विवद् (भ्वा. आ. से.)।
न तीन में न तेरह में, मु., सामान्य, साधारण।
तीमार, सं. पुं. (फ़ा.) सेवा, परिचर्या।
—दार, सं. पुं., रोगि-रुग्ण,-सेवकः-परिचारकः।
—दारी, सं. स्त्री., रोगि-रुग्ण,-परिचर्या-सेवा।
तीय, सं. स्त्री., दे. 'स्त्री'।
तीर¹, सं. पुं. (सं. न.) तटः-टं-टी।
तीर², सं. पुं. (फ़ा.) बाणः, शरः, इषुः (पुं.), सायकः।
—कश, सं. पुं. (फ़ा.) इषुधिः (पुं.), दे. 'तरकश'।
—चलाना या मारना, क्रि. स., इषुं प्र,-मुच्-क्षिप् (तु. प. अ.)।
तीरंदाज़, सं. पुं. [-+अंदाज़ (फ़ा.)] इषु-धनुर्,-धरः, धन्विन् (पुं.), धानुष्कः।
तीरंदाजी, सं. स्त्री., धनुर्,-विद्या-वेदः, शराभ्यासः।
तीर्थ, सं. पुं. (सं. तीर्थं) पुण्य-पवित्र,-स्थानं २. घट्टः ३. घट्टसोपानपथः, अवतारः ४. उपाध्यायः, गुरुः (पुं.) ५. ब्राह्मणः ६. परिव्राजकोपाधिः (पुं.) ७. तारकः, मोक्षकः ८. ईश्वरः ९. जननीजनकौ १०. अतिथिः (पुं.)।
—यात्रा, सं. स्त्री. (सं.) तीर्थाटनम्।
—राज, सं. पुं. (सं.) प्रयागः।
तीर्थिक, सं. पुं. (सं.) तीर्थपुरोहितः २. तीर्थंकरः ३. तीर्थयात्रिन्।
तीला, सं. पुं. (फ़ा. तीर) दे. 'तिनका'।
तीली, सं. स्त्री. (हिं. तीला) लघुतृणम् २. धात्वादेः दृढसूक्ष्मतारः।
तीव्र, वि. (सं.) अत्यधिक, अत्यंत, अतिशय २. दे. 'तीक्ष्ण'(१)। ३. सुतप्त, अत्युष्ण ४. असीम, अमित ५. कटु ६. दुःसह ७. प्रचंड ८. तिक्त ९. वेगवत्, शीघ्र १०. तार, उच्च (स्वर)।
तीव्रता, सं. स्त्री. (सं.) अत्यधिकता, बाहुल्यं, अत्युष्णता, असह्यता, प्रचंडता, तिक्तता इ.।
तीस, वि. [सं. त्रिंशत् (नित्य स्त्री.)]। सं. पुं., उक्ता संख्या, तदंकौ(३०) च।
—मार खाँ, मु., वीराग्रणीः (पुं.), शूरशिरोमणिः (पुं.) (व्यंग्य)।
तीसों दिन, मु., सदा, सर्वदा।
तीसरा, वि. पुं. (हिं. तीन) तृतीयः [-या (स्त्री.)]। सं. पुं., मध्यस्थः, तटस्थः।
—पहर, सं. पुं., तृतीयप्रहरः अपराह्णः, पराह्णः, विकालः।
तीसरे, क्रि. वि. (हिं. तीसरा) तृतीयस्थाने, तृतीयं, तृतीयतः (अव्य.)।
तीसवाँ, वि. (हिं. तीस) त्रिंशत्तमः-मं-मी, त्रिंशः-शं-शी (पुं. न. स्त्री.)।
तुंग, वि. (सं.) दे. 'ऊँचा' २. चंड, उग्र।
तुंड, सं. पुं. (सं. न.) मुखं, आस्यं, वदनं २. चञ्चूः-ञ्चुः (स्त्री.)।
तुंडि, सं. स्त्री. (सं. पुं.) दे. 'तुंड' (१-२)। (सं. स्त्री.) नाभिः।
तुंद, सं. पुं. (सं. न.) उदरं, तुन्दि (न.), तुन्दिः (स्त्री.)।
तुंबा, सं. पुं. (सं.) अलाबुः (पुं. स्त्री.) -बूः (स्त्री.) २. अलाबु (न.), अलाबुपात्रम्।
तुंबिया, सं. स्त्री. (सं. तुंबिका >) क्षुद्रालाबु (न.), क्षुद्रालाबुपात्रम्।
तुंबी, सं. स्त्री. (सं.) तुंबिः (स्त्री.) अलाबुः (पुं. स्त्री.) २. दे. 'तुंबा'(२)।
तुअर, सं. पुं. (सं. तुवरी) आढकी, दे. 'अरहर'।
तुक, सं. स्त्री. (हिं. टूक) अंत्यानुप्रासः, अक्षरमैत्री २. पद्यांशः ३. पादांतवर्णः।
बेतुकी, वि., असंबद्ध, असंगत।
—जोड़ना, मु., कुकवितां कृ अथवा रच् (चु.)।
तुख्म, सं. पुं. (अ.) दे. 'बीज'।
तुच्छ, वि. (सं.) नीच, हीन, अधम, क्षुद्र, दीन, निकृष्ट २. असार, लघ्वर्थक, अनर्थक।
तुड़वाना, तुड़ाना, क्रि. प्रे., व. 'तोड़ना' के प्रे. रूप।
तुतला (रा) ना, क्रि. अ. (अनु.) अस्पष्टं-शिशुवत् भाष् (भ्वा. आ. से.)।
तुपक, सं. स्त्री. (तु. तोप) *शतघ्निका २. नालास्त्रम्।
तुफंग, सं. स्त्री. (तु. तोप) वायव्यं नालास्त्रम्।
तुम, सर्व. (सं. त्वम्) त्वं (एक.), यूयं (बहु.) ('तुम को' आदि के लिए 'युष्मद्' की द्वितीया आदि के रूप बनेंगे)।

तुमड़ी, सं. स्त्री. (सं.तुम्बी>) शुष्कवर्तुलालाबुः (पुं. स्त्री.) २. दे. 'तुंबा'(२)।

तुमाई, सं. स्त्री. (हिं. तुमाना) कार्पासादि-प्रसाधनभृतिः (स्त्री.)।

तुमाना, क्रि. प्रे., व. 'तूमना' के प्रे. रूप।

तुमुल, वि. (सं.) घोररव-कलकल-कोलाहल,-भय-पूर्ण-युत। सं. पुं. (सं. पुं. न.) भीषण-घोर,-युद्धं-संग्रामः २. कोलाहलः, कलकलः।

तुम्हारा, सर्व. (हिं. तुम) युष्माकं-तव (त्रिलिंग) युष्मदीय, त्वदीय, तावक, यौष्माक-कीण।

तुम्हीं, सर्व० (हिं. तुम + ही) त्वमेव,युवामेव, यूयमेव।

तुम्हें, सर्व, (हिं. तुम) (कर्म) त्वाम् त्वा; युवाम्, वाम्; युष्मान्, वः (संप्रदान) तुभ्यं, ते, युवाभ्यां, वां; युष्मभ्यम्, वः।

तुरंग, तुरंगम, सं. पुं. (सं.) अश्वः, घोटकः।

तुरंत, क्रि. वि. (सं.) झटिति, आशु, सद्यः, सपदि, तत्क्षणं-णे।

तुरई, सं. स्त्री. (सं. तूरं >) मृदंगी, राज-, कोशातकी, जालिनी, कृतवेधना, सु,-पीत-पुष्पा, राजिमत्फला (घिया तुरई, देखो 'नेनुआ')।

तुरक, सं. पुं. (सं. तुरकः) तुरुष्कः २. यवनः ३. सैनिकः ४-५. टर्की-तुर्किस्तान,-वासिन्।

तुरकी, वि. (हिं. तुरक) तुरुष्कदेशीय २. तुरुष्कभाषा।

तुरग, सं. पुं. (सं.) अश्वः, वाजिन् (पुं.)।

तुरत, क्रि. वि., दे. 'तुरंत'।

तुरही, तुरी, सं. स्त्री. (सं. तूरं) तूर्यः-र्यं, काहलः-ला, शृंगवाद्यम्।

तुरीय, वि. (सं.) तुर्य, चतुर्थ।

—अवस्था, सं. स्त्री. (सं.) निःश्रेयसं, मुक्तिः (स्त्री.)।

तुरुष्क, सं. पुं. (सं.) दे. 'तुरक'।

तुर्य, वि., दे. 'तुरीय'।

तुर्रा, सं. पुं. (अ.) उष्णीष,-आलंबः-शेखरः २. चूड़ा, मौलिः (पुं.), शिखा, शेखरः ३. अलकः, चूर्णकुंतलः, भ्रमरकः, कुरलः। ४. वि., विचित्र, अद्भुत।

तुर्श, वि. (फ़ा.) दे. 'खट्टा'।

तुलना[1], सं. स्त्री. (सं.) उपमा, समता, साम्यं, सादृश्यं २. तारतम्यं, न्यूनाधिकता।

तुलना[2], क्रि. अ. (हिं. तोलना) तुल्-तूल् (कर्म., तोल्यते, तूल्यते), तुलया मा (कर्म. मीयते)।

किसी काम पर तुला हुआ, मु., कार्यविशेषं कर्तुं उद्यतः-कृतनिश्चयः-विहितसंकल्पः।

तुलनात्मक, वि. (सं.) तुलनायुक्त, अन्या-पेक्षक, अन्यसापेक्ष, सापेक्ष, साम्यवैषम्य,-सूचक-दर्शक।

तुलवाना, क्रि. प्रे., व. 'तोलना' के प्रे. रूप।

तुलसी, सं. स्त्री. (सं.) सुभगा, पावनी, भूतघ्नी, विष्णुवल्लभा, वृन्दा, पुण्या, वैष्णवी।

—दल, सं. पुं. (सं. न.) वृंदापत्रम्।

—दास, सं. पुं. (सं.) भक्तविशेषः, रामचरित-मानसादिरचयितृ (पुं.)।

तुला, सं. स्त्री. (सं.) दे. 'तकड़ी' २. तुलना, सादृश्यं ३. राशिविशेषः (ज्यो.)।

—दान, सं. पुं. (सं. न.) देहभारसम-सुवर्णादिदानम्। वि., तोलित, तूलित।

तुल्य, वि. (सं.) स-सम,-तोल-भार-परिमाण २. सम, समान, सदृश, सदृक्ष।

तुल्यता, सं. स्त्री. (सं.) सम,-तोलता-परिमाणता २. सादृश्यं, साम्यं, समत्वम्।

तुष, सं. पुं. (सं.) तुसः, बुषं-सं, कडंगरः, धान्यत्वच् (स्त्री.)।

तुषानल, सं. पुं. (सं.) कुकूलः, तुषाग्निः (पुं.)।

तुषार, सं. पुं. (सं.) तुहिनं, हिमं, प्रालेयं, म(मि)हिका, अवश्यायः, नीहारः। वि., हिम, तुषार, तुषार-हिम,-वत्।

तुष्ट, वि. (सं.) तृप्त, तर्पित, पूर्णकाम २. प्रसन्न, मुदित।

तुष्टि, सं. स्त्री. (सं.) तुष्टता, तृप्तिः (स्त्री.), संतोषः २. हर्षः, प्रसन्नता।

तुहमत, सं. स्त्री., दे. 'तोहमत'।

तुहिन, सं. पुं. (सं. न.) दे. 'तुषार' २. चंद्रिका, कौमुदी ३. शीतलता, हिमता।

तूँबा, सं. पु., दे. 'तुंबा'।

तूँबी, सं. स्त्री., दे. 'तुंबी'।

तू, सर्व. (सं. त्वं)।

—तड़ाक,—तुकार या—तू-तू मैं-मैं करना, मु., अशिष्टभाषायां कलहायते (ना. धा.)।

तूण-णि, सं. पुं. (सं.) }
तूणी, सं स्त्री. (सं.) } दे. 'तरकश'।
तूणीर, सं. पुं. (सं. पुं. न.) }

तूत, सं. पुं. (फ़ा. । मि. सं. तूदः) ब्रह्म,-काष्ठं-दारु (न.), सुरूपं, सुपुष्पम् ।

तूतिया, सं. पुं., दे. 'नीलाथोथा' ।

तूती, सं. स्त्री. (फ़ा.) शुकभेदः २. कनेरो-चटका ३. चटकाभेदः ४. मुखवाद्यो वाद्यभेदः, दे. 'तुरही' ।

—बोलना, मु., प्र-भू, अधिष्ठा (भ्वा. प. अ.) । नक्कारखाने में–की आवाज, मु., अरण्येरुदितम् ।

तूदा, सं. पुं. (फ़ा.) चयः, राशिः (पुं.) २. सीमाचिह्नम् ।

तून, सं. पुं. (सं. तुन्नः) नदीवृक्षः, तूणि-(णी) कः ।

तूफ़ान, सं. पुं. (अ.) झंझावातः, अति-चंड-महा,-वातः, वात्या, प्रभंजनः, प्रकंपनः २. तोय-जल,-ओघः-वृद्धिः (स्त्री.)-उपप्लवः-विप्लवः-प्रलयः, संप्लवः ३. उपद्रवः, संक्षोभः, विप्लवः ४. आपद्-आपत्तिः (स्त्री.) ५. दे. 'तोहमत' ।

—उठाना या मचाना, मु., तुमुलं कृ, संक्षोभं उत्पद् (प्रे.) ।

तूफ़ानी, वि. (फ़ा.) उपद्रविन्, कलहोत्पादक २. उग्र, प्रचंड ३. पिशुन, अभ्यसूयक ।

तूमड़ी, सं. स्त्री. (हिं. तूंबा) दे. 'तुंबी' २ तुम्बीनिर्मित आहितुण्डिकानां वाद्यभेदः ।

तूमना, क्रि. स. (सं. स्तोमः >) ऊर्णा-तूलं संमृज् (अ. प. वे., चु.) -घृष् (भ्वा. प. से.)-विश्लिष् (प्रे.) ।

तूरान, सं. पुं. (फ़ा.) तातार–तूरान,–देशः ।

तूरानी, वि. (फ़ा.) तातार-तूरान,-देशीय-सम्बन्धिन् । सं. पुं., तातार-तूरान-वासिन् (पुं.) ।

तूल[1], सं. पुं. (सं. पुं. न.) दे. 'रूई' २. दे. 'तूत' ।

तूल,[2] सं. पुं. (अ.) दे. 'लंबाई' ।

तूलिका, सं. स्त्री. (सं.) इ(ई) षीका, तुलिः (स्त्री.), तूली, ईषिका ।

तूली, सं. स्त्री. (सं.) दे. 'तूलिका' २. नीली ३. वर्तिः (स्त्री.) ।

तृण, सं. पुं. (सं. न.) दे. 'तिनका' ।

तृणवत्, वि. (सं.) तृण,-तुल्य-सम, तुच्छ, क्षुद्र २. अग्राह्य, त्याज्य ।

तृतीय, वि. (सं.) दे. 'तीसरा' ।

तृप्त, वि. (सं.) तुष्ट, पूर्णकाम २. प्रहृष्ट, प्रमुदित ।

तृप्ति, सं. स्त्री. (सं.) संतोषः, सौहित्यं, तर्पणं, प्रीणनम् २. आनंदः, हर्षः ।

तृषा, सं. स्त्री. (सं.) पिपासा, तृष्णा, उदन्या २. लोभः ३. इच्छा ।

तृषित, वि. (सं.) पिपासित, तर्षितः सतृष् २. इच्छुक ३. लुब्ध ।

तृष्णा, सं. स्त्री. (सं.) दे. 'तृषा' (१-३) ।

तें, प्रत्य. [सं. तस् (प्रत्य.)] दे. 'से' ।

तैंतालीस, वि. [सं त्रिचत्वारिंशत्(नित्य स्त्री.)] त्रयश्चत्वारिंशत् । सं. पुं., उक्ता संख्या, तदंकौ (४३) च ।

तैंतालीसवाँ, वि. (हिं. तैंतालीस) त्रि-(त्रयश्) चत्वारिंशत्तमः-मी-मं, त्रि (त्रयश)-चत्वारिंशः-शी-शं (पुं. स्त्री. न.) ।

तैंतीस, वि. (त्रयस्त्रिंशत् (नित्य स्त्री.] । सं. पुं., उक्ता संख्या, तदंकौ (३३) च ।

तैंतीसवाँ, वि. (हिं. तैंतीस) त्रयस्त्रिंशत्तमः-मी-मं, त्रयस्त्रिंशः-शी,शं (पुं. स्त्री. न.) ।

तेंदुआ, सं. पुं. (देश.) चित्रक-चित्रकव्याघ्र,-भेदः ।

तेंदू, सं. पुं. (सं. तिंदुकः) कालस्कंधः, तिंदुलः २. तिंदुलं, तिंदुलफलम् ।

ते, सर्व. (सं. पुं. तद् का बहु.) दे. 'वे' ।

तेईस, वि. [सं. त्रयोविंशतिः (नित्य स्त्री.)] सं. पुं., उक्ता संख्या, तदंकौ (२३) च ।

तेईसवाँ, वि. (हिं. तेईस) त्रयोविंशतितमः-मी-मं. त्रयोविंशः-शी-शं (पुं. स्त्री. न.) ।

तेग़, सं. स्त्री. (फ़ा.) दे. 'तलवार' ।

तेज, सं. पुं. [सं. तेजस् (न.)] कांतिः-दीप्तिः (स्त्री.), आभा, प्रभा २. पराक्रमः, वीर्यं, बलं ३. प्रतापः, अनुभावः, अभिख्या ४. तापः, ऊष्मन् (पुं.) ५. उग्रता, प्रचंडता ६. अग्निः (पुं.) ।

तेज़, वि. (फ़ा.) दे. 'तीक्ष्ण' (१) २. आशु, शीघ्रगामिन्, जवन, महावेग ३. क्षिप्र,-कर्मन्-कारिन् ४. दे. 'चरपरा' ५. उग्र, प्रचंड ६. महार्ह-र्घ, बहु-महा,-मूल्य ७. कुशाग्रबुद्धि ८. अतिचंचल ९. (विषादि) घोर, घातक ।

तेजपत्र, सं. पुं. (सं. न.) पत्रं, पत्रकं, गंधजातम् ।
तेजपात, सं. पुं., दे. 'तेजपत्र' ।
तेजबल, सं. पुं. (सं. तेजोवती) तेजनी, तेजवती ।
तेजस्वी, वि. (सं.-विन्) तेजोवत्, तेजस्वत्, ओजस्विन्, वर्चस्विन्, सुप्रभ, कांतिमत् २. प्रतापिन्, प्रतापवत् ३. वीर्यवत्, बलवत् ।
तेज़ाब, सं. पुं. (फ़ा.) अम्लः, द्रावकम् ।
तेज़ी, सं. स्त्री. (फ़ा.), निशितत्वं, तीक्ष्णधारता, प्रखरता २. उग्रता, चंडता ३. शीघ्रता, त्वरा ४. महार्घत्वं, बहुमूल्यत्वं इ. ।
तेता, वि., दे. 'उतना' ।
तेरस, सं. स्त्री. (सं. त्रयोदशी) शुक्लकृष्णपक्षयोः त्रयोदशी तिथिः (स्त्री.) ।
तेरह, वि. (सं. त्रयोदश) । सं. पुं., उक्ता संख्या, तदंकौ (१३) च ।
तेरहवाँ, वि. (हिं. तेरह) त्रयोदशः-शी-शं (पुं. स्त्री. न.) ।
तेरा, सर्व. (सं. तव) तावक, [-की (स्त्री.)], तावकी¯, त्वत्क, त्वदीय, त्वत्- ।
तेल, सं. पुं. (सं. तैलं) स्नेहः, म्रक्षणं, अभ्यञ्जनम् ।
—मलना या लगाना, क्रि. स., तैलेन अंज् (रु. प. से.)-दिह् (अ. उ. अ.)-लिप् (तु. प. अ.) ।
—निकालना, क्रि. स., स्नेहं निष्कृष् (भ्वा. प. अ.) ।
—चढ़ाना, मु., विवाहात्प्राग् वरवध्वोः तैलाभ्यञ्जनम् ।
जलती पर**—डालना**, मु., कलहं वृध् (प्रे.) ।
तेलगू, सं. स्त्री. (सं. तैलंग >) तैलंगप्रान्त-आन्ध्रप्रान्त,-भाषा, तेलगूः (स्त्री.) ।
तेलहन, सं. स्त्री., दे. 'तिलहन' ।
तेलिन, सं. स्त्री. (हिं. तेली) तैलिनी, तैलिकी, तैल,-करी-कारिणी, चाक्रिकी ।
तेलिया, वि. (हिं. तेल) तैल,-चिक्कण-कृष्ण-भासुर । सं. पुं., कृष्ण,-रंगः-रागः-वर्णः । २. कृष्णाश्वः ३. वत्सनाभः, गरलः (विषभेदः) ।
तेली, सं. पुं. (सं. तैलिन्) तैलकारः तैलिकः, चाक्रिकः, घूसरः ।
तेवर, सं. पुं. (हिं. तेह=क्रोध) सकोप-सक्रोध,-दृष्टिः (स्त्री.) २. भ्रूः (स्त्री.), भ्रूलता ।
—बदलना, मु., भ्रूभंगं कृ, भ्रूकुटिं बन्ध् (क्र्. प. अ.)-रच् (चु.) ।
तेवरी-ड़ी, सं. स्त्री., 'त्योरी' ।
तेव(त्यो)हार, सं. पुं., दे. 'तिहवार' ।
तेहरा, वि. (हिं. तीन) त्रि-,गुण-गुणित, त्रिरावृत्त, त्रिरावर्तित ।
तैयार, वि. (फ़ा.) (मनुष्य) उद्यत, उद्युक्त, सज्ज, सिद्ध, संनद्ध २. (वस्तु) सज्जी,-कृत-भूत, आयोजित, उपस्थित, उप,-क्लृप्त-कल्पित, सज्ज, सिद्ध ३. पीन, हृष्टपुष्ट ।
—करना, क्रि. स., सज्जीकृ, सन्नह् (प्रे.), उप-परि-क्लृप् (प्रे.), उपस्था (प्रे.) ।
—होना, क्रि. अ., सज्जीभू, सन्नह् (दि. उ. अ.) उद्यत-सन्नद्ध (वि.) भू ।
तैयारी, सं. स्त्री. (फ़ा. तैयार) सज्जता, सन्नद्धता, उद्यतता २. सिद्धिः-उपस्थितिः (स्त्री.) ३. आडम्बरः, श्रीः, शोभा ।
तैरना, क्रि. स. (सं. तरणं) पारं गम् (भ्वा. प. अ.), सं-, तॄ (भ्वा. प. से., द्वितीया के साथ) । क्रि. अ., तॄ, प्लु (भ्वा. आ. अ.) ।
तैराक, सं. पुं. (हिं. तैरना) तारकः, तरितृ, तरण-प्लवन,-कृत् (पुं.) ।
तैराकी, सं. पुं. (हिं. तैराक) तरः, तरणं, प्लवः, प्लवनम् ।
तैल, सं. पुं. (सं. न.) दे. 'तेल' ।
तैश, सं. पुं. (अ.) कोपः, क्रोधः ।
तैसा, वि. (सं. तादृश) दे. 'वैसा' ।
तोंद, सं. स्त्री. (सं. तुंद) पिचिण्डः, लम्बोदरम् ।
—निकलना, सं. पुं., तुन्दप्रसारः, तुन्दिकता, तुन्दिलता ।
तोंद(दै)ल, वि. (हिं. तोंद) तुंदिक, तुंदित, तुंदिभ, तुंदिल, तुंदिन्, पिचिंडिल, लम्बोदर ।
तोंदी, सं. स्त्री. [सं. तुण्डिः (स्त्री.)] तुन्दः-दी, दे. 'नाभि' ।
तो, तौ, अव्य. (सं. तद् >) तस्यां दशायां-स्थितौ (सप्तमी), तर्हि, तदा, तदानीम् ।
—भी, अव्य., दे. 'तथापि' ।
तोड़ना, क्रि स. (सं. त्रोटनं) त्रुट् (प्रे.), खंड् (चु.), भंज् (रु. प. अ.) २. भिद्-छिद् (रु. प. अ.), दॄ-शॄ (क्र्. प. से.) ३. अव-सं,-चि (स्वा. उ. अ.), आदा (जु. आ. अ.), ग्रह् (क्र्. प. से.) ४. नश्-ध्वंस् (प्रे.) ५. स्वपक्षं ग्रह् (प्रे.). स्वपक्षपातिनं विधा (जु. उ. अ.)

६. नाणकानि परिवृत (प्रे.) *त्रुट् (प्रे.)। सं. पुं., त्रोटनं, भंजनं, भेदनं, अव-सं,-चयनं, नाशः, ध्वंसः इ.।

तोड़नेवाला, सं. पुं., त्रोटकः, भञ्जकः, भेदकः, अवचायकः, नाशकः इ.।

टूटा हुआ, वि., त्रुटित, भग्न, भिन्न, ध्वस्त इ.।

तोड़ा, सं. पुं. (हिं. तोड़ना) नाणक-मुद्रा,-कोशः-कोपः २. धन,-कोपः-ग्रन्थिः (पुं.) ३. सुवर्ण-रजत,-अन्दुः-अन्दूः (दोनों स्त्री.) ४. तटः-टं-टी ५. हानिः (स्त्री.), अपचयः ६. रज्जु,-खण्डः-डम्।

तोतलाना, क्रि. अ., दे. 'तुतलाना'।

तोता, सं. पुं. (फ़ा.) कीरः, शुकः,वक्र,-तुण्डः-चंचुः (पुं.), किंकिरातः। (स्त्री., कीरी, शुकी इ.)।

—चश्म, सं. पुं. (फ़ा.) विश्वासघातकः, अप्रत्ययिन्, अविश्वासिन्।

—चश्मी, सं. स्त्री. (फ़ा.) अविश्वासः, अप्रत्ययः।

तोते की सी आँख फेरना, मु., नितांतं उपेक्ष् (भ्वा. आ. से)-उदास् (अ. आ. से.)।

हाथों के तोते उड़ जाना, मु., अत्याकुली-जडी भू, सं-न्या-मुह् (दि. प. वे.)।

तोप, सं. स्त्री. (तु.) शतघ्नी, अग्न्यस्त्रं, *तोपम्।

—खाना, सं. स्त्री. (तु.+फ़ा.) शतघ्नीशाला २. अग्न्यस्त्र-शतघ्नी-,समूहः।

तोपची, सं. पुं. (तु. तोप) दे. 'गोलंदाज़'।

तोबड़ा, सं. पुं. [फ़ा. तो (तु) बरा] *अश्वान्न-भस्त्रा।

तोबा, सं. स्त्री. (अ. तौबः) पापानावृत्तिप्रतिज्ञा, पश्चात्तापः।

तोम, सं. पुं (सं. स्तोमः) चयः, निकरः, पुंजः, संभारः।

तोमर, सं. पुं. (सं. पुं. न.) भल्लसदृशं प्राचीनास्त्रम् २-३. द्वादशमात्रा-नववर्ण,-च्छन्दस् (न.)-वृत्तम् ४. राजपुत्रवंशविशेषः।

तोय, सं. पुं. (सं. न.) जलं, पानीयम्।

—कर्म, सं. पुं. (सं.-र्मन् न.) तर्पणम् दे०।

—क्रीडा, सं. स्त्री. (सं.) जलक्रीडा।

—द, सं. पुं. (सं.) जलदः, नीरदः, अंभोदः।

—धि, निधि, सं. पुं. (सं) जलधिः, वारिधिः, समुद्रः।

तोरई, सं. स्त्री., दे. 'तुरई'।

तोरण, सं. पुं. (सं. पुं. न.) बहिर्द्वारं २. वंदनमाला ३. ग्रीवा।

तोल, सं. पुं. (सं.) भारः, गुरुत्वं २. भार-मानं, माडः, मात्रं, परिमाणं ३. तोलनं, भार-मानं, मस्तिः (स्त्री.)।

तोलन, सं. पुं. (सं. न.) तुलया भार,-मानं-मापनं २. उत्थापनम्।

तोलना, क्रि. स. (सं. तोलनं) तुल् (चु.), तूल् (भ्वा. प. से.), तुलायां धृ (चु.)। सं. पुं., दे. 'तोल'।

तोलनेवाला, सं. पुं., तोलकः, भारमातृ(पुं.)।

तोलवाना, क्रि. प्रे., व. 'तोलना' के प्रे. रूप।

तोला, सं. पुं. (सं. तोलः-लं) तोलकः-कं,-षण्णवतिरक्तिपरिमाणं, कोलं, वटकं, कर्षार्द्धम्।

तोशक, सं. स्त्री. (तु.) तूला, तूलिका।

तोष, सं. पुं. (सं.) तृप्तिः-तुष्टिः (स्त्री.), संतोषः २. प्रसन्नता, आनन्दः।

तोहफ़ा, सं. पुं. (अ.) उपहारः, उपायनं, उपदा, उपग्राह्यम्। वि., उत्कृष्ट, उत्तम।

तोहमत, सं. स्त्री. (अ.) मिथ्याभियोगः, मृषा-दोषारोपः।

—लगाना, क्रि. स. मिथ्या दुष् (प्रे. दूषयति), मृषा अभियुज् (रु. आ. अ.; चु.)।

तौर, सं. पुं. (अ.) आचारः, व्यवहारः २. दशा, अवस्था ३. प्रकारः,-विधा (समासांत में)।

—तरीका, सं. पुं. (अ.) शिष्टाचारः २. आचरणम्।

तौल, सं. पुं., दे. 'तोल'।

तौलना, क्रि स., दे. 'तोलना'।

तौलिया, सं. पुं. (अं. टावेल) मार्जनवस्त्रं, वरकम्।

तौहीन, सं. स्त्री. (अ.) अपमानः, निरादरः, अवमानना, अवज्ञा।

त्यक्त, वि. (सं.) विसृष्ट, उज्झित, अपास्त।

त्याग, सं. पुं. (सं.) उत्सर्गः, मोचनं, अपासनं, उज्झनं, हानं २. विरक्तिः (स्त्री.), वैराग्यं, संन्यासः ३. दे. 'तलाक'।

—पत्र, सं. पुं. (सं. न.) उत्सर्गलेखः।

त्यागना, क्रि. स. (सं. त्यागः) त्यज् (भ्वा.

प. अ.), उत्सृज् (तु. प. अ.), उज्झ् (तु. प. से.), रह्-वर्ज् (चु.), दे. 'छोड़ना'। सं. पुं., दे. 'त्याग'।

त्यागने योग्य, वि., त्याज्य, त्यक्तव्य, हेय, परिहार्य, उत्स्रष्टव्य।

त्यागनेवाला, सं. पुं., त्यक्तृ, उत्स्रष्टृ (पुं.), उज्झकः।

त्यागा हुआ, वि., दे. 'त्यक्त'।

त्यागी, सं. पुं. (सं.-गिन्) त्यक्तसंगः, संन्यासिन्, विरक्तः, वैराग्यवत्।

त्याज्य, वि. (सं.) दे. 'त्यागने योग्य'।

त्यों, क्रि. वि. (सं. तद्+एवं >) तथा, एवं, तद्वत्, एवंविधम्।

ज्यों—, क्रि. वि., यथा. . .तथा।

—ही, क्रि. वि., तत्क्षणं-णे।

त्योरी, सं. स्त्री. (सं. त्रिकूटः>) कोपदृष्टिः (स्त्री.), क्रोधवीक्षितं २. नयन-दृष्टि-दृक्,-पातः।

त्यो(त्यौ)हार, सं. पुं., दे. 'तिहवार'।

त्यो(त्यौ)हारी, सं. स्त्री. (हिं. त्योहार) पार्वण,-उपायनं-दानम्।

त्रसरेणु, सं. पुं. (सं.) ध्वंसिन्, द्व्यणुकत्रयात्मकरेणुः (पुं.) २. त्रिंशत्परमाणुपरिमाणम्।

त्रसित, त्रस्त, वि. (सं. त्रस्त) भीत, सभय, भयार्त, ससाध्वस, भयाविष्ट।

त्राण, सं. पुं. (सं. न.) दे. 'रक्षा'।

त्रात, वि. (सं.) त्राण, गुप्त, गोपायित, पात, अवित, रक्षित।

त्रातव्य, वि. (सं.) त्राणार्ह, रक्षणीय, पातव्य।

त्राता, सं. पुं. [सं.-तृ (पुं.)] दे. 'रक्षक'।

त्रास, सं. पुं. (सं.) भयं, भीतिः (स्त्री.) २. कष्टम्।

त्रासक, सं. पुं. (सं.) भयंकरः, भयावहः, भयानकः, भयजनकः, त्रासयितृ।

त्रासित, वि. (सं.) भीषित, तर्जित, ससाध्वस, दर्शित, भयातुर।

त्राहि, अव्य. (सं. लोट्) पाहि, रक्ष, शरणं देहि।

—त्राहि करना, मु., रक्षार्थं असकृत् प्रार्थ् (चु. आ. से.)।

त्रिक, सं. पुं. (सं. न.) त्रितयं, त्रयं-यी।

त्रिकाल, सं. पुं. (सं. न.) कालत्रयं-यी, भूतवर्तमानभविष्यत्कालाः २. वेलात्रयं-यी (प्रातः, मध्याह्नः,सायं)। अव्य., त्रिः(अव्य.), त्रिवारम्।

—ज्ञ, वि. (सं.) त्रिकाल,-वेत्तृ-विद्, सर्वज्ञ। सं. पुं., ईश्वरः २. बुद्धः।

—दर्शी, सं. पुं. (सं.-र्शिन्) ईश्वरः २. ऋषिः (पुं.)।

त्रिकुटा, सं. पुं. [सं. त्रिकटु (न.)] त्र्युषणम्, व्योषम्, कटु,-त्रयं-त्रिकं, मिश्रितशुंठीमरीचपिप्पल्यः (स्त्री. बहु.)।

त्रिगुण, सं. पुं. (सं. न.) गुण,-त्रयं-त्रिकं, सत्त्वरजस्तमांसि (न. बहु.)।

त्रितय, सं. पुं. (सं. न.) त्रिकं, त्रयं-यी २. धर्मार्थकामाः (पुं. बहु.)।

त्रिदोष, सं. पुं. (सं. न.) वातपित्तकफरूपं दोषत्रयम्।

त्रिपथगा, सं. स्त्री. (सं) गंगा, भागीरथी।

त्रिपाठी, सं. पुं. (सं.-ठिन्) दे. 'त्रिवेदी'।

त्रिपुंड्र, सं. पुं. (सं. न.) भस्मादिकृतं कपालस्थतिर्यग्रेखात्रयं, त्रिपुंड्रकम्।

त्रिपुर, सं. पुं. (सं. न.) मयदानवनिर्मितं पुरत्रयं २. लोकत्रयी, त्रिलोकी ३. बाणासुरः ४. चंदेरीनगरम्।

—अरि, सं. पुं. (सं.) त्रिपुरांतकः, शिवः।

त्रिफला, सं. पुं. (सं. स्त्री.) फल,-त्रिकं-त्रयं, मिलितहरीतकीबिभीतकामलकीफलानि (न. बहु.)।

त्रिभुज, सं. पुं. (सं.) दे. 'तिकोन'।

त्रिभुवन, सं. पुं.(सं. न.) त्रिलोकी, लोकत्रयम्। स्वर्गः पृथिवी पातालं च।

त्रिमूर्ति, सं. पुं. (सं.) ब्रह्माविष्णुशिवनामकमूर्तित्रयवत् (पुं.)।

त्रियामा, सं. स्त्री. (सं.) रात्री-त्रिः (स्त्री.)।

त्रिलोक, सं. पुं. (सं. न.), त्रिलोकी, लोकत्रयी, दे. 'त्रिभुवन'।

त्रिवेणी, सं. स्त्री. (सं.) प्रयागे गंगायमुनासरस्वतीनां संगमः।

त्रिवेदी, सं. पुं. (सं. त्रिवेदिन्) त्रिविद्यः, त्रिवेदः, त्रैविद्यः २. ब्राह्मणजातिभेदः।

त्रिशूल, सं. पुं. (सं. न.) त्रिशिखं, शूलं, त्रिशीर्षकम्।

त्रिष्टुभ्, सं. स्त्री, (सं.) छंदोभेदः।

त्रुटि, सं. स्त्री. (सं.) त्रुटी, न्यूनता, अपूर्णता,

वैकल्यं २. स्खलितं, भ्रांतिः (स्त्री.) ३. संदेहः, संशयः ।

त्रेता, सं. पुं. (सं.) त्रेता-द्वितीय,-युगम् ।

त्वचा, सं. स्त्री. (सं.) त्वच् (स्त्री.), चर्मन् (न.), छदिस् (स्त्री.), संछादनी, असृग्धरा २. वल्कः-कं, वल्कलः-लं, ३. त्वगिन्द्रियं ४. (साँप की) कंचुकः, निर्मोकः ।

त्वरा, सं. स्त्री. (सं.) शीघ्रता, दे. 'जल्दी' ।

त्वरित, वि. (सं.) शीघ्र, दे. 'तेज़' ।

थ

थ, देवनागरीवर्णमालायाः सप्तदशो व्यंजनवर्णः, थकारः ।

थंब-भ, सं. पुं., दे. 'स्तम्भ' ।

थई, सं. स्त्री. (सं. स्थानं) स्थलं २. राशिः (पुं.), चयः ।

थकना, क्रि. अ. (स्थग् >) परि-, श्रम् (दि. प. से.), क्लम् (भ्वा. दि. प. से.) आयस् (भ्वा. दि. प. से.) २. निर्विद् (दि.आ.अ.)।

थकान, सं. स्त्री. (हिं. थकना) आयासः, क्लमः, खेदः, श्रमः, क्लांतिः (स्त्री.), शैथिल्यम् ।

थकाना, क्रि. स., ब. 'थकना' के प्रे. रूप ।

थकामाँदा, वि., परि-, श्रांतः, क्लांतः, खिन्न, म्लान ।

थकावट, सं. स्त्री., दे. 'थकान' ।

थकित, वि., दे. 'थकामाँदा' ।

थड़ा, सं. पुं. (सं. स्थलं) वेदिका, वितर्दीः-र्दिः (स्त्री.) २. आपणिकासनं, पण्याजीव-पीठः-ठम् ।

थन, सं. पुं. (सं. स्तनः) कुचः, पयोधरः ।

थनेली, सं. स्त्री. (हिं. थन) स्तन-कुच,-गण्डः-पिटकः ।

थपकना, क्रि. स. (अनु. थपथप) करतलेन परामृश्-स्पृश् (तु. प. अ.), स्नेहेन आहन् (अ. प. अ.)-लघु प्रहृ (भ्वा. प. अ)-तड् (चु.) ।

थपकी, सं. स्त्री. (हिं थपकना) करतल-परामर्शः, मृदु-लघु-प्रेम,-आघातः-प्रहारः-चपेटः ।

थपड़ी, सं. स्त्री. (अनु०) दे० 'ताली' ।

थपेड़ा, सं. पुं. (अनु. थप) तरंग-कल्लोल-ऊर्मि-वीची,-संघट्टः-संमर्दः-अभिघातः २. दे. 'थप्पड़' ।

थप्पड़, सं. पुं. (अनु. थप) चपेटः-टिका, तल-चपेट,-आघातः-प्रहारः ।

—मारना, क्रि. स., चपेटं दा, चपेटिकया तड् (चु.)-प्रहृ (भ्वा. प. अ.)-आहन् (अ. प. अ.) ।

थम, सं. पुं, दे. 'स्तंभ' ।

थमना, क्रि. अ. (सं. स्तंभनं) विरम् (भ्वा. प. अ.), उप-प्र-शम् (दि. प. से.), रुद्धगति (वि.) भू २. विश्रम्, (दि. प. से.), निवृत् (भ्वा. आ. से.) । सं. पुं., उप-प्र,-शमः, विरामः, विरतिः (स्त्री.) २. निवृत्तिः-विश्रांतिः (स्त्री.), विच्छेदः ।

थरथराना, क्रि. अ. (अनु.) (भयेन) कंप्-वेप् (भ्वा. आ. से.) २. स्फुर् (तु. प. से), स्पंद् (भ्वा. आ. से.) ।

थरथराहट, **थरथरी**, } सं. स्त्री. (हिं. थरथराना) वेपनं, वेपथुः (पुं.), प्र-, कंपः-कंपनं २. स्फुरणं, स्पंदनम् ।

थर्मामीटर, सं. पुं. (अं.) दे. 'तापमानयंत्र' ।

थर्राना, क्रि. अ. (अनु.) दे. 'थरथराना' ।

थल, सं. पुं., दे. 'स्थल' ।

थलथलाना, क्रि. अ. (अनु. थल-थल>) अभीक्ष्णं विचल् (भ्वा. प. से.), थलथलायते (ना. धा.) ।

थवई, सं. पुं. (सं. स्थपतिः) पलगंडः, सुधा-जीविन्, लेपकः, गृह,-कारकः-संवेशकः ।

थाइरायडग्लैंड, सं. पुं. (अं.) चुल्लिकाग्रन्थिः ।

थाक, सं. पुं. (सं. स्था>) ग्रामसीमा २. राशिः (पुं.), चयः ।

थाती, सं. स्त्री. (सं. स्थातृ>) दे. 'अमानत' २. दे. 'पूँजी' ।

थान, सं. पुं. (सं. स्थानं) स्थलं, प्रदेशः २. आलयः, गृहं ३. देवालयः, मंदिरं ४. पशु,-शाला-स्थानं ५. (पटादीनां) *व्यावर्तः ।

थानक, सं. पुं. (सं. स्थानकम्) स्थानं, स्थलम् २. नगरम् ३. फेनः ४. आलवालम् ।

थाना, सं. पुं. (सं.स्थानं>) गुल्मः, रक्षा-रक्षि,-स्थानम् ।

थानेदार, सं. पुं. (हिं+फ़ा.) रक्षास्थाना-ध्यक्षः, *गुल्मनिरीक्षकः, रक्षकोपदर्शकः ।

थाप, सं. स्त्री. (सं. स्थापनं>) मृदंगादेराघातो ध्वनिः (पुं.) वा. २. चपेटः-टिका ३. अंकः, चिह्नं ४. प्रतिष्ठा, संमानः ५. शपथः ६. लघु-मृदु,-प्रहारः-आघातः ७. स्थितिः (स्त्री.)।

थापना, क्रि. स. (सं. स्थापनं) स्था (प्रे. स्थापयति), आ-नि-धा (जु. उ. अ.), न्यस् (दि. प. से.), अवरुह्-निविश् (प्रे.), कृ। सं. स्त्री., स्थापनं-ना, आ-नि,-धानं, योजना, रोपणं, २. मूर्त्यादीनां स्थापना-प्रतिष्ठापना।

थापा, सं. पुं. (हिं. थापना) करांकः, पंचांगुली-चिह्नम्।

थापी, सं. स्त्री. (हिं थापना) १-२. मृत्तिका-कुट्टिम,-ताडनमुद्गरः ३. दे. 'थपकी'।

थाम, सं. स्त्री. (हिं. थामना) आ-अव,-लम्बनम्, धारणं,उप-सं,-स्तम्भनम् २. आधारः, आलम्बः, अवष्टम्भः, आश्रयः।

थामना, क्रि. स. (सं. स्तंभनं) अव-उत्-उप-सं-स्तंभ् (क्र्. प. से. या प्रे.), अवलंबं-आलंबं दा, अव-आ-लंब् (भ्वा. आ. से.) २. अव-,स्था (प्रे.), वि-,स्तंभ्, रुध् (रु. उ. अ.), विरम् (प्रे.) ३. साहाय्यं दा ४. निरुध्।

थाल, सं. पुं. (सं. स्थालं) धातुमयभाजनभेदः।

थाला, सं. पुं. (हिं. थाल) आ (अ) लवालं, आवालं, आवापः।

थाली, सं. स्त्री. (हिं. थाल) स्थालकं, लघु-स्थालम्।

थाह, सं. स्त्री. (सं. स्था>) (नद्यादीनां) तलं-अधोभागः २. गाधं ३. गांभीर्यानुमानं ४. अंतः, सीमा।

—लेना, क्रि. स. (तलं-वेधं) परीक्ष् (भ्वा. आ. से.)-निरूप् (चु.)-मा (जु. आ. अ.)।

थिएटर, सं. पुं. (अं.) नाट्य-रंग-नाटक,-शाला-गृहं-मन्दिरं-भूमिः (स्त्री.)।

थिगली, सं. स्त्री. (हिं. टिकली) पट,-खंडः-शकलः।

बादल में—लगाना, मु., असंभवं विकीर्षति (सन्नंत)।

थियोसोफ़ी, सं. स्त्री. (अं.) ब्रह्मविद्या २. सम्प्रदायविशेषः।

थिर, वि., दे. 'स्थिर'।

थिरकना, क्रि. अ. (अनु. थिर) नृत्ये चरणौ निरन्तरं कंप्-वेप् (भ्वा. आ. से.)।

थिरता, सं. स्त्री., दे. 'स्थिरता'।

थुड़ी, सं. स्त्री. (अनु.) धिक्, शान्तम्, अवज्ञा-कुत्सा-गर्हा-अवहेला,-शब्दः।

—थुड़ी करना, मु०, अव-ज्ञा (क्र्या. प. से.), दे. 'धिक्कारना'।

—थुड़ी होना, मु० ब० 'धिक्कारना' के कर्म० के रूप।

थुथनी, सं. स्त्री., दे. 'थूथनी'।

थूक, सं. स्त्री. (हिं. थूकना) मुखस्रावः, लाला, ष्ठीवनं, नि-,ष्ठ्यूतम्।

—की गिलटी, सं. स्त्री., लालाग्रन्थिः (पुं.)।

—कर चाटना, मु., प्रतिज्ञां भंज् (रु. प. अ.), वचनं व्यतिक्रम् (भ्वा. प. से.)।

थूकना, क्रि. स. (अनु. थू) नि-,ष्ठिव् (भ्वा. दि. प. से, ष्ठीवति, ष्ठीव्यति), लालां निःसृ (प्रे.), सं. पुं.,नि-,ष्ठीवः-वनं, निष्ठ्यूतिः (स्त्री.)।

थूथनी, सं. स्त्री. (देश. थूथन) प्रलंबमुखं, लंबास्यम्।

थूनी, सं. स्त्री. (सं. स्थूणा) स्थाणु (पुं.), स्तंभः, अवष्टंभः।

थूहर, सं. पुं. (सं. स्थूणा>) नेत्रारिः (पुं.), निस्त्रिंशपत्रिका, स्नुही-हिः (स्त्री.), वज्रिन, वज्र,-द्रुः-द्रुमः-कण्टकः, सिंहतुण्डः, सीहुण्डः।

थेवा, सं. पुं. (देश.) दे. 'नगीना'।

थैला, सं. पुं. (सं. स्थलम्>)प्रसेवः, स्यूतः-नः, पुटः-टं, स्योतः-नः, धौतकटः।

थैली, सं. स्त्री. (हिं. थैला) प्रसेवकः, स्यू(स्यो)-तकः, पुटकः।

थोक, सं. पुं. (सं. स्तवकः) राशिः (पुं.), चयः २. संघः, गणः।

—फ़िरोश,-दार, सं. पुं. (हिं.+फ़ा.) चय-स्तूप,-विक्रयिन्।

थोड़ा, वि. (सं. स्तोक) न्यून, अल्प, स्वल्प, अणुक-अल्प-क्षुद्र-लघु,-परिमाण-मात्र, ईषत्।

—करना, क्रि. स., लघयति (ना. धा.), अल्पी-न्यूनी कृ, ह्रस् (प्रे.)।

—होना, क्रि. अ., अल्पी-न्यूनी-लघू भू, क्षि-अपचि (कर्म.)। क्रि. वि., स्तोकं, मनाक्, ईषत्, यत्-,किंचित्।

—थोड़ा, क्रि,वि., अल्पशः,अल्पाल्पं, स्तोकशः।

—बहुत, वि., न्यूनाधिक।

—सा, क्रि. वि., दे. 'थोड़ा' क्रि. वि.।

थोड़े से, वि., कतिचित्, कतिपयाः, स्तोकाः ।
थोथा, वि. (देश.) रिक्त-शून्य,-गर्भ-मध्य-उदर, सुषिर २. कुंठित, अनिशित ३. निःसार, निर्गुण ४. निरर्थक, निष्प्रयोजन ।
थोपना, क्रि. स. (सं. स्थापनं) अनु-प्र-वि-लिप् (तु. प. अ.), दिह् (अ. उ. अ.) २. राशी-पिंडी कृ, समाक्षिप् (तु. प. अ.) ३. दुष् (प्रे.), दोषं आरुह् (प्रे. आरोपयति)-क्षिप् ।

द

द, देवनागरीवर्णमालाया अष्टादशो व्यंजनवर्णः, दकारः ।
दंग, वि. (फ़ा.) चकित, विस्मित, स्तब्ध ।
दंगई, वि. (हिं. दंगा) उपद्रविन्, कलहप्रिय २. उग्र, प्रचंड ।
दंगल, सं. पुं. (फ़ा.) मल्ल-बाहु-हस्ताहस्ति,-युद्धं, मल्लक्रीडा २. मल्ल,-भूः-भूमिः (दोनों स्त्री.) ३. जनौघः, लोकसमूहः ।
दंगा, सं. पुं. (फ़ा दंगल) कलहः, उपद्रवः २. कलकलः, कोलाहलः ।
दंड, सं. पुं. (सं.) दे. 'डंड' ।
दंडधर, सं. पुं. (सं.) यमराजः, दंडपाणिः २. नृपः, शासकः ३. परिव्राजकः, सन्न्यासिन् ।
दंडनीय, वि. (सं.) दंड्य, दंडयितव्य, दमनीय ।
दंडवत्, सं. पुं. स्त्री. (सं. अव्य.) साष्टांग,-प्रणामः-नमस्कारः ।
दंडी, सं. पुं. (सं.-डिन्) दंडधरः परिव्राजकः २. यमः ३. नृपः ४. दौवारिकः ५. दंडधारी मनुष्यः ६. संस्कृतकविविशेषः ।
दंत, सं. पुं. (सं.) दशनः, रदः, रदनः, दे. 'दाँत' ।
—कथा, सं. स्त्री. (सं.) लोक-पारंपरीय,-कथा, पारंपर्यं, लोक-जन,-श्रुतिः (स्त्री.) ।
—च्छद, सं. पुं. (सं.) ओष्ठः, रदनच्छदः ।
—धावन, सं. पुं. (सं. न.) दंत,-काष्ठं-मार्जनम् ।
दंती,[1] सं. स्त्री. (सं.) एरंडपत्रिका, रेचनी, विशोधनी ।
दंती,[2] सं. पुं. (सं.-तिन्) गजः, द्विपः ।
दँतुला, वि. (सं. दंतुल) दंतुर, दंतुरित, उन्नतदंत ।
दंतोष्ठ्य, वि. (सं.) दन्तौष्ठैरुच्चार्यवर्णः (उ, व्) ।
दंत्य, वि. (सं.) रदनविषयक २. दंतोच्चार्य (तवर्गादि) ।
दंदनाना, क्रि. अ. (अनु.)दनदनायते(ना. धा.), रम् (भ्वा. आ. अ.), नंद् (भ्वा. प. से.) ।
दंदान, सं. पुं. (फा.) दन्तः, दशनः, रदनः ।
—साज़, सं. पुं., दन्तकारः, दन्तचिकित्सकः ।
दंदाना, सं. पुं. (फ़ा.) दंतः, छेदः ।
दंदानेदार, वि. (फ़ा.) दंतुर, दंतुरित, अनुक्रकच ।
दंपती—ति, सं. पुं. (सं. दंपती पुं. द्वि.) जं-जाया-भार्या,-पती (पुं. द्वि.) ।
दंभ, सं. पुं. (सं.) कपटः-टं, कापट्यं, आर्य-रूपता, लिंगवृत्तिः (स्त्री.), आडंबरः, वक्रव्रतं, धर्मोपधा, दांभिकता, छाद्मिकता २. अभि-मानः, दर्पः ।
दंभी, वि. (सं.-भिन्) कपटिन्, कापटिक-छाद्मिक-दांभिक [-की (स्त्री.)], कपट-, छद्म- २. अभिमानिन्, साडंबर ।
दंभोलि, सं. पुं. (सं.) इन्द्रवज्रः-ज्रम् २. हीरः-रम् ।
दंश, सं. पुं. (सं.) दे. 'डाँस'[1] २. दे. 'डंक' (१-२) ३. दंतः, रदनः ।
दई, सं. पुं. (सं. दैवं) ईश्वरः २. अदृष्टं, भाग्यम् ।
—मारा, वि., मंद-हत,-भाग्य ।
दक़ीक़ा, सं. पुं. (अ.) युक्तिः (स्त्री.), उपायः । कोई—बाकी न रखना, मु., सर्वोपायान्-समस्त युक्तीः प्रयुज् (रु. आ. अ., चु.) ।
दक्खिन, सं. पुं., दे. 'दक्षिण' ।
दक्ष, वि. (सं.) कुशल, निपुण, चतुर, प्रवीण, विदग्ध, विशेषज्ञ । सं. पुं., ब्रह्मपुत्रः, शिव-श्वशुरः, सतीपितृ ।
दक्षता, सं. स्त्री. (सं.) कौशलं, नैपुण्यं, चातुर्यं, प्रावीण्यं, वैदग्ध्यं, पाटवम् ।
दक्षिण, वि. (सं.) अपसव्य, सव्येतर, वामेतर २. दक्ष, निपुण । सं. पुं., दक्षिण,-आशा-दिशा-दिश् (स्त्री.), दक्षिणा, वैवस्वती, यामी, अवाची २. दक्षिणापथः, दक्षिणः-णं ३. दक्षिण,-पार्श्वः-र्श्वं ४. नायकभेदः ।
—पूर्व, सं. पुं, आग्नेयी, दक्षिणपूर्वा । वि., आग्नेय, दक्षिणपूर्व ।

—पश्चिम, सं. पुं., नैर्ऋती, दक्षिणपश्चिमा। वि., नैर्ऋत, दक्षिणपश्चिम।

दक्षिणा, सं. स्त्री. (सं.) यज्ञादिविधिदानं, पौरोहित्यशुल्कः-कं २. दानं, त्यागः, उत्सर्गः।

दक्षिणायन, सं. पुं. (सं. न.) भानोर्दक्षिणा गतिः (स्त्री.)।

—सूर्य, सं. पुं. (सं.) मकरसंक्रांतिः (स्त्री.)।

दक्षिणी, वि. (सं. दक्षिण>) द (दा) क्षिण, दाक्षिणात्य, अवाचीन, अवाच्य, याम्य, आगस्त्य।

दख़ल, सं. पुं. (अ.) अधिकारः, स्वामित्वं २. हस्तक्षेपः, परकार्यचर्चा ३. प्रवेशः, उपगमः।

—देना, क्रि. स., परकार्याणि निरुप् (चु.)-चर्च् (चु. आ. से.), परकर्मसु व्यापृ (तु. आ. अ.), मध्ये पत् (भ्वा. प. से)।

दग़ना, क्रि. अ., व. 'दाग़ना' के कर्म. के रूप।

दग़ा, सं. स्त्री. (अ.) छलं, कपटं, वंचनं, प्रतारणा २. विश्वासघातः।

—करना या देना, क्रि. स., प्रतॄ-प्रलुभ्-भ्रम्-मुह् (प्रे.), वंच् (चु.)।

—दार,-बाज़, वि. (अ.+फ़ा.) कितवः, प्रतारकः, वंचकः, शठः, विश्वासघातिन्, छलिन्, कापटिक।

—बाज़ी, सं. स्त्री. (फ़ा.) वंचकता, कैतवं २. विश्वासघातकता।

दग्ध, वि. (सं.) ज्वलित, भस्मीभूत, भस्मसात् कृत २. दुःखित, व्यथित।

दढ़ियल, वि., दे. 'डढ़ियल'।

दतवन, दतौन, सं. स्त्री., दे. 'दातुन'।

दत्त, वि. (सं.) विसृष्ट, विश्राणित, अर्पित।

दत्तक, सं. पुं. (सं.) कृतकः पुत्रः, दत्रिमः सुतः, दत्तकपुत्रः।

दत्तचित्त, वि. (सं.) अवहित, समाहित, अभिनिविष्ट, एकाग्र, अनन्यवृत्ति।

ददिहाल, सं. पुं. (हिं. दादा+सं. आलयः) पितामहालयः २. पितामह,-कुलं-वंशः।

दद्रु, सं. पुं. (सं.) दर्द्रुः-र्द्रूः, दद्रुः, दद्रुरोगः, मंडलकुष्ठम्।

दधि, सं. पुं. (सं. न.) दे. 'दही'।

—जात, सं. पुं. (सं.) चंद्रः, सोमः।

दधीचि, सं. पुं. (सं.) मुनिविशेषः।

दनदनाना, क्रि. अ. (अनु.) दे. 'दंदनाना'।

दनादन, क्रि. वि. (अनु.) सदनदनशब्दं २. अनुक्रमेण, यथाक्रमम्।

दनुज, सं. पुं. (सं.) असुरः, राक्षसः।

दफ़ती, सं. स्त्री. (अ. दफ्तीन) दे. 'गत्ता'।

दफ़न, सं. पुं. (अ.) निखननं २. श्मशाने स्थापनम्।

—करना, क्रि. स., श्मशाने-प्रेतभूमौ निधा (जु. उ. अ.)-स्था (प्रे.)-निक्षिप् (तु. प. अ.) २. निखन् (भ्वा. प. से,), निगुह् (भ्वा. उ. से.)।

दफ़ा, सं. स्त्री. (अ. दफ़अः) दे. 'बार' २. विधान-, धारा। वि., अपसारित, दूरीकृत, निष्कासित, वि-, चालित।

दफ़्तर, सं. पुं. (फ़ा.) कार्यालयः २. बृहत्पत्रं ३. सविस्तरवृत्तांतः।

दफ़्तरी, सं. पुं. (फ़ा.) पत्रसंयोजकः २. दे. 'जिल्दसाज़'। वि., कार्यालयसंबंधिन्।

दबंग, वि. (हिं. दबाना) प्रभाव,-वत्-शालिन्, अनुभाववत्, प्रतापिन्, प्रबल।

—पीला होना, मु., क्रुध् (दि. प. अ.) कुप् (दि. प. से.) ।

नीलाई, सं. स्त्री. (हिं. नीला) नीलत्वं, नीलिमन् (पुं.) ।

नीलाथोथा, सं. पुं. (हिं. नीला+सं. तुत्थं) हेमसारं, तुत्थं, नीलाञ्जनं, ताम्रगर्भं, मयूर-ग्रीवकं, नीलं, वितुन्नकं, मयूरकम् ।

नीलाम, सं. पुं. (पुर्त. लेलम) *लीलामय-विक्रयः ।

नीवँ, सं. स्त्री. (सं. नेमी) वास्तु (पु. न.), गृह-भित्ति,-मूलं-प्रतिष्ठा, पीठः, वेदमभूः (स्त्री.) ।

—डालना या रखना, क्रि. सं., वास्तुं निर्मा (जु. आ. अ.), स्था (प्रे. स्थापयति) । मु., प्रारभ् (भ्वा. आ. अ.), प्रवृत् (प्रे.) ।

नुक़ता[1], सं. पुं. (अ. नुक़तह्) बिंदुः (पुं.), (गोल-) अंकः-चिह्नं २. शून्यं, खं, बिंदुः ।

नुकता[2], सं. पुं. (अ. नुकतह्) रहस्यं, मर्मन् (न.) २. व्यंग्योक्तिः (स्त्री.), गूढार्थ-वचनं, व्यंग्यं ३. दोषः, त्रुटिः (स्त्री.) ।

—चीं, वि. (फ़ा.) छिद्र-दोष,-अन्वेषिन्, दोषैकदृश् (पुं.), पुरोभागिन् ।

—चीनी, सं. स्त्री. (फ़ा.) दोषदर्शनं, छिद्रान्वेषणं, पुरोभागित्वम् ।

नुक़सान, सं. पुं. (अ.) क्षतिः (स्त्री.), दे. 'हानि' ।

नुकीला, वि. (हिं. नोक) साग्र, तीक्ष्णाग्र, नि-, शित, अणिमत् [–ली (स्त्री.)] ।

नुक्कड़, सं. पुं. (हिं. नोक) अंतः, सीमा, अग्रं २. कोणः, अस्रः ३. दे. 'नोक' ।

नुक्स, सं. पुं. (अ.) दोषः, त्रुटिः (स्त्री.), न्यूनता ।

नुमाइश, सं. स्त्री. (फ़ा) प्रदर्शनं-नी २. आडंबरः, श्रीः (स्त्री.) ३. आविष्करणं, प्रकाशनम् ।

नुमाइशी, वि. (फ़ा. नुमाईश) आपातरमणीय, साडंबर, सुभगालोक ।

नुसख़ा, सं. पुं. (अ.) योगः, कल्पः ।

नूतन, वि. (सं.) दे. 'नया' ।

नून, सं. पुं., दे. 'नमक' ।

नूपुर, सं. पुं. (सं. न.) पाद,-कटकः-अंगदं, मंजीरः, हंसकः ।

नूर, सं. पुं. (अ.) प्रकाशः, ज्योतिस् (न.) २. कांतिः (स्त्री.), शोभा ।

—चश्म, सं. पुं., प्रियपुत्रः ।

—चश्मी, सं. स्त्री., प्रियपुत्री ।

नृ, सं. पुं. (सं.) नरः, मनुष्यः, मनुजः, मानुषः ।

—केशरी, सं. पुं. (सं.-रिन्) नरसिंह-नृसिंह,-अवतारः २. वीरः, शूरः ।

—घ्न, वि. (सं.) मनुष्य-मनुज,-घातक-मारक ।

—देव, सं. पुं. (सं.) विप्रः, ब्राह्मणः २. नृपः, भूपः ।

—पति, सं. पुं. (सं.) नर-भू,-पालः ।

—पशु, सं. पुं. (सं.) मूढ़, अज्ञ ।

—सिंह, सं. पुं. (सं.) नर-नृ,-सिंहः-केशरिन्-हरिः, विष्णोश्चतुर्थावतारः ।

नृत्य, सं. पुं. (सं. न.) दे. 'नाच' ।

—शाला, सं. स्त्री. (सं.) दे. 'नाचघर' ।

नृप, नृपति, सं. पुं. (सं.) भूपः, दे. 'राजा' ।

नृशंस, वि. (सं.) दे. 'निष्ठुर' ।

नृशंसता, सं. स्त्री. (सं.) दे. 'निष्ठुरता' ।

नृसिंह, सं. पुं. (सं.) नरसिंहः, विष्णोश्चतुर्थावतारः २. श्रेष्ठजनः, नरर्षभः ।

नेक, वि. (फ़ा.) भद्र, अच्छ, उत्तम, सु-, सत्-, २. शिष्ट, सौम्य, सभ्य ।

—चलन, वि. (फ़ा.+हिं.) सदाचारिन्, सद्वृत्त ।

—चलनी, सं. स्त्री., सदाचारः, सौजन्यम् ।

—नाम, वि. (फ़ा.) यशस्विन् , कीर्तिमत् ।

—नामी, वि., सुयशस् (न.), कीर्तिः (स्त्री.) ।

—नीयत, वि. (फ़ा.+अ.) धर्मवर्तिन्, सदाशय ।

—नीयती, सं. स्त्री., निष्कापट्यं, सदाशयः ।

—बख़्त, वि. (फ़ा.) भाग्यवत्, सौभाग्यशालिन् २. सत्स्वभाव, सुशील ।

नेकी सं. स्त्री. (फ़ा.) भद्रता, सद्व्यवहारः २. सज्जनता, सौजन्यं ३. हितं, उपकारः ।

—बदी, सं. स्त्री. (फ़ा.) उपकारापकारौ, हिताहिते २. पुण्यापुण्ये ।

नेग, सं. पुं. (सं. नैयमिक>) *सांस्कारिक,-उपहारः-पुरस्कारः, नैयमिकं दानम् ।

नेगिटिव, वि. (अं.) ऋणात्मक (विद्युदादि) ।

नेगी जोगी, सं. पुं., सांस्कारिकपुरस्काराधिकारिणः (पुं. बहु.) ।

नेज़ा, सं. पुं. (फ़ा.) कुंतः, प्रासः, शक्तिः (स्त्री.) ।

—बरदार, सं. पुं. (फ़ा) कौंतिकः, प्रासिकः, शाक्तीकः, कुंतधरः ।

नेता, सं. पुं. (सं. नेतृ) सञ्चारकः, नायकः, मार्ग,-उपदेशकः-दर्शकः, अग्र-पुरो,-गः, अग्र-

पुरः,-सरः, मुख्यः २. प्रभुः, स्वामिन् ३. निर्वाहकः, प्रवर्तकः [नेत्री (स्त्री.)]।

नेती, सं. स्त्री. (सं. नेत्रं) मंथनरज्जुः (स्त्री.), मंथगुणः ।

—धोती, सं. स्त्री., दीर्घपट्टिकया अंत्रशोधनं (हठयोग)।

नेत्र, सं. पुं. (सं. न.) नयनं, चक्षुस् (न.), दे. 'आँख' २. दे. 'नेती' ३. वस्तिशलाका ।

—रंजन, सं. पुं. (सं. न.) कज्जलम् ।

नेत्र्य, वि. (सं.) नयन-नेत्र,-विषयक-संबंधिन् २. नयन नेत्र,-हितकर ।

नेदिष्ठ, वि. (सं.) निकटतम २. अधिकतम ३. निपुण ।

नेनुआ-वा, सं. पुं. (?) घोषः-षकः, आदानी, देवदानी, ऐभी, महाफला ।

नेपचून, सं. पुं. (अं.) नेपचूनः, ग्रहविशेषः ।

नेपथ्य, सं. पुं. (सं. न.) वेशः-षः, परिधानं, वस्त्रं, आभरणं, अलंकारः २. (रंगशालायां) वेशस्थानं, अलंकारकोष्ठः ३. रंग,-भूमिः (स्त्री.)-शाला ।

नेपाल, सं. पुं. (सं.) भारतोत्तरवर्ति देशविशेषः । (सं. न.) दे. 'ताँबा' ।

—जा, सं. स्त्री. (सं.) नेपालजाता, दे. मैनसिल ।

नेब्यूला, सं. पुं. (अं.) नीहारिका ।

नेमि, सं. स्त्री. (सं.) नेमी, प्रधिः-चक्रपरिधिः (त्र.) २. कूपांतिकसमस्थलं ३. कूपसमीपे रज्जुधारणार्थं त्रिदारुयंत्रं, त्रिका ।

नेवता, सं. पुं., दे. 'निमंत्रण' ।

नेवर, सं. पुं. (सं. नूपुरं) दे. 'नूपुर' २. अश्वपादक्षतम् ।

नेवला, सं. पुं. (सं. नकुलः) पिंगलः, सूचीवदनः, लोहिताननः, अंगूषः, कशः ।

नेवार, सं. पुं., दे. 'निवार' ।

नेस्त, वि. (फ़ा.) नष्ट, लुप्त ।

—नाबूद, वि. (फ़ा.) नष्टभ्रष्ट, उच्छिन्न ।

नेस्ती, सं. स्त्री. (फ़ा.) अनस्तित्वं, अभावः २. आलस्यं ३. नाशः ।

नेह, सं. पुं. (सं. स्नेहः) प्रेमन् (पुं.), प्रीतिः (स्त्री.) २. घृतं, तैलम् ।

नैतिक, वि. (सं.) नीति,-विषयक-शास्त्रीय ।

नैत्य, वि. (सं.) नैत्यक-नैत्यिक[-की (स्त्री.)], नित्य-संबंधिन्-करणीय ।

नैन-ना, सं. पुं. (सं. नयनं) दे. 'आँख' ।

नैपुण्य, सं. पुं. (सं. न.) कौशलं, दाक्ष्यं, पाटवम् ।

नैमित्तिक, वि. (सं.) निमित्त,-जन्य-उत्पन्न, अनैत्यिक ।

नैया, सं. स्त्री., दे. 'नाव' ।

नैयायिक, सं. पुं. (सं.) न्याय-तर्क,-शास्त्रज्ञः, न्यायविद् (पुं.), तार्किकः ।

नैराश्य, सं. पुं. (सं. न.) दे. 'निराशा' ।

नैर्ऋत, सं. स्त्री. (सं. नैर्ऋती) नैर्ऋतकोणः, अवाची-प्रतीच्योर्मध्या दिक् (स्त्री.) ।

नैवेद्य, सं. पुं. (सं. न.) देव-बलिः (पुं.)-भोजनं, भोगः ।

नैसर्गिक, वि. (सं.) प्राकृतिक-साहजिक, स्वाभाविक-सांसिद्धिक[-की (स्त्री.)], प्रकृति-स्वभाव,-सिद्ध ।

नैहर, सं. पुं., दे. 'मायका' ।

नोक, सं. स्त्री. (फ़ा.) अग्रं, अग्रभागः, अणिः (पुं. स्त्री.), प्रांतः, मुखं, शिखरं, चंचुः (स्त्री.) २. उदग्र-बहिर्वर्ति,-कोणः-अस्रः ।

—झोंक, सं. स्त्री., नर्म,-आलापः-भाषितं, परि-(री)हासः, व्यंग्यम् ।

—दार, वि., दे. 'नुकीला' ।

नोकीला, वि., दे. 'नुकीला' ।

नोच, सं. स्त्री. (हिं. नोचना) लुंचः, लुंचनं २. आकस्मिक आच्छेदः, लुंठनं ३. परितो याचनम् ।

नोचना, क्रि. स. (सं. लुंचनं) लुंच् (भ्वा. प. से.), उत्पट् (चु.), आच्छिद् (रु. प. अ.) २. वि-,दृ-शृ (क्र्. प. से.) ३. अपनी-निर्हृ-व्यपहृ (भ्वा. उ. अ.) ४. अव-विं-दृ (प्रे.), निर्भिद् (रु. प. अ.), क्षुर् (तु. प. से.)।

नोट, सं. पुं. (अं.) स्मृत्यै लेखः-लेखनं-लिखनं, २. स्मरणं, स्मरणचिह्नं, अभिज्ञानं ३. पत्रं, पत्रिका ४. टिप्पनी-णी, टीका ५. धनपत्रकं, नाणकपत्रम् ।

—करना, क्रि. स., लिख् (तु. प. से.), अंक (चु.) ।

—बुक, सं. स्त्री. (अं.) अभिज्ञानसंचितिः (स्त्री.)।

नोटिस, सं. पुं. (अं.) विज्ञापना, ख्यापना, सूचना, विज्ञप्तिः (स्त्री.) २. विज्ञापनं, सूचनापत्रम्।

—देना, क्रि. स., विज्ञा-प्रख्या (प्रे.) सूच् (चु.)।

नोन, सं. पुं., (सं. लवणम्)।

कँचिया—, काचं, काचलवणं, काचसौवर्चलम्।

काला—, कृष्णलवणं, सौवर्चलं, शूलनाशनं, हृद्यगन्धम्।

खारी—, ऊपरजं, औपरकं, सार्वगुणं, मेलकलवणम्।

संचर (कटीला)—, खण्ड-काल-विड्,-लवणं, विडम्।

समुद्री—, सागरजं, सामुद्रिकं, लवणाब्धिजं, त्रिकूट-द्रोणी,-लवणम्।

सांभर—, शाकम्भरीयं, रौमं, रौमकं, साम्बरं, सम्बरोद्भवम्।

सेंधा—, सैन्धवं, सिन्धु,-उत्थं-उपलं-जं-लवणं लवणोत्तमम्।

नोना, सं. पुं. (सं. लवणं>) सीताफलं, गंडगात्रं २. लवणमृत्तिका २. यवक्षारभेदः। वि., क्षार-लवण,-युक्त-मय २. लावण्ययुत, सुंदर ३. उत्कृष्ट।

नौ[1], वि. (सं. नवन्)। सं. पुं. उक्ता संख्या, तदंकः (९) च।

—खंड, सं. पुं., भूमेर्नव भागाः।

—गुना, वि., नव,-गुण-गुणित।

—दो ग्यारह होना, मु., सत्वरं पलाय् (भ्वा. आ. से.), प्रस्था (भ्वा. आ. अ.)।

—रत्न, सं. पुं., दे. नवरत्न'।

नौ[2], वि. (फ़ा.; सं. नव) दे. 'नया'।

—आबाद, वि., (फ़ा.) अधि,-वासिन्-निवेशिन्।

—आबादी, सं. स्त्री. (फ़ा.) नव,-अधिनिवेशः-वासितप्रदेशः।

नौकर, सं. पुं. (फ़ा.) सेवकः, भृत्यः, दासः, किंकरः, प्रेष्यः, अनु-उप,-जीविन्, परि,-जनः-चारकः, अनु-परि,-चरः, चेटः, नियोज्यः, भुजिष्यः, वैतनिकः, भृतकः।

—चाकर, सं. पुं., परिजनः, दासवर्गः।

—शाही, सं. स्त्री., भृत्य,-राज्यं-शासनम्।

नौकराना, सं. पुं. (फ़ा. नौकर) दे. 'दस्तूरी' २. सेवक-दास,-पुरस्कारः-वेतनम्।

नौकरानी, सं. स्त्री. (फ़ा. नौकर) सेविका, परिचारिका, दासी, चेटी, प्रेष्या, भुजिष्या, सैरं(रिं)ध्री।

नौकरी, सं. स्त्री. (फ़ा. नौकर) सेवा, दास्यं, प्रेष्य-भृत्य,-भावः।

—पेशा, सं. पुं. (फ़ा.) सेवाजीविन्, वैतनिकः, दे. 'नौकर'।

नौका, सं. स्त्री. (सं.) दे. 'नाव'।

नौछावर, सं. स्त्री., दे. 'निछावर'।

नौज, अव्य० (अ. नऊज) शान्तं पापम्, मैवं भूयात्। नैवं भवतु।

नौजवान, सं. पुं., (फ़ा.) दे. 'नवयुवक'।

नौजवानी, सं. स्त्री. (फ़ा.) नौवयौवनं, तारुण्यं, कौमारं-रकं, नव-पूर्व-प्रथम,-वयस् (न.)।

नौता, सं. पुं., दे. 'निमंत्रण'।

नौबढ़-ढ़िया, सं. पुं. (सं. नव+हिं. बढ़ना) नवोदयः, नवोत्थानम्।

नौबत, सं. स्त्री. (फ़ा.) पर्यायः, वारः २. दशा, गतिः (स्त्री.) ३. वैभवादिसूचकं वाद्यम्।

—बजना, मु., मंगलोत्सवः प्रवृत् (भ्वा.आ.से.)।

नौमी, सं. स्त्री., दे. 'नवमी'।

नौलक्खा-खा, वि. (हिं.नौ+लाख) नवलक्षार्घ, महार्घ, महामूल्य।

नौसादर, सं. पुं. (फ़ा. नौशादर) नरसारः, अमृत-वज्र,-क्षारं, चूलिकालवणम्।

नौसिख-खिया, सं. पुं. (सं. नवशिक्षितः) अनभ्यस्तः, शैक्षः, नव,-शिष्यः-च्छात्रः।

न्यक्कार, सं. पुं. (सं.) अभिभवः, पराजयः, न्यक्करणम् २. तिरस्कारः।

न्यग्रोध, सं. पुं. (सं.) वटः, जटालः, अवरोहिन्, वृक्षनाथः, रक्तफलः।

न्याय, सं. पुं. (सं.) पक्षपाताभावः, समदर्शित्वं, साम्यं, सर्वसमता, धर्मः, न्याय्यता, न्यायिता, साधुता २. अपराधानुरूप-योग्य-न्याय्य,-दंडः ३. आन्वीक्षिकी, तर्कः, तर्क-न्याय,-विद्या-शास्त्रं, युक्तिवादः।

—करना, क्रि. स., निर्णी (भ्वा. प. अ.), अव-संप्रधृ (चु.), परिच्छिद् (रु. प. अ.), व्यवसो (दि. प. अ.) २. व्यवहारं दृश् (भ्वा. प. अ.) अवेक्ष् (भ्वा. आ. से.), कार्यं निर्णी।

—कर्ता, सं. पुं. [सं. -र्तृ (पुं.)] दे. 'न्यायाधीश'।
—सभा, सं. स्त्री. (सं.) दे. 'न्यायालय'।
न्यायाधीश, सं. पुं. (सं.) न्याय-धर्म,-अध्यक्षः, आधिकरणिकः, निर्णेतृ-व्यवहारद्रष्टृ (पुं.) प्राड्विवाकः,धर्माधिकरणिकः, दंड,-नायक-धरः।
न्यायालय, सं. पुं. (सं.) धर्म-न्याय,-सभा, व्यवहारमंडपः, अधिकरणम्।
न्यायी, वि. (सं.-यिन्) न्याय,-पर-परायण-शील, न्यायवर्तिन्।
न्याय्य, वि. (सं.) उचित, धर्म्य, युक्त, योग्य, तथ्य।
न्यारा, वि. (सं. निर्+आरात्>) दूरस्थ, दूरवर्तिन् २. विश्लिष्ट, पृथक् स्थित ३. अन्य, अपर,भिन्न ४. विलक्षण, विचित्र[न्यारी(स्त्री.)]।
न्यारिया, सं. पुं. (हिं. न्यारा) डावकः, बंधुलः।
न्यारे, क्रि. वि. (हिं. न्यारा) दूरं, दूरे, आरात् २. पृथक्, विश्लिष्ट।
न्यास, सं. पुं. (सं.) निधानं, स्थापनं, न्यसनं, निक्षेपणं २. उपनिधिः (पुं.), निक्षेपः ३. अर्पणं, त्यागः।
न्यूक्लियस, सं. पुं. (अं.) नाभिकणः।
न्यून, वि. (सं.) अल्पतर, अल्पीयस्, क्षोदीयस्, लघीयस्, ऊन २. अवर, अधर ३. क्षुद्र, नीच।
न्यूनता, सं. स्त्री. (सं.) ऊनता, अल्पता, अपूर्णता, पर्याप्तताभावः २. हीनता, अभावः।
न्योछावर, सं. स्त्री., दे. 'निछावर'।
न्योतहरी, सं. पुं.(हिं. न्योता) निमंत्रितजनः।
न्योता, सं. पुं., दे. 'निमंत्रण'।
न्योला, सं. पुं., दे. 'नेवला'।
न्योली, सं. स्त्री. (सं. नली) हठयोगक्रियाभेदः।

प

प, देवनागरीवर्णमालाया एकविंशो व्यंजनवर्णः, पकारः।
पंक, सं. पुं. (सं. पुं. न.) कर्दमः, चिकिलः, दे. 'कीचड़'।
पंकज, सं. पुं. (सं.न.)पद्मं, सरोजं, दे. 'कमल'।
पंकजासन, सं. पुं. (सं.) चतुर्मुखः, ब्रह्मन् (पुं.)।
पंकिल, वि. (सं.) सपंक, सकर्दम, सचिकिल।
पंक्ति, सं. स्त्री. (सं.) रेखा-घा, लेखा २. ततिः, राजी-जिः श्रेणी-णिः, आवली-लिः (सब स्त्री.)।
—च्युत, वि. (सं.) जातिच्युत।
—दूषक, वि. (सं.) हीन, नीच, कुजाति।
—पावन, सं. पुं. (सं.) विप्रवरः, ब्राह्मणश्रेष्ठः, द्विजोत्तमः।
पंख, सं. पुं. (सं. पक्षः) वाजः, गरुत्, पत्रं, पतत्रं, छदः, तनूरुहम्।
पंखड़ी, सं. स्त्री. [सं. पक्ष्मन् (न.)] पुष्पदलम्।
पंखा, सं. पुं. (हिं. पंख) व्यजनं, वीजनं, तालवृंतम्।
—झलना, क्रि. स., वीज् (चु.)।
कपड़े का—, आलावर्तः।
चमड़े का—, धवित्रम्।
पंखी, सं. स्त्री. (हिं. पंखा) व्यजनकं-वीजनकम्।
पंखी, सं. पुं., दे. 'पक्षी'।
पंगत-त्ति, सं. स्त्री. (सं. पंक्तिः) दे. 'पंक्ति' (१-२) २. सभा, समाजः।
पंगु, वि. (सं.) श्रोण, खंज, खोल-ड।
पंच, वि. (सं. पंचन्)। सं. पुं., उक्ता संख्या, तदंकः (५)च २. लोकः, जनता ३. निर्णेतृसभा, मध्यस्थाः।
—तत्त्व, सं. पुं., (सं. न.) पंचभूतम् (पृथिवी-जलानलानिलाकाशानि)।
—नद, सं. पुं. (सं.) पंचनदीयुतः प्रांतविशेषः, *पञ्जापः।
—नामा, सं.पुं. (सं.+फ़ा.) *पंचनिर्णयपत्रम्।
—प्राण, सं. पुं. (सं. प्राणाः) प्राणपंचकम् (प्राणः, अपानः, समानः, व्यानः, उदानः)।
—भूत, सं. पुं. (सं. न.) पंचतत्त्वं, पंच,-तत्त्वानि-भूतानि।
—महायज्ञ, सं. पुं. (सं.-यज्ञाः) ब्रह्म-देव-पितृ-बलिवैश्वदेव-नृयज्ञाः।
—रत्न, सं. पुं. (सं. न.) कनकहीरकनील-मणिपद्मरागमौक्तिकानीति पंचरत्नानि।
पंचक, सं. पुं. (सं. न.) पंचवस्तुसमुदायः।
पंचत्व, सं. पुं. (सं. न.) मरणं, निधनं, मृत्युः, पंचता।
पंचम, वि. (सं. पंचमः-मी-मं) २. सुंदर ३. दक्ष। सं. पुं., पंचमस्वरः (संगीत)।
पंचमी, सं. स्त्री. (सं.) शुक्ला कृष्णा वा पंचमी

तिथिः (स्त्री.) २. विभक्तिविशेषः (व्या.) ३. द्रौपदी ।
पंचांग, सं. पुं. (सं. न.) वारतिथिनक्षत्रयोग-करणात्मकपंजिका, पंजिका ।
पंचाग्नि, सं. स्त्री.(सं.न.)तपस्याभेदः,पंचातपा ।
पंचानन, वि. (सं.) पंच,-मुख-आस्य । सं. पुं., शिवः २. सिंहः ३. सिंहराशिः ।
पंचाननी, सं. स्त्री. (सं.) दुर्गा २. सिंही ।
पंचायत, सं. स्त्री. (सं. पंचायतनं>) *पंच,-सभा-समितिः (स्त्री.) २. ग्रामसभा ।
—नामा, सं. पुं. (हिं.+फ़ा.) पंचसभानिर्णयपत्रम् ।
पंचायती, वि. (हिं. पंचायत) पंचसभा-संबंधिन् २. सामान्य, सार्वजनिक ।
पंचाली, सं. स्त्री. (सं.) पुत्तली, वस्त्रादिनिर्मित-पुत्रिका २. द्रौपदी, पांचाली ।
पंछी, सं. पुं., दे. 'पक्षी' ।
पंजर, सं. पुं. (सं.) कंकालः, देहास्थिसमूहः २. देहः, शरीरं ३. दे. 'पिंजरा' ।
पंजा, सं. पुं. (फ़ा.) पंचकं २. करचरणानां पंचांगुलीसमूहोऽग्रभागो वा ३. (व्याघ्रादीनां) पादः ।
—पंजे में, मु., अधिकारे, वशे ।
पंजाबी, वि. (फ़ा.) पांचनद [-दी (स्त्री.)] । सं. पुं., पंचनदवासिन् ।
पंजारा, सं. पुं. (सं. पंजिकारः) तंतुकारः, कर्तकः २. दे. 'धुनिया' ।
पंजीरी, सं. स्त्री. (फ़ा. पंजा) गोधूममिष्ट चूर्णं, मिष्टान्नभेदः ।
पँड़वा, सं. पुं., (?) महिषी-पयस्विनी,-शावः-शावकः ।
पंडा, सं. स्त्री. (सं. पंडित>) तीर्थपुरोहितः ।
पंडाइन, सं. स्त्री. (हिं. पंडा) तीर्थपुरोहित,-भार्या-पत्नी ।
पंडाल, सं. पुं., (तमिल पैंडल) दे. 'मंडप' ।
पंडित, सं. पुं. (सं.) बुधः, कोविदः, प्राज्ञः, विद्वस् (पुं.) २. ब्राह्मणः । वि., ज्ञानिन्, बुद्धिमत् २. चतुर, दक्ष ३. संस्कृतज्ञ ।
पंडिता, सं. स्त्री. (सं.) विदुषी, बुद्धिमती नारी ।
पंडिताई, सं. स्त्री., दे. 'पांडित्य' ।
पंडिताऊ, वि. (हिं. पंडित) पंडित-ब्राह्मण,-तुल्य-सदृश ।
पंडितानी, सं. स्त्री. (हिं. पंडित) पण्डित-कोविद,-पत्नी-जाया २. ब्राह्मणी, द्विजोत्तमा ।
पंडुक, सं. पुं. (सं. पांडु>) कपोतजातीयः खगभेदः, पांडुकः, *घूकरः ।
पंथ, सं. पुं. (सं. पथिन्) मार्गः, वर्त्मन् (न.) २. सम्प्रदायः, मतं, धर्ममार्गः ३. रीतिः (स्त्री.) ।
पंथी, सं. पुं. (हिं. पंथ) पथिकः, यात्रिन् २. सांप्रदायिकः, मतावलंबिन् ।
पँवाड़ा, सं. पुं. (सं. प्रवादः) आख्यानं, बृहत्-विस्तृत,-कथा, अरुचिकरं वृत्तम् ।
पंसारी, सं. पुं. (सं.पण्यशालिन्>) औषधा-दिविक्रयिन्, *पण्यशालिन् ।
पंसेरी, सं. स्त्री. (सं. पंच+सेरः>) पंचसेरी, पंचसेटकी ।
पकड़, सं. स्त्री. (सं. प्रकृष्ट>) ग्रहः,-हणं, धा(ध)रणं, ग्रसनं, आकलनं २. मल्ल-बाहु,-युद्धं ३. दोषान्वेषणं, आक्षेपः, आपत्तिः (स्त्री.) ।
—धकड़, सं. स्त्री., निरोधासेधौ, ग्रहणधरणे (दोनों द्वि.) ।
पकड़ना, क्रि. स. (सं. प्रकृष्ट>) ग्रह् (क्र्. प. से.), धृ (भ्वा. प. अ., चु.), आदा (जु. आ. अ.), अवलंब् (भ्वा. आ. से.), परामृश् (तु. प. अ.) २. निरुध् (रु. उ. अ.), आसिध् (भ्वा. प. से.), बंध् (क्र्. प. अ.) ३. आसद् (प्रे.), लंघ् (भ्वा. आ. से., चु.), पश्चाद् आगत्य अतिक्रम् (भ्वा. प. से.), पश्चाद् आभिल् (तु. प. से.) ४. निवृ-स्तंभ् (प्रे.), स्थिरीकृ ५. अन्विष् (दि. प. से.), अनुसंधा (जु. उ. अ.) ६. ग्रस् (भ्वा. आ. से.), आक्रम् (भ्वा. प. से.) । सं. पुं., दे. 'पकड़' ।
पकड़नेवाला, सं. पुं., ग्रहीतृ-धर्तृ-धारयितृ (पुं.); निरोधकः, आसेकः इ. ।
पकड़वाना, पकड़ना, क्रि. प्रे., व. 'पकड़ना' के. प्रे. रूप ।
पकड़ा हुआ, वि., गृहीत, धृत, निरुद्ध, ग्रस्त ।
पकना, क्रि. अ. (सं. पक्व>) पच्-श्रा-श्री (कर्म.), सिध् (दि. प. अ.) २. पाकं व्रज् (भ्वा. प. से.), पाकोन्मुख (वि.) भू । (केशाः) धवली-शुक्ली भू ।

पकवाई, सं. स्त्री. (हिं. पकवाना) पाचन,-मूल्यं-भृतिः (स्त्री.)।

पक्कान, सं. पुं. (सं. पक्वान्नं, दे.)।

पकाई, सं.स्त्री., दे. 'पकवाई' २. पाचनं, पाकः, दे. 'पाक'।

पकाना, क्रि. स. (हिं. पकना) पच् (भ्वा. प. अ.), श्री (क्र्. उ. अ.), श्रा (अ. प. अ.; चु. श्रपयति), (अन्नं) संस्कृ अथवा सिध् (प्रे. साधयति)।

पकाने योग्य, वि., पचनीय, श्रातव्य, श्रेतव्य।

पकानेवाला, सं. पुं., पाचकः, सूदः, वल्लवः।

पकाया हुआ, वि. पक्व, पाचित, साधित, संस्कृत, श्राण।

पकाव, सं. पुं. (हिं. पकना) पचनं, पाकः २. (व्रणादीनां) सपूयत्वं, परि-, पाकः।

पका हुआ, वि., पक्व, सिद्ध, श्राण, शृत।

पको(कौ)ड़ा, सं. पुं. (हिं. पकौड़ी) पक्व-पौडः।

पको(कौ)ड़ी, सं. स्त्री. (सं. पक्ववटी) पक्व-वटिका।

पक्का, वि. (सं. पक्व) सु-परि-,पक्व, परिणत, पक्वतामापन्न २. प्रौढ, सिद्ध, परि-सं,-पूर्ण ४. संस्कृत, संशोधित ४. पक्व, श्राण, श्रृत ५. अनुभविन्, बहुदर्शिन् ६. दक्ष, निपुण ७. दृढ, स्थिर ८.निश्चित, ध्रुव ९. प्रामाणिक, प्रमाणसिद्ध।

पक्व, वि. (सं.) दे. 'पक्का' (१, ३, ४)।

पक्वान्न, सं. पुं. (सं. न.) संस्कृत-सिद्ध-शृत,-अन्नम्।

पक्वाशय, सं. पुं. (सं.) नाभ्यधोभागः, लब्धं-त्रारंभिको भागः।

पक्ष, सं. पुं. (सं.) पार्श्वः-र्श्वं, पक्ष-पार्श्व,-भागः, कुक्षिः (पुं.) २. दे. 'पंख' ३. दलं, गणः, संघः ४. अर्द्धमासः, मासार्द्धं ५. सहायकः, सखि (पुं.) ६. गृहं ७. मतं, विचारः।

उत्तर—, सं. पुं. (सं.) सिद्धान्तः, कृतान्तः, समाधिः (पुं.)।

पूर्व—, सं. पुं. (सं.) शास्त्रीयप्रश्नः, सिद्धान्त-विरुद्धकोटिः (स्त्री.), चोद्यं, देश्यं, फक्किका।

पक्षक, सं. पुं. (सं.) गुप्त-चौर,-द्वारं-द्वार् (स्त्री.) २. पार्श्वः-र्श्वं, पक्षभागः ३. सहायः, सहायकः।

पक्षति, सं. स्त्री. (सं.) पक्ष-वाज,-मूलम्, शुक्ला प्रथमतिथिः (स्त्री.), प्रतिपदा, प्रतिपदी।

पक्षपात, सं. पुं. (सं.) पक्षपातिता, असम,-दृष्टिः-बुद्धिः (स्त्री.), असमता।

पक्षपाती, सं. पुं. (सं.-तिन्) पक्ष्यः, पक्षधरः, पक्षावलंबिन्, सपक्षः, पार्श्विकः।

पक्षांत, स. पुं. (सं.) अमावस्या २. पूर्णिमा।

पक्षाघात, सं. पुं. (सं.) पक्षवातः, जाड्यं, स्तंभः, सादः।

पक्षिणी, सं. स्त्री. (सं.) पत्रिणी, पतत्रिणी, गरुत्मती. वाजिनी, नीडजा, नीडोद्भवा।

पक्षी, सं. पुं. (सं. पक्षिन्) विहगः, विहंगः-गमः, खगः, शकुंतः-तिः (पुं.), शकुनः-निः (पुं.), द्विजः, पत्रिन्, पतत्रिन्, अंडजः, वाजिन्, वि. (पुं.), पतत्रिः (पुं.), गरुत्मत् (पुं.), पतगः, पतंगः-गमः २. पक्ष्यः, पक्षपातिन्।

पख, सं. पुं. (सं. पक्षः>) कलहः, विवादः २. दोषः, त्रुटिः (स्त्री.) ३. विघ्नः. प्रतिबंधः।

पखवारा-ड़ा, सं. पुं. (सं. पक्षः+वारः >) कृष्णः शुक्लो वा पक्षः२. अर्द्धमासः, मासार्द्धम्।

पखारना, क्रि. स. (सं. प्रक्षालनं) दे. 'धोना'।

पखावज़, सं. स्त्री. (सं. पक्षवाद्यं>) मृदंग-भेदः, *पक्षवाद्यम्।

पखेरू, सं. पुं. [सं. पक्षालुः (पुं.)] दे. 'पक्षी'।

पखौरा-ड़ा, सं. पुं. (सं. पक्षः>) अंसास्थि (न.), भुजस्कंधसंधिः (पुं.)।

पग, सं. पुं. (सं. पदकं) पादः, पदं, चरणः-णं २. पदं, क्रमः ३. पादन्यासः, चरणपातः।

—डंडी, सं. स्त्री., पद्या, चरणवीथिः (स्त्री.), पथिकमार्गः, एकपदी।

पगड़ी, सं. स्त्री. (सं. पटकः) उष्णीषः-षं, शिरोवेष्टनं, वेष्टनं, वेष्टकं, चेलाण्डकः।

—बाँधना, क्रि. सं., उष्णीषं परिधा (जु. उ. अ.) वंध् (क्र्. प. अ.)।

—उछालना, मु., लघू कृ, अप-अव-मन् (प्रे.)।

—उतारना, मु., दे. 'पगड़ी उछालना' २. लुंट्-ठ् (भ्वा. प. से.), धनं अपहृ (भ्वा. उ. अ.)।

—बदलना, मु., सौहार्दं स्था (प्रे. स्थापयति)।

पगना, क्रि. अ. (सं. पाक>) रसेन मधु-

क्वाथेन वा सिच् (कर्म.)-क्लिद् (दि. प. वे.), २. अनुरंज् (कर्म.), स्निह् (दि. प. से.)।

पगला, वि. पुं., दे. 'पागल' (पगली स्त्री.)।

पगहा, सं. पुं. (सं. प्रग्रहः) पशुग्रीवारज्जुः (स्त्री.), संदानम्।

पगुराना, क्रि. अ., दे. 'जुगाली करना'।

पघा, सं. पुं., दे. 'पगहा'।

पचना, क्रि. अ. (सं. पचनं) पच् (कर्म.), परिणम् (भ्वा. प. अ.), जॄ (दि. प. से.) २. छलेन स्वकीयं कृत्वा उप-विनि,-युज् (कर्म.)।

पचपच, सं. स्त्री. (अनु.) पचपचध्वनिः (पुं.), कर्दमसंचारशब्दः २. पंकः-कं, कर्दमः।

पचपन, वि. [सं. पंचपंचाशत् (नित्य स्त्री.)] सं. पुं., उक्ता संख्या, तदंकौ (५५) च।

पचपनवाँ, वि. (हिं. पचपन) पंचपंचाशत्तमः-मी-मं, पंचपंचाशः-शी-शं (पुं. स्त्री. न.)।

पचमेल, वि. (सं. पंचमेलः>) मिश्रित, व्या-सं,-मिश्र।

पंचरंगा, वि. (सं. पंचरंग) पंचवर्ण २. नाना-अनेक-बहु,-वर्ण-रंग।

पचलड़ा, सं. पुं. }
पचलड़ी, सं. स्त्री. } (सं. पंच+हिं.लड़)*पंच-सूत्रिका,*पंचतारो हारः।

पचहत्तर, वि. [सं. पंचसप्ततिः (नित्य स्त्री.)] सं. पुं., उक्ता संख्या, तदंकौ (७५) च।

पचहत्तरवाँ, वि. (हिं. पचहत्तर) पंचसप्तति-तमः-मी-मं, पंचसप्ततः-ती-तं (पुं. स्त्री. न.)।

पचाना, क्रि. स. (हिं. पचना) दे. 'पकाना' २. पच् (भ्वा. प. अ.), जॄ (प्रे.), परिणम् (प्रे.) ३. परद्रव्यं छलेन आत्मसात् कृ ४. अतिपरिश्रमेण शरीरं क्षि (प्रे. क्षाययति)।

पचाव, सं. पुं. (हिं. पचना) वि-परि-, पाकः, पक्तिः (स्त्री.), पचनं, परीणामः।

पचास, वि. [सं. पंचाशत् (नित्य स्त्री.)]। सं. पुं., उक्ता संख्या, तदंकौ (५०) च।

पचासवाँ, वि. (हिं. पचास) पंचाशत्तमः-मी-मं, पंचाशः-शी-शं (पुं. स्त्री. न.)।

पचासा, सं. पुं. (हिं. पचास) पंचाशिका।

पचासी, वि. [सं. पंचाशीतिः (नित्य स्त्री.)]। सं. पुं., उक्ता संख्या, तदंकौ (८५) च।

पचासीवाँ, वि. (हिं. पचासी) पंचाशीतितमः-मी-मं, पंचाशीतः-ती-तं (पुं. स्त्री. न.)।

पचीस, वि. [सं. पंचविंशतिः (नित्य स्त्री.)] उक्ता संख्या, तदंकौ (२५) च।

पचीसवाँ, वि. (हिं. पचीस) पंचविंशतितमः-मी-मं, पंचविंशः-शी-शं (पुं. स्त्री. न.)।

पचीसी, सं. स्त्री. (हिं. पचीस) पंचविंशतिका २. मानवायुपः प्रथम-पंचविंशतिवर्षाणि ३. कप-र्दकक्रीडाभेदः।

पचोतरा, सं. पुं. (सं. पंचोत्तरः>) पंचोत्तरा-ख्यः करः, विंशभागात्मकः पण्यकरः।

पच्चर, सं. स्त्री. (सं. अथवा अनु. पच्>) रंध्र-पूरकः-कं काष्ठखंडः-डं २. शंकुः (पुं.), कीलः।

—लगाना, क्रि.स., काष्ठखंडेन रन्ध्रं पूर् (चु.)।

—मारना, मु., मोघी-निष्फली कृ।

पच्चानवे, वि. [सं. पंचनवतिः (नित्य स्त्री.)] सं. पुं., उक्ता संख्या, तदंकौ (९५) च।

पच्ची, सं. स्त्री. (सं. वा अनु. पच्>) समतल-तया निवेशः-प्रतिवापः-खचितिः (स्त्री.)।

—कारी, सं. स्त्री. (हिं.+फ़ा.) समतलतया निवेशनं-प्रतिवपनं-खचनं-प्रणिधानम्।

पच्छिम, सं. पुं., दे. 'पश्चिम'।

पच्छिमी, वि., दे. 'पश्चिमी'।

पछड़ना, क्रि. अ., दे. 'पिछड़ना'।

पछताना, क्रि. अ. (हिं. पछतावा) पश्चात्तापं कृ, अनुतप् (दि. आ. अ.), अनुशी (अ. आ. से.)।

पछतानेवाला, सं. पुं. अनुतापिन्, अनुश-यिन्, पश्चात्तापिन्।

पछतावा, सं. पुं. (सं. पश्चात्तापः) अनुशयः, अनुतापः, अनुशोकः, खेदः।

पछत्तर, वि., सं. पुं., दे. 'पचहत्तर'।

पछवाँ, वि. (सं. पश्चिम) पश्चिमः-मा-मं, प्रत्यङ्-तीची-त्यक्, प्रतीच्यः-च्या-च्यं,पाश्चात्यः-त्या-त्यम्। सं. स्त्री., पश्चिम-प्रतीच्य,-पवनः-वायुः।

पछाँह, सं. पुं. (सं. पश्चात्>) पश्चिमस्थो देशः, पश्चिमप्रदेशः।

पछाड़, सं. स्त्री. (हिं. पाछा), मूर्च्छावपातः, निःसंज्ञपतनम्।

—खाना, क्रि. अ., मूर्च्छया अवपत् (भ्वा. प. से.)।

पछाड़ना, क्रि. स. (हिं. पछाड़) अव-नि-पत् (प्रे.) २. (शत्रुं) पराजि (भ्वा. आ. अ.)।
पछाड़ी, सं. स्त्री. दे. 'पिछाड़ी'।
पजावा, सं. पुं. (फ़ा.) इष्टकापाकः।
पट¹, सं. पुं. (सं.) वस्त्रं, वसनं, सुचेलकं २. तिरस्करिणी, व्यवधानं, प्रतिसीरा ३. चित्रपटः ४. धातुमय,-पत्रं-पट्टः-पट्टिका।
—खोलना, क्रि. स., तिरस्करिणीं अपसृ-विचल् । (प्रे.)।
—मंडप—वास, सं. पुं. (सं.) दे. 'तंबू'।
पट², क्रि. वि. (चट का अनु.) झटिति, सपदि।
पट³ (अनु.) पतन-ताडन,-ध्वनिः (पुं.), पटिति।
पट⁴, सं. पुं. (देश.) ऊरुः (पुं.)। वि., अधोमुख, अधरोत्तर, अवमूर्द्धशय।
पट⁵, सं. पुं. (सं. पट्टः) कपा(वा)टः-टी-टं द्वारं, द्वार् (स्त्री.)।
—खोलना—बंद करना, क्रि. स., दे. 'द्वार'।
पटकना, क्रि. स. (अनु. पटक) उत्थाप्य भूमौ रभसा नि-अव-पत् (प्रे.) २. बाहुयुद्धे प्रतिद्वंद्विनं जि (भ्वा. प. अ.)।
पटकनी, सं. स्त्री. (हिं. पटकना) रभसा अधः-नि-अव,-पातः-पतनम्।
—देना, क्रि. स., दे. 'पटकना'।
पट(टु)का, सं. पुं. (सं. पट्टकः>) परिकरः, कटि,-बंधनी-वलयम्।
—बाँधना, मु., परिकरं बंध् (क्र्. प. अ.), उद्यत-सन्नद्ध (वि.) भू।
पटच्चर, सं. पुं. (सं.) चौरः, स्तेनः। न., जीर्णवस्त्रम्।
पटड़ा-रा, सं. पुं. (सं. पट्टः-ट्टं) काष्ठ-दारु,-फलकः-फलकं २. काष्ठ-दारु,-पीठम्।
—कर देना, मु., निर्बली-निःसत्त्वी कृ २. अव-उत्-सद् (प्रे.), उच्छिद् (रु. प. अ.)।
पटड़ी-री, सं. स्त्री. (हिं. पटड़ा-रा) पट्टकः-कं २. पट्टिका ३. पद्या, चरणवीथिः (स्त्री.), पाद-चरण-पथः।
पटना, सं. पुं. (सं. पट्टनं>) कुसुमपुरं, पुष्पपुरं, पाटलिपुत्रम्।
पटना, क्रि. अ. (हिं. पट = भूमि की सतह के बराबर) आ-समा-छाद् (कर्म.), आ-सं-वृ (कर्म.) २. व्याप्-आस्तृ (कर्म.) ३. पृ-प (कर्म.), आ-प्र-सं-पूर् (कर्म.) ४. सिच् (कर्म.) ५. संमन् (दि. आ. अ.), एकचित्ती भू ६. ऋणात् मुच् (कर्म.)।
पटपट, सं. स्त्री. (अनु.) पटपटाशब्दः, पटपट-ध्वनिः (पुं.)। क्रि. वि., सपटपटशब्दम्।
पटरानी, सं. स्त्री. (सं. पट्टराज्ञी) पट्ट,-देवी-महिषी, राज-, महिषी।
पटल, सं. पुं. (सं. न.) छदिस् (न.), छदिः (स्त्री.) २. आवरणं, आच्छादनं ३. तिरस्करिणी, व्यवधानं ४. आ-,स्तरः, फलकः-कं ५. दृष्टेरावरकं ६. समूहः, पटली ७. अध्यायः, परिच्छेदः ८. चयः, राशिः (पुं.) ९. परिच्छदः १०. तिलकः-कं ११. दे. 'मोतियाबिंद'।
पटवा, सं. पुं. (सं. पट्टं + हिं. वाहा) *पट्टवाहः, *पट्टहारः।
पटवाना, क्रि. प्रे., व. 'पटना' के प्रे. रूप।
पटवारगरी, सं. स्त्री. (हिं. पटवारी + फ़ा. गरी) ग्रामभूलेखकत्वं २. ग्रामभूलेखपदम्।
पटवारी, सं पुं. (सं. पट्ट + हिं. वार) *ग्रामभूलेखकः।
पटसन, सं. पुं. (सं. पाटः + शणं>) शणं, अतसी, मसृणी।
पटह, सं. पुं. (सं.) दुंदुभिः (पुं.), भेरी, पणवः।
पटहार, सं. पुं., दे. 'पटवा'।
पटा, सं. पुं. (सं. पट्टः-ट्टं) काष्ठ,-पट्टं-पीठं २. मिथ्याखड्गः ३. लगुडः, दंडः।
पटाई, सं. स्त्री. (हिं. पाटना) पटलेन आच्छादनम् २. पटलाच्छादनभृतिः (स्त्री.)।
पटाक, सं. स्त्री. (अनु.) तारध्वनिः (पुं.), महा-,शब्दः-नादः।
पटाका-खा, सं. पुं. (अनु. पटाक) अग्निक्रीडनकभेदः, *पटाकः।
पटाक्षेप, सं. पुं. (सं.) यवनिका-जवनिका-पट-अपटी,-निपातः-अवपातः।
पटाना, क्रि. स., व. 'पाटना' के प्रे. रूप।
पटापट, क्रि. वि. (अनु. पट) सपटपटशब्दम्। सं. स्त्री., पटपटाशब्दः।
पटु, वि. (सं.) कुशल, दक्ष, निपुण, प्रवीण, निष्णात, विशारद, विदग्ध।
पटुता, सं. स्त्री. (सं.) कौशलं-ल्यं, दक्षता,

नैपुण्यं-णं, प्रावीण्यं, वैचक्षण्यं, पटुत्वं, वैदग्ध्यम् ।

पटेबाज़, सं. पुं. (हि.+फ़ा.) खड्गाभ्यासिन्, मिथ्यासियोधः ।

पटेल, सं. पुं. (हिं. पट्टा) ग्रामणीः (पुं.), ग्रामाध्यक्षः २. दक्षिणभारतवर्षे उपाधिभेदः ।

पटोर-ल, सं. पुं. (सं. पटोलः) लता-राज-अमृत(ता)-कटु-नाग,-फलः, कुष्ठारिः (पुं.), कासमर्दनः ।

पट्ट, सं. पुं. (सं. पुं. न.) पीठं-ठी, उप-,आसनं २. पट्टिका ३. धातुमय,-पत्रं-पट्टिका ४. चर्मन् (न.) फलकः-कं ५. पेषणपाषाणः, शिला ६. उष्णीषः-षं ७. व्रण-, बन्धनं-आवेष्टनं ८. उत्तरीयं ९. नगरं १०. चतुष्पथः-थं, शृंगाटकं ११. राज-, सिंहासनं १२. कौशेयं १३. शणं १४. दे. 'पट्टा' ।

पट्टन, सं. पुं. (सं. न.) पत्तनं, पुरं, नगरं २. महानगरम् ।

पट्टा, सं. पुं. (सं. पट्टः) पट्टोलिका, आविहितकालात् भूम्यधिकारपत्रं २. (कुक्कुरादीनां) ग्रैवं, ग्रीवापटः ३. केश,-पाशः-कलापः ४. पीठं ५. चर्ममय,-कटिबंधनो-परिकरः ६. दे. 'चपरास' ७. खड्गभेदः ८. अधिकारपत्रम् ।

पट्टे पर दाने, क्रि. स., आविहितभयात् निरूपितमूल्येन दा अथवा विसृज् (तु. प. अ.) ।

पट्टी[1], सं. स्त्री. (सं. पट्टिका) काष्ठ-,पट्टिका २. पाठः, प्रपाठकः, ३. शिक्षा, उपदेशः ४. वंचनात्मकोपदेशः, ५. (वस्त्रादिकस्य) दीर्घ,-खंडः-शकलं ६. व्रण,-बंधनं-आवेष्टनं ७. *जंघावेष्टनी ८. और्णपटभेदः, पट्टी ९. पंक्तिः-ततिः (स्त्री.) १०. प्रसाधिताः केशाः ११. रिक्थभागः १२. खट्वायाः पार्श्व,-काष्ठं-दंडः १३. मिष्टान्नभेदः ।

—बाँधना, क्रि. स., पट्टिकां बंध् (क्र्. प. अ.) व्रणं आच्छद् (चु.) ।

—दार, सं. पुं. (हिं+फ़ा.) अंशिन्, भागग्राहिन् ।

—दारी, सं. स्त्री. (हिं+फ़ा.) अंशित्वं, भागग्राहित्वम् ।

पट्टी[2], सं.स्त्री. (सं.) अश्ववक्षोबंधनरज्जुः (स्त्री.), कक्ष्या, नद-ध्री २. ललाटभूषा ३. यन्त्रकम् ।

पट्टू, सं. पुं. (हिं. पट्टी) और्णपटभेदः, नीशारः ।

पट्ठा, सं. पुं. (सं. पुष्टः) तरुणः, युवकः, युवन्, कुमारकः २. शावः, पोतः, डिंभः ३. मल्लः, बाहुयोधः-धिन् ४. दीर्घस्थूलपत्रं ५. स्नसा, स्नायुः (स्त्री.), पेशी ।

पठक, सं. पुं. (सं.) पाठकः, वाचकः ।

पठन, सं. पुं. (सं. न.) अध्ययनं, पाठः, अधीतिः (स्त्री.), वाचनं २. श्रावणं, उच्चारणम् ।

—पाठन, सं. पुं. (सं. न.) अध्ययनाध्यापनं-ने (द्वि.) ।

पठनीय, वि. (सं.) पठितव्य, अध्येतव्य, पाठ्य, वाचनीय, पठन-अध्ययन,-अर्ह ।

पठान, सं. पुं. (पश्तो. पुख्ताना) यवनजातिभेदः, *पख्तूनः *पठानः ।

पठानी, सं. स्त्री. (हिं. पठान) पख्तूनी, पठानी २. पठानत्वं, पख्तूनत्वम् ।

पठार, सं. पुं. (सं. प्रस्तारः>) अधित्यका, २. प्रस्तारः ।

पठावनी, सं. स्त्री. (सं. प्रस्थापनम्) प्रेषणं, प्रहितिः (स्त्री.) २. प्रस्थापनभृतिः । (स्त्री.) ।

पठित, (वि. सं.) अधीत, वाचित २. श्रावित ३. साक्षर, विद्यावत्, विद्वस् ।

पड़छती (-त्ती), सं. स्त्री. दे. 'परछत्ती' ।

पड़ताल, सं. स्त्री. (सं. परितोलनं>) अनुसंधानं, अन्वेषणं २. अन्वीक्षणं, विमर्शः, निरूपणम् ।

—करना, क्रि. स., अनुसंधा (जु. उ. अ.), अन्विष् (दि. प. से.) २. विमृश् (तु. प. अ.), निरूप् (चु.), अनु-परि-ईक्ष् (भ्वा. आ. से.) ।

पड़तालना, क्रि. स., दे. 'पड़ताल करना' ।

पड़ती, सं. स्त्री. (हिं. पड़ना) अकृष्ट-अहल्य,-भूमिः (स्त्री.) ।

पड़दादा, सं. पुं. (सं. प्र+तातः>) प्रपितामहः ।

पड़दादी, सं. स्त्री. (हिं. पड़दादा) प्रपितामही ।

पड़ना, क्रि. अ. (सं. पतनं) अव-नि-, पत् (भ्वा. प. से.), भ्रंश्-स्रंस् (भ्वा. आ. से.), च्यु (भ्वा. आ. अ.) २. घट्-वृत् (भ्वा. आ. से.); आ-सं-पत्, प्रसंज् (कर्म.) संवृत्, सं-

समा-पद् (दि. आ. अ.) ३. संविश् (तु. प. अ.), विश्रम् (दि. प. से.); शी (अ. आ. से.), स्वप् (अ. प. अ.) ४. रुग्ण (वि.) वृत, रोगेण अभिभू (कर्म.) ५. प्रविश् (तु. प. अ.)।

क्या पड़ी है, मु., कोऽर्थः, किं प्रयोजनम् ।

पड़नाना, सं. पुं. (सं.प्र+दे. नाना) प्रमातामहः ।

पड़नानी, सं. स्त्री. (हिं. पड़नाना) प्रमातामही ।

पड़ (र)वा, सं. स्त्री., दे. 'प्रतिपदा' ।

पड़वाल, सं. पुं., दे. 'परवाल' ।

पड़ाव, सं. पुं. (हिं. पड़ना) प्रयाणभंगः, निवेशः, अवस्थितिः (स्त्री.) २. निवेश-विश्राम,-स्थानम् ।

पड़ोस, सं. पुं. (सं. प्रतिवासः या प्रतिवेशः) निकट-समीप-संनिहित,-देशः; संनिधिः (पुं.), २. सांनिध्यं, प्रातिवेश्यम् ।

पड़ोसी, सं. पुं. (हिं. पड़ोस) प्रतिवेशः श्यः-शिन्, प्रतिवासिन्, प्रातिवेशिकः, [पड़ोसिन (स्त्री.)=प्रति,-वेशिनी-वासिनी इ.] ।

पढ़ना, क्रि. स. (सं. पठनं) पठ् (भ्वा. प. से.), अधि-इ (अ. आ. अ.), (अपने आप पढ़ना) अनुवच् (प्रे.) २. वच् (प्रे.), उच्चर् (प्रे.) २. अभ्यस् (दि. प. से.), आवृत् (प्रे.)। सं. पुं. तथा भाव, पाठः, पठनं, अध्ययनं, वाचनं, उच्चारणं, अभ्यसनं, अभ्यासः, आवर्तनं, श्रावणम् ।

—लिखना, सं. पुं., पाठलेखौ-पठनलेखने, विद्याभ्यासः, शिक्षा ।

पढ़नेयोग्य, वि., दे. 'पठनीय' ।

पढ़नेवाला, सं. पुं., अध्येतृ-पठितृ (पुं.) वाचकः, पाठकः, अधीयानः [अध्येत्री, पठित्री, पाठिका (स्त्री.)] ।

पढ़ा हुआ, वि., दे. 'पठित' ।

पढ़वाना, क्रि. प्रे., व. 'पढ़ना' के प्रे. रूप ।

पढ़ा, वि. (सं. पठित, दे.) ।

—लिखा, वि., विद्वस्, उपात्तविद्य, साक्षर, शिक्षित, व्युत्पन्न ।

पढ़ाई, सं. स्त्री. (हिं. पढ़ना). दे. 'पढ़ना' सं. पुं. । २. अध्यापनं, पाठनं, शिक्षणं ३. अध्यापन,-शैली-रीतिः (स्त्री.) ४. अध्ययन-अध्यापन,-शुल्कं-वेतनम् ।

पढ़ाना, क्रि. स. (हिं. पढ़ना) पठ्-शिक्ष् (प्रे.), अधि-इ (प्रे. अध्यापयति), शास् (अ. प. से.), उपदिश् (तु. प. अ.)। सं. पुं. तथा भाव, अध्यापनं, उपदेशः, शिक्षा-क्षणं, पाठनम् ।

पढ़ानेवाला, सं. पुं, अध्यापकः, शिक्षकः, गुरुः, उपदेष्टृ-शास्तृ (पुं.) ।

पण, सं. पुं. (सं.) द्यूतं, देवनं, दुरोदरं, कैतवं २. ग्लहः (शर्त) ३. मूल्यं, निर्वेशः ४. शुल्कः-ल्कं, प्रतिफलं ५. धनं, रिक्थं ६. पणितव्यं, विक्रेयवस्तु (न.) ७. व्यवसायः, व्यवहारः ८. स्तुतिः (स्त्री.) ९. मुष्टिमानं १०. (पैसा) ताम्रमुद्राभेदः, पणमुद्रा ।

पतंग, सं. पुं. (सं.>) पत्रचिल्लः-ला, चिल्लाभासं, *पतंगः २. सूर्यः ३. खगः ४. शलभः ।

—उड़ाना, क्रि. स., पत्रचिल्लं-पतंगं उड्डी (प्रे. उड्डाययति) ।

—बाज़, सं. पुं., पतंगोड्डायकः ।

—बाज़ी, सं. स्त्री., पतंगक्रीडा ।

पतंगा, सं. पुं. (सं. पतंगः) शलभः २. स्फुलिंगः, अग्निकणः ।

पतंजलि, सं. पुं. (सं.) योगदर्शनकारऋषिविशेषः २. महाभाष्यकारो मुनिविशेषः ।

पत[1], सं. पुं. (सं. पतिः) भर्तृ, धवः २. प्रभुः, स्वामिन् ।

पत[2], सं. स्त्री. (सं. प्रत्ययः>) प्रतिष्ठा, गौरवं, मानः, यशस् (न.), कीर्तिः (स्त्री.) ।

—उतारना या लेना, मु., अप-अव-मन् (प्रे.), दुष् (प्रे. दूषयति) ।

—रखना, क्रि. स., गौरवं रक्ष् (भ्वा. प. से.) ।

पतझड़, सं. स्त्री. (सं. पत्रं+हिं. झड़ना) शिशिरः, शिशिरर्तुः (पुं.) (माघफाल्गुनमासौ) २. अवनतिकालः, संकटमयः समयः ।

पतत्प्रकर्ष, सं. पुं. (सं.) काव्यदोषभेदः (सा०) ।

पतत्र, सं. पुं. (सं. न.) पक्षः, वाजः, छदः २. यानं, वाहनं, युग्यं, वाहः ।

पतत्रि, सं. पुं. (सं.) पक्षिन्, पत्रिन्, पतत्रिन्, खगः, विहगः ।

पतन, सं. पुं. (सं. न.) अव-नि-अधः-, पातः,

च्यवनं, च्युतिः (स्त्री.), ध्वंसः, भ्रंशः, २. अपकर्षः, अवनतिः (स्त्री.) ३. विनाशः, मृत्युः (पुं.) ४. बहिष्कारः, अपांक्तेयत्वम् ।

—शील, वि. (सं.) पातुक, पतयालु ।

पतला, वि. (सं. पात्रट) प्र-तनु, सूक्ष्म, २. कृश, क्षाम, क्षीण ३. जलबहुल, प्रवाहिन् ४. विरल, घनत्वरहित ।

—करना, क्रि. स., वि-, द्रु-ली (प्रे.), विरलयति (ना. धा.), तनू कृ, तक्ष् (भ्वा. प. से; भ्वा. प. वे.); कृशी कृ ।

—होना, क्रि. अ., क्षि-अपचि (कर्म.), तनूविरली भू; कृशी भू ; द्रवी भू, विली (कर्म.) ।

पतलापन, सं. पुं. (हिं. पतला) तनुता, तनुत्वं, सूक्ष्मत्वं २. कार्श्यं, क्षीणता ३. जलबहुलत्वं ४. वैरल्यम् ।

पतलून, सं. स्त्री. (अं. पैंटलून) *पतलूनं, आंग्लपादायामः ।

पतवार-ल, सं. स्त्री. (सं. पात्रपालः) कर्णः, केनिपातः-तकः ।

पता, सं. पुं. (सं. प्रत्ययः>) (पत्रादि का) बाह्यनामन् (न.), पत्रसंज्ञा २. (घरादि का) नामधामसंकेतः, गृहपरिचयः, निकेतसंकेतः ३. बोधः, ज्ञानं ४. रहस्यं, गुह्यं ५. चिह्नं, लक्षणम् ।

पताका, सं. स्त्री. (सं.) वै-,जयंती-तिका, ध्वजः, केतनं, केतुः (पुं.) कदली-लिका ।

पति, सं. पुं. (सं.) धवः, हृदय-जीवित,-ईशः, प्राणनाथः, वरः, परिणेतृ-भर्तृ-पाणिग्रहितृ (पुं.), प्रियः, कांतः, स्वामिन्, गृहिन्, रमणः । २. प्रभुः (पुं.), अधिपतिः (पुं.) ।

—व्रत, सं. पुं. (सं. न.) पति-भक्तिः (स्त्री.)-निष्ठा, पातिव्रत्यम् ।

—व्रता, वि. स्त्री.(सं.) साध्वी, सच्चरित्रा, सती ।

पतित, वि. (सं.) गलित, अव-नि-अधः,-पतित, च्युत, ध्वस्त, स्रस्त २. धर्म-आचार,-भ्रष्ट ३. पापिन्, पातकिन् ४. जातेः-समाजात् च्युत-बहिष्कृत ५. अधम, नीच ।

—पावन, वि. (सं.) पाप-पतित,-पावक-शोधक-उद्धारक, अघनाशक, पापमोचक ।

पतीला, सं. पुं. (हिं. पतीली) स्थाली, दे. 'देगचा' ।

पतीली, सं. स्त्री. (सं. पातिलि>) उखा, दे. 'देगची' ।

पते की बात, सं. स्त्री., गुह्यवार्ता, गुप्तवृत्तम् ।

पतोखा, सं. पुं. (हिं. पत्ता) दे. 'दोना' ।

पतोहू, सं. स्त्री., दे. 'पुत्रवधू' ।

पत्तन, सं. पुं. (सं.) पुरं, नगरं; महती पुरी ।

पत्तल, सं. स्त्री, (सं. पत्रं>)पत्रं, *पत्रस्थालोलिका २. पत्रस्थं भोजनम् ।

जिस पत्तल में खाना उसी पत्तल में छेद करना, मु., उपकारकमेव दु (स्वा. प. अ)-बाध् (भ्वा. आ. से.), उपकारकस्यैवापकारः ।

पत्ता, सं. पुं. (सं. पत्रं) दे. 'पत्रं' २. क्रीडापत्रम् ।

पत्ती, सं. स्त्री. (हिं. पत्ता) पत्रकं, पर्णकं २. अंशः, भागः ३. पुष्पदलम् ।

—दार, सं. पुं. (हिं+फ़ा.) अंश-भाग,-ग्राहिन्-हारिन्, हरः २. पत्रमय ।

पत्थर, सं. पुं. (सं. प्रस्तरः) शिला, अश्मन्-ग्रावन् (पुं.), पाषाणः, उपलः, दृश(ष)द् (स्त्री.), मृन्मरुः (पुं.), काचकः, पारटीटः २. वर्षशिला, इन्द्रोपलः ३. रत्नं ४. न किंचिदपि । वि., क्रूर, निर्दय २. गुरु, भारवत् ३. कीकस, दृढ़ ।

—चटा, सं. पुं., (१-३) घास-सर्प-मीन,-भेदः ४. कृपणः, मितंपचः ।

—फोड़, सं. पुं. दे. 'हुदहुद' ।

—की लकीर, मु., अक्षय्य, अक्षर, नित्य, शाश्वत, निश्चित ।

छाती पर—रखना, मु., प्रतीकाराक्षमतया सह् (भ्वा. आ. से.), निरुपायतया मृष् (दि. उ. से.) ।

—पड़ना, मु., नश् (दि. प. वे.) ध्वंस् (भ्वा. आ. से.) ।

—पसीजना, मु. मृदू-दयार्द्रीभू ।

—होना, मु., निश्चल (वि.) स्था (भ्वा. प. अ.) २. निर्दय-निर्घृण (वि.) जन् (दि. आ. से.) ।

पत्नी, सं. स्त्री. (सं.) जाया, भार्या, दाराः (नित्य पुं. बहु.) स-सह,-धर्मिणी, गृहिणी, अर्द्धांगिनी, सहचरी, जनी, वधूः (स्त्री.), परिग्रहः, क्षेत्रं, कलत्रं, ऊढा ।

—शाला, सं. स्त्री. (सं.) पत्नी,-कोष्ठः-गृहम् ।

पत्र, सं. पुं. (सं. न.) पर्णं, छदनं, पलाशं, दलः-लं, छदः २. (पुस्तकादीनां) पत्रं, पर्णं, पृष्ठं ३. समाचार-वृत्त,-पत्रं ४. संदेश-, पत्रं, लेखः-ख्यं ५. लेखपत्रं ६. (धात्वादेः पट्टः-ट्टं, फलकः-कम्) ।

—कार, सं. पुं. (सं.) वृत्तपत्र-लेखकः-संपादकः ।

—वाहक, सं. पुं. (सं.) लेखहारः, संदेशहरः ।

—व्यवहार, सं. पुं. (सं.) पत्रविनिमयः, लेखव्यवहारः ।

पत्रांजन, सं. पुं. (सं. न.) मशी-पी-सी, मशिः, षिः-सिः (सब (स्त्री.) ।

पत्रा, सं. पुं. (सं. पत्रं>) पंचांगं, पंजिका २. पृष्ठं, पर्णं, पत्रम् ।

पत्राचार, सं. पुं. (सं.), पत्र,-व्यवहारः-विनिमयः ।

पत्रावलि, सं. स्त्री. (सं.) पर्ण-दल-छद-श्रेणी-राजी-आवली २. पत्रभंगः ।

पत्रिका, सं. स्त्री. (सं.) संदेश-,पत्रं २. सामयिक,-पुस्तकं-ग्रंथः ३, समाचार-वृत्त,-पत्रं ४. लघुलेखः ।

पत्री, सं. स्त्री. (सं.) लिपिपत्रिका, लघुलेखः २. संदेश-,पत्रम् ।

जन्म—, सं. स्त्री. (सं.) जन्मपत्रिका ।

पथ, सं. पुं. (सं.) पथिन् (पुं.), मार्गः, अध्वन् (पुं.), वर्त्मन् (न.), पदवी-विः (स्त्री.), २. रीतिः (स्त्री.), विपानम् ।

—गामी, सं. पुं., दे. 'पथिक' ।

—(प्र)दर्शक, सं. पुं. (सं.) मार्ग,-दर्शक-उपदेशकः, नेतृ, नायकः ।

पथरी, सं. स्त्री. (हिं. पत्थर) प्रस्तर-कटोरा-रिका २. अश्मरी, अश्मरीः-रं ३. अष्ठीलाः (स्त्री. बहु.), पाषाणशकलाः (पुं. बहु.) ४. दे. 'चकमक' ५. पक्षिजठरः-रं ६. झामरः, शाणी ।

पथरीला, वि. (हिं. पत्थर) प्रस्तर-उपल, संकुल-आकीर्ण-बहुल ।

पथिक, सं. पुं. (सं.) अध्वगः, अध्वनीनः, अध्वन्यः, पान्थः, पथिलः, यात्रि(तृ)कः, यातुः-गंतुः (पुं.), पथकः ।

पथ्य, सं. पुं. (सं. न.) उपयुक्ताहारः । २. मंगलम् । वि., स्वास्थ्यकर, आरोग्यावह ।

पद, सं. पुं. (सं. न.) पादः, चरणः, अंघ्रिः (पुं.) २. पाद-पद,,चिह्न-मुद्रा ३. पदं, पद-पाद,-न्यासः-विक्षेपः, विं-,क्रमः, ४. स्थानं, स्थितिः (स्त्री.), पदवी ५. वृत्तिः (स्त्री.), व्यवसायः ५. पद्यं, छन्दस् (न.) ६. पद्यपादः, छंदश्चरणः ७. उपाधिः (पुं.), मानपदं ८. सुप्तिङन्तं प्रातिपदिकं, सविभक्तिकः शब्दः (व्या.) ९. भक्तिगीतिः (स्त्री.) १०. निःश्रेयसं, मुक्तिः (स्त्री.) ।

—चर, सं. पुं. (सं.) पदगः, पदातिकः-तिः (पुं.) ।

—च्छेद, सं. पुं. (सं.) संधिसमासयुक्तवाक्यस्य पदानां विभागः (व्या.) ।

—च्युत, वि. (सं.) भ्रष्टाधिकार, अधिकारच्युत ।

—दलित, वि. (सं.) पाद-पद,-आक्रांत-मर्दित २. अपकर्षित, अवपीडित ।

पदक, सं. पुं. (सं. न.) कीर्ति-प्रतिष्ठा-, मुद्रा ।

पदवी, सं. स्त्री. (सं.) पदं, वृत्तिः-स्थितिः, (स्त्री.) स्थाणं २. उपाधिः (पुं.), उप-मान-, पदं, कीर्तिचिह्न ३. मार्गः ४. रीतिः (स्त्री.) ।

पदाति, सं. पुं. (सं.) प(पा)दातिकः, पदिकः, पत्तिः (पुं.) प(पा)दगः, प(पा)दाद् (पुं.), पादातः ।

पदाना, क्रि. स., ब. 'पादना' के प्रे. रूप ।

पदार्थ, सं. पुं. (सं.) मूर्त्त-, द्रव्यं, वस्तु (न.), अर्थः २. शब्दार्थः ३. धर्मार्थकाममोक्षाः ४. द्रव्यगुणकर्मादयः प्रमेयविषयाः (दर्शन.) ।

—विज्ञान, सं. पुं. (सं. न.) विज्ञानं, भौतिक-शास्त्रम् ।

पदार्पण, सं. पुं. (सं. न.) चरणार्पणं, पादन्यसनं, शुभागमनम् ।

पदावली, सं. स्त्री. (सं.) शब्दश्रेणी २. गीत-संग्रहः ।

पद्धति, सं. स्त्री. (सं.) मार्गः, पथः, पथिन् २. पंक्तिः-ततिः (स्त्री.) ३. रीतिः (स्त्री.), परिपाटी-टिः (स्त्री.) ४. प्रकारः, विधा ५. संस्कारविधिदर्शको ग्रन्थः ।

पद्धरि-री, सं. स्त्री. (सं. पद्धटिका) मात्रिकसमभेदः (सा०) प्रतिचरण १६ मात्रा, अन्त में जगण, उ० नभ रैनि सघन तममय विलास । पद अटकत कंटक दंभजाल ।]

पद्म, सं. पुं. (सं. न.) सरोजं, पुंडरीकं, दे.

'कमल' २. विष्णोरायुधविशेषः ३. षोडशस्थानिनी संख्या (ग., १०००००००००००००००)।

—कंद, सं. पुं. (सं. पुं. न.) शालु(लू)कं, जलालुकं, पद्ममूलम् ।

—नाभ-भिः, सं. पुं. (सं.) दे. 'विष्णु' ।

—पाणि, सं. पुं. (सं.) ब्रह्मन् (पुं.) २. सूर्यः ३. बुद्धः ।

—योनि, सं. पुं. (सं.) दे. 'ब्रह्मा' ।

—राग, सं. पुं. (सं.) लोहितकः, लोहितं, शोणरत्नं, कुरुविंदकम् ।

पद्मा, सं. स्त्री. (सं.) दे. 'लक्ष्मी' ।

पद्माकर, सं. पुं. (सं.) तटा(डा)कः, सरोवरः, सरसी, सरस् (न.), सरकम् ।

पद्माक्ष, सं. स्त्री. (सं.) विष्णुः २. सूर्यः ३. पद्मबीजम् । वि. (सं.) कंजाक्ष, कमलनयन, कमलनेत्र ।

पद्मालया, सं. स्त्री. (सं.) कमला, पद्मा, श्रीः, इन्दिरा, रमा ।

पद्मासन, सं. पुं. (सं. न.) योगासनविशेषः । २. (सं. पुं.) दे. 'ब्रह्मा' ।

पद्मिनी, सं. स्त्री. (सं.) कमलिनी, नलिनी, बिसिनी २. दे. 'पद्माकर' ३. स्त्रीभेदविशेषः, (जो कोमलांगी, सुशीला, सुन्दरी तथा पतिव्रता हो) ४. हस्तिनी ५. दे. 'लक्ष्मी' ।

—वल्लभ, सं. पुं. (सं.) सूर्यः ।

पद्य, सं. पुं. (सं. न.) छंदस् (न.), श्लोकः २. काव्यं, कविता ।

—मय, वि. (सं.) पद्य-, रूप-आत्मक, छन्दोबद्ध ।

पधारना, सं. पुं. (हिं. पग+धरना) गमनं, प्रस्थानं २. उप-, आगमनं, प्रापणम् ।

पन[1], सं. पुं. (सं. पणः) प्रतिज्ञा, दृढसंकल्पः ।

पन[2], सं. पुं. [सं. पर्वन् (न.)>] आयुषो चतुर्थभागः ।

पन[3], प्रत्यय. (हिं.)-त्वं,-ता (उ. बालपनः बालत्वं-ता ।

पनघट, सं. पुं. (हिं. पानी+घाट) घट्टः-ट्टी ।

पनचक्की, सं. स्त्री. (हिं. पानी+चक्की) जल,-चक्री-पेषणी-यंत्रम् ।

पनडुब्बा, सं. पुं. (हिं. पानी+डूबना) निमंक्तृ (पुं.), अवगाहकः २. खगभेदः ३. जलकुक्कुटः ।

पनडुब्बी, सं. स्त्री. (पूर्व.) *जलमग्ना (नौका) ।

पनपना, क्रि. अ. (सं. पर्ण) पुनः पल्लवित-हरित (वि.) भू २. पुनः स्वास्थ्यं लभ् (भ्वा. आ. अ.) अथवा पुष् (दि. प. अ.) ।

पनपाना, क्रि. स., व. 'पनपना' के प्रे. रूप ।

पनवाड़ी, सं. स्त्री. (हिं. पान+वाड़ी) *पर्णवाटी-टिका, तांबूलीवाटिका ।

पनवाड़ी, सं. पुं. (हिं. पान) दे. 'तमोली' ।

पनस, सं. पुं. (सं.) (वृक्ष) कंट-कंटकि,-फलः, स्थूलः, मृदंगफलः, (फल) पनसं, दे. 'कटहल' ।

पनसारी, सं. पुं., दे. 'पंसारी' ।

पनसाल, सं. स्त्री. (सं. पानीय-शाला) प्रपा, दे. 'सबील' ।

पनहा, सं. पुं. (सं. परिणाहः) दे. 'चौड़ाई' २. गूढाशयः, मर्मन् (न.) ।

पनहारा, सं. पुं. (सं.पानीयहारः) जल,-वाहकः-वोढृ (पुं.) ।

पनहारिन-री, सं. स्त्री. (हिं. पनहारा) जलः-वाहिका-वोढ्री ।

पनाती, सं. पुं. [सं. प्रनप्तृ (पुं.)] प्रपौत्रः २. प्रदौहित्रः ।

पनारा-ला, सं. पुं., दे. 'परनाला' ।

पनाह, सं. स्त्री. (फ़ा.) परि-, त्राणं, रक्षा २. रक्षास्थानं, आश्रयः ।

पनीर, सं. पुं. (फ़ा.) कूर्चिका २. निर्जलं दधि (न.) ।

पनीरी, सं. स्त्री. (सं. पर्ण>) पर्णबीजानि (न. बहु.) ।

पन्नग, सं. पुं. (सं.) दे. 'साँप' ।

पन्ना, सं. पुं. (सं. पर्ण>) पुस्तक,-पत्रं-पृष्ठं २. धातुपट्टः-ट्टं ३. मरकतं, हरिन्मणिः (पुं.), अश्मगर्भजं, सौपर्णं ४. देशीयोपानह उपरिभागम् ।

पन्नी, सं. स्त्री. (हिं. पन्ना) त्रपु-पित्तल,-पत्रम् ।

पपड़ा, सं. पुं. (सं. पर्पटः>) शुष्ककाष्ठत्वक्-खंडः २. रोटिकाया बाह्यभागः ।

पपड़ी, सं. स्त्री. (हिं. पपड़ा) बाह्य,-पटलं-वेष्टनं, वल्कं, शुष्कत्वम् (स्त्री.) २. दे. 'खुरंड' ३. पर्पटकः ४. वल्कलः-लम् ।

पपनी, सं. स्त्री. (देश.) दे. 'बरौनी' ।

पपीहा, सं. पुं. (देश.) चातकः, मेघजीवनः, सारंगः, स्तोककः ।

पपीता, सं. पुं. (देश.) स्थूलैरण्डः, महापञ्चाङ्गुलः २. पीपीकरः, क्रीडनकभेदः ।

पपीहा, सं. पुं. (अनु.) दे. 'चातक' ।

पपैया, सं. पुं. (अनु.) चातकः २. पीपीकरः, क्रीडनकभेदः ३. आम्रवृक्षकः ।

पपोटा, सं. पुं. (सं. प्रपटः>) दे. 'पलक' ।

पब्लिक, सं. स्त्री. (अं.) लोकाः, जनता, जनाः । वि., सार्व,-जनिक-जनीन-लौकिक ।

—प्रासिक्यूटर, सं. पुं. (अं.) राजकीयप्राभियोक्तृ ।

—वर्क्स डिपार्टमेंट, सं. पुं. (अं.) लोकनिर्माणविभागः ।

पब्लिशर, सं. पुं. (अं.) पुस्तक-ग्रंथ-,प्रकाशकः । दे. 'प्रकाशक' ।

पय, सं. पुं. [सं. पयस् (न.)] दुग्धं, क्षीरं २. जलं. ३. अन्नम् ।

पयस्विनी, सं. स्त्री. (सं.) क्षीरिणी, दोग्ध्री, दुग्धदा, दुधा ।

पयाल, सं. पुं. (सं. पलालः-लं) निष्फलकांडः, निश्शस्यो धान्यनालः ।

पयोज, सं. पुं. (सं. न.) सरोजं, पद्मं, दे. 'कमल' ।

पयोद, सं. पुं. (सं.) मेघः, दे. 'बादल' ।

पयोधर, सं. पुं. (सं.) कुचः, स्त्रीस्तनः २. ऊधस् (न.), आपीनं ३. मेघः ।

पयोधि, पयोनिधि, } सं. पुं. (सं.) सागरः, समुद्रः ।

परंच, अव्य. (सं. परं+च) अपरं च, अपि च, अथ च २. तथापि, किंतु, परंतु ।

परंतप, वि. (सं.) अरिमद्दर्दन, रिपुसूदन ।

परंतु, अव्य. (सं. परं+तु) किन्तु, परं, तथापि ।

परंपरा, सं. स्त्री. (सं.) अनु-,क्रमः, आनुपूर्वी-र्व्यं, पूर्वापरक्रमः २. संतानः, संततिः (स्त्री.) ३. परिपाटी-टिः (स्त्री.), प्रथा ।

—गत, वि. (सं.) परंपरीण, सांप्रदायिक-पौराणिक [-की (स्त्री.)], क्रम,-आगत-प्राप्त ।

पर[१], वि. (सं.) अपर, अन्य, इतर, स्वातिरिक्त, आत्मभिन्न २. परकीय, अन्यदीय, अन्य-, पर- (समासारंभ में), अन्यस्य, परस्य ३. दूर, दूर,-स्थ-वर्तिन्, विप्रकृष्ट ४. अपर, उत्तर, उत्तरकालीन, पाश्चात्य ५. अतिरिक्त, भिन्न ६. उत्तम, श्रेष्ठ ७. लीन,-मग्न,-परायण । (उ. स्वार्थपर=स्वार्थमग्न) । सं. पुं. (सं.) शत्रुः-अरिः (पुं.) ।

पर[२], अव्य. (सं. परं) तदनु, ततः, तत्पश्चात् २. परंतु, किंतु, तथापि ।

पर[३], प्रत्य. (सं. उपरि) प्रायः सप्तमी विभक्ति से (उ. कुर्सी पर=आसंद्याम्), अधि, उपरिष्टात् ।

पर[४], सं. पुं. (फ़ा.) पक्षः, गरुत् (पुं.) वाजः ।

—दार, वि., सपक्ष, वाजिन्, पक्षिन्, गरुत्मत् ।

—कट जाना, मु., अशक्त-असमर्थ (वि.) भू ।

—न मारना, मु., गंतुं न शक् (स्वा. प. अ.) ।

—निकलना, मु., दृप् (दि. प. अ.), गर्व् (भ्वा. प. से.), प्रगल्भ् (भ्वा. आ. से.) ।

परकार, सं. पुं. (फ़ा.) ।

परकीय, वि. (सं.) दे. 'पर'[१](२) ।

परकीया, सं. स्त्री. (सं.) नायिकाभेदः, परपुरुषानुरागिणी ।

परकोटा, सं. पुं. (सं. परिकूटं>) प्राकारः, वप्रः-प्रं, तालः, वरणः ।

परख, सं. स्त्री. (सं. परीक्षा) विमर्शः, सूक्ष्म,-निरूपणं-परीक्षणं-दर्शनं २. विवेकः, विचारणा, परिच्छेदः ।

परखना, क्रि. स. (सं. परीक्षणं) परीक्ष् (भ्वा. आ. से.) विमृश् (तु. प. अ.) २. विविच् (रु. उ. अ.), विज्-विच् (जु. उ. अ.), परिच्छिद् (रु. प. अ.) । सं. पुं., दे. 'परख' ।

परखनेवाला, सं. पुं., दे. 'परीक्षक' ।

परखा हुआ, वि., दे. 'परीक्षित' ।

परगना, सं. पुं. (फ़ा.) उपमंडलविभागः, ग्रामसमूहः, *परिगणः ।

परगहनी, सं. स्त्री. (सं. प्रग्रहणं >) सुवर्णकाराणां नालाकार उपकरणभेदः, *प्रग्रहणी ।

परचना, क्रि. अ. (सं. परिचयनं) परि-चि (स्वा. उ. अ.), सुपरिचित (वि.) भू, रूढबद्ध,-सख्य-सौहृद (वि.) भू ।

परचा, सं. पुं. (फ़ा.) (परीक्षायाः) प्रश्नपत्रं २. संदेश-,पत्रं ३. पत्रखंडः-डम् ।

परचाना, क्रि. स., व. 'परचना' के प्रे. रूप ।

परचून, सं. पुं. (सं. पर=अन्य+चूर्णं=आटा>) प्रकीर्ण-विविध,-पण्यं, *परचूर्णम् ।

परचूनिया, सं. पुं. (हिं. परचून) स्तोकशः-अल्पशः विक्रयिन्-विक्रेतृ, खंडवणिज् (पुं.) ।

परछत्ती, सं. स्त्री. (सं. प्र+हिं. छत) *प्र,-छदिः (स्त्री.)-छदिस् (न.)-पटलं २. तृण,-पटलं-छदिः ।

परछन, सं. स्त्री. (सं. परि+अर्चनं) (वधू-संबंधिनीभिः वरस्य) पर्यर्चनं-पर्यर्चा ।

परछांई, सं. स्त्री. (सं. प्रतिच्छाया) छाया, छायाकृतिः (स्त्री.) २. प्रतिबिंबः-बं, प्रति,-रूपं-फलं-मूर्तिः (स्त्री.) ।

परजौट, सं. पुं. (हिं. परजा) *गृहभूमिकरः ।

परतंत्र, वि. (सं.) पराधीन, परायत्त, पराश्रित, परवश, परावलंबिन्, परनिघ्न ।

परतंत्रता, सं. स्त्री. (सं.) पराधीनता, पराश्रयः, परावलंबनं, परवशता इ. ।

परत, सं. स्त्री. (सं. पत्रं>) अथवा स्तरः, तलं २. पुटः, भंगः, वलिः (स्त्री.) ३. दे. 'पपड़ी'(१) ।

परतल, सं. पुं. (सं. पटललं>) *अश्व-गोणी-प्रसेवः-भारः ।

—का टट्टू, सं. पुं. पृष्ठ्यः, स्थौरिन् ।

परतला, सं. पुं. (सं. परि+तन्) खड्ग-कृपाण,-पट्टिका ।

परती, सं. स्त्री., दे. 'पड़ती' ।

परदा, सं. पुं. (फ़ा.) अपटी, तिरस्करिणी, कांडपट-टकः, ज(य)वनिका, प्रतिसी(सी)रा २. व्यवधानं ३. अवगुंठनं-ठिका ४. (नारीणां) एकांतवासः, परपुरुषादर्शनं ५. स्तरः, तलं ६. व्यवधायककुड्यं ७. पटलं, आवरकं ८. आवरणं, आच्छादनं ९. वाद्यानां स्वरोद्गमस्थानम् ।

—उठाना या खोलना, मु., रहस्यं-गुह्यं प्रकटयति (ना. धा.)-प्रकाश् (प्रे.) ।

—करना या रखना, मु., अवगुंठ् (चु.), अंतःपुरे वस् (भ्वा. प. अ.) ।

—नशीन, वि. (फ़ा.) अवगुंठनवती, अंतःपुरवासिनी ।

परदादा, सं. पुं., दे. 'पड़दादा' ।

परदेस, सं. पुं. (सं. परदेशः) विदेशः ।

परदेसी, सं. पुं. (सं. परदेशीयः) विदेशीयः, पारदेशिकः, वैदेशिकः । वि., अन्य-पर,-देशीय ।

परनाना, सं. पुं., दे. 'पड़नाना' ।

परनाला, सं. पुं. (सं.) प्रणालः ।

परनाली, सं. स्त्री. (सं. प्रणाली) परि(री)-वाहः, सरणिः (स्त्री.), निर्गमः जलनिस्सरण-मार्गः, जलोच्छ्वासः ।

पर(ड़)पोता, सं. पुं. (सं. प्रपौत्रः) पुत्रपौत्रः, पौत्रपुत्रः ।

पर(ड़)पोती, सं. स्त्री. (सं. प्रपौत्री) पुत्रपौत्री, पौत्रपुत्री ।

परब्रह्म, सं. पुं. (सं. न.) परमेश्वरः, निर्गुणो जगदीश्वरः ।

परभृत, सं. स्त्री. (सं. पुं.) कोकिलः, पिकः ।

परम, वि. (सं.) उत्तम, श्रेष्ठ २. आदिम, प्रथम ३. प्रधान, मुख्य ३. अत्यधिक अत्यंत ।

—गति, सं. स्त्री. (सं.)
—धाम, सं.पुं.[सं.-मन्(न.)]
—पद, सं. पुं. (सं. न.)
} मोक्षः, मुक्तिः (स्त्री.), अपवर्गः, निःश्रेयसम् ।

—ज्ञान, सं. पुं. (सं. न.) ब्रह्मज्ञानम् ।

—तत्त्व, सं. पुं. (सं. न) मूलसत्ता २. ईश्वरः ।

—पिता, सं. पुं. [सं.-तृ (पुं.)]
—पुरुष, सं. पुं. (सं.)
—ब्रह्म, सं. पुं. [सं.-ह्मन् (न.)]
} परमेश्वरः सच्चिदानंदो जगदीश्वरः ।

—हंस, सं. पुं. (सं.) संन्यासिभेदः २. ईश्वरः ।

परमानेंट, वि. (अं.) स्थिर, स्थायिन् ।

परमाक्षर, सं. पुं. (सं. न.) ओङ्कारः, प्रणवः ।

परमाणु, सं. पुं. (सं.) भूजलानलानिलानां सूक्ष्मतमो लवः ।

—वाद, सं. पुं. (सं.) परमाणुभ्यो जगद्रचना इति न्यायवैशेषिकसिद्धांतः ।

परमात्मा, सं. पुं. (सं.-त्मन्) परमेश्वरः, परब्रह्मन् (न.) जगदीश्वरः, वि., धातृ (पुं.) ओम् (अव्य.) सच्चिदानंदः ।

परमानंद, सं. पुं. (सं.) अत्यंतसुखं २. ब्रह्म-सायुज्यसुखं ३. आनंदस्वरूपं ब्रह्मन् (न.) ।

परमान्न, सं. पुं. (सं. न.) पायसः-सं, क्षीरिका ।

परमायु, सं. स्त्री. [सं.-युस् (न.)] अधिकाधिक.युस् (न.), जीवनसीमा (यह मनुष्यों की १२० वर्ष है) ।

परमार्थ, सं. पुं. (सं.) उत्कृष्टवस्तु (न.) २. यथार्थतत्त्वं ३. मोक्षः ४. सुखम् ।

परमार्थी, वि. (सं.-र्थिन्) तत्त्वज्ञानाभिलाषिन् २. मुमुक्षु, मोक्षेच्छुक ।

परमेश्वर, सं. पुं. (सं.) दे. 'परमात्मा' २. विष्णुः ३. शिवः ।

परला, वि. (सं. पर) पर, परस्थ, परवर्तिन्, २. अनंतर, निरंतराल ३. दूर, दूर,-स्थ वर्तिन् ।

परलोक, सं. पुं. (सं.) लोकांतरं २. देहांतर-प्राप्तिः (स्त्री.), प्रेत्यभावः, पुनर्जन्मन् (न.) ।

—गमन, सं. पुं. (सं. न.) मृत्युः (पुं.) निधनम् ।

—वासी, वि. (सं.-सिन्) मृत, विपन्न, दिवंगत, स्वर्गिन् ।

—सिधारना, मु., दिवं-स्वर्गं-पंचत्वं गम् ।

परवरदिगार, सं. पुं. (फ़ा.) पालकः २. ईश्वरः ।

परवरिश, सं. स्त्री. (फ़ा.) पालनं, पोषणं, भरणम् ।

—करना, क्रि. स., परि-प्रति,-पा (प्रे. पालयति), संवृध्-परिपुष् (प्रे.) ।

परवल, सं. पुं. (सं. पटोलः) दे. 'पटोर' ।

परवश-स्थ, वि. (सं.) दे. 'परतंत्र' ।

परवशता, सं. स्त्री. (सं.) दे. 'परतंत्रता' ।

परवा[1], सं. स्त्री. (फ़ा.) आशंका, चिंता, व्यग्रता, उद्वेगः २. आश्रयः, अवलंबः ।

परवा[2], सं. स्त्री. (सं. 'प्रतिपदा' दे०)

परवाज़, सं. स्त्री. (फ़ा.) उड्डयनं, उत्पतनं, खे विसर्पणम् २. गर्वः, अवलेपः ।

परवानगी, सं. स्त्री. (फ़ा.) अनुमतिः (स्त्री.), अनुज्ञा ।

परवाना, सं. पुं. (फ़ा.) आज्ञा-शासन-अनुज्ञा,-पत्रं २. पतंगः, शलभः, दीपशत्रुः (पुं.) ।

—राहदारी, सं. पुं., दे. 'पासपोर्ट' ।

परवाल, सं. पुं. (सं. पर+वालः>) पक्ष्म-प्रकोपः ।

परशु, सं. पुं. (सं.) पर्शुः (पुं.) परश्वधः, पर्श्वधः, कुठारः ।

—राम, सं. पुं. (सं.) भार्गवः, जामदग्न्यः, पर्शुरामः ।

[illegible] दे. 'परशु' ।

[illegible] (सं. पर+फ़ा. साल) [illegible], गतवर्षं परुत् (अव्य.) २. (आगामी) उत्तर-पर-आगामि,-वर्षम् । क्रि. वि., परुत्, गतवर्षे २. आगामि,-वत्सरे-वर्षे ।

परसों, क्रि. वि. [सं. परश्वः (अव्य.)] श्वः-परदिनं २. ह्यः-पूर्वदिनम् ।

परस्पर, क्रि. वि. (सं. परस्परं) अन्योन्यं, इतरेतरं, मिथः (सब अव्य.) ।

—का, वि., परस्परस्य-अन्योऽन्यस्य-इतरेतरस्य (केवल एकवचन में), परस्पर-, अन्योन्य-, इतरेतर-, मिथः ।

परहित, सं. पुं. (सं. न.) दे. 'परोपकार' ।

परहेज़, सं. पुं. (फ़ा.) कुपथ्यत्यागः, पथ्य-सेवनं, मित,-अशनं-पानं, आहार-पानाशन,-नियमः २. संयमः, जितेन्द्रियता, दोष-दुर्गुण,-त्यागः ।

—करना, क्रि. स., कुपथ्यं त्यज् (भ्वा. प. अ.), २. दोषान् परि-वि-वर्ज् (चु.) ।

—गार, सं. पुं. (फ़ा.) कुपथ्यत्यागिन्, संयताहारः २. संयमिन्, जितेन्द्रियः ।

—गारी, सं. स्त्री. (फ़ा.) दे. 'परहेज़' (१–२) ।

पराँठा, सं. पुं. (हिं. पलटना ?) *परम-घृत-गर्भ,-रोटिका, परोटः ।

परांत, सं. पुं. (सं.) मृत्युः, निधनम् ।

—काल, सं. पुं. (सं.) मृत्युसमयः २. मुमुक्षूणां देहत्यागकालः ।

परा[1], सं. स्त्री. (सं.) ब्रह्म-उपनिषद्,-विद्या । वि. स्त्री. (सं.) परवर्तिनी, दूरस्था २. श्रेष्ठा ।

परा[2], सं. पुं. (फ़ा. पर=पंख ?) पंक्तिः-ततिः (स्त्री.) ।

पराकाष्ठा, सं. स्त्री. (सं.) अतिभूमिः-परा-कोटिः (स्त्री.), परमसीमा, परमावधिः (पुं.), अत्यंतता ।

पराक्रम, सं. पुं. (सं.) वीर्यं, शौर्यं, विक्रमः, पौरुषं, ओजस्-सहस्-तरस् (न.), रणोत्साहः ।

पराक्रमी, वि. (सं.-मिन्) वीर, शूर, विक्रमिन्, विक्रांत, वीर्य-विक्रम,-शालिन्, साहसिक [-की (स्त्री.)], तेजस्विन् [-नी (स्त्री.)] ।

पराग, सं. पुं. (सं.) पुष्प-कुसुम,-धूलिः (स्त्री.)-रजस् (न.)-रेणुः (पुं.) २. रजस्, धूलिः ३. स्नानीयसुगन्धिचूर्णं ४. चंदनं ५. कर्पूर-रजस् ।

पराङ्मुख, वि. (सं.) विमुख, पराचीन २. प्रतिकूल, विपरीत, विरक्त [पराङ्मुखी (स्त्री.)] ।

पराजय, सं. पुं. (सं.) पराभवः, हारी-रिः (स्त्री.) भंगः ।

पराजित, वि. (सं.) हारित, पराभूत, निर्-वि., जित ।
परात, सं. स्त्री. (सं. पात्रं>) पारीत्रा ।
पराधीन, वि. (सं.) दे. 'परतंत्र' ।
पराधीनता, सं. स्त्री. (सं.) 'परतंत्रता' ।
पराभव, सं. पुं. (सं.) दे. 'पराजय' २. तिरस्कारः, मानहानिः (स्त्री.) ३. विनाशः ।
पराभूत, वि.(सं.) दे. 'पराजित' २. तिरस्कृत ३. ध्वस्त, नष्ट ।
परामर्श, सं. पुं. (सं.) विवेचनं, विचारणा, वितर्कः, मंत्रणा, २. उपदेशः अनुशासनम् ।
परायण, वि. (सं.) लग्न, मग्न, प्रवृत्त, पर, निरत (प्रायः समासांत में, उ. धर्मपरायण= धर्मपर इ.)।
पराया, वि. पुं. (सं. पर) दे. 'पर१' (२) ।
परार, सं. पुं. [सं. परारि (अव्य.)] पूर्वतरवत्सरः, गततृतीयवर्षः-र्षम् ।
परार्द्ध, सं. पुं. (सं. न.) शंखः-खं, अष्टादशांकवती संख्या (१०००००००००००००००००)।
परावर, वि. (सं.) पूर्वापर २. निकटदूर ३. सर्वोत्तम, सर्वश्रेष्ठ ।
परावर्त, सं. पुं. (सं.) (निर्णयादिकस्य) परा-प्रत्या,-वृत्तिः (स्त्री.) वर्तनम् ।
—व्यवहार, सं. पुं. (सं.) अभियोगस्य निर्णयस्य वा पुनर्विचारः ।
परावर्तन, सं. पुं. (सं. न.) प्रतिनि-नि-परा-प्रत्या,-वृत्तिः (स्त्री.)-वर्तनं, अप,-क्रमणं-सरणं-यानम् ।
पराशर, सं. पुं. (सं.) व्यासपितृ ।
पराश्रय, सं. पुं. (सं.) अन्य-पर,-संश्रयः-अवलम्बः-अवलंबनं २. दे. 'परतंत्रता' ।
पराश्रित, वि. (सं.) अन्य-पर,-संश्रित–अवलंबित २. दे. 'परतंत्र' ।
परासु, वि. (सं.) प्रेतः-ता-तं, मृतः-ता-तम्, परेतः-ता-तं, निर्जीवः-वा-वं, प्रणीतः-ता-तम् ।
परास्त, वि. (सं.) दे. 'पराजित' ।
पराह्न, सं. पुं. (सं.) अपराह्णः, विकालः ।
परिंदा, सं. पुं. (फ़ा.) पक्षिन्, पत्रिन्, पतत्रिन, खगः ।
परिकर, सं. पुं. (सं.) परिजनः, अनुचरवर्गः २. कटिबंधः, प्रगाढ़गात्रिकाबंधः ३. कुटुम्बं ४. समूहः ५. अर्थालंकारभेदः (सा.) ।

परिकल्पित, वि. (सं.) रचित, आविष्कृत २. कल्पित, उद्भावित ३. निश्चित ।
परिक्रमा, सं. स्त्री. (सं.-मः) प्रदक्षिणः-णा-णं, (पूजार्थं) परिभ्रमणम् ।
—करना, क्रि. स., परिक्रम् (भ्वा. प. से.; भ्वा. आ. अ.), (पूजार्थं) परि-भ्रम् (भ्वा. प. से.) प्रदक्षिणां कृ ।
परिखा, सं. स्त्री. (सं.) खातं, खेयम् ।
परिख्यात, वि. (सं.) विख्यात, विश्रुत ।
परिगणन, सं. पुं. (सं. न.) संख्यानं, सम्यक् गणनम् ।
परिगृहीत, वि. (सं.) स्वीकृत, उररीकृत २. प्राप्त, लब्ध २. अंतर्भूत, समाविष्ट ।
परिग्रह, सं. पुं. (सं.) आदानं, ग्रहणं, प्रतिग्रहः २. लब्धिः-प्राप्तिः (स्त्री.) ३. धनादिसंग्रहः ४. स्वी-अंगी,-कार ५. विवाहः ६. पत्नी ७. परिजनः, परिवारः ८. परिवेष्टनम् ।
परिघ, सं. पुं. (सं.) परिघातनः लोहमुखलगुडः २. परि,-घातःहननं ३. अर्गलः-लं-ला-ली ४. मुद्गरः ५. शूलः ६. कलसः ७. भवनं प्रतिबंधः, बाधा ।
परिचय, सं. पुं. (सं.) परि-, ज्ञानं, अभिज्ञता, बोधः २. प्रमाणं, उपपत्तिः (स्त्री.) ३.अभ्यासः ।
परिचर, सं. पुं. (सं.) अनुचरः, सेवकः, दे. 'परिचारक' ।
प्रतियोगिता, सं. स्त्री. (सं.) प्रतिद्वंद्विता, प्रतिस्पर्द्धा, अहमहमिका, विजिगीषा २.विरोधः, शत्रुता ।

प्रतियोगी, सं. पुं. (सं.-गिन्) प्रतिद्वंद्विन्, प्रतिस्पर्द्धिन, विजिगीषुः २. शत्रुः, वैरिन् ३. सहायकः ३. अंशिन्, अंशभाज् ।

प्रतिरूप, सं. पुं. (सं. न.) मूर्तिः (स्त्री.), प्रतिमा २. चित्रं, आलेख्यं ३. प्रतिनिधिः ।

प्रतिरोध, सं. पुं. (सं.) विरोधः, प्रातिकूल्यं, वैपरीत्यं २. बाधः-धा, व्याघातः, प्रतिबंधः ।

प्रतिलिपि, सं. स्त्री. (सं.) अनुलिपिः (स्त्री.), प्रतिलेखः ।

प्रतिलोम, वि. (सं.) प्रतिकूल, विपरीत, विरुद्ध २. तुच्छ, नीच ३. विलोम, विपर्यस्त, व्यत्यस्त ।

प्रतिलोमज, सं. पुं. (सं.) वर्णसंकरः २. उत्तमवर्णायां नार्यां अधमवर्णात् पुरुषात् जातः ।

प्रतिवचन, सं. पुं. (सं. न.) उत्तरं, प्रतिवचस (न.) २. प्रतिध्वनिः ।

प्रतिवत्सर, अव्य. (सं.) प्रति-अनु,-वर्षं-वत्सरं-अब्दं, वर्षे-वर्षे, वत्सरे-वत्सरे ।

प्रतिवनिता, सं. स्त्री. (सं.) सपत्नी, सभार्या, समानपतिका ।

प्रतिवस्तु, सं. स्त्री. (सं.) सदृश-समान-तुल्य,-वस्तु (न.), पदार्थः २. प्रतिदत्तपदार्थः ३. उपमानम् ।

प्रतिवस्तूपमा, सं. स्त्री. (सं.) अर्थालंकारभेदः ।

प्रतिवाद, सं. पुं. (सं.) प्रत्याख्यानं, निराकरणं, निरासः, दे. 'खंडन' २. विवादः ३. उत्तरम् ।

प्रतिवादी, सं. पुं. (सं.-दिन्) प्रत्यर्थिन्, अभियुक्तः २. विपक्षिन्, प्रतिपक्षिन्, प्रत्याख्यातृ ।

प्रतिवासी, सं. पुं. (सं. सिन्) दे. 'पड़ोसी' ।

प्रतिवेशी, सं. पुं. (सं-शिन्) दे. 'पड़ोसी' ।

प्रतिशोध, सं. पुं. (सं.>) निर्यातनं, प्रति,-अपकारः-द्रोहः ।

प्रतिश्याय, सं. पुं. (सं.) दे. 'जुकाम' २. पीनसरोगः ।

प्रतिषिद्ध, वि. (सं.) दे. 'निषिद्ध' ।

प्रतिषेध, सं. पुं. (सं.) दे. 'निषेध' २. खंडनं, निरसनं ३. अर्थालंकारभेदः (सा.) ।

प्रतिष्ठा, सं. स्त्री. (सं.) संस्कारः, अर्हणा, सं-,मानः, आदरः, गौरवं २. यशस् (न.), कीर्तिः-विख्यातिः-प्रसिद्धिः (स्त्री.) ३. स्थापनं-ना, निधानम् ।

प्रतिष्ठित, वि. (सं.) सत्कृत, सं-,मानित, अभ्यर्चित २. विश्रुत, प्रसिद्ध, विख्यात २.स्थापित, प्रतिष्ठापित ।

प्रतिस्पर्द्धा, सं. स्त्री. (सं.) प्रत्यर्थिता, प्रतिद्वंद्विता, विजिगीषा, अहमहमिका २. कलहः ।

प्रतिस्पर्द्धी, सं. पुं. (सं.-द्धिन्) प्रत्यर्थिन्, प्रतिद्वंद्विन्, विजिगीषुः।

प्रतिहत, वि. (सं.) अव-प्रति,-रुद्ध, प्रतिबाधित २. पराणुन्न, परावर्तित ३. अपास्त, क्षिप्त ४. पतित ५. निराश ६. पराजित, परास्त।

प्रति(ती)हार, सं. पुं. (सं.) द्वार् (स्त्री.), द्वारं २. द्वारपालः, द्वाःस्थः।

प्रति(ती)हारी, सं. पुं. (सं.-रिन्) द्वारपालः, द्वाःस्थः, दौवारिकः। सं. स्त्री. (सं.) द्वारपालिका।

प्रतिहिंसा, सं. स्त्री. (सं.) प्रत्यपकारः, प्रत्यपक्रिया, प्रतिद्रोहः, प्रति-,निर्यातनम्।

प्रतीक, सं. पुं. (सं. न.) प्रतिमा, मूर्तिः २. मुखं, आननं ३. अग्रं, अग्रभागः ४. श्लोकादेः प्रथमशब्दः ५. अंगं, अवयवः ६. चिह्नं, लक्षणं ७. आकारः, रूपं ८. प्रतिरूपं, स्थानापन्नवस्तु (न.)।

प्रतीकार, सं. पुं. (सं.) दे. 'प्रतिकार'।

प्रतीक्षा, सं. स्त्री. (सं.) प्रतीक्षणं, उद्वीक्षा, प्रत्याशा, अपेक्षा।

—करना, क्रि. अ., अप-उद्-प्रति-ईक्ष् (भ्वा. आ. से.), अनु-प्रति-पा (प्रे. पालयति)।

प्रतीची, सं. स्त्री. (सं.) दे. 'पश्चिम'।

प्रतीत, वि. (सं.) ज्ञात, विदित, अवगत, बुद्ध २. प्रसिद्ध ३. प्रसन्न।

—होना, क्रि. अ., ज्ञा-अवगम्-बुध्-प्रती· (=प्रति-इ) (सब कर्म.)।

प्रतीति, सं. स्त्री. (सं.) ज्ञानं, बोधः, अवगमः २. ख्यातिः (स्त्री.) ३. विश्वासः ४. आनंदः ५. आदरः।

प्रतीप, वि. (सं.) विरुद्ध, विपरीत, प्रतिकूल।

प्रतीहार, सं. पुं. (सं.) दे. 'प्रतिहार'।

प्रत्यंचा, सं. स्त्री. (सं.) मौर्वी, शिंजिनी, ज्या, धनुर्गुणः।

प्रत्यक्ष, वि. (सं.) दृश्य, दृग्गोचर, पुरःस्थित २. इन्द्रियग्राह्य, इन्द्रियगोचर, ऐन्द्रियक ३. प्रकट, स्पष्ट। सं. पुं. (सं. न.) प्रमाणभेदः (न्याय.), अनुभवभेदः। क्रि. वि., नयनयोः पुरतः २. स्पष्टं, व्यक्तम्।

—दर्शी, सं. पुं. (सं.-र्शिन्) (प्रत्यक्ष-) साक्षिन् (

—प्रमाण, सं. पुं. (सं. न.) प्रमाणभेदः (न्या.)।

प्रत्यय, सं. पुं. (सं.) विश्वासः, विश्रंभः २. शब्दांतयभागः, प्रकृत्युत्तरं जायमानः आगमः (सुप् तिङ् आदि, व्या.) ३. प्रमाणं, साधनं ४. ज्ञानं ५. विचारः ६. व्याख्या ७. कारणं ८. आवश्यकता ९. प्रसिद्धिः (स्त्री.) १०. चिह्नं ११. निर्णयः १२. सम्मतिः (स्त्री.) १३. सहायकः १४. स्वादः।

प्रत्याख्यान, सं. पुं. (सं. न.) निराकरणं, निरसनं, खंडनम्।

प्रत्याशा, सं. स्त्री. (सं.) आशा, आशंसा, आकांक्षा २. उद्वीक्षा, प्रतीक्षा, अपेक्षा।

प्रत्याशी, वि. (सं.-शिन्) परीक्षार्थिन् २. पदान्वेषिन् ३. आशावत्, आशान्वित।

प्रत्याहार, सं. पुं. (सं.) प्रत्याहरणं, उपादानं, इन्द्रियनिग्रहः २. अल्पेन बहूनां ग्रहणं (उ. अच्=सब स्वरवर्ण, व्या.) (

प्रत्युक्ति, सं. स्त्री. (सं.) उत्तरं, प्रतिवचनम्।

प्रत्युत, अव्य. (सं.) दे. 'बल्कि'।

प्रत्युत्तर, सं. पुं. (सं. न.) उत्तरस्योत्तरं, उत्तरप्रतिवचनम्।

प्रत्युत्थान, सं. पुं. (सं. न.) स्वागतार्थम् उत्थानं-अभ्युत्थानम् २. शत्रुसाम्मुख्यार्थम् उत्थितिः (स्त्री.) ३. कार्यविशेषाय सज्जी भू, सन्नह् (दि. उ. अ.)।

प्रत्युत्पन्न, वि. (सं.) पुनरुत्पन्न २. स्वावसरे उत्पन्न।

—मति, वि. (सं.) तत्कालधी, कुशाग्रीयमति, सूक्ष्मदर्शिन् २. प्रतिभान्वित। सं. स्त्री. (सं.) तत्कालधीः (स्त्री.), कुशाग्रबुद्धिः (स्त्री.) २. प्रतिभा।

प्रत्युद्गमन, सं. पुं. (सं. न.) प्रत्युत्थानं, प्रत्युद्गमः।

प्रत्युपकार, सं. पुं. (सं.) प्रति,-उपकृतिः (स्त्री.)-साहाय्यम्।

प्रत्येक, वि. (सं.) एकैक, सर्व, सकल।

प्रथन, सं. पुं. (सं. न.) विस्तारः, विततिः-व्याप्तिः (स्त्री.) २. यशः-प्रसरणं-प्रसारणम् ३. क्षेपणम् ४. प्रदर्शनम्।

प्रथम, वि. (सं.) आद्य, आदिम, अग्रिम २. श्रेष्ठ, उत्तम ३. प्रधान, मुख्य। क्रि. वि. (सं. न.) अग्रे, आदौ, पूर्वं, प्रथमतः।

—कल्प, सं. पुं. (सं.) सर्वोत्तम-,उपायः-युक्तिः (स्त्री.) २. मुख्यनियमः।

—पुरुष, सं. पुं. (सं.) अन्यपुरुषः (व्या०)।

—वय, सं. पुं. (सं.-यस् न.) यौवनं, तारुण्यम्, नववयस् (न.)।

प्रथमा, सं. स्त्री. (सं.) विभक्तिविशेषः (व्या.) २. मदिरा।

प्रथा, सं. स्त्री. (सं.) रीतिः-रूढिः (स्त्री.), अनुसारः, आचारः, व्यवहारः २. दे.'प्रसिद्धि'।

प्रथित, वि. (सं.) दे. 'प्रसिद्ध'।

प्रदक्षिणा, सं. स्त्री. (सं.) प्रदक्षिणः-णं, परिक्रमः।

प्रदत्त, वि. (सं.) अर्पित, विश्राणित, उत्-वि,-सृष्ट, संक्रामित।

प्रदर, सं. पुं. (सं.) नारीरोगभेदः, असृग्दरः (द्वौ भेदौ–श्वेतप्रदरः, रक्तप्रदरः)।

प्रदर्शक, सं. पुं. (सं.) प्र-,दर्शयितृ, दर्शनकारयितृ २. दर्शकः, द्रष्टृ, प्रेक्षकः ३. गुरुः।

प्रदर्शन, सं. पुं. (सं. न.) प्रकटनं, प्रकाशनं, व्यंजनं, विजृम्भणं, प्रकटी-आविष्-करणं २. दे. 'नुमाइश'।

प्रदर्शनी, सं. स्त्री. (सं.) दे. 'नुमाइश'।

प्रदर्शित, वि. (सं.) प्रकटीकृत, प्रकटित, प्रकाशित।

प्रदान, सं. पुं. (सं. न.) दानं, विश्राणनं, अर्पणं, संक्रामणं २. विवाहः।

प्रदिशा, सं. स्त्री. (सं.) प्रदिश्-विदिश् (स्त्री.) विदिशा, दिक्कोणः।

प्रदीप, सं. पुं. (सं.) दीपः, कज्जलध्वजः, नयनोत्सवः दोषास्यः २. प्रकाशः।

प्रदीपन, सं. पुं. (सं. न.) उद्-सं,-दीपनं, प्रज्वलनं २. प्र-,द्योतनं, प्रकाशनं, ३. उत्तेजनं, प्रोत्साहनम्।

प्रदीप्त, वि. (सं.) प्रज्वलित, उद्-सं,-दीप्त, समिद्ध २. प्रकाशित, प्रकाशमान ३. उज्ज्वल, भासुर।

प्रदेश, सं. पुं. (सं.) चक्रं, मंडलं, प्रांतः, देशविभागः, भूभागः २. स्थानं, स्थलं ३.अंगं, अवयवः।

प्रदोष, सं. पुं. (सं.) संध्यासमयः, संध्या, सायंकालः, दिनावसानं, रजनीमुखं २. संध्यांधकारः।

प्रधान, वि. (सं.) मुख्य, श्रेष्ठ, अग्र्य, अग्रिम, परम, उत्तम, प्रमुख, विशिष्ट। सं. पुं., नेतृ, नायकः, पुरोगः, अग्रणीः २. मंत्रिन्, सचिवः ३. प्रकृतिः (स्त्री.), जगतः उपादानकारणं, प्रधानं ४. सभा,-पतिः-अध्यक्षः ५. ईश्वरः।

—मंत्री, सं. पुं. (सं.-त्रिन्) महामंत्रिन्, प्रधान,-अमात्यः-सचिवः।

प्रधानता, सं. स्त्री. (सं.) उत्तमता, श्रेष्ठता, मुख्यता २. नेतृत्वं, नायकत्वं ३. अध्यक्षता, सभापतित्वं ४. मंत्रिपदं, मंत्रित्वम्।

प्रध्वंस, सं. पुं. (सं.) वि-,नाशः, प्रणाशः, विध्वंसः, उच्छेदः संहारः।

प्रपंच, सं. पुं. (सं.) सृष्टिः (स्त्री.), संसारः, जगज्जालं २. विस्तरः, विस्तारः, ३. छलं, आडंबरः, कपटं ४. दे. 'बखेड़ा'।

प्रपंची, वि. (सं.-चिन्) कापटिक, मायाविन्, छलिन् २. चतुर, धूर्त ३. कलहप्रियः।

प्रपन्न, वि. (सं.) प्राप्त, आगत २. शरणागत।

प्रपात, सं. पुं. (सं.) दे. 'झरना' २. अतटः, भृगुः, निरवलंबः पर्वतादिपार्श्वः ३. अव,-पातः-पतनम्।

प्रपितामह, सं. पुं. (सं.) दे. 'पड़दादा'।

प्रपितामही, सं. स्त्री. (सं.) दे. 'पड़दादी'।

प्रपौत्र, सं. पुं. (सं.) दे. 'परपोता'।

प्रपौत्री, सं. स्त्री. (सं.) दे. 'परपोती'।

प्रफुल्ल, वि. (स.) विकसित, स्फुटित, उत्-सं,-फुल्ल, प्रबुद्ध, भिन्न, विकच २. कुसुमित, पुष्पित ३. उन्मीलित, उन्मिषित (नेत्र) ४. स्मित, आनंदित।

—नयन, वि. (सं.) विकचनेत्र [-त्रा,-त्री (स्त्री.)]।

—वदन, वि. (सं.) स्मितानन, प्रसन्नमुख [-नी (स्त्री.) = स्मिताननाना-नी, प्रसन्नमुखा स्त्री.]।

प्रफुल्लित, वि. (सं.) दे. 'प्रफुल्ल'।

प्रबंध, सं. पुं. (सं.) संविधा, उपायः, आयोजनं, प्रयोगः, युक्तिः (स्त्री.) २. अवेक्षा-क्षणं, निर्वाहः-हणं, प्रवर्तनं, अधिष्ठानं, व्यवस्थापनं, चालनं, व्यवस्था ३. निबंधः, लेखः, प्रस्तावः ४. महाकाव्यं, संग्रथितकविता।

—कर्ता, सं. पुं. (सं.-र्तृ) प्रबंधकः, आयोजकः, व्यवस्थापकः, निर्वाहकः, चालकः, अध्यक्षः, अधिष्ठातृ, अवेक्षकः।

—कल्पना, सं. स्त्री. (सं.) स्तोकसत्या कल्पनाबहुला कथा।

—कारिणी, सं. स्त्री. (सं.) प्रबन्ध-व्यवस्था,-कर्त्री समितिः (स्त्री.)।

—काव्य, सं. पुं. (सं. न.) क्रमबद्धकाव्यम्, श्रव्यकाव्यभेदः (सा०)।

प्रबंधक, सं. पुं. (सं.) दे. 'प्रबंधकर्ता'।

प्रबल, वि. (सं.) बलवत्, सबल, बलिन्, शक्तिमत्, ऊर्जस्विन्, प्रभविष्णु २. उग्र, घोर, तीव्र, प्र-,चंड।

प्रबुद्ध, वि. (सं.) जागरित, उन्निद्र, जाग्रत (शत्रंत) २. विकसित ३. ज्ञानिन्।

प्रबोध, सं. पुं. (सं.) जागरणं, प्रबोधनं, निद्रा,-भंगः-त्यागः २. यथार्थ-पूर्ण,-ज्ञानं ३.सांत्वनं-ना ४. विकासः ५. पूर्वनिवेदनं ६. चेतनालाभः, मूर्च्छाभंगः।

प्रबोधन, सं. पुं. (सं. न.) (निद्रांतः) उत्थानं, निद्राभंजनं २. जागरणं ३. उद्बोधः, उपदेशः, ज्ञापनं ४. सांत्वनम्।

प्रभंजन, सं. पुं. (सं.) वायुः, पवनः २.वात्या, झंझावातः, प्रकंपनः। (सं. न.) उत्पाटनं, उन्मूलनं, वि-, नाशनम्।

प्रभव, सं. पुं. (सं.) जन्महेतुः (पुं.) उत्पत्ति-कारणं २.उत्पत्तिस्थानं, आकरः ३. सृष्टिः(स्त्री.) ४. (नद्यादीनां) उद्गमः, उद्भवः, मूलम्।

प्रभा, सं. स्त्री. (सं.) दीप्तिः-द्युतिः-कांतिः-रुचिः-शोचिः (स्त्री.), आभा, विभा, प्रकाशः, त्विषा।

—कीट, सं. पुं. (सं.) खद्योतः, दे. 'जुगनू'।

प्रभाकर, सं. पुं. (सं.) दिवाकरः, दे. 'सूर्य'।

प्रभात, सं. पुं. (सं. न.) विभातं, प्रातःकालः, उषा, ऊषा, उषः, ऊषः, अहर्मुखं, क(का)ल्यं, व्युष्टं, प्रत्यु(त्यू)षः-षं, अरुणोदयः, विहानः-नं, उषस् (स्त्री.)।

प्रभाव, सं. पुं. (सं.)सामर्थ्यं,शक्तिः (स्त्री.), बलं २. माहात्म्यं, महत्त्वं ३. वशः-शं, प्राबल्यं ४. परिणामः, फलम्।

प्रभु, सं. पुं. (सं.) जगदीशः, परमेश्वरः २. स्वामिन्, भर्तृ ३. अधिपतिः, नायकः ३. श्रेष्ठजनोपाधिः।

—भक्त, वि. (सं.) स्वामिभक्त, कर्तव्यपर, सत्सेवक २. प्रभूपासक, भगवद्भक्त।

प्रभुता, सं. स्त्री. (सं.) महत्त्वं, माहात्म्यं २. शासकता, अधिकारित्वं ३. वैभवं ४. स्वामित्वं, प्रभुत्वम्।

प्रभूत, वि. (सं.) दे. 'प्रचुर' २. उत्पन्न, उद्भूत, उद्गत।

प्रभृति, क्रि. वि. (सं.) तदारभ्य, ततोऽनन्तरं, आदि,-इत्यादि। सं. स्त्री., आरंभः।

प्रभेद, सं. पुं. (सं.) प्रकारः, वर्गः, जातिः (स्त्री.) २. अंतरं, भेदः, भिदा।

प्रमत्त, वि. (सं.) उन्मद, मदोन्मत्त, मत्त, क्षीब २. उन्मत्त, वातुल, उन्मादिन्।

प्रमथन, सं. पुं. (सं. न.) विलोडनं २. क्लेशनं ३. हननम्।

प्रमद, सं. पुं. (सं.) आनंदः, हर्षः २. क्षीबता। वि., क्षीब।

प्रमदा, सं.स्त्री.(सं.) सुंदरी, उत्तमयोषित् (स्त्री.)।

प्रमा, सं. स्त्री. (सं.) यथार्थज्ञानं, शुद्धबोधः २. दे. 'माप'।

प्रमाण, सं. पुं. (सं. न.) निदर्शनं, साधनं, उपपत्तिः (स्त्री.) मुख्यहेतुः २. साक्ष्यं, प्रामाण्यं ३. सत्यता ४. इयत्ता, निर्दिष्टपरिमाणं ५. शास्त्रम्। वि.,सत्य, सिद्ध २. मान्य, स्वीकार्य।

—पत्र, सं. पुं. (सं. न.) आगम-निर्णय-निदर्शन,-पत्रम्।

प्रमाणित, वि. (सं.) साधित, उपपादित, स्थापित, प्रमाणी-सत्या,-कृत, सत्यापित।

प्रमाता, सं. पुं. (सं.-तृ) प्रमाणैःज्ञातृ-बोद्धृ।

प्रमातामह, सं. पुं. (सं.) मातामहपितृ।

प्रमातामही, सं. स्त्री. (सं.) प्रमातामहपत्नी।

प्रमाद, सं. पुं. (सं.) अनवधानं-नता, उपेक्षा, सावधानताऽभावः २. भ्रांतिः-त्रुटिः (स्त्री.), भ्रमः।

—करना, क्रि. अ., प्रमद् (दि. प. से.), प्रमादं कृ।

प्रमादिका, सं. स्त्री. (सं.) क्षतयोनिकन्या २. प्रमादिनी नारी।

प्रमादी, वि. (सं.-दिन्) अनवधान, प्रमत्त, अनवहित।

प्रमापण, सं. पुं. (सं. न.) वधः, हत्या, हननम्।

प्रमित, वि. (सं.) (यथार्थ) ज्ञात, अवगत २. परिमित, स्तोक ३. प्रमाणित।

प्रमिति, सं. स्त्री. (सं.) प्रमा, प्रमाणैः प्राप्तं सत्यज्ञानम् २. मानं, परिमाणम्।

प्रमुख, वि. (सं.) प्रधान, श्रेष्ठ, मुख्य २. प्रथम, आदिम ३. प्रतिष्ठित, मान्य ।
प्रमुदित, वि. (सं.) प्रहृष्ट, प्रसन्न, आनंदित ।
प्रमेह, सं. पुं. (सं.) मेहः, मूत्रदोषः, बहुमूत्रता ।
प्रमोद, सं. पुं. (सं.) हर्षः, आनंदः, प्रसन्नता २. सुखम् ।
प्रयत्न, सं. पुं. (सं.) उद्यमः, अध्यवसायः, आयासः, चेष्टा, चेष्टितं २. जीवव्यापारः(न्या.)।
—शील, वि. (सं.) प्रयत्नवत्, सयत्न, उद्यमिन्, अध्यवसायिन्, सचेष्ट।
प्रयाग, सं. पुं. (सं.) तीर्थविशेषः २. महायज्ञः ।
प्रयाण, सं. पुं. (सं. न.) प्रस्थानं, गमनं, व्रज्या, यात्रा २. युद्धयात्रा ।
—काल, सं.पुं.(सं.)गमनकालः २. मृत्युसमयः ।
प्रयास, सं. पुं. (सं.) उद्योगः, प्र,-यत्नः, परि-,श्रमः।
प्रयुक्त, वि. (सं.) व्यवहृत, व्यापृत, उपयुक्त, सेवित, उपभुक्त ।
प्रयोग, सं. पुं. (सं.) उपयोगः, उपभोगः, सेवनं, व्यवहारः २. अनुष्ठानं, साधनं ३. प्रक्रिया, विधानं ४. तांत्रिकोपचारः ५.अभिनयः ६. कुसीदाय ऋणदानम् ।
—करना, उप-प्र-युज् (रु. आ. अ.), व्यापृ (प्रे.), सेव् (भ्वा. आ. से.), उपभुज् (रु. आ. अ.)।
प्रयोजक, सं. पुं. (सं.) अनुष्ठातृ, उपयोक्तृ २. प्रेरकः ३. व्यवस्थापकः ।
प्रयोजन, सं. पुं. (सं. न.) अर्थः, कार्यं २. उद्देश्यं, अभिप्रायः, आशयः ।
प्रलयंकर, वि. (सं.) प्रलय-विनाश-संहार,-कर-कारिन् ।
प्रलय, सं. पुं. (सं.) कल्पांतः, प्रतिसंचयः, ब्रह्मांडनाशः, विलयः, संक्षयः ।
प्रलाप, सं. पुं. (सं.) निरर्थकवचनानि (बहु.), प्र-, जल्पः-जल्पनम् ।
प्रलोभन, सं. पुं. (सं. न.) विलोभनं, लोभेन प्रवर्तनं २. प्रलोभकपदार्थः, विकारहेतुः ।
प्रवंचना, सं. स्त्री. (सं.) धूर्तता, कैतवं,छलम् ।
प्रवचन, सं. पुं. (सं. न.) व्याख्यानं, विवरणं, प्रकाशनं, स्पष्टीकरणं २. व्याख्या ३. वेदांगम् ।
प्रवर, वि. (सं.) श्रेष्ठ, प्रधान, मुख्य (सं. न.) गोत्रम् । (सं. पुं.) संततिः (स्त्री.) २. गोत्र-प्रवर्तकमुनिव्यावर्तको मुनिगणः ।
प्रवर्तक, सं. पुं, (सं.) आरम्भकः, संस्थापकः, प्रवर्तयितृ २. संचालकः, निर्वाहकः ३. प्रेरकः, नियोजकः ४. उत्तेजकः ५. आविष्कारकः ।
प्रवर्तन, सं. पुं. (सं. न.) कार्योपक्रमणं, २. कार्य,-संचालनं-निर्वहणं ३. प्रचारणं ४. उत्तेजनम् ।
प्रवाद, सं. पुं. (सं.) जनश्रुतिः (स्त्री.), किंवदंती, लोक,-वादः-वार्त्ता २. अपवादः, मिथ्याकलंकः ।
प्रवाल, सं. पुं. (सं. पुं. न.) विद्रुमः २. किश-(स)लयः ३. वीणादण्डः ।
प्रवास, सं. पुं. (सं.) विदेशवासः २. विदेशः ।
प्रवासी, वि. (सं.-सिन्) प्रोषित, विदेशस्थ, विदेशवासिन् ।
प्रवाह, सं. न. (सं.) स्रवः, स्रवणं, स्रुतिः (स्त्री.), स्रावः २. (जल-) धारा, वेगः, ओघः, स्रोतस् (न.) ३. कार्यनिर्वाहः ४. व्यवहारः ५. प्रवृत्तिः (स्त्री.) ६. क्रमः, सततगतिः (स्त्री.) ।
प्रविष्ट, वि. (सं.) कृतप्रवेश, अन्तर्गत ।
प्रवीण, वि. (सं.) निपुण, कुशल, दक्ष, पटु, चतुर, निष्णात, विज्ञ २. वीणावादनकुशल ।
प्रवीणता, सं. स्त्री. (सं.) नैपुण्यं, दाक्ष्यं, कौशलं, पाटवं, चातुर्यम् ।
प्रवृत्त, वि. (सं.) रत, मग्न, -पर, -परायण २. उद्यत ३. नियुक्त ।
—करना, क्रि. स., प्रवृत् (प्रे.), नि-उद्-युज् (चु.) प्रवणी कृ, प्रेर् (प्रे.) ।
—होना, क्रि. अ., प्रवृत् (भ्वा. आ. से.), रत मग्न-तत्पर (वि.) भू ।
प्रवृत्ति, सं. स्त्री. (सं.) रुचिः (स्त्री.), छंदः, अभिलाषः, भावः २. वृत्तांतः ३. कार्यनिर्वाहः ४. विषयासंगः ५. उत्पत्तिः (स्त्री.) ।
प्रवेश, सं. पुं. (सं.) अन्तर्,-विगाहनं-गमनं २. गतिः (स्त्री.), उपगमः ३. बोधः, ज्ञानं, परिचयः ।
—पत्र, सं. पुं. (सं. न.) प्रविष्टि,-पत्रं-पत्रकम् ।
—शुल्क, सं. पुं. (सं.) प्रविष्टि,-शुल्कः-कम् ।
प्रवेशिका, सं. स्त्री. (सं.) परीक्षाभेदः २. प्रवेष्ट्री ।
प्रव्रजित, वि. (सं.) सन्न्यासिन्, चतुर्थाश्रमिन्, परिव्राजक ।

प्रव्रज्या, सं. स्त्री. (सं.) *सन्न्यासः, वैराग्यम्, चतुर्थाश्रमः।

प्रशंसक, सं. पुं. (सं.) स्तोतृ, स्तावकः, नावकः, श्लाघकः २. चाटुकारः।

प्रशंसनीय, वि. (सं.) प्रशंस्य, श्लाघ्य, स्तुत्य, नुत्य. प्रशंसार्ह।

प्रशंसा, सं. स्त्री. (सं.) श्लाघा, स्तुतिः-नुतिः-नुः (स्त्री.), स्तवः, कीर्तनं, ईडा।

—करना, क्रि. स., प्रशंस् (भ्वा. प. से.), श्लाघ् (भ्वा. आ. से.), नु (अ. प. से.), स्तु (अ. प. अ.); ईड् (अ. आ. से.)।

—होना, क्रि. अ., प्रशंस्-स्तु-नु श्लाघ् (कर्म.)।

प्रशंसित, वि. (सं.) दे. 'प्रशस्त'।

प्रशमन, सं. पुं. (सं. न.) शमनं, शांतिः (स्त्री.) २. नाशनं ३. मारणं ४. वशीकरणम्।

प्रशस्त, वि. (सं.) नुत, नूत, स्तुत, श्लाघित, प्रशंसित २. दे. 'प्रशंसनीय' ३. उत्तम, श्रेष्ठ।

—पाद, सं. पुं. (सं.) दर्शनाचार्यविशेषः।

प्रशस्ति, सं. स्त्री. (सं.) दे. 'प्रशंसा' २. पत्रारंभे प्रशंसावाक्यं ३. राज्ञां कीर्तिलेखः ४. प्राचीनग्रन्थानां लेखकादिपरिचायकानि आद्यंतवाक्यानि।

प्रशस्य, वि. (सं.) दे. 'प्रशंसनीय' २. उत्तम।

प्रशांत, वि. (सं.) स्थिर, क्षोभहीन, निश्चल, स्तिमित, निष्कंप २. शांतचित्त, क्षोभ, उद्वेग-शून्य।

प्रशाखा, सं. स्त्री. (सं.) लघु-तनु,-शाखा, प्रशाखिका।

प्रश्न, सं. पुं. (सं.) पृच्छा, अनुयोगः, २. विकल्प-विवाद-जिज्ञासा,-विषयः।

—उत्तर, सं. पुं. (सं. रं-रे) अनुयोगप्रतिवचनं-ने (द्वि.), संवादः।

—करना, या पूछना, क्रि. स., प्रश्नं प्रच्छ् (तु. प. अ.), प्रश्नयति (ना. धा.), अनुयुज् (रु. आ. अ.)।

प्रश्वास, सं. पुं. (सं.) उच्छ्वासः २. उच्छ्वसनम्।

प्रष्टव्य, वि. (सं.) प्रश्नार्ह २. पृच्छाविषयः।

प्रसंग, सं. पुं. (सं.) विषयानुक्रमः, प्रकरणं, अर्थसंगतिः (स्त्री.) २. मैथुनं ३. संबंधः, संगतिः (स्त्री.) ४. अनुरक्तिः (स्त्री.) ५. वार्ता, विषयः ६. सदवसरः ७. विस्तारः।

प्रसक्त, वि. (सं.) संलग्न, संश्लिष्ट २. आसक्त ३. प्रस्तावित।

प्रसन्न, वि. (सं.) सं-,तुष्ट, प्र-,हृष्ट, सानंद, आनंदित, प्र-,मुदित, प्रफुल्ल २. निर्मल।

—करना, क्रि. स., आनंद्-आह्लाद्-तुष्-प्रसद्-प्रमुद्-प्रहृष् (प्रे.)।

—होना, क्रि. अ., प्रसद् (भ्वा. प. अ.), आह्लाद्-प्रमुद् (भ्वा. आ. से.), प्र-,हृष् (दि. प. से.)।

प्रसन्नता, सं. स्त्री. (सं.) आनंदः, आह्लादः, प्र-,हर्षः,सं.-तोषः, प्र-,मोदः,उल्लासः २.अनुग्रहः ३. स्वच्छता।

प्रसव, सं. पुं. (सं.) जननं, प्रसूतिः (स्त्री.), गर्भमोचनं २. जन्मन् (न.), उत्पत्तिः (स्त्री.) ३. संतानः ४. फलं ५. कुसुमम्।

प्रसविनी, वि. (स्त्री.) उत्पादयित्री, जनयित्री, प्रसवित्री।

प्रसाद, सं. पुं. (सं.) कृपा, दया., अनुग्रहः २. प्रसन्नता ३. स्वच्छता ४. काव्यगुणविशेषः (सा.) ५. देवाद्यवशिष्टपदार्थः, शेषः ६. भोजनं ७. नैवेद्यं, वायनं-नकम्।

प्रसादी, सं. स्त्री. (सं. प्रसादः>) देवार्पितपदार्थः २. नैवेद्यं ३. गुरुजनदत्तवस्तु (न.)।

प्रसाधन, सं. पुं. (सं. न.) वेशः-षः २. भूषणं, मंडनं, शृंगारः ३. निष्-सं,-पादनं, करणम्।

प्रसाधित, वि. (सं.) परिष्-संस्,-कृत २. सु-सम्पादित।

प्रसार, सं. पुं. (सं.) प्रसरः, विस्तारः, विततिः (स्त्री.)।

प्रसिद्ध, वि. (सं.) प्र-वि-,ख्यात, यशस्विन्, कीर्तिमत्, लोकविश्रुत, यशोधर, सुशंस, लब्धकीर्ति।

प्रसिद्धि, सं. स्त्री. (सं.) ख्यातिः-कीर्तिः-विश्रुतिः (स्त्री.), यशस् (न.), श्लोकः, विश्रावः।

प्रसू, सं. स्त्री. (सं.) जननी, मातृ (स्त्री.)। वि., प्रसवित्री, जनयित्री।

प्रसूता, सं. स्त्री. (सं.) जातापत्या, प्रजाता, प्रसूतिका।

—का बुखार, सं. पुं., सूतिकाज्वरः।

प्रसूति, सं. स्त्री. (सं.) प्रसवः, जननं २. उद्भवः ३. उत्पत्तिस्थानं ४. संततिः (स्त्री.) ५. प्रसूता।

प्रसून, सं. पुं. (सं. न.) कुसुमं, पुष्पं २. फलम् । वि., जात, उत्पन्न ।

—वर्ष, सं. पुं. (सं.) पुष्पवृष्टिः (स्त्री.) ।

—वाण, सं. पुं. (सं.) पुष्प-,शरः-बाणः, कामः, मदनः ।

प्रसृत, वि. (सं.) प्रगत, प्रचलित २. विस्तृत, विस्तीर्ण ३. लंब, दीर्घ, आयत ४. व्यस्त, संलग्न ५. सुशील, विनम्र ६. गत, यात ७. स्फूर्तिमत्

प्रसृता, सं. स्त्री. (सं.) जंघा, टक्किका ।

प्रसेक, सं. पुं. (सं.) आ-अव-, सेकः-सेचनम्, अभिवर्षणं, अभ्युक्षणं, प्रोक्षणम् क्षरणं, गलनं, स्रवणम् ३. वमनं, वयः, वयिः (स्त्री.) ४. दर्विका,-कटोरिका-अग्रभागः ।

प्रस्तर, सं. पुं. (सं.) शिला, पाषाणः, दे. 'पत्थर' ।

प्रस्ताव, सं. पं. (सं.) अवसरः, उचितकालः २. प्रसंगः, विषयः ३. प्रकरणं ४. उपक्षेपः, उपन्यासः ५. प्र-नि,-बंधः, लेखः ६. दे. 'प्रस्तावना' ।

प्रस्तावना, सं. स्त्री. (सं.) भूमिका, उपोद्घातः, प्राक्कथनं, आमुखं, अवतरणिका २. आरम्भः, उपक्रमः ।

प्रस्तुत, वि. (सं.) नु(नू)त, श्लाघित । २. उक्त, कथित ३. प्रासंगिक, प्रसंगप्राप्त ४. उपस्थित, प्रतिपन्न ५. उद्यत, सज्ज ६. निष्पन्न, संपादित ।

प्रस्थान, सं. पुं. (सं. न.) प्रयाणं, अपक्रमः, गमनं, यात्रा २. विजिगीषुसेनायाः प्रयाणम् ।

प्रस्वेद, सं. पुं. (सं.) दे. 'पसीना' ।

प्रहर, सं. पुं. (सं.) यामः, दे. 'पहर' ।

प्रहरी, वि. (सं.-रिन्) दे. 'पहरा' सं. पुं. २ ।

प्रहसन, सं. पुं. (सं. न.) रूपक-नाटक,-भेदः, २. परिहासः, विनोदः ३. अव-उप,-हासः ।

प्रहार, सं. पुं. (सं.) आघातः, ताडः, निर्घातः, हथः ।

—करना, क्रि. सं. आहन् (अ. प. अ.), प्रहृ (भ्वा. प. अ.), तड् (चु.), प्रहारं कृ ।

प्रहृष्ट, वि. (सं.) प्रमुदित, सुप्रसन्न, अत्यानंदित ।

प्रहेलिका, सं. स्त्री. (सं.) प्रश्नदूती, दे. 'पहेली' ।

प्रांगण, सं.पुं. (सं. न.)अजिरं, अंगनं, चत्वरम् ।

प्रांजल, वि. (सं.) सरल, ऋजु, २. सत्य, यथार्थ ३. सम, समतल ।

प्रांत, सं. पुं. (सं.) देशभागः, राष्ट्रविभागः २. भूखंडः, प्रदेशः ३. सीमा, समंतः ४. अग्रं, कोटिः (स्त्री.) ५. दिश् (स्त्री.) ।

प्रांतीय, वि. (सं.) प्रांतिक, प्रांत,संबंधिन्-विषयक ।

प्राइवेट, वि. (अं.) स्वकीय, आत्मीय २. विशिष्ट, असार्वजनिक ३. गुप्त, संवरणीय ।

—सेक्रेटरी, सं. पुं. (अं.) *स्वकीयसचिवः ।

प्राकार, सं. पुं. (सं.) वप्रः-प्रं, शा(सा)लः, वरणः ।

प्राकृत, वि. (सं.) प्रकृतिज, प्राकृतिक २. स्वाभाविक, नैसर्गिक ३. साधारण ४. लौकिक ५. तुच्छ, नीच ६. भौतिक । सं. स्त्री. (सं. न.) व्यवहारभाषा २. प्राचीन-भाषाविशेषः ।

प्राकृतिक, वि. (सं.) दे. 'प्राकृत' ।

प्राची, सं. स्त्री. (सं.) पूर्वदिशा, पूर्वदिश् (स्त्री.) २. पूजकपूज्ययोः पुरोवर्तिदिशा ।

प्राचीन, वि. (सं.) पुराण, प्राक्तन, पुरातन, पूर्व, प्राक्कालीन २. पूर्वदेशीय, प्राच्य, पौरस्त्य, पूर्वदिक्स्थ, प्रांच् ।

प्राचीनता, सं. स्त्री. (सं.) पुराणता, पुरातनता इ. ।

प्राचीर, सं. पुं. (सं. न.) प्रांततो वृत्तिः (स्त्री.) प्रावरः, प्रावृतिः (स्त्री.), दे. 'प्रकार' ।

प्राचुर्य, सं. पुं. (सं. न.) 'प्रचुरता' ।

प्राच्य, वि. (सं.) दे. 'प्राचीन' (१-२) ।

प्राज्ञ, वि. तथा सं. पुं. (सं.) पंडित(:), विज्ञ (:), धीमत्, बुद्धिमत्, विद्वस् ।

प्राज्ञी, सं. स्त्री. तथा वि. (सं.) पंडिता, बुद्धिमती, विदुषी (नारी) ।

प्राण, सं. पुं. (सं. प्राणाः बहु.) असवः (बहु.) हृन्मारुतः २. श्वासः, उच्छ्वासः, श्वसितं, ३. पवनः, अनिलः ४. बलं, शक्तिः (स्त्री.) ५. जीवनं, चैतन्यं ६. आत्मन् ७. प्रियो मनुष्यः पदार्थो वा ।

—त्याग, सं. पुं. (सं.) मृत्युः, निधनं २.आत्म,-हत्या-घातः ।

—दंड, सं. पुं. (सं.) देह-मृत्यु,-दंडः, उत्तम-साहसम् ।

—धारण, सं. पुं. (सं. न.) जीवनं, प्राणनं, देहधारणम् ।

—नाथ, सं. पुं. (सं.) प्राणपतिः, प्राणेश्वरः, पतिः, भर्तृ २. दयितः, वल्लभः ।

—प्रतिष्ठा, सं. स्त्री. (सं.) देवप्रतिमायां प्राणस्थापनविधिः ।

—प्रिय, वि. (सं.) प्रियतम, अत्यंतप्रिय । सं. पुं., भर्तृ, पतिः ।

—हर, वि. (सं.) प्राणहारिन्, मारक, घातक ।

—उड़ जाना, मु., अत्यंतं त्रस् (दि. प से.) भी (जु. प. अ.), भयविह्वल(वि.)भू ।

—गले तक आना, मु., आसन्नमृत्यु (वि.) भू, कंठगतप्राण (वि.) जन् (दि. आ. से.) ।

—त्यागना, देना या निकालना, मु., प्राणान् त्यज् (भ्वा. प. अ.) दे. 'मरना' ।

—लेना, मु., हन् (अ. प. अ.), मृ-व्यापद् (प्रे.) हिंस् (रु. प. से. चु.) ।

प्राणांत, सं. पुं. (सं.) निधनं, मरणम् ।

प्राणांतक, वि. (सं.) प्राण,-हर-हारिन्, घातक, मारक ।

प्राणात्यय, सं. पुं. (सं.) मृत्युः, निधनम् २. प्राणान्त-देहान्त-समयः-कालः ३. प्राण,-भयं-संशयः-संकटम् ।

प्राणाधार, सं. पुं. (सं.) पतिः, भर्तृ । वि., जीवनाश्रय, अतिप्रिय ।

प्राणायाम, सं. पुं. (सं.) योगांगभेदः, श्वासप्रश्वासगतिनिरोधः ।

प्राणाहुति, सं. स्त्री. (सं.) जीवनोत्सर्गः, आत्मबलिः, भोजनारम्भे पंचप्राणेभ्यो भक्षणम् ।

प्राणी, वि. (सं.-णिन्) सप्राण, प्राणधारिन्, संजीव, जीवत् (शत्रंत) । सं. पुं. जीवः, जंतुः २. मनुष्यः ३. व्यक्ति (स्त्री.) ।

प्राणेश-श्वर, सं. पुं. (सं.) दे. 'प्राण' के नीचे 'प्राणनाथ' ।

प्राणोपहार, सं. पुं. (सं.) आहारः, भोजनं, खाद्यम्, भक्ष्यम् ।

प्रातः, अव्य.
प्रातःकाल, सं. पुं. } (सं.) दे. 'प्रभात' ।

प्रातः-स्मरणीय, वि. (सं.) पुण्य,-श्लोक-शील-चरित, महात्मन्, पुण्यात्मन् ।

प्रात, क्रि. वि. (सं. प्रातर् अव्य.) प्रातःकाले, प्रभातसमये ।

—नाथ, सं. पुं. (सं.) सूर्यः, भानुः ।

—भोजन, सं. पुं., दे. 'कलेवा' ।

प्राथमिक, वि. (सं.) आद्य, आदिम, प्रारंभिक २. पूर्व, प्रावेशिक, प्रास्ताविक ३. मौल, मौलिक ।

प्रादुर्भाव, सं. पुं. (सं.) आविर्भावः, प्राकट्यं, प्राकाश्यं, व्यक्तता २. उत्पत्तिः (स्त्री.), जन्मन् (न.) ।

प्रादुर्भूत, वि. (सं.) आविर्भूत, प्रकटित, प्रकटीभूत, व्यक्त २. जात, उत्पन्न ।

प्राधान्य, सं. पुं. (सं. न.) दे. 'प्रधानता' ।

प्राप्त, वि. (सं.) लब्ध, अधिगत, आसादित, प्रतिपन्न, वित्त, विन्न ।

—करना, क्रि. स., प्र-,आप् (स्वा. प. अ.), अधिगम्, लभ् (भ्वा. आ. अ.) आसद् (प्रे.), विद् (तु. उ. वे.) ।

—होना, क्रि. अ. आप्-लभ्-अभिगम् (कर्म.) ।

प्राप्ति, सं. स्त्री. (सं.) लाभः, प्रतिपत्तिः-उपलब्धिः (स्त्री.) अधिगमः, प्रापणं २. गतिः (स्त्री.) ३. अर्जनं ४. आयः, अर्थागमः ।

प्राप्य, वि. (सं.) लभ्य, अधिगंतव्य, प्राप्तव्य २. समासादनीय, गम्य ।

प्रामाणिक, वि. (सं.) सप्रमाण, प्रमाणसिद्ध, २. विश्वसनीय, विश्वास्य ३. सत्य, तथ्य ४. शास्त्रसिद्ध ५. हैतुक, युक्तियुक्त ।

प्रामाण्य, सं. पुं. (सं. न.) प्रमाणता-त्वं २. प्रतिष्ठा ।

प्रायः, क्रि. वि. (सं.) प्रायशः बहुशः,-धा, प्रायेण, मुहुर्मुहुः, भूयोभूयः, अनेकशः, अभीक्ष्णं २.-कल्प,-भूयिष्ठ,-प्राय, (उ. दे. 'प्राय' की टि.), उप-(उ. उपविंशाः छात्राः) ।

प्राय, सं. पुं. (सं.) प्रस्थानं, प्रयाणं २. मरणं ३. मरणार्थमनशनं, दे. 'धरना' ।

—द्वीप, सं. पुं., द्वीपकल्पः-पम् ।

(टि. जब 'प्राय' समासांत में हो तब १.-तुल्य, सदृश (उ. अमृतप्राय वचन = अमृत,तुल्यं-सदृशं वचनं) २.-भूयिष्ठ,-कल्प (उ. मृतप्रायो मनुष्यः, मृत,-कल्पः-भूयिष्ठः मानवः) ।

प्रायश्चित्त, सं. पुं. (सं. न.) पाप,-निष्कृतिः-विशुद्धिः (दोनों स्त्री.), अघ,-नाशनं-क्षालनं-मार्जनं, पापनाशककृत्यम् ।

प्रारंभ, सं. पुं. (सं.) उपक्रमः २. आदिः ।

प्रारंभिक, वि. (सं.) औपक्रमिक, आरंभिक २. आद्य, आदिम ३. प्राथमिक, प्रावेशिक ।

प्रारब्ध, सं. स्त्री. (सं. न.) भाग्यं, दैवं, अदृष्टं, प्राक्तनं, नियतिः (स्त्री.)। वि., कृतारंभ, उपक्रांत।

प्रार्थना, सं. स्त्री. (सं.) याचना, याच्ञा, अभिशस्तिः (स्त्री.), आ-नि,-वेदनं, अभि-, अथना।

—करना, क्रि. स. अभि-प्र-, अर्थ (चु.आ.से.), याच् (भ्वा. उ. से.), सविनयं आ-नि-विद् (प्रे.)।

—पत्र, सं. पुं. (सं.) आवेदनपत्रम्।

प्रार्थनीय, वि. (सं.) याचनीय, अभ्यर्थनीय।

प्रार्थित, वि. (सं.) याचितं, अभ्यर्थित, निवेदित।

प्रार्थी, सं. पुं. (सं.-र्थिन्) प्रार्थयितृ, याचकः-निवेदकः।

प्रालब्ध, सं. स्त्री., दे. 'प्रारब्ध' सं. स्त्री.।

प्रासंगिक, वि. (सं.) प्रसंग,-आगत-प्राप्त-उचित, अनुरूप, प्रस्तुत, प्रास्ताविक [-की (स्त्री.) = प्रास्ताविकी]।

प्रासाद, सं. पुं. (सं.) राज-नृप,-गृहं-भवनं-मंदिरं, हर्म्यं, सौधः-धम्।

प्रिज़्म, सं. पुं. (अं.) त्रिपार्श्वकाचः।

प्रिय, वि. (सं.) दे. 'प्यारा' २. मनोहर, अभिराम। सं. पुं., पतिः २. कांतः, दयितः ३. जामातृ ४. हितम्।

—तम, वि. (सं.) प्रेष्ठ, प्राणप्रिय। सं. पुं., पतिः, भर्तृ। २. वल्लभः, कांतः।

—तमा, वि. (सं.) प्रेष्ठा, प्राणप्रिया। सं. स्त्री., पत्नी २. कांता।

—दर्शन, वि. (सं.) सु-शुभ,-दर्शन, चक्षुष्य, सुरूप, शोभन, सुंदर।

—भाषी, वि. (सं.-षिन्) मधुरभाषिन्, प्रिय,-वादिन्-वचन।

—वर, वि. (सं.) प्रेष्ठ, प्रियतम।

प्रिया, सं. स्त्री. (सं.) नारी, रमणी २. पत्नी, भार्या ३. प्रेयसी, प्रेमवती, कांता।

प्रीतम, सं. पुं., दे. 'प्रियतम'।

प्रीत, प्रीति, } सं. स्त्री. [सं. प्रीतिः (स्त्री.)] दे. 'प्यार' २.तृप्तिः(स्त्री.) ३.आनंदः, हर्षः।

—पूर्वक, क्रि. वि. (सं.-र्कं) प्रेम्णा, स्नेहेन।

—भोज, सं. पुं. (सं.-भोगः) प्रीतिभोजनं, भोजनोत्सवः।

प्रेक्षक, सं. पुं. (सं.) दर्शकः, द्रष्टृ २. (नाटकादि में) पार्षदः, सामाजिकः।

प्रेक्षण, सं. पुं. (सं. न.) नेत्रं २. अवलोकनं, दर्शनम्।

प्रेत, सं. पुं. (सं.) नरकस्थप्राणिन् २. भूतभेदः, वेतालः ३. मृतमानवः, शवः।

—कर्म, सं. पुं. [सं.-कर्मन् (न.)] प्रेत,-कार्यं-क्रिया-कृत्यं, आमृत्योः सपिंडीकरणपर्यंतः क्रियाकलापः।

—गृह, सं. पुं. (सं. न.) प्रेतभूमिः (स्त्री.) श्मशानम्।

—दाह, सं. पुं. (सं.) अन्त्येष्टि-मृतक,-संस्कारः।

—पक्ष, सं.पुं.(सं.) पितृपक्षः, गौण-चांद्राश्विन-कृष्णपक्षः।

—पति, सं. पुं. (सं.) यमराजः।

प्रेतनी, सं. स्त्री. (सं. प्रेतः) पिशाची-चिका, प्रेतपत्नी।

प्रेम, सं. पुं. [सं. प्रेमन् (पुं. न.)] स्नेहः, अनु,-रागः, प्रणयः, दे. 'प्यार' २. कामः, शृङ्गारः, रतिः (स्त्री.) ३. ईश्वरभक्तिः (स्त्री.)।

—कहानी, सं. स्त्री.,प्रेमकथा, शृंगाराख्यायिका।

—पात्र, सं. पुं. (सं. न.) स्नेहभाजनं (मानव वा पदार्थ)।

—पाश, सं. पुं. (सं.) स्नेह-अनुराग-प्रेम,-बन्धनं-रज्जुः (स्त्री.)-शृंखला-जालम्।

—पुत्तलिका, सं. स्त्री. (सं.) पत्नी, भार्या, कलत्रम्।

—वारि, सं. पुं. (सं. न.) प्रेमाश्रु (न.), स्नेहास्रम्।

प्रेमालाप, सं. पुं. (सं.)स्नेहसंभाषणं २.शृंगार-संवादः।

प्रेमाश्रु, सं. पुं. (सं. न.) प्रेम,-जलं-वारि(न.), अनुरागवाष्पम्।

प्रेमिक, सं. पुं., दे. 'प्रेमी'।

प्रेमिका, सं. स्त्री., दे. 'प्रेयसी'।

प्रेमी, सं. पुं. (सं.-मिन्) प्रणयिन्, अनुरागिन्, स्नेहिन्, अनुराग-प्रणय,-वत् २. कामिन्, कामुकः, रमणः, वल्लभः। वि.,-प्रिय,-आसक्त-निरत, सेवी (उ., संगीत का प्रेमी = संगीत,-प्रिय-आसक्त इ.)।

प्रेय, वि. (सं. प्रेयस्) प्रियतर, अतिप्रिय

२. लौकिक-सांसारिक,-सुखानि-भोगाः ३. अलंकारभेदः (सा०)।

प्रेयसी, सं. स्त्री. (सं.) प्रेमवती, प्रेमिणी, प्रिया, वल्लभा, कांता, दयिता।

प्रेरक, सं. पुं. (सं.) प्रचोदयितृ, प्रवर्तयितृ, प्रोत्साहकः, उत्तेजकः।

प्रेरणा, सं. स्त्री. (सं.) प्रचोदना, प्रोत्साहनं-ना, उत्तेजनं-ना, प्रवर्तनं २. दे. 'धक्का'।

—करना, क्रि. स., उत्तिज्-प्रवृत्-प्रेर्-प्रचुद्-प्रोत्सह् (प्रे.)।

प्रेरित, वि. (सं.) प्रचोदित, प्रोत्साहित, उत्तेजित, प्रवर्तित।

प्रेस, सं. पुं. (अं.) संपीडनयंत्रं २. मुद्रणयंत्रं ३. मुद्रणयंत्रालयः।

प्रेसिडेंट, सं. पुं. (अं.) सभा,-पतिः-अध्यक्षः, प्रधानः।

प्रोग्राम, सं. पुं. (अं.) कार्यक्रमः २. कार्यक्रमपत्रम्।

प्रोटीन, सं. पुं. (अं.) प्रोभूजिनं, भोजनतत्त्वभेदः।

प्रोत, वि. (सं.) खचित, निहित २. स्यूत, ग्रथित, गुंफित।

प्रोत्साहन, सं. पुं. (सं. न.) धैर्य-उत्साह,-वर्द्धनं, उत्तेजनं, आश्वासनम्।

प्रोत्साहित, वि. (सं.) उत्तेजित, आश्वासित, वर्द्धितोत्साह, प्रेरित।

प्रोथ, वि. (सं.) विश्रुत, प्रख्यात २. प्रचलित, प्रस्थित ३. स्थापित, स्थिरीकृत (सं. पुं. न.) १-२ अश्व,-नासा-नासारन्ध्रम् ३. शूकर-लंबास्यम्।

प्रोदक, वि. (सं.) उत्त, उन्न, आर्द्र २. निर्जल, निर्गतजल, शुष्क।

प्रोनोट, सं. पुं. (अं.) ऋणनिस्तारप्रतिज्ञा-लेखः, ऋणपत्रम्।

प्रोपगेंडा, सं. पुं. (सं.) प्रचारः, प्रचारकार्यम्।

प्रोप्राइटर, सं. पुं. (अं.) स्वामिन्, प्रभुः, इनः।

प्रोफ़ेसर, सं. पुं. (अं.) (महाविद्यालयस्य विश्वविद्यालयस्य वा) उपाध्यायः।

प्रोषित, वि. (सं.) विदेशस्थ, प्रवासिन्।

—पतिका, सं. स्त्री. (सं.) प्रोषितभर्तृका, नायिकाभेदः।

प्रौढ, वि. (सं.) प्रवृद्ध, एधित, प्रोपचित २. सं-परि,-पूर्ण, संपन्न, सिद्ध ३. परिणत, परिपक्व ४. पुष्ट, दृढ़ ५. निपुण, चतुर।

प्रौढ़ता, सं. स्त्री. (सं.) प्रौढ़त्वं, प्रवृद्धिः (स्त्री.) २. परिपूर्णता ३. परिपक्वता ४. पुष्टिः (स्त्री.) ५. निपुणता।

प्रौढ़ा, सं. स्त्री. (सं.) चिरिंटी, श्यामा, सुवयाः, दृष्टरजाः (स्त्री. एक.) (३० से ५५ वर्ष तक की नारी) २. नायिकाभेदः। वि., पुष्टा, परिपक्वा, दृढ़ा।

प्लग, सं. पुं. (अं.) निगम्।

प्लवग, सं. पुं. (सं.) कपिः, वानरः २.हरिणः ३. मंडूकः।

प्लवन, सं. पुं. (सं. न.) कूर्दनं २. तरणम्।

प्लाटिनम, सं. पुं. (अं.) महातु।

प्लावन, सं. पुं. (सं. न.) महाप्रवाहः, जल,-प्रलयः-बृंहणं-विप्लवः।

प्लावित, वि. (सं.) जलमग्न।

प्लास्टर, सं. पुं. (अं.) दे. 'पलस्तर'।

—आव पेरिस, सं. पुं., दग्धाचूर्णम्, पेरिसप्रलेपः।

प्लीहा, सं. स्त्री. (सं.) प्ली(प्लि)हन् (पुं.), गुल्मः, प्लिहा।

प्लुत, सं. पुं. (सं.) त्रिमात्रवर्णः। वि., झंपगतियुत २. प्लावित ३. सिक्त ४. त्रिमात्र।

प्लूरिसी, सं. स्त्री. (अं.) फुफ्फुसवेष्टनपाकः, फुफ्फुसावरणप्रदाहः।

प्लेग, सं. पुं. (अं.) महा,-मारी, मारिका २. मूषिकरोगः अग्निरोहिणी।

प्लेट, सं. स्त्री. (अं.) दे. 'तश्तरी' २. (धात्वादिकस्य) पट्टः-टं, फलकः-कम्।

—फ़ार्म, सं. पुं. (अं.) वेदी, वेदिका, मञ्चः, पीठिका।

फ

फ, देवनागरीवर्णमालायाः द्वाविंशतितमो व्यंजनवर्णः, फकारः।

फंका, सं. पुं. (हिं. फाँकना) मुष्टिः (पुं. स्त्री.), अंजलिः (पुं.), मुष्टि-अंजलि,-मात्रं अन्नादिकं २. खंडः-डं, शकलः-लम्।

फंकी, सं. स्त्री. (हिं. फंका) चूर्णं, चूर्णौषधम्।

फंद, सं. पुं. (सं. बंधः) बंधनं २. दे. 'फंदा' ३. छलं, कपटं ४. रहस्यं, गूढवार्ता ५. दुःखम्।

फंदा, सं. पुं. (सं. बंधः) पाशः, बन्धनं, वागुरा, पातिली, मृगबंधनी २. जालं ३. दुःखं, कष्टम्।

—लगाना, मु., छल् (चु.), विप्रलभ् (भ्वा. आ. अ.) वंच्-प्रतॄ (प्रे.) २. जालं निक्षिप् (तु. प. अ.)-निधा (जु. उ. अ.)।

फंदे में पड़ना, मु., पाशे बंध्-ग्रह् (कर्म.), वशी भू, २. विप्रलभ्-प्रतार् (कर्म.)।

फंसना, क्रि. अ. (हिं. फांसना) संग्रंथ्-संश्लिष्-संबंध् (कर्म.), आकुली-संकीर्णी-भू, संशक्त-संलग्न-संश्लिष्ट (वि.) भू २. जाले पाशे वा धृ-बंध् (कर्म.), जालबद्ध (वि.) भू।

फंसवाना, क्रि. प्रे., ब. 'फंसाना' के प्रे. रूप।

फंसाना, क्रि. स. (हिं. फंसना) संश्लिष् (प्रे.), संग्रंथ् (क्र्. प. से.), आकुली-संलग्नी-संकीर्णी-कृ २. पाशेन बंध् (क्र्. प. अ.) जाले धृ (चु.), पाशे पत् (प्रे.)।

फंसाव, सं. पुं. } (हिं. फंसना) संश्लिष्टता,
फंसावट, सं. स्त्री. } ग्रंथिलत्वं २. संकुलता, व्यतिकरः, संकरः।

फ़क, वि. (अ. फ़क़) श्वेत, शुक्ल, स्वच्छ २. विवर्ण, मंदप्रभ।

रंग—होना या पड़ जाना, मु., पांडुच्छाय-विवर्ण (वि.) भू, मंद-म्लान मलिन,प्रभ(वि.) जन् (दि. आ. से.) २. आकुली भू, मुह् (दि. प. से.)।

फ़क़त, वि. (अ.) अलं, पर्याप्त २. एकाकिन्। क्रि. वि., केवलम्।

फ़क़ीर, सं. पुं. (अ.) भिक्षुः, भिक्षुकः २. साधुः, सन्न्यासिन् ३. निर्धनः।

फ़क़ीरनी, सं. स्त्री. (अ. फकीर>) भिक्षुकी, भिक्षोपजीविनी, भिक्षाचरी २. परिव्राजिका, सन्न्यासिनी, वैरागिणी।

फ़क़ीरी, सं. स्त्री. (अ. फ़क़ीरी) भिक्षुकता, याचकता २. सन्न्यासः ३. दारिद्र्यम्।

फक्कड़, वि. (अ. फकीर) निश्चित २. निर्धन, ३. निश्चितदरिद्र। सं. पुं., गाली, अश्लील-वचनम्, अश्लील-ग्राम्य-अवाच्य,-वचनं २. मिथ्यावचनम्।

—बाज, सं. पुं., अवाच्यवाचकः अश्लील-भाषिन् २. मिथ्याभाषिन्।

—बाज़ी, सं. स्त्री., अश्लीलभाषिता, अवाच्य-वाचकता।

फक्किका, सं. स्त्री. (सं.) तत्त्वनिर्णयार्थमुपस्था-पितः पूर्वपक्षः २. छलं, कपटम्, दंभः।

फ़ख़र, सं. पुं. (फ़ा. फ़ख़्र) गर्वः, अभिमानः।

फगुआ, सं. पुं. (हिं. फागुन) होलिकोत्सवः २. होलिकागीतानि (न. बहु.)।

फ़ज़ीलत, सं. स्त्री. (अ.), गौरवं, महत्ता।

—की पगड़ी, मु., विद्वत्ताप्रमाणम्, वैदुष्यो-ष्णीषम्।

फज़ीहत, सं. स्त्री. (अ.) दुर्गतिः (स्त्री.) दुर्दशा, २. कलहः।

फ़ज़ूल, वि. (अ.) निरर्थक, व्यर्थ।

—ख़र्च, वि. (अ.+फ़ा) मुक्तहस्त, अप-व्यर्थ,-व्ययिन्।

—ख़र्ची, सं. स्त्री., अति-अप-अमित,-व्ययः, मुक्तहस्तता।

फ़ज़्ल, सं. पुं. (अ.) कृपा, अनुग्रहः।

फट, सं. स्त्री. (अनु.) फटिति शब्दः-ध्वनि।

—फट, सं. स्त्री., फट-फटाशब्दः २. प्रजल्पः।

—से, क्रि. वि., झटिति, सपदि।

फटक[1], सं. पुं. दे. 'स्फटिक'।

फटक[2], क्रि. वि. (अनु.) तत्क्षणे, झटिति।

फटकन, सं. स्त्री. (हिं. फ़टकना) बुर्प-सं, तुषः, असारद्रव्यम्।

फटकना, क्रि. स., (अनु. फट) प्रस्फुट् (प्रे.), प्रस्फोटनेन-शूर्पेण विशुध् (प्रे.) २. दे. 'पींजना' ३. दे. 'फटफटाना'। ४. रेणुं अपमृज् (अ. प. से.), निर्धूली कृ ५. क्षिप् (तु. प. अ.), अस् (दि. प. से)। क्रि. अ., या (अ. प. अ.), गम् २. दूरी-पृथग्-भू ३. 'तड़फड़ाना' ४. श्रम् (दि. प. से.)।

फटकरी, सं. स्त्री., दे. 'फिटकरी'।

फटकार, सं. स्त्री. (अनु. फट्+सं. कारः>) निर्भर्त्सना, वाग्दंडः, उपालंभः, निंदा, आक्रोशः, गर्हा।

फटकारना, क्रि. स. (पूर्व.) शिलायां आहत्य आहत्य वस्त्राणि प्रक्षल् (चु.) २. दूरी-पृथक्-कृ ३. निर्भर्त्स्-तर्ज् (चु. आ. से.) वाचा दंड् (चु.), निंद् (भ्वा. प. से.) ४. सफटफट-शब्दं एज्-कंप् (प्रे.)।

फटकारने योग्य, वि., निर्भर्त्सनीय, तर्जनीय।

फटकारने वाला, सं. पुं., निर्भर्त्सकः, तर्जकः ।
फटकी, सं. स्त्री. (हिं. फटक^{2}>) शाकुनिक-पंजरः-रम् ।
फटना, क्रि. अ. (हिं. फाड़ना) विदृ-विभिद्-विशृ (कर्म.) २. स्फुट् (तु. प. से.), दल् (भ्वा. प. से.) ३. खंडशो भिद् (कर्म.) शकली भू ४. अप-वि कृ (तु. प. से.) इतस्ततः विद्रु (भ्वा. प. अ.) ५. अत्यंतं व्यथ् (भ्वा. आ. से.) ६. अम्ली भू ।
फट पड़ना, मु. सहसा आपत् (भ्वा. प. से.)-उपस्था (भ्वा. आ. अ.) ।
छाती—, (शोकातिशयेन) हृदयं विदृ-द्विधा भिद् (कर्म.) ।
फटफटाना, क्रि. स. (अनु. फटफट) प्र-, जल्प् (भ्वा. प. से.) अपार्थकं वद् (भ्वा. प. से.) २. दे. 'फड़फड़ाना' ३. प्रयस्-परिश्रम् (दि. प. से.) ४. फटफटायते (ना. धा.), फटफटाशब्दं कृ ५. आजीविकायै भृशं चेष्ट (भ्वा. आ. से.) ।
फटा, वि. (हिं. फटना) विदीर्ण, विशीर्ण २. स्फुटित, विदलित ३. शकलीभूत । सं. पुं., छिद्रं, छेदः, भेदः ।
—दूध, सं. पुं., अम्लीभूतं क्षीरम् ।
—पुराना, सं. पुं., चीरं, चीवरं, कर्पटः ।
फटे में पाँव देना, मु.. अव्यापारेषु व्यापारं कृ, परकार्येषु व्यापृ (तु. आ. अ.) ।
फटिक, सं. पुं. दे. 'स्फटिक' ।
फट्टा, सं. पुं. (हिं. फटना>) विदीर्णवेणुदंडः ।
फड़, सं. स्त्री. (सं. पणः) ग्लहः २. द्यूत,-शाला-सभा ३. क्रयविक्रयस्थानं ४. पंक्तिः (स्त्री.), समूहः ।
—बाज़, सं. पुं. (हिं.+फा.) सभिकः, द्यूत-कारकः २. वाचालः, वावदूकः ।
फड़क, सं. स्त्री. (अनु.) प्र-,स्पंदः, स्फुरणं, कंपः २. पक्ष,-चालनं-आस्फालनम् ।
—उठना, मु., प्रसद् (दि. प. अ.) ।
—जाना, मु., अनुरंज् (कर्म.), स्निह् (दि.प.से) ।
फड़कना, क्रि. अ. (पूर्व.) स्फुर् (तु. प. से.), वेप्-कंप्-स्पंद् (भ्वा. आ. से.) २. क्षुभ् (दि. प. से.), आकुली भू २. पक्षाः विचल् (भ्वा. प. से.), विधू (कर्म.) ।
फड़काना, क्रि. स., ब. 'फड़कना' के प्रे. रूप ।

फड़फड़ाना, क्रि. स. (अनु. फड़फड़>) फट-फटायते (ना. धा.), फटफटाशब्दं जन् (प्रे.) २. पक्षौ विधू (स्वा. उ. से.; क्र्. उ. से., भ्वा. उ. से., चु.), आस्फल्-विचल् (प्रे.), दे. 'फटफटाना' । क्रि. अ., क्षुभ् (दि.प.से.), आकुली भू २. उत्सुकः वृत् (भ्वा. आ. से.) ।
फड़फड़ाहट, सं. स्त्री. (हिं. फड़फड़ाना) पक्ष,-आस्फालनं-विधुवनं-विचालनं २. स्फुरणं, स्पंदनं, विकंपः ३. आकुलता, चित्त,-वेगः-भ्रमः, सं-,क्षोभः ४. प्रयासः,अति-प्र,-यत्नः, चेष्टितम् ।
फड़वाना, **फड़ाना**, } क्रि. प्रे., ब. 'फाड़ना' के प्रे.रूप ।
फड़िया, सं. पुं. (हिं. फड़) द्यूतकारकः, सभिकः २. दे. 'परचूनिया' ।
फण, सं. पुं. (सं.) फणा, फणं, कटः,-टा-टी, स्फटः-टा, भोगः, स्फुटः-टा, दर्वी-दर्विः (स्त्री.) ।
—कर, सं. पुं. (सं.) सर्पः, अहिः ।
—धर, सं. पुं. (सं.) नागः, सर्पः २. शिवः ।
—मणि, सं. स्त्री. (सं. पुं.) सर्प-मणिः-रत्नम् ।
फणा, सं. स्त्री. (सं.) दे. 'फण' ।
फणी, सं. पुं. (सं.-णिन्) फणधरः, फणकरः, दे. 'सर्प' ।
फणीन्द्र, **फणीश**, } सं. पुं. (सं.) अनंतः, शेषः, भुजगेशः, सर्पराजः ।
फ़तवा, सं. पुं. (अ.) व्यवस्था, निर्णयः (इस्लाम) ।
फ़तह, सं. स्त्री. (अ.) विजयः २. साफल्यम् ।
—मंद, **—याब**, (अ.+फ़ा.) विजयिन्, विजेतृ ।
फतिंगा, सं. पुं. (सं. पतंगः) शलभः, पतंगमः ।
फ़तूर, सं. पुं. (अ.) दोषः, विकारः, २. हानिः (स्त्री.) ३. विघ्नः ४. उपद्रवः ।
फन, सं. पुं., दे. 'फण' ।
फ़न, सं. पुं. (फ़ा.) गुणः, वैशिष्ट्यं २. विद्या, ज्ञानं ३. कलाकौशलं, शिल्पं ४. व्याजः, छद्मन् (न.) ।
फ़ना, सं. स्त्री. (अ.) प्रलयः, वि-,नाशः, प्र-,ध्वंसः ।
फनी, सं. पुं., दे. 'फणी' ।
फफोला, सं. पुं. (सं. प्रस्फोटः) त्वक्-,स्फोटः, शोफः । दे. 'छाला' ।
दिल के —फोले फोड़ना, मु., वैर,-साधनं-

शोधनं-निर्यातनं कृ (ना. धा.), प्रतिहिंस् (रु. प. से.), क्रोधं प्रकटयति (ना. धा.),

फब, सं. स्त्री., दे. 'फबन'।

फबती, सं. स्त्री. (हिं. फबना) क्ष्वेला-लिका, नर्मन् (न.), नर्मोक्तिः (स्त्री.), व्यंग्यवचनं २. समयोचितसूक्तिः (स्त्री.)।

—**उड़ाना**, मु., अव-उप,-हस् (भ्वा. प. से.), वक्रोक्त्या आक्षिप् (तु. प. अ.)।

—**कहना**, मु., सहास्यं उपालभ् (भ्वा. आ. अ.), सहासं व्यंग्यवचनं प्रयुज् (रु.आ.अ.)।

फबन, सं. स्त्री. (हिं. फबना) शोभा, छविः (स्त्री.), सौन्दर्यं २. मंडनं, प्रसाधनं, परिष्कारः।

फबना, क्रि. अ., (सं. प्रभवनं>) शुभ् (भ्वा. आ. से.), युज् (कर्म.) उपपद् (दि. आ. अ.), उचित-उपपन्न-अनुरूप-युक्त-सदृश (वि.) वृत (भ्वा. आ. से.)।

फबनेवाला, वि., शोभन, उचित, युक्त, अनुरूप, सदृश।

फबीला, वि. (हिं. फब) शोभन, सुन्दर, २. उचित, अनुरूप।

फरक, फरकन, सं. स्त्री., दे. 'फड़क'।

फ़रक़, सं. पुं., दे. 'फ़र्क़'।

फरकना, क्रि. अ., दे. 'फड़कना'।

फ़रज़ंद, सं. पुं. (फ़ा.) पुत्रः, तनुजः।

फरजी, सं. पुं., दे. 'फर्जी'।

फ़रद, सं. स्त्री., दे. 'फ़र्द'।

फरफंद, सं. पुं. (अनु. फर+हिं. फंदा) माया, कपटं, छलं, छद्मन्, (न.), व्याजः २. भावः, हावः।

फरफर, सं. पुं. (अनु.) पक्ष,-स्फुरणं-आस्फालनम्। क्रि. वि., सवेगं, शीघ्रं, द्रुतं २. अप्रतिहतम्।

फरफराना, क्रि. स., क्रि.अ., दे. 'फड़फड़ाना'।

फ़रमा[1], सं. पुं. (अं. फ्रेम) घटना, रचना २. दे. 'कालबूत' ३. आकारसाधनम्।

फ़रमा[2], सं. पुं. (अं. फ़ार्म) सकृन्मुद्रणार्हं पूर्णपत्रम्।

फ़रमान, सं. पुं. (फ़ा.) राजकीयं आज्ञापत्रं, अनुशासनपत्रं २. आज्ञा, आदेशः।

फ़रमाना, क्रि. स. (फ़ा.) आज्ञा (प्रे.), आदिश् (तु. प. अ.) शास् (अ. प. से.) २. कथ् (चु.)।

फ़रयाद, सं. स्त्री. (फ़ा.) दुःखनिवेदनं २. प्रार्थना, अभ्यर्थना ३. अभियोगः।

फ़रयादी, सं. पुं. (फ़ा.) दुःखनिवेदकः २. अभियोक्तृ २. प्रार्थिन्।

फ़रलांग, सं. पुं. (अं.) क्रोशस्य षोडशो भागः, अध्वमानभेदः।

फ़रलो, सं. स्त्री. (अं.) सार्द्धवेतनो दीर्घावकाशः, अवकाशभेदः।

फ़रवरी, सं. स्त्री. (अं. फ़ेब्रुअरी) आंग्लसंवत्सरस्य द्वितीयो मासः।

फरसा, सं. पुं. (सं. परशुः) दे. 'कुल्हाड़ा'।

फ़रहंग, सं. पुं. (फ़ा.) कोशः-षः, अभिधानं, शब्दसंग्रहः २. टीका, कुंचिका, व्याख्या।

फ़रहत, सं. स्त्री. (अ.) मोदः, हर्षः, प्रसन्नता।

फरहरा, सं. पुं. (हिं. फहराना) पताका, केतुः।

फ़राख़, वि. (फ़ा.) आयत, विस्तृत, विशाल।

—**दिल**, वि. (फ़ा.) विशालहृदय, उदार।

फ़राग़त, सं. स्त्री. (अ.) व्यवसाय-विश्रामः, उद्योगविश्रांतिः (स्त्री.), अवकाशः। २. निश्चिंतता ३. मलत्यागः।

फ़रामोश, वि. (फ़ा.) विस्मृत।

फ़रामोशी, सं. स्त्री. (फ़ा.), विस्मृतिः (स्त्री.), विस्मरणम् २. स्खलनं, स्खलितम्।

फ़रार, वि. (अ.) (दंडभयात्) पलायित, अपक्रांत।

फ़रिश्ता, सं. पुं. (फा., मि. सं. प्रेषितः) दिव्य-ईश,-दूतः २. देवता।

फ़रीक़, सं. पुं. (अ.) प्रतिद्वंद्विन्, विपक्षिन् २. वादिन्, अर्थिन्, प्रतिवादिन्, प्रत्यर्थिन् ३. पक्षः; प्रतिपक्षः ४. पक्ष्यः, सपक्षः ५. श्रेणी, वर्गः।

—**सानी**, (सं. पुं. अ.) प्रतिवादिन्।

फ़रीक़ैन, सं. पुं. (अ.) (व्यवहारे) पक्षप्रतिपक्षौ, वादिप्रतिवादिनौ, अभियोग्यभियुक्तौ।

फरुहा, सं. पुं., दे. 'फावड़ा'।

फरेंद-दा, सं. पुं. (सं. फलेन्द्रः) राज-महा,-जंबुः, नंदः।

फ़रेब, सं. पुं. (फ़ा.) छलं, कपटं, प्रतारणा।

फ़रेबी, वि. (फ़ा.) छलिन्, कापटिक, प्रतारक।

फ़रोख़्त, सं. स्त्री. (फ़ा.) विक्रयः-यणम् ।
फ़र्क़, सं. पुं. (अ.) पृथक्कृता-त्वं, भिन्नत्वं, इतरत्वं २. अंतरं, भेदः, विशेषः ३. दूरता-त्वं, अंतरं ४. न्यूनता, विकलता ।
फ़र्ज़, सं. पुं. (अ.) धार्मिककृत्यं (इस्लाम) २. कर्तव्यकर्मन् (न.) ३. कल्पना ४. उत्तरदायित्वम् ।
—करना, क्रि. अ., क्लृप् (प्रे.), उत्प्रेक्ष् (भ्वा. आ. से.); (प्रमाणं विना) सिद्धं मन् (दि. आ. अ.) ।
फ़र्ज़ी, सं. पुं. (फ़ा.) कल्पित, काल्पनिक, २. सत्ताहीन, वितथ ।
फ़र्द, सं. स्त्री. (अ.) सूची-चिः (स्त्री.) नामावली-लिः (स्त्री.), अनुक्रमणिका २. पृथक्स्थितः पत्रवस्त्रादिखंडः ३. प्रच्छदपटस्योर्ध्वपुटः । वि., अनुपम, अतुल्य ।
फ़र्याद, सं. स्त्री., दे. 'फरयाद' ।
फ़र्राटा, सं. पुं. (अनु.) त्वरा, वेगः २. दे. 'खर्राटा' ।
फ़र्राश, सं. पुं. (अ.) कुथप्रसारकः २. किंकरः ।
फ़र्श, सं. पुं. (अ.) कुट्टिमः-मं., शिलास्तरः २. गृहभूमिः (स्त्री.) आस्तरणं, कुथः-था, नमतं, परिस्तोमः ।
फल, सं. पुं. (सं. न.) शस्यं, प्रसवः, उत्पन्नं २. लाभः, प्राप्तिः (स्त्री.) ३. परिणामः, ४. गुणः, प्रभावः ५. कर्मभोगः ६. प्रतिफलं, प्रतीकारः ७. धारा, पत्रं, फलं (खड्गादिकस्य) ८. फालः, कुशी, कृषकः ९. फलकः-कं १०. ढालं, फरं, चर्मन् (न.) ११. उद्देश्यसिद्धिः (स्त्री.) १२. गुण्यः (गतिः) १३. गणितक्रियापरिणामः (उ. योग-गुणन,-फलं) १४. क्षेत्रफलं १५. ग्रहयोगपरिणामः (ज्यो.) १६. प्रयोजनं, अर्थः १७. वृद्धिः (स्त्री.), दे. 'सूद' .
—आना, या **लगना**, क्रि. अ., फल् (भ्वा. प. से.), सफलीभू , फलवत् जन् (दि. आ. से.), फलित (वि.) भू ।
—दार, वि.(सं.+फ़ा.) फलवत्, फलदायक, फलद, फलप्रद, फलित, फलिन्, सफल २. अमोघ, अवंध्य ।
—पाक, सं. पुं. (सं.) करमर्दकः २. जलामलकं ३. फलपरिणतिः (स्त्री.) ।
—पाना, क्रि. स., (स्वकर्मणाम्) फलं भुज् (रु. आ. अ.)-लभ् (भ्वा. आ. अ.) प्राप् (स्वा. प. अ.) ।
—प्राप्ति, सं. स्त्री. (सं.) कृतकार्यता, मनोरथसिद्धिः (स्त्री.) ।
—भोग, सं. पुं. (सं.) उदर्कानुभवः, परिणामोपभोगः ।
—राज, सं. पुं. (सं.) दे. 'तरबूज़' २. दे. 'ख़रबूज़ा' ।
फलक, सं. पुं. (सं. पुं. न.) (काष्ठादिकस्य) पट्टः-ट्टं २. शिला ३. ढालं, चर्मन् (न.) ४. रजकपट्टं ५. आस्तरणं ६. पत्रं,पृष्ठं ७. हस्ततलं ८. फलं ९. पीठं, पीठिका ।
फ़लक, सं. पुं. (अ.) आकाशः-शं, गगनं २. स्वर्गः ।
फलतः, अव्य. (सं.) परिणामतः, अतः, इति हेतोः, अस्मात् कारणात् ।
फलद, वि. (सं.) फल,-दायक-प्रद-जनक ।
फलना, क्रि. अ. (सं. फलनं) दे. 'फल आना' ('फल' के नीचे) २. फलं आवह् (भ्वा. प. अ.), लाभं जन् (प्रे.) ।
—फूलना, मु., समृध् (दि. प. से.), संवृध् (भ्वा. आ. से.), उत्कर्षं या (अ. प. अ.) ।
फ़लसफ़ी, सं. पुं. (अ.) दर्शनशास्त्रं, तर्क,-विद्याशास्त्रम् ।
फ़लसफ़ा, सं. पुं. (अ.) दार्शनिकः, तत्त्वज्ञः, दर्शनशास्त्रज्ञः ।
फलां, वि. (फ़ा.) अमुक ।
—फलाँ, वि. अमुकामुक, विशिष्ट, निर्दिष्ट ।
फलांग, सं. स्त्री., दे. 'कुदान' ।
फलांगना, क्रि. अ. (सं. प्रलंघनम्) दे. 'कूदना' ।
फलाकांक्षी, वि. (सं.-क्षिन्) फलेच्छुक, फलाभिलाषिन् ।
फलाना, वि., दे. 'फलां' ।
फलार्थी, वि. (सं.-र्थिन्) फलेच्छुक, फलाभिलाषिन् २. परिणामोत्सुक ।
फलाहार, सं. पुं. (सं.) फलभक्षणं, फलैर्निर्वहणम् ।
फलाहारी, वि. (सं.-रिन्) फलभक्षक ।
फलित, वि. (सं.) फलवत्, फलिन्, प्राप्तफल २. संपन्न, पूर्ण ।

—ज्योतिष, सं. पुं. (सं. न.) दैवज्ञविद्या ।
फली, सं. स्त्री. (हिं. फल) बीजपुटं, बीजकोषः ।
फलीता, सं. पुं. (अ. फतीलह्) वर्तिका, वर्तिः (स्त्री.) २. नालीकास्त्रवर्तिः, फली ।
फलीभूत, वि. (सं.>) सफल, फलप्रद ।
फलोदय, सं. पुं. (सं.) फलोत्पत्तिः (स्त्री.) २. लाभः ३. हर्षः ४. स्वर्गः ।
फ़सल, सं. स्त्री. (अ. फस्ल) शस्यं, धान्यं, अन्नम् २. ऋतुः ३. कालः ।
फ़साद, सं. पुं. (अ.) संक्षोभः, विप्लवः २. कलहः, उपद्रवः २. विकारः, विक्रिया ।
फ़सादी, वि. (फ़ा.) विद्रोहिन्, विप्लवकारिन् २. उपद्रविन्, कलहप्रिय ।
फ़साना, सं. पुं. (फ़ा.) आख्यायिका, लघु-, कथा ।
फ़साहत, सं. स्त्री. (अ.) भाषा-,सौष्ठवं-परिष्कृतिः (स्त्री.) ।
फ़सील, सं. स्त्री. (अ.) प्राकारः, वरणः, वप्रः, वप्रम् ।
फहरना, क्रि. अ. (सं. प्रसरणम्) प्रसृ (भ्वा. प. अ.), उद्डी (भ्वा. आ. से.) ।
फहराना, क्रि. स., 'फहराना' के धातुओं के प्रेरणार्थक रूप ।
फाँक, सं. स्त्री. (सं. फलकम्>) खण्डं-ण्डः, शकलं-लः २. छुरिका ३. रेखा ।
फाँकना, क्रि. स. (हिं. फंकी) हस्ततलेन मुखे निक्षिप् (तु. प. अ.) । सं. पुं., चूर्णस्य मुखे निक्षेपणम् ।
फाँदना, क्रि. अ. (सं. फणनं>) कुर्द् (भ्वा. आ. से.) उत्प्लु (भ्वा. आ. अ.) २. उल्लंघ् (भ्वा. आ. से.) । सं. पुं., उत्प्लवनं, कूर्दनं, उल्लंघनम् ।
फाँस, सं. स्त्री. (सं. पाशः) बंधनम्, दे. 'फंदा' ।
फाँसना, क्रि. स. (हिं. फाँस) पाशयति (ना. धा.) २. वंच्-प्रतॄ (प्रे.) ।
फाँसी, सं. स्त्री. (हिं. फाँस) उद्बंधनम् २. मृत्युदण्डः २. पाशः, बंधनम् ।
—देना, क्रि. स., उद्बध्य हन् (अ. प. अ.) ।
फ़ाइल, सं. स्त्री. (अं.) पत्रसंग्रहः २. पंक्तिः (स्त्री.) ३. सूत्रं, गुणः ।
फाका, सं. पुं. (अ. फाकह्) उपवासः, उपोषितं, लंघनम् ।
फाग, सं. पुं. (हिं. फागुन) होलिकोत्सवः २. रक्तचूर्णभेदः ३. होलिकागीतम् ।
फागुन, सं. पुं. (सं. फाल्गुनः दे.) ।
फाटक, सं. पुं. (सं. कपाटः) अंगनद्वारं, बृहद्-द्वारम् २. लौहद्वारम् ३. दे. 'काँजी हौद' ।
फाड़ना, क्रि. स. (सं. स्फाटनम्) व्रश्च् (तु. प. से.), भिद्-छिद् (रु. प. अ.), विद् (प्रे.) २. खण्ड् (चु.), भंज् (रु. प. अ.) । सं. पुं., व्रश्चनं, भेदनं, छेदनं, विदारणं, विपाटनं २. खंडनं., भंजनम् ।
फानूस, सं. पुं. (फ़ा.) *दीप,-कोषः-पुटः ।
फ़ायदा, सं. पुं. (अ. फ़ाइदह्) लाभः, धनागमः, आयः २. प्रयोजनसिद्धिः-ईप्सितप्राप्तिः (स्त्री.) ३. सुफलं, सुपरिणामः ४. नीरोगता ।
—मंद, वि., लाभदायक, उपकारक ।
फारखती, सं. स्त्री. (अ. फ़ारिग़+खती) दायित्वत्यागः २. दायित्वत्यागपत्रम् ।
फारम, सं. पुं. (अं. फ़ार्म) प्रपत्रम् ।
फ़ारमूला, सं. पुं. (अं.) सूत्रम् ।
फ़ारस, सं. पुं. (फ़ा.) पारसि(सी)कः ।
फ़ारसी, सं. स्त्री. (फ़ा.) पारसी ।
—दाँ, वि. पारसीविद्, पारसीपंडित ।
फ़ारिग़, वि. (फ़ा.) लब्धावकाश, निर्वर्तित-व्यापारः, निवृत्त ।
—होना, मु., कार्यमुक्त-, लब्धावकाश भू २. शौचाय गम् ।
फ़ारेन, वि. (अं.) विदेशीय, परदेशीय, वैं-पार,-देशिक ।
—आफ़िस, सं. पुं. (अं.) विदेश-परराष्ट्र,-कार्यालयः ।
—सेक्रेटरी, सं. पुं., विदेश-परराष्ट्र-,सचिवः ।
फ़ारेनर, सं. पुं. (अं.) विदेशीयः, परदेशीयः, वैदेशिकः, पारदेशिकः ।
फ़ारेनहाइट, सं. पुं., जर्मनवैज्ञानिकविशेषः ।
—थर्मामीटर, सं. पुं. (अं.) फ़ारेनहाइट-तापमापकम् ।
फ़ारेस्ट, सं. पुं. (अं.) वनं, जंगलम् ।
—डिपार्टमेंट, सं. पुं. (अं.) वन-जंगल,-विभागः ।
फाल, सं. स्त्री. (सं. पुं. न.) कुशिलं, कृषिका, हलोपकरणम् ।
फ़ालतू, वि. (हिं. फाल=टुकड़ा) उपयुक्ताव-

शिष्ट, अतिरिक्त २. अनुपयोगिन्, निरर्थक ३. अकर्मण्य ।

फ़ालसा, सं. पुं. (फ़ा.) गिरिपीलु (न.), नीलमंडलं, परावतम्, परुपकम् ।

फ़ालिज, सं. पुं. (अ.) पक्षाघातः, गात्रसादः ।

फाल्गुन, सं. पुं. (सं.) फल्गुनः, तपस्यः, वत्सरान्तकः, फाल्गुनिकः २. अर्जुनः ३. अर्जुनवृक्षः ।

फावड़ा, सं. पुं. (सं. फालः>) आखानः-नं, टं.-गः ।

फ़ासफ़ोरस, सं. पुं. (अं.) स्फुरं., स्फूरकं, भास्वरम् ।

फ़ासला, सं. पुं. (अ. फ़ासलह्) अन्तरं, दूरता, विप्रकर्षः ।

फाहा, सं. पुं. (सं. फालम्>) स्नेहाक्त,-तूल-खंडः, पटखंडः ।

फिंकवाना, क्रि. प्रे., 'फेंकना' के प्रे. रूप ।

फ़िकर, सं. स्त्री. (अ. फ़िक्र) चिन्ता, दुःखं, खेदः २. ध्यानं, विचारः ३. उपायचिन्ता ।

फिट, अव्य. (अनु.) धिक् , धिग्धिक् ।

—कार, सं. स्त्री. (अनु. फिट+सं. कारः) धिक्कारः, धिक्क्रिया २. अभिशापः, अभिशपनम् ।

फ़िट, वि. (अं.) यथार्ह, उपपन्न । सं. पुं., मूर्च्छा, भ्रमिः (स्त्री.) ।

फिटकिरी, सं. स्त्री. (सं. स्फटिकी) स्फटी, श्वेता, शुभ्रा, फाटकी, तुवरी, स्फटिका ।

फ़िटन, सं. स्त्री. (अं.) चतुश्चक्रोऽश्वयानभेदः ।

फिरंग, सं. पुं. ((अं. फ्रांक>) युरोप-गौरांग,-देशः २. विदेशः ३. उपदंशरोगः ।

फिरंगी, सं. पुं. (हिं. फिरंग) फिरंग-युरोप-वास्तव्यः-वासिन्, गौरांगः ।

फिर, क्रि. वि. (हिं. फिरना) पुनर् , भूयस् , द्विः (दोनों अव्य.) २. अनन्तरं, ततः, तत्पश्चात् ३. अतिरिक्तम् ।

—फिर, क्रि. वि., पुनः पुनः, वारं वारं, असकृत्, उभयोभयः ।

फ़िरक़ा, सं. पुं. (अ.) जातिः (स्त्री.), सम्प्रदायः ।

फिरना, क्रि. अ. (हिं. फेरना) इतस्ततः अट्-विचर्-भ्रम् (भ्वा. प. से.) २. वायुं सेव् (भ्वा. आ. से.) ३. प्रत्यागम् , निवृत् (भ्वा. आ. से.) । सं. पुं., भ्रमणं, विचरणं ४. वायुसेवनम् ३. प्रत्यागमनं, निवर्तनम् ।

फिरनी, सं. स्त्री. (फा. फ़ीरीनी) पायसभेदः ।

फिराना, क्रि. स. (हिं. फिरना) इतस्ततः प्रेर् (प्रे.) २. प्रत्यावृत् (प्रे.) ३. चक्रवत् भ्रम् (प्रे.) ।

फिल्टर, सं. पुं. (अं.) पावम् ।

—पेपर, सं. पुं. (अं.) पावपत्रम् ।

फिल्टरेशन, सं. पुं. (अं.) पावपत्रम् ।

फिसलन, सं. स्त्री. (हिं. फिसलना) निपत्या, चिक्कणस्थानं, पिच्छिलपथः ।

फिसलना, क्रि. अ. (सं. प्रस्खलनम्) (पिच्छिलभूमौ) प्रस्खल् (भ्वा. प. से.) । सं. पुं., प्रस्खलनम् ।

फीका, वि. (सं. अपक्व>?) निस्स्वाद, नीरस २. धूमिल, मलिन, ३. निष्प्रभ ४. व्यर्थ, निष्फल ।

फ़ीता, सं. पुं. (पुर्त.) पट्टिका ३. बंधनसूत्रम् ।

फ़ीरोजा, सं. पुं. (फ़ा.) वैदूर्यं, हरिन्नीलरत्नम् ।

फ़ीरोज़ी, वि. (फ़ा.) हरिन्नील ।

फीस, सं. स्त्री. (अं. बहु.) शुल्कः-कम्, दक्षिणा ।

फुँकना, क्रि. अ. (हिं. फूंकना) दह् , भस्मसात् भू ।

फुँकनी, सं. स्त्री. (हिं. फूंकना) धमनी २. भस्त्रा ।

फुंकार, सं, पुं. (अनु. फुं.+सं. कारः) फूत्कारः २. सर्पनिःश्वासः ३. सक्रोधं निःश्वसनम् ।

फुंकारना, क्रि. अ. (हिं. फुंकार) फूत्कृ, सर्पवत् श्वस् (अ. प. से.) ।

फुंसी, सं. स्त्री. (सं. पनसिका>) पिटि(ट)का, वरंडः, वरंडकः ।

फ़ुट, सं. पुं (अं.) गजतृतीयांशः, चरणमानम् । २. चरणम्, पादः ।

फुटकर, वि. (सं. स्फुट>) अयुग्म, विषम २. पृथक् स्थित, संबंधरहित ३. विविध, बहुप्रकार ४. अल्पाल्प, स्तोकस्तोक ।

फ़ुटनोट, सं. पुं. (अं.) पादटिप्पणी ।

फ़ुटपाथ, सं. पुं. (अं.) पदपथः ।

फ़ुटबाल, सं. पुं. (अं.) पदकन्दुकः २. पदकन्दुक-क्रीडा ।

फुदकना, क्रि. अ. (अनु.) उत्प्लुत्य गम्

(भ्वा. प. अ.) २. नृत् (दि. प. से.) । सं. पुं. उत्प्लवनं, नर्तनम् ।

फुनगी, सं. स्त्री. (सं. स्फुटनम्) शाखा-विटप,-अग्रपल्लव:-अग्रांकुरा: (बहु०) ।

फुप्फुस, सं. पुं. (सं.) दे. 'फेफड़ा' ।

फुफकार, सं. पुं. (अनु.) दे. 'फुंकार' ।

फुफेरा, वि., (हिं. फूफा) पैतृष्वसेय, पि (पै) तृष्वस्रीय ।

फ़ुरकत, सं. स्त्री. (अ.). वियोग:, विरह: ।

फुरती, सं. स्त्री. (सं. स्फूर्ति:) शीघ्रता, क्षिप्रकारिता ।

फुरतीला, वि. (हिं. फुरती) शीघ्र-क्षिप्र,-कारिन्, स्फूर्तिमत् ।

फुरना, क्रि. अ. (सं. स्फुर्) प्रादुर्भू, प्रकटीभू २. कंप्-वेप् (भ्वा. आ. से.) ३. प्रकाश् (भ्वा. आ. से.) ४. फुरफुरायते (ना. धा.) ।

फुरसत, सं. स्त्री. (अ.) अवकाश:, रिक्तसमय: २. अवसर:, समय: ।

फुलका, सं. पुं. (हिं. फूलना) लघु-तनु,-रोटिका २. विस्फोट:, पिटिका ।

फुलझड़ी, सं. स्त्री. (हिं. फूल+झड़ना) फुल्लक्षारिणी २. कलहकारिणी वार्ता ।

फुलवाड़ी, सं. स्त्री. (सं. फुल्लवाटी) पुष्प-कुसुम,-वाटी-वाटिका, उद्यानम् २. वरयात्रायाः कर्गल-निर्मिता फुल्लवाटी ३. पुत्रकलत्रादयः ।

फुलाना, क्रि. स., व. 'फूलना' के प्रे. रूप ।

फुलेल, सं. पुं. (हिं. फूल+तेल) सुगन्धितैलम् ।

फुल्ल, वि. (सं.) विकसित, स्फुटित, उन्निद्र ।

फुसफुसा, वि. (अनु. फुस) शिथिल, श्लथ २. भंगुर, भिदुर ३. अशक्त, दुर्बल ।

फुसलाना, क्रि. स. (हिं. फिसलाना) प्रतॄ-वंच् (प्रे.), विप्रलभ् (भ्वा. आ. अ.) ।

फुहार, सं. स्त्री. (सं. फूत्कार: >) शीकरवर्ष:, मन्दवृष्टि: (स्त्री.) ।

फुहारा, सं. पुं. (हिं. फुहार) जल-धारा,-यन्त्रम् २. जलोत्क्षेप: ।

फूँक, सं. स्त्री. (अनु. फू) फूत्कार:, ध्मानम् २. मुखमारुत:, श्वास: ।

—मारना, क्रि. स., फूत्कृ, ध्मा (भ्वा. प. अ.) ।

फूँकना, क्रि. स. (हिं. फूँक) दह् (भ्वा. प. अ.), भस्मसात् कृ २. फूत्कृ ।

फूँकनी, सं. स्त्री., दे. 'फुँकनी' ।

फूँस, सं. स्त्री. (घास से अनु.) पलाल:-लं, पल: २. शुष्क,-तृण-घास: ।

फूट, सं. स्त्री. (हिं. फूटना) चित्रा, मरुजा, चिर्भिटा, पथ्या २. विश्लेप: ३. विरोध:, मतभेद: ।

—डालना, क्रि. स., विरोधं जन् (प्रे.) ।

फूटना, क्रि. अ. (सं. स्फुटनम्) भिद्-छिद्-विदॄ (कर्म.) स्फुट् (तु. प. से.) २. विकस्-फुल्ल् (भ्वा. प. से.) ।

फूत्कार, सं. पुं. (सं.) दे. 'फुंकार' ।

फूफा, सं पुं. (देश.) पितृष्वसृ,-पति:-धव: ।

फूफी, सं. स्त्री. (हिं. फूफा) पितृष्वसृ ।

फूल, सं. पुं. (सं. फुल्लम्) कुसुमं, प्रसूनं, पुष्पम् ।

—दान, सं. पुं., कुसुमभाजनं, फुल्लधानम् ।

—दार, वि., पुष्पित, सपुष्प ।

फूलना, क्रि. अ. (हिं. फूल) फुल्ल्-विकस् (भ्वा. प. से.) २ प्रमुद् (भ्वा. आ. से.) । सं.पुं.,विकास:,प्रस्फुटनं २. प्रमोद:, आह्लाद: ।

फूला, सं. पुं. } (हिं. फूल) शुक्रं, पुष्पम्,
फूली, सं. स्त्री. } पुष्पकं, नेत्ररोगभेद: ।

फूस, सं. पुं., दे. 'फूँस' ।

फूहड़, वि. (अनु.) जड, मूढ, मन्दमति २. कदाकार, कुरूप, कुदर्शन ।

फेंकना, क्रि. स. (सं. क्षेपणम्) क्षिप्-मुच् (तु. प. अ.), प्र-अस् (दि. प. से.) २. प्रमादेन पत् (प्रे.) ३. सावमानं त्यज् (भ्वा. प. अ.) ४. अपव्यय् (चु.) । सं. पुं., क्षेपणं, प्रासनं, पातनं, अपव्यय: ।

फेंकने योग्य, वि., क्षेपणीय, त्यक्तव्य ।

—वाला, सं. पुं., क्षेपक:, प्रासक: ।

फेंका हुआ, वि., क्षिप्त, प्रास्त, त्यक्त ।

फेंटना, क्रि. स. (सं. पिष्ट) मंथ् (क्र्. प. से.), मथ्-खज् (भ्वा. प. से.) २. क्रीडापत्राणि मिश्र् (चु.) ।

छकड़े का—, सं. पुं., शाकटः, धुरंधरः, धुरीणः, धौरेयः, प्रासंग्यः।
बूढ़ा—, सं. पुं., जरद्गवः।
हल खींचनेवाला—, सं. पुं., सैरिकः, हालिकः।
बैलून, सं. पुं. (अं.) दे. 'गुब्बारा'।
बैशाख, सं. पुं., दे. 'वैशाख'।
बैसाखी[१], सं. स्त्री. (सं. वैशाखी) आर्याणां पर्वविशेषः।
बैसाखी[२], सं. स्त्री. (सं. वैशाखः>) *वैशाखी, कुक्षियष्टिः (स्त्री.)।

बोझ, सं. पुं. (सं. वोढव्यं ?) भारः, भरः, वीवधः, पर्याहारः २. गुरुत्वं, तोलः, भारः ३. दुष्करकार्यं ४. कार्यचिंता ५. कार्यभारः ६. उत्तरदायित्वम् ।

बोझ(झि)ल, वि. (हिं. बोझ) गुरु, भारवत्, भारिक, भारिन्, दुर्वह ।

बोटा, सं. पुं. (सं. वृंतं>) छिन्नस्थूलकाष्ठखंडः २, खंडः-डं, शकलः-लम् ।

बोटी, सं. स्त्री. (हिं. बोटा) मांसखंडकः-कम् ।

—बोटी काटना, मु., शरीरं खंडशः कृत् (तु. प. से.)-शकली कृ, देहं स्तोकशः खंड् (चु.) ।

बोतल, सं. स्त्री. (अं. बॉटल) काचकूपी ।

बोदा, वि. (सं. अबोध) दुर्-मंद-जड़,-मति-धी-बुद्धि, मूर्ख २. अलस, मंथर ३. निर्बल, अशक्त ४. शिथिल, श्लथ ।

बोध, सं. पुं. (सं.) उपलब्धिः प्रतिपत्तिः (स्त्री.), ज्ञानं २. धैर्यं, आश्वासनम् ।

—गम्य, वि. (सं.) ज्ञेय, बुद्धिगम्य, सुबोध, सुगम ।

बोधक, सं. पुं. (सं.) अध्यापकः, शिक्षकः । वि., ज्ञापक, व्यंजक ।

बोधन, सं. पुं. (सं. न.) अध्यापनं, शिक्षणं २. ज्ञापनं, सूचनं ३. उत्थापनं, निद्राभंजनं ४. उद्दीपनं, प्रज्वलनम् ।

बोधनीय, वि. (सं.) विज्ञापनीय २. निद्रायाः उत्थापनीय ।

बोधि, सं. स्त्री. (सं. पुं.) समाधिभेदः, पूर्ण-ज्ञान,-प्रकाशः-उपलब्धिः (स्त्री.) २. कुक्कुटः ।

—द्रुम, सं. पुं. (सं.) बोधि,-तरुः-वृक्षः, पावन,-पिप्पलः-चलदलः-कुंजराशनः ।

—सत्त्व, सं. पुं. (सं.) बुद्धत्वोन्मुखो महात्मन् ।

बोना, क्रि. स. (सं. वपनं) आ-नि-,वप् (भ्वा. उ. अ.), (बीजानि)विकॄ (तु. प. से.)-आरुह् (प्रे.) । सं. पुं., उप्तिः (स्त्री.), वपनं, वापः, वपः, बीज,-विकिरणं-आरोपणम् ।

बोने योग्य, वि., वपनीय, वप्तव्य, वाप्य ।

बोने वाला, सं. पुं., वपः, वापकः, वप्तृ, वापिन् ।

बोया हुआ, वि., उप्त, भूमौ विकीर्ण (बीज) ।

बोरा, सं. पुं. (सं. पुरं = दोना>) स्यूतः, स्योतः, प्रसेवः ।

बोरिक एसिड, सं. पुं. (अं.) टङ्कणाम्लः ।

बोरिया, सं. स्त्री. (हिं. बोरा) कटः, किलिं-जकः २. आस्तरः-रणं, *विष्टरः ३. दे. 'बोरी' ।

—(अथवा बोरिया बधना) उठाना, मु., गमन-प्रस्थान-उद्यत (वि.) भू ।

बोरी, सं. स्त्री. (हिं. बोरा) स्यूतकः, स्योतकः, प्रसेवकः ।

बोल, सं. पुं. (हिं. बोलना) वाणी, गिर्-वाच-उक्तिः-व्याहृतिः (स्त्री.), वचस् (न.), शब्दः, वाक्यं, वचनं २. व्यंग्य-व्याज-छेक,-उक्तिः (स्त्री.), दे. 'बोली' ३. प्रतिज्ञा ४. वाद्यानां नियतध्वनिः ५. गीतांशः ।

—चाल, सं. स्त्री., सौहार्दं, सद्भावः, आ-सं,-लापः ।

—चाल की भाषा, सं. स्त्री., सांलापिक-व्याव-हारिक,-भाषा ।

—बाला होना, मु., वाक्यं आह (कर्म.) २. भाग्यं उद्-इ (अ. प. अ.) ३. यशो वृध् (भ्वा. आ. से.) ।

बोलना, क्रि. अ. (सं. ब्रू) आलप्-गद्-भण् (भ्वा. प. से.), ब्रू (अ. उ. अ.), वच् (आ. प. अ.) २. किलकिलायति-ते (ना. धा.), कूज् (भ्वा. प. से.) ३. कथ् (चु.) ४. गै (भ्वा. प. अ.) । सं. पुं., आलपनं, निगदनं,भाषणं, वचनं, गदनं कथनं, कूजनम् ।

बोलने योग्य, वि., आलपनीय, वचनीय,गेय ।

बोलने वाला, सं. पुं., वाचकः, वक्तृ, निगदितृ, कथकः, व्याख्यातृ, गायकः ।

बोला हुआ, वि., उक्त, गदित, कथित, गीत ।

बोली, सं. स्त्री. (हिं. बोलना) गिर्-वाच् (स्त्री.) गिरा, उदीरणा, वाणी २. वचनं-उक्तिः (स्त्री.), वाक्यं, शब्दः ३. विक्रय-घोषणा ४. भाषा, वाणी, गिरा ५. उप-प्राकृत-प्रादेशिक,-भाषा ६. वक्र-व्यंग्य-व्याज-छेक-भंगि,-उक्तिः (स्त्री.)-भाषितं, कूटाक्षेपः ।

—ठोली, सं. स्त्री., दे. 'बोली' (६) ।

—ठोली मारना, मु., भंग्या आक्षिप् (तु.प.अ.) वक्रोक्त्या अधिक्षिप्, व्याजोक्त्या सूच् (चु.) ।

बोवा(आ)ना, क्रि. प्रे., व. 'बोना' के प्रे. रूप ।

बोहनी, सं. स्त्री. (सं. बोधनं>)प्रथमविक्रयः ।

बौखलाना, क्रि. अ. (सं. वायुस्खलनं>) ईषत् उन्मद् (दि. प. से.)—वातुलीभू ।

बौछाड़-र, सं. स्त्री. (सं. वायुक्षरणं>) झंझा, झंझा,-अनिलः-वातः-मरुत् (पुं.) २. आसारः, धारासंपातः ३. *सततसंपातः ४. व्यंग्योक्तिः (स्त्री.), दे. 'बोली' (६) ।

बौद्ध, सं. पुं. (सं.) गौतमबुद्धानुयायिन् । वि., बुद्ध,-संबंधिन्-प्रचारित ।

—धर्म, सं. पुं. (सं.) बुद्धप्रवर्तितधर्मः, बुद्धमतम् ।

बौना, सं. पुं. (सं. वामनः) खर्वः, ह्रस्वः, खट्टनः, खट्टेरकः, न्यंच् । वि., खर्व, ह्रस्व ।

बौरा, वि. (सं. वातुल) विक्षिप्त, उन्मत्त । २. अज्ञ, मूर्ख ।

बोली, सं. स्त्री. (देश.) विकं, रुद्यःप्रसूताया गोर्दुग्धम् ।

ब्याज, सं. पुं. दे. 'सूद' ।

ब्याध, सं. पुं., दे. 'व्याध' ।

ब्याना, क्रि. स. (सं. बीजं>) जन्-उत्पद् (प्रे.), प्रसू (अ. आ. से.) ।

ब्यालू, सं. पुं. (सं. वैकालिक>) सांध्य भोजनं, *नक्ताशः । *वैकालिकम् ।

ब्याह, सं. पुं. (सं. विवाहः) उद्वाहः, परिणयः, उपयमः, पाणि,-ग्रहः-ग्राहः-ग्रहणं, दार,-परिग्रहः-अधिगमः ।

ब्याहता, वि. स्त्री. (सं. विवाहिता) ऊढा, परिणीता । सं. पुं., पतिः, भर्तृ ।

ब्याहना, क्रि. स, (सं. विवहनं) (पत्नीग्रहण) उद्-वि-वह् (भ्वा. प. अ.), परिणी (भ्वा. प. अ.), उपयम् (भ्वा. आ. अ.), परि-,प्रति-ग्रह् (क्र्. प. से.) २. (पति-ग्रहणं) पतिं विद् (तु. उ. वे.)-लभ् (भ्वा. आ. अ.)-अधिगम् (भ्वा. प. अ.), वृ (स्वा. उ. से.), भर्त्रा संयुज् (कर्म.) ३. उद्वाहं कृ (प्रे.), पाणिं ग्रह् (प्रे.), विवाहेन-संयुज् (प्रे.), पाणिग्रहणं संपद् (प्रे.)। सं. पुं., दे. 'ब्याह' सं. पुं. ।

ब्याहने योग्य, वि., उद्-वि,-वाह्य-वोढव्य, परिणेय, विवाहयोग्य ।

ब्याहने वाला, सं. पुं., वि-उद्-वोढृ, परिणेतृ, परिणायकः, पाणि-,ग्राहः-ग्राहकः-ग्रहीतृ ।

ब्याहा हुआ, वि. पुं., विवाहित, सपत्नीक, सभार्य, कृतदार, स्त्रीमत्, कुटुंबिन्, ऊढ, परिणीत । (वि. स्त्री.) सभर्तृका, पतिवत्नी, सधवा, सुवासिनी, परिणीता, ऊढा ।

ब्योंत, सं. स्त्री. (सं. व्यवस्था) वृत्तं, वृत्तांतः २. कार्य,-विधिः-प्रणाली-शैली ३. युक्तिः (स्त्री.), उपायः ४. आयोजनं, उपकल्पनं ५. अवसरः ६. व्यवस्था, प्रबंधः ७. सीवनाय वस्त्रकर्तनम् ।

ब्योंतना, क्रि. स., दे. 'कतरना' ।

ब्योपार-री, सं. पुं., दे. 'व्यापार-री' ।

ब्योरा, सं. पुं. (सं. विवरणम्) विस्तृत,-वर्णनं-वृत्तान्तः २. उदन्तः, वृत्तान्तः ३. अन्तरम्, भेदः ।

—(रे)वार, अ०, स,-विस्तरं-विस्तारम्, विस्तारपूर्वकम् ।

ब्योहार, सं. पुं., दे. 'व्यवहार' ।

ब्रज, सं. पुं., दे. 'व्रज' ।

ब्रत, सं. पुं., दे. 'व्रत' ।

ब्रह्म, सं. पुं. [सं. ब्रह्मन् (न.)] परमात्मन्, परमेश्वरः, सच्चिदानंदः, जगत्कर्तृ २. आत्मन्, देहिन् ३. ब्राह्मणः (प्रायः समासारंभ में, उ. ब्रह्महत्या) ४. चतुर्मुख, विधिः, पद्मासनः ५. वेदः ६. ब्रह्मांडं, भुवनकोषः ।

—चर्य, सं. पुं. (सं. न.) आश्रमभेदः, प्रथमाश्रमः २. वीर्यरक्षा, अष्टांगमैथुनप्रतिषेधः, यमभेदः (योग.), ऊर्ध्वरेतस्त्वम् ।

—चारिणी, सं. स्त्री. (सं.) ब्रह्मचर्यधारिणी, २. प्रथमाश्रमिणी २. अनूढा, कुमारी ।

—चारी, सं. पुं. (सं.-रिन्) व्रतिन्, लिंगिन्, लिङ्गस्थः, ब्रह्मचर्यधारिन् वर्णिन् २. प्रथमाश्रमिन्, अविवाहितः ।

—ज्ञान, सं. पुं. (सं. न.) परमेश्वरबोधः ।

—ज्ञानी, सं. पुं. (सं.-निन्) ब्रह्मवेत्ता २. अद्वैतवादिन् ।

—दिन, सं. पुं. (सं. न.) परमेष्ठिदिवसः, सृष्ट्यवधिः (= १०० चतुर्युगी) ।

—देश, सं. पुं. (सं.) आर्यावर्तस्य भागविशेषः (कुरुक्षेत्रं च मत्स्याश्च पंचालाः शूरसेनकाः । एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरः—मनु० २।१९)

—पुराण, सं. पुं. (सं. न.) पुराणविशेषः ।

—बंधु, सं. पुं. (सं.) पतितो विप्रः ।

—भोज, सं. पुं. (सं.-ज्यं) ब्राह्मणभोजनम् ।

—मुहूर्त, सं. पुं. (सं. पुं. न.) सूर्योदयात् त्रिचतुरघटीपूर्ववर्तिकालः, ब्रह्मरात्रः ।

—यज्ञ, सं. पुं. (सं.) ब्रह्मसत्रं, सविधि वेदाध्ययनाध्यापनम् ।

—रंध्र, सं. पु. (सं. न.) ब्रह्म,-छिद्र-द्वारम् ।

—रात्रि, सं. स्त्री. (सं.) ब्रह्मणो निशा, प्रलयावधिः (= १०० चतुर्युगी) ।

—वर्चस, सं. पुं. (सं. न.) तपःस्वाध्यायजं तेजस् (न.) ।

—वर्चस्वी, वि. (सं.-स्विन्) ब्रह्मवर्चसविशिष्ट ।

—वादिनी, सं. स्त्री. (सं.) गायत्री । वि., वेदोपदेष्ट्री ।

—वादी, वि. (सं.-दिन्) वेदोपदेशकः ।

—विद, वि. (सं.) ब्रह्मवेत्तृ २. वेदार्थज्ञः ।

—विद्या, सं. स्त्री. (सं.) उपनिषद्-परा,-विद्या ।

—वेत्ता, सं. पुं. (सं.-वेत्तृ) ब्रह्मज्ञः ।

—वैवर्त्त, सं. पुं. (सं. न.) पुराणविशेषः ।

—समाज, सं. पुं. (सं.) श्रीराममोहनराजप्रवर्तितः संप्रदायविशेषः ।

—सूत्र, सं. पुं. (सं. न.) दे. 'यज्ञोपवीत' २. शारीरिकसूत्रम् ।

—हत्या, सं. स्त्री. (सं.) विप्रवधः ।

—हत्यारा, सं. पुं. (सं.+हि.) विप्रघ्नः-ब्राह्मणघातकः ।

ब्रह्मत्व, सं. पुं. (सं. न.) परमेश्वर,-त्वं-ता २. ब्राह्मणत्वम् ।

ब्रह्मर्षि, सं. पुं. (सं.) वसिष्ठादयो मंत्रद्रष्टारः ऋषयः २. ब्राह्मणः ऋषिः ।

ब्रह्मा, सं. पुं. (सं.-ह्मन् पुं.) चतुर्मुखः, अष्टकर्णः, अजः, कः, कंजः, कमल-पद्म-अब्ज,-योनिः, वि-,धातृ, नाभिजः, पद्मासनः, परमेष्ठिन्, पितामहः, विधिः, विरिंचः-चिः-चनः, विश्वसृज्, सर्वतोमुख, स्रष्टृ, स्वयंभूः, हंसवाहनः, हिरण्यगर्भः (सब पुं.) ।

ब्रह्मांड, सं. पुं. (सं. न.) भुवनकोषः, विश्वगोलकः, विश्वं, जगत् (न.),जगती, त्रिभुवनम् ।

ब्रह्माक्षर, सं. पुं. (सं. न.) ओम् इत्यक्षरम्, प्रणवः, ओङ्कारः ।

ब्रह्माणी, सं.स्त्री. (सं.) ब्रह्मणः पत्नी, शतरूपा, सावित्री, सरस्वती, गायत्री ।

ब्रह्मानंद, सं. पुं. (सं.) ब्रह्मदर्शनाह्लादः ।

ब्रह्माभ्यास, सं. पुं. (सं.) वेद,-अध्ययनं-स्वाध्यायः ।

ब्रह्मावर्त्त, सं. पुं. (सं.) तपोवटः, सरस्वती-दृपद्वत्योर्मध्यवर्तिदेशः ।

ब्रह्मासन, सं. पुं. (सं. न.) योग-ध्यान,-आसनम् ।

ब्रह्मास्त्र, सं. पुं. (सं. न.) ब्रह्मस्वरूपमस्त्रं २. अमोघास्त्रभेदः ।

ब्राह्मण, सं. पुं. (सं.) आर्याणामुत्तमो वर्णः २. विप्रः, ज्येष्ठवर्णः, अग्र,-जन्मन्-जातकः । भूदेवः, द्वि,-जन्मन्-जातिः, वक्त्रजः, द्विजः, गुरुः, द्विजोत्तमः, षट्कर्मन्, ब्रह्मन् (सब पुं.) ।

ब्राह्मणत्व, सं. पुं. (सं. न.) द्विजत्वं, विप्रत्वं, ब्राह्मण्यम् इ. ।

ब्राह्मणी, सं. स्त्री. (सं.) ब्राह्मणपत्नी २. ज्येष्ठवर्णा, द्विजोत्तमा ३. बुद्धिः (स्त्री.) ।

ब्राह्ममुहूर्त्त, स. पुं. (सं. पुं. न.) अरुणोदय-कालस्य प्रथमदंडद्वयम् ।

ब्राह्मी, सं. स्त्री. (सं.) दुर्गा २. भारतवर्षस्य प्राचीनलिपिविशेषः ३. (बूटी) सोमवल्लरी, सुरसा, परमेष्ठिनी, ब्रह्मकन्यका, शारदा, सरस्वती ।

ब्रिटिश, वि. (अं.) आंग्ल ।

ब्रुश, सं. पुं. (अं.) आघर्षणी, लोममयी शोधनी-मार्जनी २. कूर्चिका-र्ची, तूलिका, वर्तिका ।

ब्रूरी, सं. स्त्री. (अं. ब्र्यूरी) यवासवनी ।

ब्रोंकाइटस, सं. पुं. (अं.) श्वासनालीभुजप्रदाहः ।

ब्लाक, सं. पुं. (अं.) *चित्रफलकः-कं २. चतुरस्रो भूखंडः ३. गृहवर्गः ।

ब्लीचिंग पौडर, सं. पुं. (अं.) श्वेतनक्षोदः, रंगनाशकचूर्णम् ।

ब्लैडर, सं. पुं. (अं.) मूत्राशयः, बस्तिः (पुं. स्त्री.) २. पित्ताशयः ३. (पादकन्दुकस्य) अन्तःकोषः ।

भ

भ, देवनागरीवर्णमालायाश्चतुर्विंशो व्यंजनवर्णः, भकारः ।

भंग[1], सं. स्त्री., दे. 'भांग' ।

भंग[2], सं. पुं. (सं.) भंजनं, भेदनं २. विनाशः, विध्वंसः ३. अतिक्रमणं, उल्लंघनं ४. तरंगः, कल्लोलः ५. पराजयः ६. खंडः-डं ७. बाधा, विघ्नः ८. वक्रता, जिह्मता ९. दे. 'लकवा' ।

भंगड़, वि. (हि. भांग) भंगाप, भंगापायिन् ।

भँगरा[1],सं.पुं. (सं. भृगराजः) केशयः,केशरंजनः, कुन्तलवर्द्धनः, पितृप्रियः, भृंगः, केशराजः ।

भँगरा[2], सं. पुं. (हिं. भंग) शाणपटः, वराशिः-सिः ।

भंगराज, सं. पुं. (सं. भृङ्गराजः) पिकाकारः खगभेदः २. दे. 'भंगरा'[1] ।

भंगिन, सं. स्त्री. (हिं. भंगी[1]) खलपूः (स्त्री.), सम्मार्जिका ।

भंगिमा, सं. स्त्री. (सं.-मन् पुं.) वक्रता, कुटिलता, जिह्मता, अरालता ।

भंगी,[1] सं. पुं. (सं. भक्तः>) खलपूः (पुं.), मलहारकः, संमार्जकः २. क्षुद्रजातिभेदः ।

भंगी,[2] वि. (हिं. भंग[1]) दे. 'भंगड़' ।

भंगी,[3] सं. स्त्री. (सं.) भेदः, विच्छेदः २. कुटिलता, वक्रता ३. अंगनिवेशः, विन्यासः ४. कल्लोलः, लहरी ५. व्याजः ६. प्रतिकृतिः (स्त्री.) ।

भंगी,[4] वि. (सं. भंगिन्) भिदुर, भंगुर, सुभंग, भंजनशील २. भंजक, भंजन, खंडक, खंडन ।

भंगुर, वि. (सं.) भिदुर, सुभंग २. नश्वर, अध्रुव २. कुटिल, वक्र ।

भंजक, त्रि. (सं.) खंडक, खंडन, त्रोटक २. उल्लंघक, अतिक्रमणकारिन् ।

भंजन, सं. पुं. (सं. न.) खंडनं, त्रोटनं, भेदनं, शकलीकरणं २.अतिक्रमः-मणं, उल्लंघनं, भंगः, व्याहननं ३. वि-,ध्वंसनं ४. भंगः, ध्वंसः ५. नाशनं, लोपनम् । वि., दे. 'भंजक' (१-२) ।

भंजना, क्रि. अ. (सं. भंजनं) दे. 'टूटना' ।

भंटा, सं. पुं. (सं. वृंताकः) दे. 'बैंगन' ।

भंड, सं. पुं. (सं.) दे. 'भांड़' ।

भंडा, सं. पुं., दे. 'भांडा' ।

भंडार, सं. पुं. (सं. भांडारं) कोशः-पः, निधिः, शेवधिः, निधानं २. धान्य,-कोष्ठः, अ(आ)गारः-रं ३. पाकशाला. ४. उदरं, जठरं ५. भांडागारः-रं ६. 'दे' 'भंडारा' ।

भंडारा, सं. पुं. (हिं. भंडार) दे. 'भंडार' (१-५) २. समूहः, राशिः ३. साधूनां भोजनोत्सवः ।

भंडारी, सं. (हिं. भंडार) कोष्ठकः, अ(आ)-गारकः-कं २. कोशः-षः ।

भंडारी, सं. पुं. (भांडारिन्) कोशा(षा)ध्यक्षः, धनाध्यक्षः २. भांडागारिकः, भांडारिकः ३. सूदः, पाचकः ।

भंभीरी, सं. स्त्री. (अनु.) रक्तवर्णः पतंगभेदः, *भंभीरी २. दे. 'तीतुरी' ।

भँवर, सं. पुं. (सं. भ्रमरकः) जल,-आवर्तः-गुल्मः, भ्रमिः (स्त्री.), आवर्तः, अवघूर्णः, कूलहुंडकः, तानूरः २. दे. 'भ्रमर' ३. गर्तः-र्तं, अवटः ।

भँवरा, सं. पुं., दे. 'भ्रमर' ।

भँवरी,[1] सं. स्त्री. (हिं. भँवर) दे. 'भँवर' (१), शरीरांगस्थं रोम,-वर्तुलं-मंडलम् ।

भँवरी,[2] सं. स्त्री. (हिं. भँवरना, सं. भ्रमणं>) दे. 'भाँवर' २. वैवधिकता, भांडवाहकता ३. (प्रजारक्षार्थं अधिकारिणां) पर्यटनं-परिभ्रमणम् ।

भइया, सं. पुं. (हिं. भाई, दे.) ।

भक, सं. स्त्री. (अनु.) ज्वाला-झलका,-ध्वनिः (पुं.) ।

भक्त, वि. (सं.) धार्मिक, धर्मात्मन्, पुण्य-धर्म,-शील, पुण्यात्मन् । सं. पुं., पूजकः, उपासकः, सेवकः २. अनुयायिन्, अनुगामिन् ३. पक्षपातिन्, सहायकः ।

भक्ताई, सं. स्त्री., दे. 'भक्ति' ।

भक्ति, सं. स्त्री. (सं.) ईश्वर,-सेवा,-पूजा-अर्चा-उपासना-परायणता २. नियमः, धार्मिकता, धर्मक्रिया, तपस् (न.) ३. श्रद्धा, निष्ठा ४. परायणता, निरतिः (स्त्री.), अनुरागः, अभिनिवेशः ।

भक्ष, सं. पुं. (सं.) भोजनम् २. भक्षणम् ।

—कार, सं. पुं. (सं.) खांडिकः २. पाचकः ।

भक्षक, वि. (सं.) खादक, अद्मर, भोक्तृ, घस्मर, भोजिन् [भक्षिका (स्त्री.) = खादिका, भोजिनी, भोक्त्री] ।

भक्षण, सं. पुं. (सं. न.) अशनं, आस्वादनं, खादनं, भोजनं, अभ्यवहरणं २. आहारः ।

भक्षित, वि. (सं.) भुक्त, खादित, अशित ।

भक्षी, वि. (सं.-क्षिन्) दे. 'भक्षक' ।

भक्ष्य, वि. (सं.) खाद्य, भोज्य, अभ्यवहार्य । सं. पुं. (सं. न.) भोजनं, आहारः, खाद्यवस्तु (न.), अन्नम् ।

भगंदर, सं. पुं. (सं.) अपानदेशे व्रणरोगभेदः ।

भग, सं. पुं. (सं.) सूर्यः २. ऐश्वर्यं, धनं ३. स्त्री-महा,-भाग्यं ४. चंद्रः ५. योनिः (स्त्री.) ६. गुदं ७. पूर्वाफल्गुनीनक्षत्रं ८. धर्मः ९. कांतिः (स्त्री.) १०. मोक्षः ११. माहात्म्यं १२. यत्नः ।

भगण, सं. पुं. (सं.) नक्षत्रसमूहः २. गणभेदः। (ऽ।।; छंदःशास्त्र)।

भगत, सं. पुं. तथा. वि., दे. 'भक्त'।

भगतानी, सं. स्त्री. (हिं. भगत) भक्त,-भार्या-पत्नी २. ईश्वर,-उपासिका-पूजिका-सेविका, धर्मशीला ३. अनुगामिनी।

भगती, सं. स्त्री., दे. 'भक्ति'।

भगदड़, सं. स्त्री. (हिं. भाग+दौड़) पलायनं, अप,-क्रमणं-यानं, विद्रावः।

—पड़ना या मचना, क्रि. अ., पलाय् (भ्वा. आ. से.), वि-प्र-द्रु (भ्वा. प. अ.), अपधाव् (भ्वा. प. से.)।

भगवंत, सं. पुं. (सं. भगवन्तः>) ईश्वरः, भगवत् (पुं.)।

भगवती, सं. स्त्री. (सं.) देवी २. गौरी ३. सरस्वती ४. गंगा ५. दुर्गा।

—भगवत्, वि. (सं.) श्रीमत्, लक्ष्मीवत्, ऐश्वर्यशालिन् २. पूज्य, मान्य, अर्चनीय। सं. पुं. (सं.) परमेश्वरः, जगदीश्वरः ३.विष्णुः ४. शिवः ५. जिनः ६. बुद्धः।

—गीता, सं. स्त्री. (सं.) श्रीकृष्णार्जुनसंवादात्मको विख्यातो धर्मग्रंथविशेषः।

—पदी, सं. स्त्री. (सं.) गंगा, *देवनदी।

भगवाँ-वा, सं.पुं., दे. 'गेरु'। वि., दे.'गेरुआ'।

भगवान-न्, वि. (सं. भगवत्) दे. 'भगवत्' वि. तथा सं. पुं.।

भगाना, क्रि. स., व. 'भागना' के प्रे. रूप।

भगिनी, सं. स्त्री. (सं.) सोदरा, दे. 'बहन'।

भगीरथ, सं. पुं. (सं.) अयोध्यापतिविशेषः। वि., सुमहत्, विपुल, अत्यधिक।

भगोड़ा, वि. (हिं. भागना) रणविमुख, युद्ध-त्यागिन् २. अपधावित, प्रपलायित ३. भीरु, कातर।

भग्न, वि. (सं.) खंडित, त्रुटित, ध्वस्त २. भिन्न, वि-,दीर्ण ३. पराजित, पराभूत।

भग्नावशेष, सं. पुं. (सं.) ध्वंसावशेषः, दे. 'खंडहर'।

भजन, सं. पुं. (सं. न.) पूजा, अर्चा, सेवा, सपर्य्या २. जपः, संततस्मरणं ३. भक्तिगीतं-तिका।

—करना, क्रि. स., दे. 'भजना'।

भजना, क्रि. स. (सं. भजनं) भज् (भ्वा. उ. अ.), पूज्-सभाज् (चु.), उपास् (अ. आ. से.), आराध् (चु.), नमस्यति (ना. धा.), सेव् (भ्वा. आ. से.) २. जप् (भ्वा. प. से.), निरंतरं स्मृ (भ्वा. प. अ.) ३. आ-,श्रि (भ्वा. उ. से.)। क्रि. अ., दे. 'भागना'। सं. पुं., दे. 'भजन' (१-२)।

भजनानंद, सं. पुं. (सं.) भक्ति,-आनन्दः-रसः-आह्लादः। वि. भक्तिपरायण।

भजनानंदी, वि. (सं.-दिन्) भक्त्यानन्द,-मग्न-लीन-परायण।

भजनीक, सं. पुं. (सं. भजनं>) गायकः, गातृ, गातुः, गेष्णः।

भजनीय, वि. (सं.) पूज्य, सम्मान्य, सेव्य।

भजने योग्य, वि., भजनीय, उपास्य, सेव्य, जपार्ह, आश्रयणीय।

भजने वाला, सं. पुं., भक्तः, उपासकः आराधकः।

भट, सं. पुं. (सं.) योधः, योद्धृ (सैनिकः, आयुधिकः) २. वीरः, शूरः ३. वर्णसंकरभेदः।

भटकटाई, भटकटैया, सं. स्त्री. (सं. भटः+कंटकः>) दुःस्पर्शा, दुष्प्रधर्षिणी, बहुकंटा, चित्रफला।

भटकना, क्रि. अ. (सं. भ्रान्तक>) मोघं पर्यट्-परिभ्रम् (भ्वा. प. से.) २. पथभ्रष्ट (वि.), इतस्ततः या (अ. प. अ.), विपथंगम् ३. भ्रम्, मुह् (दि. प. से.)। सं. पुं., व्यर्थपर्यटनं, पथ-भ्रंशः, उन्मार्ग-गमनं, भ्रमः, माया, मोहः।

भटकाना, क्रि. स., व. 'भटकना' के प्रे. रूप।

भटका हुआ, वि., उन्मार्ग-विपथ,-गामिन्, पथ-भ्रष्ट, भ्रांत, मूढ।

भटू, सं. स्त्री., (सं. वधूः>) (सम्बोधन में हा) (हे) सखि! (हे) आलि! (हे) वयस्ये.

भट्ट[1], सं. पुं. (सं. भट्टः) जातिविशेषः २. स्तुति-पाठकः, दे. 'भाट'।

भट्ट[2], सं. पुं., दे. 'भट'।

भट्ठा, सं. पुं. (सं. भ्राष्ट्रः>) आपाकः, कंदुः (पुं. स्त्री.), पाकपुटी।

भट्ठी, सं. स्त्री. (हिं. भट्ठा) अश्मंतं, उद्धानं, अंतिका, अंदिका, अधिश्रयणी, अग्निकुंडं २. संधानी, अभिषवशाला ३. रजककटाहः।

भठियारा, सं. पुं. (हिं. भट्ठा) पांथागार,-अध्यक्षः-पतिः २. भृष्टकारः, भ्राष्ट्रमिंधः, भर्जन,-कारः-कर्तृ।

भठियारिन-री, सं. स्त्री. (हिं. भठियारा) पांथागाराध्यक्षा २. भर्जन,-कारी-कर्त्री, भृष्टकारी।

भड़क, सं. स्त्री. (अनु.) औज्ज्वल्यं, प्रभा, भास् (स्त्री.), अति-बाह्य,-कांतिः-दीप्तिः (दोनों स्त्री.)-शोभा।

—दार, वि. (हिं.+फ़ा.) भासुर, भासमान, उज्ज्वल, दीप्तिमत्।

भड़काना, क्रि. अ. (हिं. भड़क) उत्-प्र ज्वल् (भ्वा. प. से.), उत्-प्र-सं दीप् (दि. आ. से.) २. ससाध्वसं अपसृ (भ्वा. प. अ.)-परावृत् (भ्वा. आ. से.), सहसा कंप् (भ्वा. आ. से.) ३. क्रुध् (दि. प. अ.)।

भड़काना, क्रि. स. व., 'भड़कना' के प्रे. रूप २. उत्तिज् उद्दाप्-(प्रे.)।

भड़कीला, वि. (हिं. भड़क) दे. 'भड़कदार'।

भड़भड़िया, वि. (अनु. भड़भड़) वाचाऊ, वाचाट, वावदूक, जल्पक, बहुभाषिन्।

भड़भूँजा, सं. पुं. (हिं. भाड़ भूंजना) दे. 'भठियारा' (२)।

भड़भूजी,-जिन, सं. स्त्री. (हिं. भड़भूंजा) दे. 'भठियारिन' (२)।

भड़ुआ, सं. पुं, (हिं. भाँड) भगाजीविन्, वेश्याचार्यः, कुंडाशिन्, विटः।

भड्डर, सं. पुं. (सं. भद्र>) क्षुद्रब्राह्मणभेदः।

भणित, वि. (सं.) उक्त, कथित, व्याहृत।

भतीजा, सं. पुं. (सं. भ्रातृजः) भ्रातृव्यः, भ्रात्री-(त्रे)यः, भ्रातुःपुत्रः।

भतीजी, सं. स्त्री. (हिं. भतीजा) भ्रातृजा, भ्रातृव्या. भ्रात्रीया, भ्रातुःपुत्री, भ्रात्रेयी।

भत्ता, सं. पुं. (सं. भक्तं>) *भक्त, मार्गव्ययः, यात्रावृत्तिः (स्त्री.), यात्रिकम्।

भदभद, वि. (अनु.) अतिस्थूल २. कुदर्शन।

भद्दा, वि. (अनु. भद) कदाकार, कुदर्शन, कुरूप, विषमांग २. नैपुण्य-दाक्ष्य-शून्य ३. अश्लील, अवाच्य।

भद्र[1], वि. (सं.) सभ्य, शिष्ट, सुशिक्षित, श्रेष्ठ, गुणिन्, प्रशस्त, साधु, सुवृत्त, सुशील २. मंगल, कल्याण, शुभ ३. उचित, उपयुक्त। सं. पुं. (सं. न.) कल्याणं, क्षेमं, मंगलं, कुशलं, हितं २. चंदनं ३. गजजातिभेदः ४. सुवर्णं ५. समृद्धिः (स्त्री.)।

भद्र[2], सं. पुं. (सं. भद्राकरणं) केशकूर्चश्मश्रु-मुंडनं, मुंडनम्।

भद्रता, सं. स्त्री. (सं.) शिष्टता, सभ्यता, सज्जनता, सुशीलता।

भद्रासन, सं. पुं. (सं. न.) नृपासनं, सिंहासनं २. योगासनभेदः।

भद्रिका, सं. स्त्री. (सं.) भद्रा तिथिः (द्वितीया, सप्तमी, द्वादशी) २. वृत्तभेदः।

भनक, सं. स्त्री. (सं. भण्>) मंद-अस्पष्ट-ध्वनिः २. जनप्रवाहः, किंवदंती।

भनभनाना, क्रि. अ. (अनु.) भणभणायते (ना. धा.), गुंज् (भ्वा. प. से.) झंकारं कृ।

भनभनाहट, सं. स्त्री. (हिं. भनभनाना) भणभणायितं, भणभणध्वनिः, गुंजनं, गुंजितं, झंकारः।

भब(भ)का, सं. पुं. (हिं. भाप) बक-संधान,-यंत्रम्।

भभक, सं. स्त्री. (अनु. भक) ज्वालोत्थानं, कीलोद्गतिः (सं. स्त्री.) २. दे. 'उज्वाल'।

—मारना, क्रि. अ., गर्ज् (भ्वा. प. से.)।

भभकना, क्रि. अ. (हिं. भभक) प्रज्वल् (भ्वा. प. से.), उद्दीप् (दि. आ. से.) २. तापातिशयेन स्फुट् (तु. प. से.)-भंज् (कर्म.) ३. दे. 'उबलना'।

भभकी, सं. स्त्री. (हिं. भभक) विभीषिका, तर्जना, भर्त्सना, भयदर्शनम्।

—देना, क्रि. स., निर्-,भर्त्स्, तर्ज् (दोनों चु. आ. से.)।

गीदड़—, मु., कपटविभीषिका, मिथ्या तर्जना।

भभ्भड़, सं. पुं., दे. 'भीड़भाड़'।

भभूका, सं. पुं. (हिं. भभक) ज्वाला, शिखा, अर्चिस् (न.)।

भभूत, सं. स्त्री. [सं. विभूतिः (स्त्री.)] गोमयभस्मन् (न.) २. वैभवम्।

—लगाना, क्रि. स., विभूत्या विग्रहं लिप् (तु. उ. अ.)। सं. पुं. भस्मगुंठनम्।

भयंकर, वि.(सं.) त्रास-भीति-भय,-जनक-द-प्रद-आवह, भीम, भीषण, भयानक, रौद्र, भैरव।

भयंकरता, सं. स्त्री. (सं.) भीमता, भीषणता, भयानकता इ.।

भय, सं. पुं. (सं. न.) भीः-भीतिः (स्त्री.),

साध्वसं, सं-,त्रासः, दरः-रं, भिया २. आतंकः ३. आशंका ।

—कारक,—प्रद, वि., दे. 'भयंकर' ।

—खाना या लगना, क्रि. अ., भी (जु. प. अ.), वि-सं-त्रस् (भ्वा. दि. प. से.), दे. 'डरना' ।

—भीत, वि. (सं.) भीत, भयार्त, ससाध्वस, त्रस्त, सभय, सदर ।

—हीन, वि. (सं.) निर्भय, अभय, निर्भीक, अकुतोभय, दे. 'निर्भय' ।

भयातुर, वि. (सं.) दे. 'भयभीत' ।

भयानक, वि. (सं.) दे. 'भयंकर' ।

भयावना, वि. (सं. भयं>) दे. 'भयंकर' ।

भयावह, वि. (सं.) दे. 'भयंकर' ।

भर, वि. (हिं. भरना) समस्त, सम्पूर्ण, समग्र, यावत् (-ती स्त्री.) तावत् (-ती स्त्री.) । क्रि. वि., यावत् (द्वितीया के साथ), आ-(पंचमी के साथ-मात्र,-मित,-परिमित,-परिमाण ।

आयु—, क्रि. वि., यावज्जीवं, आमृत्योः ।

कोस—, क्रि. वि., क्रोशं यावत्, क्रोशमात्रम् ।

बाँस—, वि., वंश,-मात्र-मित-परिमाण ।

शक्ति—, क्रि. वि., यथाशक्ति (न.), यावच्छक्यं, यावच्छक्ति (अव्य.) ।

सेर— वि., सेर-सेटक,-मात्र-परिमित ।

भरण, सं. पुं. (सं. न.) पालनं, पोषणं, संवर्धनं, रक्षणं, समालंबनम् ।

भरणी, सं. स्त्री. (सं.)नक्षत्रविशेषः, यमदेवता २. घोषकलता । वि. स्त्री. (सं.) पालयित्री, पोषिका ।

भरत, सं. पुं. (सं.) कैकेयीपुत्रः, रामानुजः २. शाकुंतलेयः, दौष्यंतिः, सर्वदमनः ३. ऋषभदेवपुत्रः ४. नाट्यशास्त्रलेखको मुनिर्विशेषः ५. नटः ।

—खंड, सं. पुं. (सं. न.) भारतं, भारतवर्षः-र्षं २. भारतांतर्गतकुमारिकाखंडम् ।

भरता[1], सं. पुं. (देश.) *वृंताकभृक्तम् ।

भरता[2], **भरतार**, सं. पुं. [सं. भर्तारः (बहु.)] भर्तृ, पतिः, धवः २. स्वामिन्, प्रभुः ।

भरती, सं. स्त्री. (हिं. भरना) सैन्यप्रवेशः २. प्रवेशः ३. भरणं, पूरणं, पूर्तिः (स्त्री.) ।

—करना, क्रि. स., सैन्ये प्रवेशं कृ (प्रे.) ।

—डालना, क्रि. स., गर्तं पूर् (चु.) ।

—होना, क्रि. अ., सेनायां प्रविश् (तु.प.अ.) ।

भरना, क्रि. स. (सं. भरणं) भृ (भ्वा. उ. अ.), भृ (जु. उ. अ.), पृ. (जु. प. अ.), पॄ (जु. प. से.), पूर् (चु.), व्याप् (स्वा. प. अ.) २. प्रस्रु-पत् (प्रे.) ३. ऋणादिकं शुध्-निस्तॄ (प्रे.) ४. सह् (भ्वा. आ. से.) ५. उत्तिज्-प्रकुप् (प्रे.) ६. लिप् (तु. उ. अ.) । क्रि. अ., भृ-पृ-पॄ-व्याप्-पूर् (कर्म.) २. अंतः कुप् (दि. प. से.) ३. ऋणादिकं शुध् (दि. प. अ.) ४. पुष् (कर्म.) । सं. पुं., भरणं, पूरणं, व्यापनं, पूर्तिः-भृतिः (स्त्री.) २. ऋणं ३. उत्कोचः ।

भरनी[1], सं. स्त्री. (हिं. भरना) मल्लिकः,त्र(त)-सरः, सूत्रवेष्टः-ष्टनं २. तिर्यकृतंतवः (पुं. बहु.) ।

भरनी[2], सं. स्त्री., दे. 'भरणी' ।

भरने योग्य, वि., भर्तव्य, भरणीय, पूरणीय, पूरयितव्य २. शोधनीय (ऋणादि) ।

—वाला, सं. पुं., पूरकः, भर्तृ, पूरयितृ २. ऋणादिशोधकः ।

भरा हुआ, वि., सं,-भृत, पूर्ण, पूरित, आ-सं-कीर्ण, व्याप्त, निचित, संकुल, आविष्ट ।

भरपूर, वि. (हिं. भरना+पूरा) सं-परि-, पूर्ण-पूरित-भृत-संकीर्ण-व्याप्त, निचित । क्रि.वि., पूर्णतया, अशेषेण २. सम्यक्, साधु ।

भरभराना, क्रि. अ. (अनु.) आकुल (वि.) भू ।

भरम, सं. पुं. (सं. भ्रमः) भ्रान्तिः, मिथ्या-मतिः (दोनों स्त्री.), माया, आभासः, अविद्या २. भेदः, रहस्यम् ३. प्रतिष्ठा, प्रत्ययः ।

भरमार, सं. स्त्री. (हिं. भरना+मार) बहुलता, प्रचुरता, विपुलता, भूयिष्ठता ।

भरराना, क्रि. अ. (अनु०) सहसा पत् (भ्वा. प. से.) ९. त्रुट् (दि. तथा तु. प. से.) ।

भरवाना, क्रि. प्रे., व. 'भरना' के प्रे. रूप ।

भरसक, क्रि. वि. [हिं. भर+सक (=शक्ति)] यथा-शक्ति-बलं-सामर्थ्यं, पूर्ण,-शक्त्या-बलेन ।

भरा, वि. (हिं. भरना) पूर्ण, पूरित, (सं.) भृत, निचित, आविष्ट ।

—(री) जवानी, पूर्ण,-यौवनं-तारुण्यम् ।

—(री) थाली में लात मारना, मु., लाभ-प्रदजीविकां परित्यज् (भ्वा. प. अ.) ।

—पूरा, वि. (हिं. भरना+पूरा) संपन्न, समृद्ध २. परि-सं-,पूर्ण ।

भराई, सं. स्त्री. (हिं. भरना) दे. 'भरना' सं. पुं. २. भरणं-पूरणं,-भृतिः (स्त्री.)—वेतनम् ।

भराना, क्रि. प्रे., व. 'भरना' के प्रे. रूप।
भरी, सं. स्त्री. (हिं. भर) दशमाषो।
भरोसा, सं. पुं. (हिं. भरा+सं. विश्वासः>) विश्वासः, प्रत्ययः २. आश्रयः, अवलंबः-बनं, आधारः ३. आशा।
—करना, क्रि. अ., आ-अव-लंब् (भ्वा.आ.से.) २. विश्वस् (अ. प. से.) ३. आशां बंध् (क्र्. प. अ.)।
भर्ता, भर्तार, } सं. पुं. (सं. भर्तृ) दे. 'भरता[२]'।
भर्ता, सं. पुं., दे. 'भरता[१]'।
भर्ती, सं. स्त्री., दे. 'भरती'।
भर्त्सना, सं. स्त्री. (सं.) तर्जना, निर्भर्त्सना, अधिक्षेपः, निंदा, गर्हा, वाग्दंडः, उपालंभः।
—करना, क्रि. स., निर्भर्त्स्-तर्ज् (चु. आ. से.), गर्ह् (भ्वा. आ. से.), निंद् (भ्वा. प. से.)।
भलमनसत, भलमनसाहत, भलमनसी, } सं.स्त्री. (हिं. भला+मानुस) भद्रता, सज्जनता, आर्यत्वं, महानुभावता।
भला, वि. (सं. भद्र) शुभ, वर, शोभन, उत्तम, श्रेष्ठ, गुणवत्, निर्दोष, साधु, प्रशस्त, प्रशस्य, वर, सु-, सत्- २. उत्कृष्ट, विशिष्ट। सं. पुं. (सं. न.) कल्याणं, कुशलं, मंगलं, हितं २. लाभः, प्राप्तिः (स्त्री.)। अव्य., भवतु, अस्तु, तावत्।
—करना, मु., उपकृ, साहाय्यं दा (जु.उ.अ.)।
—चंगा, वि., नीरोग, स्वस्थ, निरामय।
—बुरा, सं. पुं., दुर्-अश्लील,-वचनं २. हानि-लाभौ।
—मानुस, सं. पुं., भद्रः, आर्यः, सज्जनः।
भले ही, मु., कामं, (लोट्, विधिलिङ् से भी अनुवाद किया जाता है)।
भलाई, सं. स्त्री. (हिं. भला) सज्जनता, साधुता, आर्यता २. उपकारः, उपकृतिः (स्त्री.), परहितम्।
भव, सं. पुं. (सं.) संसारः, जगत् (न.), २. जन्मन् (न.), उत्पत्तिः (स्त्री.) ३. पुनर्जन्मदुःखं ४. सत्ता ५. शिवः ६. मेघः।
—बंधन, सं. पुं. (सं. न.) जगज्जालम्।
—भंजन, सं. पुं. (सं.) ईश्वरः, मुक्तिदः।
—भय, सं. पुं. (सं. न.) पुनर्जन्मत्रासः।
—मोचन, वि. (सं.) मोक्षद।
—सागर, सं. पुं. (सं.) संसारपारावारः।
भवदीय, सर्व. (सं.) भावत्क, युष्मदीय, त्वदीय, तावक-यौष्माक [—की (स्त्री.)], यौष्माकीण।
भवन, सं. पुं. (सं.न.) अ(आ)गारः-रं, वेश्मन्-सद्मन् (न.), सदनं, निकेतनं, मंदिरं, गृहं, गेहं २. प्रासादः, नृपमंदिरम्।
भवानी, सं. स्त्री. (सं.) दे. 'पार्वती'।
भवितव्य, वि. (सं.) अवश्यं भाविन्, भवनीय।
भवितव्यता, सं. स्त्री. (सं.) नियतिः (स्त्री.), भाग्यं, भागधेयं, दैवम्।
भविष्णु, वि. (सं.) भविष्य, भविष्यत्, आगामिन्, भूष्णु।
भविष्य, वि. (सं.) आगामिन्, अनागत, उत्तर, भविष्यत्, श्वस्तन [—नी (स्त्री.)। सं. पुं. (सं. न.), भविष्यत्-आगामि-भावि-उत्तर-अनागत,-कालः-समयः, अनागतं, श्वस्तनं, प्रगेतनं, भाविन्-आगामिन् (न.), आयतिः (स्त्री.), उदर्कः।
भविष्यत्, वि. तथा सं. पुं., दे. 'भविष्य'।
भविष्य(द्)वक्ता, सं. पुं. (सं.-वक्तृ) भविष्यद्-वादिन्, दैवज्ञः।
भविष्य(द्)वाणी, सं. स्त्री. (सं.) भावि-कथनं-सूचनं, भविष्यद्वादः।
भव्य, वि. (सं.) सश्रीक, शोभान्वित, दिव्य, सुप्रभ, शोभन २. शुभ, मंगल ३. सत्य, यथार्थ ४. योग्य ५. भाविन् ६. श्रेष्ठ ७. प्रसन्न ८. महत्, गुरु।
भव्यता, सं. स्त्री. (सं.) दिव्यता, शोभा, श्रीः (स्त्री.), सुंदरता इ.।
भषक, सं. पुं. (सं.) कुक्कुरः, सारमेयः।
भसींड, सं. स्त्री. (देश.) मृणालः-लं, शालूकं (बिसदंडः ?), बिसं, नालीकः २. करहाटः, कर्कटः, शिफाकंदः।
भसुंड, सं. पुं., दे. 'हाथी'।
भसुर, सं. पुं. (हिं. ससुर का अनु.) ज्येष्ठः, भर्तुरग्रजः।
भस्म, सं. पुं. [सं. भस्मन् (न.)] भसितं, वि-, भूतिः (स्त्री.)।
—करना, क्रि. स., भस्मी(स्मी)कृ, भस्मसात् कृ २. दे. 'जलाना'।

—लेपन, सं. पुं. (सं. न.) भस्म,-गुंठन-उद्धूलनम् ।

—होना, क्रि. अ., भस्मीभू, भस्मसात्भू २. दे. 'जलना' ।

भस्मक, सं. पुं. (सं. न.) भस्मकीटः, उदररोग-भेदः २. क्षुधातिशयः ३. सुवर्णं ४. विडंगः ।

भस्मीभूत, वि. (सं.) मसितीभूत, सर्वथा दग्ध ।

भहराना, क्रि. अ. (अनु.) त्रुट् (दि. प. से.) २. सहसा पत् (भ्वा. प. से.) ३. स्खल् (भ्वा. प. से.) ।

भाँग, सं. स्त्री. (सं. भंगा) गजा, मादिनी, वि-,जया, मातुलानी ।

—खा या पी जाना, मु., उन्मत्त इव भाष् (भ्वा. आ. से.) ।

भांजा, सं. पुं. (हिं. बहिन) भागिनेयः, स्वस्रि(स्री-स्रे) यः ।

भांजी[१], सं. स्त्री. (हिं. भांजा) भागिनेयी, स्वस्रि(स्री)या, स्वस्रेयी ।

भाँजी[२], सं. स्त्री. (हिं. भाँजना) *भंजिका, भंजक-बाधक,-उक्तिः (स्त्री.) ।

—मारना, मु., बाध् (भ्वा. आ. से.) प्रति-बन्ध् (क्र्. प. अ.), प्रतिरुध् (स्वा. उ. अ.) ।

भाँटा, सं. पुं., दे. 'बैंगन' ।

भाँड़, सं. पुं. (सं. भंडः) चाटुपटुः, विनोद-परिहास,-कारिन्, वैहासिकः, परिहासयितृ । (राजा का भांड़) विदूषकः, नर्मसचिवः २. अनुकारिन्, विडंबनकृत् ३. वि., अपत्रप, निर्लज्ज ।

भांड़ा, सं. पुं. (सं. भांडं) (बृहत्-) पात्रं, भाजनं २. सामग्री, साधनानि (न. बहु.) ।

—फूटना, मु., रहस्यं भिद् (कर्म.) प्रकटीभू ।

—फोड़ना, मु., रहस्यं प्रकाश् (प्रे.)-भिद् (रु. प. अ.) ।

भांडागार, सं. पुं. (सं. पुं. न.) } दे. 'भंडार' ।
भांडार, सं. पुं. (सं. भाडारं) }

भाँति, सं. स्त्री. (सं. भेदः) प्रकारः, जातिः (स्त्री.), रूपं,-विधा (उ., बहुविध) २. रीतिः (स्त्री.), शैली, विधिः ।

—भाँति के, मु., विविध, बहु-अनेक-नाना,-विध-रूप-प्रकार ।

भाँपना, क्रि. स. (सं. भा>) ऊह् (भ्वा. आ. से.) अनुमा (जु. आ. अ.) ।

भाँवर-री, सं. स्त्री. (सं. भ्रमणं>) वैवाहिक,-प्रदक्षिणा-परिक्रमः २. परि,-भ्रमणं-अटनं-क्रमणम् ।

—फिरना या लेना, क्रि. अ., प्रदक्षिणीकृ, परिभ्रम्-परिक्रम् (भ्वा. प. से.) ।

भाई, सं. पुं. (सं. भ्रातृ) (सगा) सहोदरः, सोदरः, सोदर्य्यः, समानोदर्य्यः, सगर्भः, सहजः २.सगोत्रः, सजातीयः, सवर्णः, सकुल्यः, सवंशीयः, सनाभिः ३. (संबोधन में) सखे, मित्र, वयस्य, भ्रातः ।

चचेरा—, पितृव्य,-जः-पुत्रः ।

छोटा—, अनुजः, कनीयान् भ्रातृ ।

फुफेरा—, पैतृष्वसेयः, पि(पै)तृष्वस्रीयः ।

बड़ा—, अग्रजः, ज्यायान् भ्रातृ ।

ममेरा—, मातुल,-जः-पुत्रः, मातुलेयः ।

मौसेरा—, मातृष्वसेयः; मातृष्वस्रीयः ।

सौतेला—, वैमात्रः, वैमात्रेयः ।

—चारा, सं. पुं., भ्रातृत्वं, भ्रातृभावः, सौभ्रात्रं २. मित्रत्वं ३. सवर्णत्वं, सगोत्रत्वम् ।

—दूज, सं. स्त्री., यमद्वितीया, कार्तिकशुक्ला द्वितीया, पर्वविशेषः ।

—बंद, सं. पुं., ज्ञातयः, स्वजनाः, भ्रातरः, बंधवः, बांधवाः, सजातीयाः, सगोत्राः, सुहृदः (सब बहु.) ।

—बंदी, सं. स्त्री., दे. 'भाईचारा' ।

—बिरादरी, सं. स्त्री., दे. 'भाईबंद' ।

भाखा, सं. स्त्री. (सं. भाषा) दे. 'भाषा' २. हिन्दीभाषा ।

भाग, सं. पुं. (सं.) अंशः, विभागः, खंडः-डं २. पार्श्वः-र्श्वं ३. भाग्यं, भागधेयं ४. मस्तकं, ललाटं ५. सौभाग्यं ६. प्रातःकालः ७. वैभवं ८. गणितक्रियाभेदः (= तकसीम) ।

—करना, क्रि. स., दे. 'बाँटना' ।

—फल, सं. पुं. (सं. न.) फलं, लब्धिः (स्त्री.)।

भाज्यं
भाजकः ४) १६ (४ फलं
१६
×

—भरोसा, सं. पुं., भाग्याश्रयः, दैवपरता ।

—जगना, मु., भाग्यं उद्-इ (अ. प. अ.) ।

भागड़, सं. स्त्री. (हिं. भागना) सामूहिक-सामुदायिक,- पलायनं- अपमानं- अपधावनं, विद्रावः ।

भागना, क्रि. अ. (सं. भाज्) पलाय् (भ्वा. आ. से.), अपधाव् (भ्वा. प. से.), वि-प्र-द्रु (भ्वा. प. अ.), अप,-सृ-सृप् (भ्वा. प. अ.) २. वृज् (चु.), परिहृ (भ्वा. प. अ.)। सं. पुं., पलायनं, अपधावनं, अप,-यानं-द्रवणं-सरणं, परिहरणम्।

भाग-दौड़, सं. स्त्री., दे. 'भगदड़'।

सिर पर पैर रखकर भागना, मु., महाजवेन पलाय् या अपधाव्।

भागनेवाला, सं. पुं., दे. 'भगोड़ा'।

भागवत, सं. पुं. (सं. न.) श्रीमद्भागवतं, महापुराणविशेषः २. देवीभागवतपुराणं ३. भगवद्भक्तः। वि., ऐश्वर, वैष्णव।

भागार्थी, वि. (सं.-र्थिन्) भाग-अंश-खंड,-इच्छुक-कामिन्-अर्थिन्।

भागार्ह, वि. (सं.) अंशिन्, अंशभागिन्, भाग,-धारिन्-भागिन् २. विभाज्य, अंशनीय, वंटनीय।

भागिनेय, सं. पुं. (सं.) दे. 'भाँजा'।

भागी, सं. पुं. (सं. भागिन्) अंशिन्, अंश-भाग, ग्राहिन्-हारिन् २. दायादः, दायिकः, रिक्थिन्, अंशकः।

भागीरथ, वि. (सं.) भगीरथ,-सम्बन्धिन्-विषयक-सदृश।

भागीरथी, सं. स्त्री. (सं.) गंगा, जाह्नवी २. गंगाया वंगवर्तिशाखाविशेषः।

भाग्य, सं. पुं. (सं. न.) भागधेयं, दिष्टं, अदृष्टं, दैवं, नियतिः (स्त्री.) विधिः, भवितव्यता, विपाकः, प्राक्तनम्।

—उदय, सं. पुं. (सं.) पुण्योदयः, दैवानुकूलता।

—चक्र, सं. पुं. (सं. न.) दैवगतिः (स्त्री.), भाग्यक्रमः।

—वश,—वशात्, क्रि. वि. सौभाग्येन, सुदैवेन, दिष्ट्या, दैवात्।

—वान्, वि. (सं.-वत) भाग्यशालिन्, महाभाग, सुभग, धन्य, सौभाग्य-पुण्य,-वत सुकृतिन्, श्रीमत्।

—हीन, वि. (सं.) हत-दुर्-मंद,-भाग्य-भाग, दुर्दैव, दैवहतक।

भाजक, वि. (सं.) विभागकल्पक, विभेदक, विच्छेदक, विभाजयितृ २. हरः, हारः, हारकः (गणित) दे. 'भागफल' में।

भाजन, सं. पुं. (सं. न.) दे. 'पात्र'।

भाजित, वि. (सं.) विभक्त, विभाजित २. पृथक्कृत, विश्लेषित।

भाजी, सं. स्त्री. (सं.) व्यञ्जनं, उपसेचनं, अन्नोपस्करः २. शाकः, हरितकः, शिग्रुः ३. दे. 'मांड'।

भाज्य, वि. (सं.) भागार्ह, भाजनीय। सं. पुं. (सं. न.) भागार्हांकः(गणित) दे. 'भागफल' में।

भाट, सं पुं. (सं. भट्टः) वर्णसंकरजातिविशेषः। २. चारणः, वंदिन्, वैतालिकः, मागधः, स्तुति-पाठकः, मधुकः ३. चाटुकारः ४. राजदूतः।

भाटा, सं. पुं. (हिं. भाठना) वेला,-परिवर्तः-अपचयः, क्षीयमाण-अपचीयमान,-वेला।

ज्वार—, सं. पुं. वेलोपचयापचयौ (पुं. द्वि.)।

भाड़, सं. पुं. (सं. भ्राष्ट्रः-ष्ट्रं) अंबरीषं, भर्जनापाकः।

—झोंकना, मु., क्षुद्रकार्यं कृ २. कालं व्यर्थं या (प्रे. यापयति)।

—में झोंकना वा डालना, मु., नश् (प्रे.), क्षै (प्रे. क्षपयति) २. त्यज् (भ्वा. प. अ.), उपेक्ष् (भ्वा. आ. से.)।

—में पड़े, मु., नश्यतु, भस्मसात् भवतु।

भाड़ा, सं. पुं. (सं. भाटकः-कं) भाटं, भाटिः (स्त्री.)।

—भाड़े का टट्टू, मु., अस्थिर, अस्थायिन् २. स्वार्थपर, अर्थपर ३. अल्पमूल्य, गुण-सार,-हीन।

भात, सं. पुं. (सं. भक्तं) ओदनः-नं, अन्नं, अंधस् (न.) कूरं, भिस्सा, दीदिविः २. वर-वधूपित्रोर्भक्तभोजनात्मको वैवाहिकरीतिभेदः।

भाथा, सं. पुं. (सं. भस्त्रा) दे. 'तरकश'।

भादों, सं. पुं. (सं. भाद्रः) भाद्रपदः, नभस्यः, प्रौष्ठपदः।

भाद्र, भाद्रपद, सं. पुं. (सं.) दे. 'भादों'।

भाद्रपदी, सं. स्त्री. (सं.) भाद्री, भाद्र-भाद्र-पद,-पूर्णिमा।

भान, सं. पुं. (सं.) प्रकाशः, ज्योतिस् (न.) २. ज्ञानं ३. आभासः, प्रतीतिः (स्त्री.)।

भानजा, सं. पुं., दे. 'भांजा'।

भानजी, सं. स्त्री. दे. 'भांजी'।

भानमती, सं. स्त्री. (सं. भानुमती) ऐन्द्र-जालिकी, मायिनी।

—का पिटारा, सं. पुं., विषमवस्तुसंग्रहः।
भाना, क्रि. अ., दे. 'पसन्द आना'।
भानु, सं. पुं. (सं.) रविः, सूर्यः २. किरणः।
भानुजा, भानुतनया, } सं. स्त्री. (सं.) यमुना, कालिंदी, भानुसुता।
भाप, सं. स्त्री. (सं. बा(वा)ष्पः-पम्।
—निकलना, क्रि. अ., बा(वा)ष्पायते (ना. धा.), बाष्पं उत्क्षिप् (तु. प. अ.)-उद्गृ (तु. प. से.)।
—देना, क्रि. स., बाष्पेण स्विद् (प्रे.) या पच् (भ्वा. प. अ.)।
—बनना या बनाना, उद्बाष्पणं, वाष्पी,-भवनं-करणम्।
भाभी, सं. स्त्री. (सं. भ्रातृभार्या) अग्रजपत्नी २. भ्रातृ,-जाया-पत्नी, प्रजावती ३. जननी।
भामा, सं. स्त्री. (सं.) पत्नी, भार्या २. नारी ३. क्रुद्धा स्त्री।
भामिनी, सं. स्त्री. (सं.) कोपना स्त्री २. नारी।
भार, सं. पुं. (सं.) दे. 'बोझ'।
—वाह, सं. पुं. (सं.) भारिन्, भारिकः, भार-हरः-हारः, वाह(हि)कः।
—उठाना, मु., प्रष्टव्यतां अंगीकृ।
—उतरना, मु., उत्तरदायित्वं हा (जु.प.अ.)।
भारत, सं. पुं. (सं. न.) भारतवर्षः-र्षं, भ(भा)रतखंडं २. महाभारतग्रन्थः।
भारती, सं. स्त्री. (सं.) गिर्-वाच् (स्त्री.), वाणी २. सरस्वती, शारदा ३. वृत्तिभेदः (सा.)।
भारतीय, वि. (सं.) भारत,-देशीय-वर्षीय। सं. पुं., भारतवासिन्।
भारी, वि. (सं.-रिन्) भारिक, गुरु, दुर्वह, भारवत् २. कराल, भीषण ३. महत्, बृहत्, विशाल ४. अत्यंत, अत्यधिक ५. असह्य, दुर्भर, दुर्धर ६. प्रबल ७. शून, स्फीत ८. शांत, ग(गं)भीर।
—पन, सं. पुं., भारवत्त्वं, गुरुत्वं, गरिष्ठता।
—भरकम, वि., अति-बहु,-भारवत्।
पैर भारी होना, मु., गर्भं धृ (चु.)।
भार्या, सं. स्त्री. (सं.) दाराः (पुं. बहु.), दे. 'पत्नी'।
भाल, सं. पुं. (सं. न.) ललाटं, अलिकं, गोधिः (पुं. स्त्री.), निट(टि)लं, मूर्धन् (पुं.), मस्तं, मस्त(स्ति)कं, मस्तकः।
—चंद्र,—नेत्र,—लोचन, सं. पुं. (सं.) शिवः।

भाला, सं. पुं. (सं. भल्लः-ल्लं) दे. 'बरछा'।
—बरदार, सं. पुं. (हिं.+फ़ा.) दे. 'बरछैत'।
भालू, सं. पुं. (सं. भालूकः) भल्लु(ल्लू)कः, ऋक्षः, भल्लः, दुर्घोषः, दीर्घकेशः, दुश्चरः, भालुकः, भाल्लूकः।
भाव, सं. पुं. (सं.) अस्तित्वं, सत्ता, विद्यमानता २. मानस-मनो,-विकारः-वृत्तिः (स्त्री.), विचारः ३. अभिप्रायः, आशयः ४. मुखाकृतिः (स्त्री.) ५. जन्मन् (न.) आत्मन् (पुं.) ७. पदार्थः ८. विद्वस् (पुं.) ९. जंतुः १०. कृत्यं, विभूतिः (स्त्री.)। ११. सं-विषय,-भोगः १२. प्रेमन् (पुं. न.), अनुरागः १३. संसारः १४. कल्पना १५. स्वभावः १६. गूढेच्छा १७. शैली-रीतिः (स्त्री.) १८. दशा १९. भावना २०. विश्वासः २१. प्रतिष्ठा २२. वस्तु,-गुणः-धर्मः २३. उद्देश्यं २४. मूल्यं, अर्घः, वस्नः, अवक्रयः, अर्घ-मूल्य,-प्रमाणं २५. श्रद्धा, भक्तिः (स्त्री.) २६. स्थायि-व्यभिचारिसात्त्विकभावाः (काव्य.), नायिकादिमानसविकाराः २७. हावः, दे. 'नखरा'।
—ताव, सं. पुं., मूल्यं, अर्घः।
—वाचक, सं. स्त्री. (सं.-वाचिका) संज्ञाभेदः (व्या., उ. श्रेष्ठता)।
—वाच्य, सं पुं. (सं. न.) वाच्यभेदः (व्या., उ. हस्यते)।
—उतरना या गिरना, मु., अर्घः अपचि (कर्म.), मूल्यं ह्रस् (भ्वा. प. से.), मंदायते (ना. धा.)।
—चढ़ना या बढ़ना, मु. वस्नं वृध् (भ्वा. आ. से.), अवक्रयः उपचि (कर्म.)।
भावक, वि. (सं.) उत्पादक, स्रष्टृ २. कल्याण-कारक ३. उत्प्रेक्षक ४. काव्यरसिक।
भावज, सं. स्त्री. (सं. भ्रातृजाया) दे. 'भाभी' (२.)।
भावता, वि. (हिं. भावना = अच्छा लगना) प्रिय, रुचिकर, रोचक। सं. पुं., वल्लभः, प्रियतमः, प्रेमपात्रम्।
भावन, वि. (सं.) उत्पादक, प्रकाशक। सं. पुं. (सं.) निमित्तकारणम् २. सृष्टिकर्तृ ३. शिवः। (सं. न.) उत्पादनम् २. चिन्तनम् ३. कल्पना ४. भक्तिभावना।
भावना, सं. स्त्री. (सं.) ध्यानं, चिंता, विमर्शः,

विचारः २. कामना, वासना, इच्छा ३. स्मृत्यनुभवजश्चित्तसंस्कारभेदः ४. सामान्य,-विचारः-कल्पना ५. दे. 'पुट' (वैद्यक)। वि., शोभन, प्रिय, रोचक। क्रि. अ., दे. 'पसंद आना'।

भावनीय, वि. (सं.) चिन्तनीय, कल्पनीय।

भावाभाव, सं. पुं. [सं.-वौ (द्वि.)] अस्तित्वानस्तित्वे (न.) २. उत्पत्तिविनाशौ ३. जन्ममृत्यू (सव द्वि.)।

भावार्थ, सं. पुं. (सं.) तात्पर्यार्थः, आशयः, तात्पर्य्यं, भावः २. भावप्रधानटीका।

भावित, वि. (सं.) विचारित, चिंतित।

भावी, वि. (सं.-विन्) दे. 'भविष्य' (वि.)। सं. स्त्री., दे. 'भविष्य' सं. पुं. २.दे. 'भवितव्यता'।

भावुक, वि. (सं.) रसिक, सरस, रसभूयिष्ठ, भावप्रधान २. चिंतक, विचारक।

भाव्य, वि. (सं.) भवितव्य, अवश्यंभाविन्।

भाषण, सं. पुं. (सं. न.) कथनं, वचनं, उक्तिः (स्त्री.) २. व्याख्यानं, प्रवचनं, उपदेशः।

भाषांतर, सं. पुं. (सं. न.) अनुवादः।

—कार, सं. पुं. (सं.) अनुवादकः।

भाषा, सं. स्त्री. (सं.) वाणी, वाच्-गिर् (स्त्री.), भारती, गिरा, उदीरणा २. हिन्दीभाषा ३. वचस् (न.), वचनं, वाक्यं, उक्तिः (स्त्री.), व्याहारः, निगदः, शब्दः, भाषितं, आलापः ४. सरस्वती ५. अभियोगपत्रं (अर्ज़ीदावा)।

भाषित, वि. (सं.) कथित, उक्त, उदीरित। सं. पुं. (सं. न.) कथनं, वार्तालापः।

भाषी, सं. पुं. (सं.-षिन्), वादिन्, वक्तृ।

भाष्य, सं. पुं. (सं. न.) टीका, व्याख्या, वृत्तिः (स्त्री.) विवरणम्।

—कार, सं. पुं. (सं.) टीका-भाष्य-व्याख्या,-कारः-कृत् (पुं.) २. महाभाष्यकारः, पतंजलिः, गोनर्दीयः।

भास, सं. पुं. (सं.) संस्कृतभाषायाः महाकविविशेषः २. कान्तिः-दीप्तिः (स्त्री.) ३. कल्पना ४. गोष्ठः-ष्ठम् ५. कुक्कुटः ६. गृध्रः ७. पक्षिन्।

भासना, क्रि. अ. (सं. भासनं) भास्-प्रकाश् (भ्वा. आ. से.), २. प्रति-इ (कर्म.) ३. दृश् (कर्म.)।

भासुर, वि. (सं.) दे. 'भास्वर'।

भास्कर, सं. पुं. (सं.) सूर्यः २. अग्निः, (सं. न.) सुवर्णं ३.ज्योतिषग्रन्थकारो भास्कराचार्यः।

भास्वर, वि. (सं.) द्युति-कांति-दीप्ति,-मत्, उज्ज्वल, भासुर, देदीप्यमान, भ्राजमान।

भिंडी, सं. स्त्री. (सं. भिंडा) भिंडः, भिंडकः, सुशाकः, करपर्णः, वृत्तबीजः, चतुष्पुंड्रः।

भिक्षा, सं. स्त्री. (सं.) याञ्चा, याचना, अर्थना, २. भिक्षाटनं ३. भक्ष्यं, दानम्।

—पात्र, सं. पुं. (सं. न.) भिक्षा-दान,-पात्रं-भाजनम्।

भिक्षु, सं. पुं. (सं.) परिव्राज्, परिव्राजकः, व्रजकः, (बौद्ध-) सन्न्यासिन्, मस्करिन्, प(पा)-राशरिन् २. दे. 'भिखारी'।

भिक्षुक, सं. पुं., (सं.) दे. 'भिखारी'।

भिखमंगा, सं. पुं. दे. 'भिखारी'।

भिखारिन, सं. स्त्री. (हिं. भिखारी) भिक्षुकी, भिक्षाकी, भिक्षाचरी।

भिखारी, सं. पुं. (हिं. भीख) भिक्षुः, भिक्षुकः, भिक्षाकः, भिक्षाचरः, भिक्षाशिन्, मार्गणः, याचकः, याचनकः, वनीयकः, अर्थिन्।

भिगोना, क्रि. स. (हिं. भीगना) क्लिद् (प्रे.), उद् (रु. प. से.), आर्द्रीकृ।

भिजवाना, क्रि. प्रे., व. 'भेजना' के प्रे. रूप।

भिटनी, सं. स्त्री. (देश.) स्तनाग्रं, चूचुकम्।

भिड़, सं. स्त्री. (हिं. बर्रे ?) वरटः-टा-टी, इडाचिका, गंधोली, गृहकारिका।

भिड़ना, क्रि. अ. (अनु. भड़ ?) संघट्ट (भ्वा. आ. से.) संमृद्-संहन् (कर्म.) उप,-इ-या (अ. प. अ.), संमिल् (तु. प. से.) ३. कलहायते (ना. धा.), युध् (दि. आ. अ.)।

भिड़ाना, क्रि. स., व. 'भिड़ना' के प्रे. रूप।

भितल्ला, सं. पुं. (हिं. भीतर+तल) दे. 'अस्तर'। वि. आन्तर, आभ्यन्तर, दे. 'भीतरी'।

भितल्ली, सं. स्त्री., (हिं. भितल्ला) पेषण्याः अधस्थः पाषाणः।

भित्त, सं. पुं. (सं. न.) भागः, अंशः २.खण्डः-डं, शकलः-लम् ३. दे. 'भित्ति'।

भित्ति, सं. स्त्री. (सं.) कुड्यं, कूड्यं, कुड्यकं, भित्तिका २. भित्ति-गृह,-मूलम् ३. चित्राधारः ४. छेदः, भेदः ५. खण्डः, शकलः ६. भग्नवस्तु (न.) ६. कटः, किलंजं, तृणपूली ७. दोषः ८. अवसरः।

भिदना, क्रि. अ. (सं. भिद्) विध्-व्यध् (कर्म.), छिद्रित (वि.) भू २. आहन्-व्रण् (कर्म.)।

भिनकना, **भिनभिनाना,** } क्रि.अ. (अनु. भिनभिन) भिणभिणायते (ना. धा.), भिणभिण,-रणितं-निनदं जन् (प्रे.)।

भिनभिनाहट, सं. स्त्री. (हिं. भिनभिनाना) भिणभिणायितं, भिणभिण,-रणितं-निनदः, झंकारः, गुञ्जनम्।

भिन्न, वि. (सं.) असंबद्ध, अलग्न, पृथग्भूत, विश्लिष्ट २. अन्य, इतर, अपर। सं. पुं. (सं. न.) अपूर्णांकः, राशि,-भागः।

—भिन्न, वि., अनेक, विभिन्न २. वि-नाना,-विध।

भिन्नता, सं. स्त्री. (सं.) भिन्नत्वं, पृथक्त्वं, भेदः, अंतरम्।

भिलावाँ, सं. पुं. (सं. भल्लातकः) भल्लातः, शोथहृत् (पुं.), वीर,-तरुः-वृक्षः, कृमिघ्नः, भूतनाशनः, स्फोटबीजकः, व्रणकृत् (पुं.)।

भी, अव्य. (सं. अपि) च, अपि च २. अवश्यं ३. अधिकम्।

भीख, सं. स्त्री. (सं. भिक्षा) दे. 'भिक्षा' (१-३)।

—मांगना, क्रि. स., भिक्ष् (भ्वा. आ. से.), भिक्षां याच् (भ्वा. आ. से.)।

भीग(ज)ना, क्रि. अ. (सं. अभ्यंजनं>) क्लिन्नी-आर्द्री भू, उंद् (कर्म. उद्यते), क्लिद् (दि. प. वे.)।

भीगी बिल्ली होना, मु., भयात् तूष्णीं स्था (भ्वा. प. अ.)।

भीड़, सं. स्त्री. (हिं. भिड़ना) जन,-समुदायः-संमर्दः-ओघः-समूहः २. आपद्-विपद् (स्त्री.)।

—भड़क्का, सं. पुं. **—भाड़,** सं. स्त्री. } सुमहान् जनसंमर्दः इ.।

भीत[1], वि. (सं.) भयार्त्त, त्रस्त, सभय।

ओछे की प्रीत ज्यों बालू की भीत, मु., * क्षुद्रसख्यं हि नश्वरम्।

भीत[2], सं. स्त्री., दे. 'भित्ति'।

भीतर, क्रि. वि. (सं. अभ्यंतरे) अंतः, गर्भे, अंतरे, दे. 'अंदर'। सं. पुं., हृदयं, मानसं, अंतःकरणं २. अंतःपुरं, अवरोधः।

भीतरी, वि. (हिं. भीतर) आंतर-आभ्यंतर [-री (स्त्री.)], अन्तर्, अंतरस्थ, अंतर्भव २. गुप्त, गूढ, प्रच्छन्न।

भीति, सं. स्त्री. (सं.) दे. 'भय'।

भीम, सं. पुं. (सं.) युधिष्ठिरानुजः, भीमसेनः, वृकोदरः। वि., दे. भयंकर २. सुमहत्, अतिविशाल।

—के हाथी, मु., अप्रत्यागामि-अप्रत्यावर्ति,-पदार्थः।

भीरु, वि. (सं.) कातर, त्रस्नु, भयशील, भारु(लु)क।

भीरुता, सं. स्त्री. (सं.) कातर्यं, कापुरुषत्वं, क्लीबता, त्रस्नुता।

भील, सं. पुं. (सं. भिल्लः) म्लेच्छजातिविशेषः।

भीलनी, सं. स्त्री. (हिं. भील) भिल्ली, भिल्लनारी।

भीषण, वि. (सं.) दे. 'भयंकर'।

भीषणता, सं. स्त्री. (सं.) दे. 'भयंकरता'।

भीष्म, सं. पुं. (सं.) गांगेयः, देवव्रतः, शांतनुपुत्रः २. शिवः। वि., दे. 'भयंकर'।

भुक्खड़, वि. (हिं. भूख) बुभुक्षित, क्षुधार्त २. औदरिक, बहुभोजिन्, अघंर, घस्मर, अत्याहारिन् ३. दरिद्र, दीन।

भुक्त, (सं.) भक्षित, जग्ध २. उपभुक्त, व्यवहृत।

—शेष, वि. (सं.) उच्छिष्ट, जुष्ट।

भुक्ति, सं. स्त्री. (सं.) भोजनं, आहारः, अन्नं २. विषयोपभोगः, लौकिकसुखम्।

भुखमरा, वि. (हिं. भूख-मरना) दे. 'भुक्खड़' (२, ३)।

भुगतना, क्रि. स. (सं. भुक्त>) उप-,भुज् (रु. आ. अ.), अनुभू, प्राप् (स्वा. प. अ.) २. क्षम्-सह् (भ्वा. आ. से.), मृष् (दि. प. से., चु.) ३. (ऋणादिकं) शुध् (दि. प. अ.), अपाकृ (कर्म.)। क्रि. अ., समाप (कर्म.), पूर् (कर्म.), निर्वृत् (भ्वा. आ. से.) अवसो (कर्म.)।

भुगतान, सं. पुं. (हिं. भुगताना) निर्वृत्तिः-समाप्तिः-सिद्धिः-पूर्तिः (स्त्री.) २. (ऋणादिकस्य) निस्तारः, परिशुद्धिः, अपनयनम्।

भुगताना, क्रि. प्रे. व. 'भुगतना' क्रि. स. के प्रे. रूप।

भुग्गा, वि., मूर्ख, जड, अज्ञ, निर्बुद्धि।

भुग्न, वि. (सं.) अराल, जिह्म, वक्र, न्युब्ज, आ-, न(ना)मित।

भुच्च, भुच्चड़, वि. (सं. भूत+हिं. चढ़ना) जड़, अज्ञ, मूर्ख, जडमति।

भुजंग,
भुजंगम } सं. पुं. (सं.) दे. 'सर्प'।
भुजंगी-गिनी, सं. स्त्री., दे. 'सर्पिणी'।
भुज, सं. पुं. (सं.) भुजा, बाहुः, दोर्दंडः २. (ज्योमैट्री में) भुजः, बाहुः, पार्श्वः।
—दंड, सं. पुं. (सं.) दोर्-बाहु,-दंडः।
—पाश, सं. पुं. (सं.) आलिंगनं, परिष्वंगः।
—बंद, सं. पुं., अंगदं, केयूरं, बाहुवलयः।
—मूल, सं. पुं. (सं. न.) कक्षा, दोर्मूलं, खडिकः।
भुजना, सं. पुं. (हिं. भूजना) *भृष्टान्नम्।
भुजा, सं. स्त्री. (सं.) दे. 'भुज'।
भुजिया, सं. स्त्री. (हिं. भूजना) *भर्जिता, भृष्टशुष्क,-शाकः-शिग्रुः। सं. पुं. क्वथितधान्यं २. क्वथितधान्यतंडुलः।
भुट्टा, सं. पुं. (सं. भृष्ट>) मकायकणिशम्।
भुतना, सं. पुं. दे. 'भूत' (७-९)।
भुनगा, सं. पुं. (अनु.) (१-२) कीट-पतंग,-भेदः।
भुनना, क्रि. अ., ब. 'भूनना' के कर्म. रूप २. ब. 'भुजना' के कर्म. रूप।
भुनभुनाना, क्रि. अ. (अनु.) भुणभुणायते (ना. धा.) अव्यक्तं वच् (अ. प. अ.)।
भुनवाना, क्रि. प्रे., ब. 'भूनना' के प्रे. रूप। २. ब. 'भुनाना' के प्रे. रूप।
भुनाई[1], सं. स्त्री. (हिं. भूनना) भर्जन,-भृतिः-भाटिः (दोनों स्त्री.)।
भुनाई[2], सं. स्त्री. (हिं. भुनाना) नाणकवि-निमयभाटिः-भृतिः (दोनों स्त्री.)।
भुनाना[1], क्रि. प्रे. ब. 'भूनना' के प्रे. रूप।
भुनाना[2], क्रि. स. (सं. भंजनं) अल्पनाण-केभ्यः बृहन्नाणकानि प्रतिदा (जु. उ. अ.), नाणकानि*भंज्*त्रुट् (प्रे.) नाणकानि विनि-मे (भ्वा. आ. अ.)।
भुरकुस, सं. पुं. (अनु. भुर>) *चूर्णं, क्षोदः।
—निकालना, मु., निर्दयं तड् (चु.) २. नश्-ध्वंस् (प्रे.)।
भुरता, सं. पुं. (अनु. भुर>) दे. 'भरता' २. चूर्णित-विकृत,-पदार्थः।
—करना, मु., आपाड्य चूर्ण् (चु.)-पिष् (रु. प. अ.)।
भुरभुरा, वि. (अनु.) भिदुर, भंगुर, सुभंग २. वालुकानिभ।
भुलक्कड़, वि. (हिं. भूलना) विस्मरणशील, मंद-अल्प,-स्मृति २. प्रमादिन्, प्रमत्त।
भुलाना, क्रि. प्रे., ब. 'भूलना' के प्रे. रूप।
भुलावा, सं. पुं. (हिं. भुलाना) प्र-,वंचना, प्रतारणा, छलम्।
—देना, क्रि. स., प्रतॄ (प्रे.), वंच (चु.)।
भुवः, अव्य. (सं.) आकाशः-शं, अंतरिक्ष-लोकः, द्वितीयलोकः २. द्वितीयमहाव्या-हृतिः (स्त्री.)।
भुवन, सं. पुं. (सं. न.) जगत् (न.), जगती, सृष्टिः (स्त्री.), संसारः २. जलं ३. जनः, लोकः ४. चतुर्दश-भुवनानि (न. बहु.)-लोकाः।
त्रि—, सं. पुं. (सं. न.) त्रिलोकी, लोकत्रयम्।
भुशुंडि, सं. पुं. (सं.) काकभुशुंडिः। (सं. स्त्री.) भुशुंडी, अस्त्रभेदः।
भुस, सं. पुं., दे. 'भूसा'।
भुसी, सं. स्त्री., दे. 'भूसी'।
भूँकना, क्रि. अ. (अनु.) दे. 'भौंकना' (१-२)।
भूँचाल, (सं. भूचालः) मही-, भू-कंपः-प्रकंपः-चलनं, क्ष्मायितम्।
भूँजना, क्रि. स., दे. 'भूनना' (१-२)।
भूँडोल, सं. पुं. दे. 'भूँचाल'।
भू, सं. स्त्री. (सं.) धरणी, धरा, दे. 'पृथिवी' २. स्थानं, स्थलम्।
—कंप, सं. पुं. (सं.) दे. 'भूँचाल'।
—चाल,
—डोल, } दे. 'भूँचाल'।
—तल, सं. पुं. (सं. न.) धरातलं २. पृथिवी।
भूख, सं. स्त्री. (सं. बुभुक्षा) क्षुधा, क्षुध् (स्त्री.), जिघत्सा, अशनाया, अशनायितं २. आवश्य-कता ३. अभिलाषः।
—का अभाव, सं. पुं., अरुचिः (स्त्री.), भक्त,-उपघातः-द्वेषः।
—प्यास, सं. स्त्री., क्षुधापिपासे, क्षुत्तृषे।
भूखों मरना, मु., आहाराभावात् मृ (तु. आ. अ.)-अवसद् (भ्वा. प. अ.)-नश् (दि. प. वे.)।
—लगना, क्रि. अ., क्षुध् (दि. प. अ., चतुर्थी के साथ), भुज् (सन्नंत, बुभुक्षति-ते) क्षुधया अर्द्-पीड् (कर्म.)।

भूखा, वि. (हिं. भूख) क्षुधा,-आविष्ट-आतुर-आर्त्त-अन्वित-पीडित, क्षुधित, जिघत्सु, बुभुक्षु, अन्नार्थिन्, अशनायित २. इच्छुक ३. दरिद्र ।

—नंगा, वि., दीन, दरिद्र, निर्धन, अकिंचन ।

—प्यासा, वि., क्षुत्पिपासित, क्षुत्तृषार्त्त ।

भूखे प्यासे, मु., *निरन्नपानं, अन्नपानं विना ।

भूगर्भ, सं. पुं. (सं.) धरा,-अंतरं-अभ्यंतरं-गर्भः ।

—गृह, सं. पुं. (सं. न.) भू-गेहं-गृहम् ।

—शास्त्र, सं. पुं. (सं. न.) भूतत्त्व,-शास्त्रं-विद्या-विज्ञानम् ।

—शास्त्रवेत्ता, सं. पुं. (सं.-तृ) भूतत्त्वज्ञः, भूगर्भशास्त्रज्ञः ।

भूगोल, सं. पुं. (सं.) भूमंडलं, भुवनकोषः २. भूगोलः,-विद्या-शास्त्रं, भूपृष्ठविद्या ।

—वेत्ता, सं. पुं. (सं.-तृ.) भूगोलशास्त्रज्ञः ।

भूचक्र, सं. पुं. (सं. न.) पृथ्वीपरिधिः २. विषुवद्रेखा ३. अयनवृत्तं ४. क्रांतिवृत्तम् ।

भूचर, सं. पुं. (सं.) स्थलचरः २. शिवः ।

भूत, सं. पुं. (सं. न.) पृथ्व्यप्तेजोवाय्वाकाश-पंचकं २. जड़चेतनपदार्थः, चराचरवस्तु (न.) ३. प्राणिन्, जीवः ४. भूत-अतीत,-कालः ५. शवः ६. क्रियारूपभेदः (व्या.) ७. रुद्रानुचराः, पिशाचाः ८. मृतस्य आत्मन् (पुं.) ९. पिशाचः, प्रेतः, रक्षस् (न.), राक्षसः । वि. (सं.) गत, वि-,अतीत, २. युक्त ३. सदृश ४. परिणत (सब प्रायः समासांत में) ।

—उतारना, क्रि. स., भूतान् निष्कस् (प्रे.)-अपनुद् (तु. प. अ.)-अपसृ (प्रे.) ।

—काल, सं. पुं. (सं.) पूर्वभूत-अतीत-, कालः-समयः ।

—नाथ, } **—भावन**, } सं. पुं. (सं.) शिवः ।

—पूर्व, वि. (सं.) प्राक्तन, पूर्वतन, पौर्विक ।

—संचार, सं. पुं. (सं.) भूतावेशः ।

—चढ़ना या सवार होना, मु., अतिनिर्बंधेन अव-स्था (भ्वा. आ. अ.) २. अत्यर्थं कुप् (दि. प. से.) ।

भूतत्त्वविद्या, सं. स्त्री. (सं.) दे. 'भूगर्भविद्या' ।

भूतात्मा, सं. पुं. (सं.-त्मन्) जीवात्मन्, देहिन् २. शरीरं ३. परमेश्वरः ४. विष्णुः ५. शिवः ।

भूतानुकंपा, सं. स्त्री. (सं.) जीव-भूत-प्राणि-, दया-कृपा-अनुकम्पा ।

भूताविष्ट, वि. (सं.) पिशाच-भूत,-ग्रस्त-पीडित-आक्रांत ।

भूतावेश, सं. पुं. (सं.) भूत,-संचारः-क्रांतिः (स्त्री.), पिशाचावेशः ।

भूति(त)नी, सं. स्त्री. (हिं. भूत) शाकिनी, डाकिनी, राक्षसी, पिशाची-चिका ।

भूदेव, सं. पुं. (सं.) ब्राह्मणः, भूसुरः ।

भूधर, सं. पुं. (सं.) गिरिः, पर्वतः ।

भूनना, क्रि. स. (सं. भर्जनं>) भृज् (भ्वा. आ. से.), भ्रस्ज् (तु. उ. अ.), ईषत्तापेन प्लुष् (भ्वा. प. से.)-शुष् (प्रे.) ।

भूप, सं. पुं. (सं.) भूपतिः, भूपालः, नृपः, राजन् (पुं.) ।

भूपति, } **भूपाल**, } सं. पुं. (सं.) नृपः, दे. 'राजा' ।

भूभल, सं. स्त्री. (सं. भूः+हिं. बलना) उष्ण,-भसितं-भस्मन् (न.)-वालुका ।

भूमंडल, सं. पुं. (सं. न.) पृथिवी, धरा, धरित्री ।

भूमिका, सं. स्त्री. (सं.) प्रस्तावना, उपोद्घातः, अवतरणिका, आमुखं, मुखबंधः २. वेशांतर-परिग्रहः ।

भूमि, सं. स्त्री. (सं.) धरा, धरित्री, दे. 'पृथिवी' ।

—ज, वि. (सं.) भूमिजात ।

—जा, सं. स्त्री. (सं.) जानकी, सीता ।

—पुत्र, सं. पुं. (सं.) मंगलग्रहः, भूसुतः ।

—सुता, सं. स्त्री. (सं.) सीता, वैदेही ।

भूय, अव्य. (सं. भूयस्) पुनः, पुनरपि ।

भूरा, वि. (सं. बभ्रु) धूलि-मृद् ,-वर्ण-रंग २. कपिल-श, पिंग, पिंगल । सं. पुं., १-२ बभ्रु-पिंगल,-वर्णः-रंगः ३. शर्करा, सिता ।

भूरि, वि. (सं.) अधिक, बहु, प्रचुर २. महत्, गुरु ।

भूल, सं. स्त्री. (हिं. भूलना) विस्मरणं, विस्मृतिः (स्त्री.) २. दोषः अपराधः ३. अशुद्धिः (स्त्री.), स्खलितं, स्खलनं २. मोहः, भ्रमः ।

—चूक, सं. स्त्री., प्रमादः, अपराधः, त्रुटिः (स्त्री.), स्खलितम् ।

—भुलैयाँ, सं. स्त्री., सुगहनस्थानं, भ्रांतिचक्रं २. संशय-संदेह,-आस्पदम् ।

भूलना, क्रि. स. (प्रा. भुल्लइ) विस्मृ (भ्वा. प. अ.) २. स्खल् (भ्वा. प. से.), प्रमद् (दि. प. से.) ३. त्यज् (भ्वा. प. अ.), हा (जु. प. अ.) । क्रि. अ., विस्मृ (कर्म.) २. भ्रंश्-नश् (दि. प. से.), च्यु (भ्वा. आ. अ.) ३. गर्वित-अवलिप्त (वि.) भू. ४. कम् (भ्वा. आ. से.), स्निह् (दि. प. से., सप्तमी के साथ) । सं. पुं., विस्मरणं, विस्मृतिः (स्त्री.) २. प्रमादः, स्खलितं ३. भ्रंशः, नाशः ।

भूलने योग्य, वि., विस्मर्तव्य, विस्मरणीय ।

भूलनेवाला, सं. पुं., दे. 'भुलक्कड़' ।

भूला-भटका, वि., पथ-मार्ग,-भ्रष्ट ।

भूला हुआ, वि., विस्मृत, स्मृतिपथात् अपेत ।

भूलोक, सं. पुं. (सं.) मर्त्यलोकः, भूमिः (स्त्री.) ।

भूशायी, वि. (सं.-यिन्) धराशायिन्, मृत, २. भूमिशयन ३. भूमौ पतित ।

भूषण, सं. पुं. (सं. न.) आभरणं, अलंकारः, आ-वि-,भूषणं, दे. 'गहना' ।

भूषणीय, वि. (सं.) भूष्य, अलंकार्य, मंडनीय ।

भूषा, सं. स्त्री. (सं.) अलंक्रिया, परिष्-,कारः-क्रिया, प्रसाधनं, नेपथ्यम् ।

भूषित, वि. (सं.) अलंकृत, परिष्कृत, प्रसाधित, मण्डित ।

भूसा, सं. पुं. (सं. बुसं>) पलालः-लं, यवसं, धान्यतृणं, पलः ।

भूसी, सं. स्त्री. (हिं. भूसा) दे. 'भूसा' २. बुषं, बुसं, तुषः-सः, कडंगरः, धान्यत्वच् (स्त्री.) ।

भूसुर, सं. पुं. (सं.) विप्रः, ब्राह्मणः ।

भृंग, सं. पुं. (सं.) भ्रमरः, षट्पदः २. कीटभेदः ।

—राज, सं. पुं. (सं.) पक्षिभेदः २. केशरंजनः, केश्यः, कुंतलवर्द्धनः, क्षुपभेदः ।

भृकुटी, सं. स्त्री. (सं.) दे. 'भौंह' ।

भृगु, सं. पुं. (सं.) मुनिविशेषः २. परशुरामः ।

—नाथ, सं. पुं. (सं.) परशुरामः, भृगुरामः ।

भृत, वि. (सं.) पूरित, पूर्ण, निचित २. पालित, पोषित ।

भृतक, सं. पुं. (सं.) वैतनिकः, कर्मकरः ।

भृतकाध्यापक, सं. पुं. (सं.) सवेतनः शिक्षकः ।

भृति, सं. स्त्री. (सं.) वेतनं, भृत्या २. कर्मण्या, तुलिका, भरण्यं, भर्मण्या ३. मूल्यं ४. पूरणं, भरणं ५. पालनं ६. वैतनिकता ।

भृत्य, सं. पुं. (सं.) सेवकः, दे. 'नौकर' ।

भृत्या, सं. स्त्री. (सं.) सेविका, दासी २. दे. 'भृति' ।

भृश, क्रि. वि. (सं. भृशं) अत्यंतं, अत्यधिकम् ।

भेंगा, वि. (देश.) केकर, केदर, टेर, टगर, वलिर ।

—पन, स. पुं., तिर्यग्दृष्टिः (स्त्री.), टेरता इ. ।

भेंट, सं. स्त्री. (सं. भिद्>) सं(समा)गमः, संमिलनं, साक्षात्कारः २. उपहारः, उपायनं, प्राभृतं-तकं, प्रदेशनम् ।

—करना, क्रि. स., संमिल् (तु. प. से.), अभि-सं-मुखीभू, सं-इ (अ. प. अ.) २. उत्सृज् (तु. प. अ.), उपह (भ्वा. प. अ.), उपढौक् (प्रे.), ऋ (प्रे. अर्पयति) ।

भेक, सं. पुं. (सं.) दे. 'मेंढक' ।

भेख, सं. पुं. दे. 'वेष' ।

भेजना, क्रि. स. (सं. व्रजनं>) सं-,प्रेष् (प्रे.), प्र-हि (स्वा. प. अ.), प्रस्था (प्रे.), विसृज् (तु. प. अ.), सं-,प्रेर् (प्रे.) । सं. पुं., सं-, प्रेषणं-प्रेरणं, विसर्जनं, प्रस्थापनं, प्रहितिः (स्त्री.) ।

भेजने योग्य, वि., प्रेषयितव्य, प्रस्थाप्य, प्रहेयणीय ।

भेजनेवाला, सं. पुं., प्रेषकः, प्रहेतृ ।

भेजा हुआ, वि., प्रेषित, विसृष्ट, प्रहित ।

भे(भि)जवाना, क्रि. प्रे., व. 'भेजना' के प्रे. रूप ।

भेजा, सं. पुं. (देश.) दे. 'मगज़' ।

भेड़, सं. स्त्री. (सं. मेडकः>) मेषी, एडका, अविला, उरणी, उरा, कुररी, जालकिनी, अविः (स्त्री.), रुजा (पुं., दे. 'भेड़ा') २. मूढः, मूढधीः, ऋजुः ।

भेड़ना, क्रि. स., दे. 'बंद करना' ।

भेड़ा, सं. पुं. (सं. मेड्रः) अविः, उरणः, उरभ्रः, ऊर्णायुः, एडकः, मेढ्रः, हुडः, रो(लो)मशः, मेडुः, भेडकः ।

भेड़िया, सं. पुं. (हिं. भेड़) वृकः, कोकः, ईहामृगः ।

—धसान, सं. पुं., अंध,-अनुकरणं-अनुसरणं-अनुवर्तनम् ।

भेड़ी, सं. स्त्री., दे. 'भेड़'।

भेद, सं. पुं. (सं.) छेदः, दे. 'भेदन' २. शत्रु-वशीकरणोपायभेदः, उपजापः ३. रहस्यं, गूढाशयः ४. अन्तरं, विशेषः ५. प्रकारः, जातिः (स्त्री.)।

—खोलना, क्रि. स., रहस्यं विवृ (स्वा. उ. से.)।

—पाना, क्रि. स., गुह्यं बुध् (भ्वा. प. से.)।

—बुद्धि, सं. स्त्री. (सं.) विश्लेषः, विच्छेदः, ऐक्याभावः।

—भाव, सं. पुं. (सं.) अंतरं, विशेषः।

—लेना, क्रि. स., गोप्यं ज्ञा (सन्नंत, जिज्ञासते)।

भेदक, वि. (सं.) भेत्तृ, छेत्तृ २. रेचक।

भेदन, सं. पुं. (सं. न.) विदारणं, छेदनं, वेधनं, व्यधः-धनं, त्रोटनम्। वि., भेदक २. रेचक।

भेदिया, **भेदी**,[1] } सं. पुं. (सं. भेदः >) दे. 'जासूस' २. रहस्यविद् (पुं.)।

भेदी[2], वि. (सं. भेदिन्) छेदक, विदारक।

भेद्य, वि. (सं.) छेद्य, विदारणीय।

—रोग, सं. पुं. (सं.) शल्यचिकित्स्यो रोगः।

भेरी, सं. स्त्री. (सं.) भेरिः (स्त्री.), दुंदुभिः, डिंडिमः, पटहः, ढक्का।

भेली, सं. स्त्री. (देश.) गुडपिंडः-डम्।

भेष, स. पुं., दे. 'वेष'।

भेषज, सं. पुं. (सं. न.) औषधं, अगदः, भैषज्यम्।

भेस, सं. पुं., दे. 'वेष'।

भैंस, सं. स्त्री. (सं. महिषी) मंदगमना, महाक्षीरा, पयस्विनी, कलुषा।

भैंसा, सं. पुं. (सं. महिषः) अश्वारिः, कलुषः, कासरः, कृष्णशृंगः, गद्गदस्वरः, जर(र)तः, यमरथः, लुलापः (यः), वीरस्कंधः, सैरिभः, हेरंबः।

भैया, सं. पुं., दे. 'भाई'।

लेना, क्रि. स. (सं. लभनं) आदा (जु. आ. अ.), प्रति-इष् (तु. प. से.), प्रति-परि,-ग्रह् (क्र. प. से.) २. अधिगम् (भ्वा. प. अ.), आसद् (प्रे.), प्राप् (स्वा. प. अ.), लभ् (भ्वा. आ. अ.) ३. धृ (भ्वा. प. अ., चु.), अव-आ-लंब् (भ्वा. आ. से.), ग्रह् ४. जि (भ्वा. प. अ.), अभिभू (भ्वा. प. से.), वशीकृ ५. क्री (क्र्. उ. अ.) ६. ऋणं ग्रह् ७. अंके-क्रोडे निधा (जु. उ. अ.) ८. स्वी-अंगी-कृ, प्रतिपद् (दि. आ. अ.) ९. प्रत्युद्,-गम्-व्रज् (भ्वा. प. से.)-या (अ. प. अ.) सत्कृ, संमन्-संभू (प्रे.) १०. कार्यभार स्वीकृ ११. रुचि (स्वा. प. अ.), संग्रह् (क्र्. प. से.) १२. उपहस् (भ्वा. प. से.), व्यंग्योक्तिभिः लज्ज् (प्रे.)। सं. पुं., आदानं, ग्रहणं, प्रतिग्रहः, अधिगमनं, प्रापणं, आसादनं, आलंबनं, धारणं, ऋणादानं, अंगीकरणं, वशीकरणं, संचयः-यनं, क्रयणं, क्रयः इ.।

लेने योग्य, वि. (सं.) आदेय, ग्राह्य, ग्रहीतव्य, प्राप्य, आसादनीय, क्रेय, क्रयणीय इ.।

लेने वाला, सं. पुं., आदातृ, गृहीतृ, अधिगंतृ, आसादयितृ, अंगीकर्तृ, क्रेतृ, ग्राहकः।

लिया हुआ, वि. (सं.) आत्त, आदत्त, गृहीत, प्राप्त, अधिगत, धृत, अंगीकृत, वशीकृत, क्रीत इ.।

ले आना, मु., दे. ३. 'लाना'।

ले चलना या ले जाना, मु., आदाय गम् २. आत्मना सह नी (भ्वा. प. अ.)।

ले डूबना, मु., परमपि आत्मना सह क्षै-अवसद्-नश् (प्रे.)।

ले देकर, मु., सर्वं संकलय्य २. कृच्छ्रेण, कथमपि।

लेना एक न देना दो, मु., न कोऽप्यर्थः, न किमपि प्रयोजनम्।

लेना देना, मु., दानादानं, आदानप्रदानं २. कौसीद्यं, वृद्धिजीवनम्।

लेने के देने पड़ना, मु., भद्रस्यामद्रं फलं, इष्टाशायामनिष्टप्रसंगः।

ले भागना, मु., सह नीत्वा पलाय् (भ्वा. आ. से.), अपहृ (भ्वा. उ. अ.)।

ले मरना, मु., दे. 'ले डूबना'।

लेन्स, सं. पुं. (अं.) काचः ।

लेप, सं. पुं. (सं.) अभि,-अंजनं, उपदेहः, समालभः, उपनाहः, प्रलेपपट्टिका २. लेपनं, सुधा ३. लेपस्तरः ४. उद्वर्तनं, दे. 'उबटन' ५. संपर्कः, सम्बन्धः ।

—चढ़ाना, क्रि. स., दे. 'लीपना'।

लेपक, सं. पुं. (सं.) लेपिन्, लेपकारः, पलगंडः, लेप्यकृत् ।

लेपन, सं. पुं. (सं. न.) दे. 'लिपाई' (१)।

लेपना, क्रि. स., दे. 'लीपना'।

लेपालक, सं. पुं. (हिं. लेना+पालना) दत्तकः, दे.।

लेबर, सं. पुं. (अं.) परि-,श्रमः, आयासः, प्रयासः २. श्रमिक-कर्मकर,-वर्गः ।

—पार्टी, सं. स्त्री. (अं.) श्रमिकदलः लम् ।

—यूनियन, सं. स्त्री. (अं.) श्रमिक-कर्मकर-, संघः-समाजः-सभा ।

लेबुल, सं. पुं. (अं.) लेपपत्रम् ।

लेबोरेटरी, सं. स्त्री. (अं.) प्रयोगशाला, २. रसायनशाला।

लेमोनेड, सं. पुं. (अं.) जंबीर,-पेयं-पानकम् ।

लेरुवा, सं. पुं. (सं. लेहः>) दे. 'बछड़ा'।

लेवा, वि. (हिं. लेना) आ,-दातृ-दायक ।

—देवा, सं. पुं., आदानप्रदानम् ।

नाम—, सं. पुं., पुत्रः २. दायादः ।

लेश, सं. पुं. (सं.) दे. 'लव' २. चिह्नं, लक्षणं ३. संबंधः ४. अलंकारभेदः (सा.) २. अल्प, स्तोक ।

—मात्र, वि. (सं.) अणु-अल्प,-मात्र (—त्रा, त्री स्त्री.) ।

लेस, सं. पुं., दे. 'लासा' (१)।

—दार, वि. (हिं+फ़ा.) दे. 'लसदार'।

लेहन, सं. पुं. (सं. न.) जिह्वया स्वादनं-स्वदनं-रसनम् ।

लेहाज़ा, क्रि. वि. (अ.) अतः, अतएव ।

लेहिन, सं. पुं. (सं.) टंकणं-नं, रसशोधनः, बिडम् ।

लेह्य, वि. (सं.) लेहनीय, लेटव्य । सं. पुं. (सं. न.) दे. 'अवलेह' २. लेहनीयाहारः ३. अमृतम् ।

लैन, सं. स्त्री., दे. 'लाइन'।

लैसंस, सं. पुं. (अं. लाइसेंस) अधिकारपत्रं, अनुज्ञालेखः ।

लैस, सं. पुं. (अं. लेस) सज्ज, सन्नद्ध, सिद्ध २. जालाभरणं, दे. 'फ़ीता'।

लोंद, सं. पुं., दे. 'मलमास'।

लोंदा, सं. पुं. (सं. लोष्टः-ष्टं) आर्द्र-,पिंडः (–डं)-घनः, क्लिन्नगोलः (–लं)-लोष्टः(–ष्टं) ।

लो, अव्य. (हिं. लेना) दृश्यतां, प्रेक्ष्यतां, अवलोक्यतां । (केवल इन्हीं रूपों में) ।

लोई[1], सं. स्त्री. (सं. लोमीय) लौमी, नीशारः, आविकं. ऊर्णायुः, कंबलभेदः ।

लोई[2], सं. स्त्री., दे. 'पेड़ा' (गूंधे हुए आटे का) ।

लोक, सं. पुं. (सं.) भुवनं, भूर्भुवःस्वरादयः चतुर्दशस्थानविशेषाः २. जगत् (न.),जगती, विश्वं, चराचरं, ब्रह्मांडं, भुवनं, विष्टपं ३. नि-आ,-वासः ४. दिशा, प्रदेशः ५. लोकः-काः, जनः-नाः ६. समाजः ७. प्राणिन् ।

—कंटक, सं. पुं. (सं.) जनपीडकः ।

—तंत्र, सं. पुं. (सं. न.) जन-प्रजा-तंत्रम् ।

—त्रय, सं. पुं. (सं. न.) त्रिभुवनं, त्रैलोक्यं, त्रिलोकी ।

—नाथ, सं. पुं. (सं.) ब्रह्मन् (पुं.) २. विष्णुः ३. शिवः ४. बुद्धः ५. लोकपालः ।

—पति, सं. पुं. (सं.) ब्रह्मन् (पुं.) २. नृपः ३. लोकपालः ।

—परलोक, सं. पुं. (सं.-कौ) उभौ लोकौ, लोकद्वयम् ।

—पाल, सं. पुं. (सं.) दिक्पालः २. नृपः ।

—प्रवाद, सं. पुं. (सं.) जन-लोक,-रवः-श्रुतिः-(स्त्री.)-प्रवादः ।

—मर्यादा, सं. स्त्री. (सं.) लोक, आचारः-व्यवहारः, जगद्रीतिः (स्त्री.) ।

—यात्रा, सं. स्त्री. (सं.) जीवनं, प्राणधारणं ।

—विश्रुत, वि. (सं.) जगद्विख्यात । २. व्यवहारः, लौकिककृत्यानि (न. बहु.) ।

—श्रुति, सं. स्त्री. (सं.) दे. 'लोकप्रवाद'।

—संग्रह, सं. पुं. (सं.) लोक-जन,-रंजनं-प्रसादनं २. लोकहितैषणा ।

लोकांतर, सं. पुं. (सं. न.) पर-प्रेत,-लोकः ।

लोकाचार, सं. पुं. (सं.) जगद्रीतिः-रूढ़िः (स्त्री.), लौकिकं, लोक,-मार्गः-व्यवहारः ।

लोकाट, सं. पुं. (चीनी लुः+क्यू) लवकटं, चैनम् ।

लोकालोक, सं. पुं. (सं.) चक्रवालः, पर्वत-विशेषः (पुराणं) ।

लोकैषणा, सं. स्त्री. (सं.) अभ्युदयाभिलाषः २. स्वर्गलिप्सा ।

लोकोक्ति, सं. स्त्री. (सं.) आभाणकः, जनवादः, लौकिक,-न्यायः २. अलंकारभेदः (सा०) ।

लोकोत्तर, वि. (सं.) अलौकिक, अमानुष, अपार्थिव, लोकातिशायिन्, दिव्य, अति,-विलक्षण-अद्भुत ।

लोग, सं. पुं. (सं. लोकः) लोकः-काः, जनः-नाः, मानवाः, मनुष्याः, नराः, मानुषाः, मर्त्याः, मनुजाः (सब बहु.) ।

लोच[1], सं. स्त्री. (हिं. लचक) दे. 'लचक' २. कोमलता, मृदुता ।

लोच[2], सं. पुं. [सं. रुचिः (स्त्री.)] अभि-लाषः, इच्छा ।

लोचन, सं. पुं. (सं. न.) नयनं, नेत्रम्, दे. 'आँख' ।

लोट, सं. स्त्री. (हिं. लोटना) लु(लो)ठनं, लोटनं, वेल्लनं, लुंटा,-लुंठा, लोटः ।

—पोट, वि., लुटि(ठि)त, वेल्लित, स्खलित २. मुग्ध, बद्धभाव, अनुरागिन् ३. वि-,आकुल ४. व्यत्यस्त, विपर्यस्त ।

—जाना, मु., मूर्च्छ् (भ्वा. प. से., मूर्च्छति) २. मृ (तु. आ. अ.) ३. विश्रम् (दि. प. से.) ४. चकितो मुग्धो वा भू ।

—पोट होना, मु., (पीडादिभिः) वि-,लुठ् (तु. प. से., भ्वा. आ. से.) २. भावं-अनुरागं बंध् (क्र्. प. अ.), ३. सहसा विलुठ्य वा मृ (तु. आ. अ.) ।

—होना, मु., अनुरक्त-आसक्त (वि.) भू २. व्याकुलीभू ।

लोटन, सं. पुं. (सं. न.) दे. 'लोट' २. *लोट-नकपोतः ३. लांगलभेदः ४. मार्गशर्करा ।

लोटना, क्रि. अ. (सं. लोटनं) लुट् (भ्वा. दि. प. से.), लुठ् (भ्वा. आ. से., तु. प. से.) २. पार्श्वं परिवृत् (प्रे.) ३. आकुल-व्याकुल (वि.)भू । सं. पुं. तथा भाव, दे. 'लोट' सं. स्त्री. ।

लोटा, सं. पुं. (हिं. लोटना) कमंडलुः, दे. ।

लोडन, सं. पुं. (सं. न.) मथनं, आ-वि-लोडनम्, मंथः ।

लोडित, वि. (सं.) मथित, आ-वि-लोडित, व्याघट्टित ।

लोढ़ा, सं. पुं, (सं. लोष्टः-ष्टं>) दे. 'बट्टा' ।

लोथ-थि, सं. स्त्री. (सं. लोष्टः-ष्टं>) शवः, दे. ।

—पोथ, मु., अति,-शिथिल-श्रांत-खिन्न ।

लोथड़ा, सं. पुं. (हिं. लोथः) पलल-मांस,-पिंडः (डं) ।

लोद-ध, सं. स्त्री. (सं. लोधः) (लाल) लोध्रः, रक्तः, मार्जनः, तिरीटः, तिंदुकः । (सफेद) शुक्लः, महा,-शबरः, लोध्रः, शावरः ।

लोन, सं. पुं. (सं. लवणं) दे. 'नमक' २. लावण्यं, विशिष्टसौन्दर्यम् ।

लोना, वि. (हिं. लोन) लवण दे. 'नमकीन' २. सुन्दर, चारु । सं. पुं., *कुडय-भित्ति,-लवणं ३ लवणितकुडयस्य धूलिः (स्त्री.) ।

लोनिया, सं. पुं. (हिं. लोग) दे. 'लूनिया' । सं. पुं. ।

लोप, सं. पुं. (सं.) वि-,नाशः, क्षयः, वि,-ध्वंसः २. अदर्शनं, तिरोभावः, अंतर्धानं ३. अभावः, अविद्यमानता ४. वर्णविनाशः (व्या.) ५. विच्छेदः, विरामः ।

लोपामुद्रा, सं. स्त्री. (सं.) अगस्त्यमुनिपत्नी, लोपः, वरप्रदा, कोशीतकी ।

लोबान, सं. पुं. (अ.) सुगंधिनिर्यासभेदः *लोबानम् ।

लोबिया, सं. पुं. (सं. लोभ्यः = मूँग) क्षुधा-भिजनकः, चप(ब)लः, चर्बरः, सुकुमारः, शिंबिका, दीर्घ,-शिम्बी-बीजः ।

लोभ, सं. पुं. (सं.) परद्रव्याभिलाषः, गृध्या, गृध्नता, स्पृहा, लौल्यं, लिप्सा, गर्द्धः, तृष्णा, कांक्षा, शंसा, लोलुपता-भता, इच्छा, वांछा, मनोरथः, अभिलाषः, कामः २, कार्पण्यं, कदर्यता ।

लोभित, वि. (सं.) मोहित, आकृष्ट, हृतचित्त, लुब्ध, मुग्ध ।

लोभी, वि. (सं.-भिन्) गृध्नु, गर्द्धन, लुब्ध, लोलुप-भ, लिप्सु, अभिलाषुक, तृष्णक ।

लोम, सं. पुं. (सं.) लोमन् (न.) दे. 'रोंगटा' २. लांगूलं, पुच्छम् ।

—हर्षण, सं. पुं. (सं. न.) रोमांचः, दे. । वि., दे. 'रोमहर्षण' ।

लोमड़, सं. पुं. (सं. लोमः>) *लोमशः, *लोमाशः, दे. 'गीदड़' ।

लोमड़ी, सं. स्त्री. (हिं. लोमड़) लोमशा, लोमाशिका, दे. गीदड़ी' (संस्कृत में गीदड़-लोमड़ तथा गीदड़ी-लोमड़ी के लिए समान शब्दों का ही प्रयोग होता है ।) ।

लोमश, सं. पुं. (सं.) ऋषिविशेषः २. मेषः, दे.'भेड़ा' । वि., बहुलोमान्वित, केशिन, केशिक २. ऊर्णामय (-यी स्त्री.), और्ण (-र्णी स्त्री.) ।

—मार्जार, सं. पुं. (सं.) गंधमार्जारः, पूतिकः, मूत्रपातनः ।

लोरी, सं. स्त्री. (सं. लोल>) निद्रा-शयन-, गीतिका ।

—देना, क्रि. स., निद्रा-गीतिकया स्वप् (प्रे.) ।

लोल, वि. (सं.) सकंप, कंपमान, वेपमान, कंपित, कंप २. चंचलचित्त ३. क्षणभंगुर, पल, क्षणिक ४. उत्सुक, उत्कंठित ।

लोला, सं. स्त्री. (सं.) जिह्वा, रसना २. लक्ष्मीः-श्रीः (स्त्री.) ।

लोलुप, वि. (सं.) दे. 'लोभी' ।

लोलुपता, सं. स्त्री., दे. 'लोभ' ।

लोशन, सं. पुं. (अं.) व्रणक्षालकं, धावनौषधं, *औषधजलम् ।

लोष्ट, सं. पुं. (सं. पुं. न.) लोष्टः, मृत्तिकाखंडं, दलिः (पुं. स्त्री.), दलनी २. अश्मखंड-डः ।

लोह, सं. पुं. (सं. लोहः-हं) लौहं, दे. 'लोहा' २. रुधिरं ३. रक्तछागः ।

—कांत, सं. पुं. (सं.) अयस्कांतः, लोह-, चुंबकः ।

—कार, सं. पुं. (सं.) अयस्कारः, दे. 'लुहार' ।

—किट्ट, सं. पुं. (सं. न.) लोह,-मलं, मंडूरं, लोहजं, कृष्णचूर्णं, अयो,-मलं-रजस् (न.) ।

—चून, **—चूर**, **—चूर्ण**, } सं. पुं. (सं. लोहचूर्णं) कालक्षोदः ।

—द्रावी, सं. पुं. (सं.-विन्) लोहितः, टंकणं न. दे. 'सोहागा' ।

लोहाँगी, सं. स्त्री. (सं. लोहांगी) लोहशीर्ष,-यष्टी-दंडः-लगुडः ।

लोहा, सं. पुं. (सं. लोहः-हं) कृष्ण-, अयस् (न.)-आयसं, कालं, कालायसं, लौहं, अश्म-गिरि,-सारः, दृढं, पिंडं २. अस्त्रं, शस्त्रं, ३. लोहमयद्रव्यम् । वि., रक्त, लोहित २. अति,-दृढ-कीकस ।

लोहे का, वि., लौह(-ही स्त्री.), लोह-अयो,-मय (-यी स्त्री.), आयस (-सी स्त्री.), लोह-, आयस-, ।

लोहे का चना, मु., सुदुष्करं कर्मन् (न.) ।

लोहे के चने चबाना, मु., सुदुष्करं कर्म संपद् (प्रे.) ।

—गहना या लेना, मु., युध् (दि. आ. अ.) दे. 'लड़ना' ।

—बजना, मु., युद्धं प्रवृत् (भ्वा. आ. से.) ।

(किसीका)—मानना, मु., (अन्यस्य) प्रभुत्वं *स्वीकृ २. वि-परा,-जि (कर्म.) ।

लोहार, सं. पुं. (सं. लोहकारः) दे. 'लुहार' ।

—की स्याही, सं. स्त्री., दे, 'हीराकसीस' ।

लोहित, वि. (सं.) रक्त, शोण । सं. पुं. (सं.) मंगलग्रहः, कुजः, भौमः २. रक्तवर्णः । (सं. न.) रक्तं, रुधिरम् ।

—चंदन, सं. पुं., केसरः-रं, कश्मीरजं, कुंकुमम् ।

—नयन, वि., (सं.) रक्त-लोहित, नेत्र-नयन-ईक्षण, कुपित, क्रुद्ध ।

—शतपत्र, सं. पुं., कोकनदं, रक्त,-उत्पलं-नीरजम् ।

लोहिया, सं. पुं. (हिं. लोहा) लोहपण्य-विक्रेतृ, लोहविक्रयिन् २. लोहितर्षभः ३. लोह-गुलिका ।

लोहू, सं. पुं. (सं. लोहितं) दे. 'रक्त' तथा 'लहू' ।

लौं, अव्य. (हिं. लग) दे. 'तक' २. सदृश, तुल्य ।

लौंग, सं. पुं. (सं. लवंगं) देवकुसुमं, श्री,-प्रसूनं-पुष्पं-संज्ञं, लवंगकं, दिव्यं, शेखरं, लवं २. लवंगं (घ्राणभूषणभेदः) ।

लौंडा, सं. पुं. (हिं. लोना) (लावण्यविशिष्टः) बालकः-दारकः । वि., अबोध, अज्ञ २. चपल, चंचल ।

—पन, सं. पुं., बाल्यं २. चांचल्यम् ।

लौंडी-डिया, सं. स्त्री. (हिं. लौंडा) कन्या, कुमारी २. पुत्री ३. दासी ।

लौंडेबाज़, वि. (हिं.+फ़ा.) पुंमैथुनकारिन् ।

लौंडेबाज़ी, सं. स्त्री. (हिं. + फ़ा.) पुंमैथुनम् ।
लौ¹, सं. स्त्री. (हिं. लपट) कीलः-ला, अग्नि-ज्वाला(लः)ज्वाला, जिह्वा, शिखा २. दीपशिखा ।
लौ, सं. स्त्री. (हिं. लाग) अभिलाषः, रागः २. चित्त-मनो,-वृत्तिः(स्त्री.) ३. कामना,वांछा ।
—लगना, क्रि. अ., उद्यत (वि.) भू २. (भक्त्यादिषु) लीन-मग्न-निरत(वि.) भू ।
—लगाना, क्रि. स., सततं अभिलष् (भ्वा. प. से.) २. आत्मानं भक्त्यादिषु निमस्ज्-आसंज् (प्रे.) ३. आम्रेड् (प्रे.) ।
—लीन, वि. (सं.) मग्न, आसक्त, निरत ।
लौकिक, वि., (सं.) सांसारिक, ऐहिक, प्रापंचिक, लौक्य २. व्यावहारिक, आचारिक ।
लौकी, सं. स्त्री. (सं. लाबु-बूः दोनों स्त्री.) अलाबुः-बूः (स्त्री.), दे. 'कद्दू' ।
लौटना, क्रि. अ. (हिं. उलटना) दे. वापस आना' तथा 'वापस जाना' ।
लौटफेर, सं. पुं. (हिं. लौटना + फेरना) बृहत्-महा,-परिवर्तः-परिवर्तनम् ।
लौटाना, क्रि. स., दे. 'वापस करना' ।
लौह, सं. पुं. (सं. न.) दे. 'लोहा' (१) । वि., दे. 'लोहे का' ('लोहा' में) ।

व

व, देवनागरीवर्णमालाया ऊनत्रिंशो व्यंजनवर्णः, वकारः ।
वंक, वि. (सं.) अराल, वृजिन, कुंचित, वक्र, आनत, जिह्म, वेल्लित, आभुग्न, कुटिल । सं. पुं. (सं.) नदीवक्रम् ।
वंकिम, वि. (सं.) ईषत्–किंचित्,–अराल–वक्र–वृजिन ।
वंग, सं. पुं. [सं. वंगाः (पुं. बहु.)] वंगप्रांतः (=बंगाल) । (सं. न.) त्रपुः, त्रपु (न.), रंगं, नागजं, कस्तीरं २.सीसं-सकं, सीसपत्रम् ।
—भस्म, सं. पुं. [सं.-भस्मन् (न.)] रंगभस्मन् (न.) ।
वंगन, सं. पुं., दे. 'बैंगन' ।
वंचक, वि. तथा सं. पुं. (सं.) कपटिन्, प्रतारक(:), धूर्त (:) ।
वंचना, सं. स्त्री. (सं.) वंचनं, प्रतारणं-णा, माया, कपटं, कैतवं, वंचथः ।
वंचित, वि. (सं.) प्रतारित, विप्रलब्ध २. हीन, रहित ।
वंदन, सं. पुं. (सं. न.) वंदना, प्रणामः, प्रणतिः (स्त्री.), नमस्कारः २. पूजा, अर्चा, आराधना २. स्तुतिः-नुतिः (स्त्री.) ।
—वार, सं. स्त्री. (सं. वंदनमाल्यं) वंदनमालालिका, तोरणस्रज् (स्त्री.) ।
वंदना, सं. स्त्री. (सं.) दे. 'वंदन' (१-३) ।
वंदनीय, वि. (सं.) नमस्य, वंद्य २. पूज्य, अर्चनीय ३ स्तुत्य, न(ना)व्य ।
वंदी, सं. पुं. (सं.-दिन्) स्तुतिपाठकः, मा(म)-गधः, चारणः, वंदथः २. कारागुप्तः, बंदी-दिः (स्त्री.) ।
—गृह, सं. पुं. (सं. न.) कारा, कारा,-गृहं-गारम् ।
वंद्य, वि. (सं.) दे. 'वंदनीय' ।
वंध्या, सं. स्त्री. (सं.) दे. 'बंध्या' ।
वंश, सं. पुं. (सं.) कुलं, अन्वयः, अन्ववायः, गोत्रं, अभिजनः २. जातिः (स्त्री.), वर्गः ३. कुटुंबं, गृहजनः, पुत्रकलत्रादीनि (न. बहु.) ४. वेणुः, दृढग्रंथिः, दे. 'बांस' । ५. मुरली, वंशी ६. पृष्ठास्थि (न.), पृष्ठवंशः ७. भुजादीनां लंबास्थि (न.) ।
—ज, सं. पुं. (सं.) पुत्रः २. संतानः ।
—धर, सं. पुं. (सं.) वंशजः, संततिः (स्त्री.) ।
—लोचन, सं. पुं. [सं.-लो(रो)चना]वंशशर्करा, वंशजा-जा, वांशी, शुभा ।
—हीन, वि. (सं.) निर्वंश २. अपुत्र ।
वंशानुक्रम, सं. पुं. (सं.) वंश-, अन्वयः-क्रमः,-परम्परा (स्त्री.)-अवलिः-विततिः ।
वंशावली, सं. स्त्री. [सं.-ली-लिः (स्त्री.)] वंश,-क्रमः-श्रेणी-परंपरा ।
वंशी, सं. स्त्री. (सं.) वंशिका, मुरली दे. ।
—धर, सं. पुं. (सं.) मुरलीधरः, श्रीकृष्णः
व, अव्य. (फ़ा.) च, दे. 'और' ।
वक, सं. पुं. (सं.) दे. 'बगला' २. राक्षसविशेषः ।
—वृत्ति, सं. स्त्री. (अ.) विडालवृत्तिः, दंभः ।
वकालत, सं. स्त्री. (अ.) अभिभाषकता-त्वं, वाक्कीलत्वं, व्यवहारदर्शकता-त्वं २. परप्रातिनिध्यं, परकार्यसाधकत्वं ३. दूतकर्मन् (न.) ४. परपक्षमंडनम् ।

—करना, क्र. अ., परिपक्षं समर्थ् (चु.) २. अभिभाषकवृत्तिं उपजीव् (भ्वा. प. से.)।

—नामा, सं. पुं. (अ.+फ़ा.) अभिभाषकता-पत्रम्।

वकील, सं. पुं. (अं.) अभिभाषकः, व्यवहार-दर्शकः, वाक्कीलः, पक्षवादिन् २. राज-, दूतः ३. प्रतिनिधिः, प्रतिहस्तकः ४. पर-पक्ष-पोषकः।

वकुल, सं. पुं. (सं.) दे. 'बकुल'।

वकूफ़, सं. पुं. (अ.) ज्ञानं २. बुद्धिः (स्त्री.)।

बे—, वि. (फ़ा.+अ.) निर्बुद्धि।

वक्त, सं. पुं. (अ.) समयः, कालः २. अवसरः ३. अवकाशः ४. ऋतुः ५. मृत्युकालः।

—की चीज़, सं. स्त्री., कालानुकूलो रागः।

—बे वक्त, क्रि. वि. कालेऽकाले वा, समयेऽसमये वा।

—काटना, मु., येन केन प्रकारेण कालं या (प्रे. यापयति) २. मनो विनुद् (प्रे.)।

—पड़ना, मु., आपद् आपत (भ्वा. प. से.), उपनम् (भ्वा. प. अ.)।

वक्तन् फ़ौक़्तन, क्रि. वि. (अ.) कदा कदा, यदा कदा २. यथाकालम्।

वक्तव्य, वि. (सं.) कथनीय, वचनीय २. हीन, कुत्सित। सं. पुं. (सं. न.) कथनं, वचनं २. व्याख्यानम्।

वक्ता, सं. पुं. (सं. वक्तृ) वाग्मिन्, वाक्पटुः २. व्याख्यातृ, उपदेशकः ३. कथ(थि)कः।

वक्तृता, सं. स्त्री. (सं.) वक्तृत्वं, वाग्मिता, वाक्पाटवं, भाषणकौशलं २. व्याख्यानं, भाषणं, कथनम्।

वक्त्र, सं. पुं. (सं. न.) मुखं, आस्यं, लपनं, वदनम् २. चंचुः—चूः (स्त्री.) ३. लम्बास्यं, प्रलम्बमुखम् ४. बाणाग्रम् ५. कार्यारम्भः ६. परिधानभेदः।

—ज, सं. पुं. (सं.) ब्राह्मणः, विप्रः २. दन्तः, दशनः, रदनः, खादनः।

—तुंड, सं. पुं. (सं.) गणेशः, गजवदनः।

—शोधन, सं. पुं. (सं. न.) मुखशुद्धिः (स्त्री.) २. निंबुकं, जंबीरम् ३. मातुलुंगम्।

वक्फ़, सं. पुं. (अ.) परोपकाराय दानं २. धर्मार्थं उत्सृष्टा संपद् (स्त्री.)।

—नामा, सं. पुं. (अ+फ़ा.) दानपत्रम्।

वक्फ़ा, सं. पुं. (अ.) अवकाशः २. उद्योग-विश्रांतिः (स्त्री.)।

वक्र, वि. (सं.) दे. 'वंक' २. छलिन्, कपटिन्, धूर्त्त। (सं. पुं.) शनैश्चरः २. मंगलः, भौमः। (सं. न.) नदीवक्र, वंकः।

—गामी, वि. (सं.) कुटिलगति २. शठ, कुटिल।

—तुंड, सं. पुं. (सं.) गणेशः २. शुकः।

वक्रता, सं. स्त्री. (सं.) जिह्मता, आनतिः (स्त्री.), कौटिल्यं २. छलं, कपटं, शाठ्यम्।

वक्रोक्ति, सं. स्त्री. (सं.) काकूक्तिः (स्त्री.) २. शब्दालंकारभेदः (सा.) ३. चमत्कृत-कुटिल,-उक्तिः (स्त्री.)।

वक्षःस्थल, सं. पुं. (सं. न.) उरस्-वक्षस् (न.), अंकः, उत्संगः, उरःस्थलम्।

वग़ैरह, अव्य. (अ.)-आदि,-प्रभृति।

वचन, सं. पुं. (सं. न.) भाषा, सरस्वती, वाणी दे. २. उक्तिः (स्त्री.), कथनं, भाषणं, वाक्यं ३. एकत्वादिबोधकः शब्दरूपभेदः (व्या.) ४. प्रतिज्ञा, संगरः।

वजह, सं. स्त्री. (अ.) कारणं, हेतुः।

वज़न, सं. पुं. (अ.) भारः, गुरुत्वम्।

वज़नी, वि. (अ. वज़न) भारवत्, गुरु २. मान्य, प्रभावशालिन्।

वज़ा, सं. स्त्री. (अ. वज़अ) रचना २. आकृतिः (स्त्री.) ३. आचारः, व्यवहारः ४. दशा ५. रीतिः (स्त्री.)।

वज़ारत, सं. स्त्री. (अ.) साचिव्यं, अमात्यत्वं, मंत्रित्वम्।

वज़ीफ़ा, सं.पुं.(अ.) (छात्र)-वृत्तिः-भृतिः(स्त्री.)।

वज़ीर, सं. पुं. (अ.) अमात्यः, सचिवः, मंत्रिन्, मंत्रधरः, मंत्रज्ञः, धी-बुद्धि,-सहायः।

वज़ीरी, सं. स्त्री., दे. 'वज़ारत'।

वज़ू, सं. पुं. (अ.) प्रार्थनायाः पूर्वं अंग-प्रक्षालनं (इस्लाम), *अङ्गस्पर्शः।

वजूद, सं. पुं. (अ.) अस्तित्वं, सत्ता २. शरीरं ३. सृष्टिः (स्त्री.) ४. अभिव्यक्तिः (स्त्री.)।

वज्र, सं. पुं. (सं. पुं. न.) कुलिशं, पविः, अशनिः (पुं. स्त्री.), दंभोलिः, ह्रादिनी, शतधारं, अभ्रोत्थं, शंबः, गिरिकंटकः २. हीरः-रं, हीरकः, रत्नं २. विद्युत् (स्त्री.)। वि., अति,-दृढ-संहत-कीकस-कठिन, दुर्भेद्य २. घोर, भीषण।

—धर, सं. पुं. (सं.) इंद्रः, वज्रिन्, वज्र,-पाणिः-बाहुः-मुष्टिः ।
—पात, सं. पुं. (सं.) वज्राघातः ।
—मय, वि. (सं.) दे. 'वज्र' वि. (१) ।
—हृदय, वि. (सं.) पाषाणहृदय, निष्करुण, निर्दय ।
वट, सं. पुं. (सं.) न्यग्रोधः, वृक्षनाथः, रक्तफलः, क्षीरिन्, जटालः, अवरोही, महाछायः ।
वटी, सं. स्त्री. (सं.) गुली-लिका, वटिका, निस्तली, दे. 'गोली' ।
वटु, } वटुक, } सं. पुं. (सं.) बालकः, माणवकः २. वर्णिन्, ब्रह्मचारिन् ।
वड़ी, सं. स्त्री. (सं. वटी) मापवटी ।
वणिक्, सं. पुं. (सं. वणिज्) पण्याजीवः, क्रयविक्रयिकः २. वैश्यः ।
वतन, सं. पुं. (अ.) जन्म,-भूः-भूमिः (दोनों (स्त्री.), स्वदेशः २. निवासस्थानं ३. जन्मस्थानम् ।
वतीरा, सं. पुं. (अ.) प्रथा, रीतिः (स्त्री.) २. आचारः, वृत्तम् ।
वत्स, सं. पुं. (सं.) गोशिशुः, तर्णकः, दोषःपकः, तंतुभः २. शिशुः, बालकः ।
वत्सतर, सं. पुं. (सं.) दम्यः, दुर्दांतः, गडिः ।
वत्सतरी, सं. स्त्री. (सं.) त्रिहायणी गौः (स्त्री.) ।
वत्सर, सं. पुं. (सं.) अब्दः, हायनः, वर्षम् ।
वत्सल, वि. (सं.) अपत्यानुरागिन्, संतानस्नेहिन्, पुत्रप्रेमिन् २. स्नेहिन्, प्रेमिन् ।
वत्सलता, सं. स्त्री. (सं.) (सन्तानादिकस्य) अनुरागः-स्नेहः ।
वदन, सं. पुं. (सं. न.) मुखं, आननम ।
वदान्य, वि. (सं.) बहुप्रद, दानशील, उदार २. वल्गुवाच्, मधुरभाषिन् ।
वदाम, सं. पुं., दे. 'बादाम' ।
वदावद, वि. (सं.) वाचाल, वाचाट ।
वध, सं. पुं. (सं.) घातः, हननं, हत्या, विशसनं, प्रमाथः, संहारः ।
वधक, सं. पुं. (सं.) नरघातकः, हंतृ, हिंसकः २. व्याधः, शाकुनिकः ३. मृत्युः ।
वधू, वधूटी, सं. स्त्री. (सं.) नवोढ़ा, नववधूः, पाणिगृहीता २. पत्नी ३. पुत्रवधूः ।
वध्य, वि. (सं.) वधार्ह, शीर्षच्छेद्य, हंतव्य ।
वन, सं. पुं. (सं. न.) अरण्यं, विपिनं, अटवी, काननं, गहनं, द(दा)वः, कांतारं २. वाटिका ३. जलम् ।
—चर, सं. पुं. (सं.) वन,-चारिन्-विहारिन् २. वन्य,-पशुः-मनुष्यः ।
—माली, सं. पुं. (सं.) श्रीकृष्णः २. वनपुष्पमालाधारिन् ।
—राज, सं. पुं. (सं.) सिंहः ।
—वास, सं. पुं. (सं.) विपिनवसतिः (स्त्री.) ।
—वासी, सं. पुं. (सं.-सिन्) आटविकः, वनेचरः, वनौकस्, वनिन् ।
—स्थली, सं. स्त्री. (सं.) कानन-भूमिः, अरण्यप्रदेशः ।
वनस्पति, सं. स्त्री. (सं. पुं.) पुष्पहीनः फलिवृक्षः (उ. बड़, पीपल आदि) २. वृक्षः, पादपः ३. वटः, न्यग्रोधः ।
—शास्त्र, सं. पुं. (सं. न.) वनस्पतिविज्ञानम् ।
वनिता, सं. स्त्री. (सं.) नारी, रमणी २. प्रिया, कांता ।
वनी, सं. स्त्री. (सं.) वनं, दे. ।
वनी, सं. पुं. (सं.-निन्) वानप्रस्थः दे. २. दे. 'वनवासी' ।
वन्य, वि. (सं.) वन,-उद्भव-उद्भूत-जात, आरण्यक, जांगल २. असभ्य, अशिष्ट ३. क्रूर, हिंस्र ।
वपनं, सं. पुं. (सं. न.) केशमुंडनं २. बीजाधानम् ।
वपा, सं. स्त्री. (सं.) मेदस् (न.), वसा ।
वपु, सं. पुं. [सं. वपुस् (न.)] शरीरम् ।
वप्र, सं. पुं. (सं. पुं. न.) वरणः, सालः, प्राकारः २. क्षेत्रं ३. धूलिः (स्त्री.) ४. तुंगतटः ५. गिरिशिखरं ६. वल्मीकः-कं, मृत्तिकाचयः ।
—क्रीड़ा, सं. स्त्री. (सं.) वप्रक्रिया ।
वफ़ा, सं. स्त्री. (अ.) प्रतिज्ञापालनं २. आज्ञा,-कारिता-अनुसरणं-पालनं ३. विश्वसनीयता ४. सुशीलता ।
—दार, वि. (अ.+फ़ा.) विश्वसनीय, विश्वास्य, स्वामिभक्त २. आज्ञा,-कारिन्-पालक ३. कर्तव्यपालक ।
—दारी, सं. स्त्री. (अ.+फ़ा.) दे. 'वफ़ा' ।
वबा, सं. स्त्री. (अ.) महा-,मारी, जन-, मारः, मारिका २. स्पर्शसंचारिरोगः ।
वबाल, सं. पुं. (अ.) भारः, भरः २. कष्टं, विपद् (स्त्री.) ।

वमन, सं. पुं. (सं. न.) वमः, वमिः (स्त्री.), छर्दनं, छर्दिका २. वांत-वमन,-द्रव्यम् ।
—करना, क्रि. स., उद्-,वम् (भ्वा. प. से.), छर्द् (चु.) ।
वयःसंधि, सं. स्त्री. (सं. पुं.) बाल्ययौवन-मध्यकालः ।
वय, सं. स्त्री. [सं. वयस् (न.) आयुस् (न.), वयःक्रमः, अतीतजीवनकालः ।
वयस्क, वि. (सं.) प्रौढ़, प्राप्तव्यवहार, दे. 'बालिग़' ।
वयस्य, सं. पुं. (सं.) समवयस्कः २. मित्रं, सखि (पुं.) ।
वयस्या, सं. स्त्री. (सं.) सखी दे. ।
वयोवृद्ध, वि. (सं.) स्थविर, जरठ-ण, जरित-न्, वृद्ध ।
वरंच, अव्य. (सं.) अपि तु, दे. 'बल्कि' २. परंतु, किंतु ।
वर, सं. पुं. (सं.) वृतिः (स्त्री.), तपोभिः देवेभ्यो याचितो मनोरथः २. (देवादीनां) अनुग्रहः, प्रसादः, आशिस् (स्त्री.) ३. जामातृ ४. परिणेतृ, वोढृ ५. पतिः, भर्तृ । वि. (सं.)- उत्तम,-श्रेष्ठ (उ. ऋषिवरः=ऋषिश्रेष्ठः) ।
—मांगना, क्रि. स., वरं याच् (भ्वा. आ. से.) वृ (स्वा. उ. से.)-वॄ (क्र्. उ. से.) ।
—दान, सं. पुं. (सं.) मनोरथपूरणं, अभीष्ट-प्रदानं २. दे. 'वर' (२) ।
—दायक, सं. पुं. (सं.) वर-दः-प्रदः-दातृ, वांछितार्थदः, समर्द्धकः ।
—यात्रा, सं. स्त्री. (सं.) *जनेतं, परिणेतृ-प्रस्थानम् । दे. 'बरात' ।
—वर्णिनी, सं. स्त्री. (सं.) वर,-अंगना-नारी, सुंदरी ।
वरक़, स. पुं. (अ.) (पुस्तक–) पत्रं-पर्णं २-३. सुवर्ण-रजत,-पत्रम् ।
—गरदानी, सं. स्त्री., (अ.+फ़ा.) ग्रन्थे विहंगमदृष्टिः (स्त्री.), अध्ययनाडम्बरः, अध्ययनाभासः ।
—स्याह करना, मु., अत्यन्तं-अत्यर्थं लिख् (तु, प. स.) ।
वरगलाना, क्रि. स. (फ़ा. वरग़लानीदन) प्रलुभ्-विमुह् (प्रे.) २. प्रतॄ-वंच् (प्रे.) ।
वरज़िश, सं. स्त्री. (फ़ा.) व्यायामः, दे. ।
वरण, सं. पुं. (सं. न.) वृतिः (स्त्री.), उद्ग्रहणं २. भर्तृत्वेनांगीकरणं, पतित्वेन स्वीकरणं ३. पूजा ४. आवरणं, आच्छादनम् ।
वरद, सं. पुं. (सं.) दे. 'वरदायक' ('वर' के नीचे) ।
वरदी, सं. स्त्री. (अ.) *नियतपरिधानं, विशिष्ट-वर्गीय-वेषः ।
वरन्, अव्य. (सं. वरं>) अपि तु ।
वरना, अव्य. (अ.) अन्यथा, इतरथा, नो चेत् ।
वराटिका, सं. स्त्री. (सं.) कपर्दिका, दे. 'कौड़ी' ।
वरानना, सं. स्त्री. (सं.) सुंदरी, वरवर्णिनी, सुवदना-नी ।
वराह, सं. पुं. (सं.) शूकरः, दे. 'सूअर' २. विष्णुः, विष्णोरवतारविशेषः ।
वरिष्ठ, वि. (सं.) उत्तम, श्रेष्ठ, पूज्यतम ।
वरुण, सं. पुं. (सं.) पाशिन्, प्रचेतस् , अप्-अपां,-पतिः, जलेश्वरः, मेघनादः २. जलं ३. सूर्यः ४. ग्रह-विशेषः (अं. नेपचून) ।
वरुणालय, सं. पुं. (सं.) सागरः ।
वरूथिनी, सं. स्त्री. (सं.) सेना, सैन्यम् ।
वरे, क्रि. वि. [सं. अवारतः (अव्य.)] इतः, एतत्स्थानं प्रति, अत्र २. समीपं-पे-पतः, अतिकं-के (सब १-२. अव्य.) ।
वरेण्य, वि. (सं.) प्रधान, मुख्य २. वरणीय, सत्कार्य ।
वर्कशाप, सं. स्त्री. (अं.) प्रावेशनं, शिल्प,-शालं-शाला ।
वर्ग, सं. पुं. (सं.) (सजातीयानां) गणः, जातिः (स्त्री.), समूहः, श्रेणी-णिः (स्त्री.) २. समस्थानवत् व्यंजनपंचकं (उ. कवर्गः, इ.) ३. अध्यायः, परिच्छेदः ४. सम-,चतुर्भुजः-चतुरस्रः ५. समद्विघातः, वर्गफलं, कृतिः (स्त्री.) (उ. ३×३=९ वर्गांकः) ।
—फल, सं. पुं. (सं. न.) दे. 'वर्ग' (५) ।
—मूल, सं. पुं. (सं. न.) पूरितसमानांकद्वय-स्याद्यंकः, पद (उ. ९ का वर्गमूल=३) ।
वर्चस्, सं. पुं. (सं. न.) तेजस् (न.), कांतिः (स्त्री.) ।
वर्चस्वी, वि. (सं.-स्विन्) तेजस्विन्, कांतिमत् ।
वर्जन, सं. पुं. (सं. न.) त्यागः २. निषेधः ।
वर्जनीय, वि. (सं.) त्याज्य, हेय, वर्ज्य २. निषेधार्ह ।
वर्जित, वि. (सं.)त्यक्त, उत्सृष्ट २. निषिद्ध, हेय ।
वर्ण, सं. पुं. (सं.) आर्याणां ब्राह्मणादिविभाग-

चतुष्टयं, जातिः (स्त्री.) २. रंगः, रागः ३. प्रकारः, विधा ४. अक्षरं ५. रूपं, आकारः ।
—धर्म, सं. पुं. (सं.) ब्राह्मणादिकर्तव्यकलापः ।
—नाश, सं. पुं. (सं.) वर्ण-अक्षर,-लोपः-पातः (निरुक्तः) (उ., पृषतोदर से पृषोदर) ।
—माला, सं. स्त्री. (सं.) वर्णसमाम्नायः, अक्षरश्रेणी (उ. अ से ह् तक) ।
—विकार, सं. पुं. (सं.) अक्षरविक्रिया (निरुक्त) (उ. गाली से गारी) ।
—विचार, सं. पुं. (सं.) व्याकरणांगविशेषः, शिक्षा ।
—विपर्यय, सं. पुं. (सं.) अक्षरव्यत्यासः (निरुक्त; उ. हिंस से सिंह) ।
—वृत्त, सं. पुं. (सं. न.) अक्षरछंदस् (न.) ।
—श्रेष्ठ, सं. पुं. (सं.) ब्राह्मणः ।
—संकर, सं. पुं. (सं.) वर्ण-जाति,-मिश्रणं २. मिश्रजः, संकरजः, सांकरिकः ।
—हीन, वि. (सं.) बहिष्कृत, अपांक्तेय ।
वर्णन, सं. पुं. (सं. न.) निरूपणं, विवरणं, व्याख्यानं, सविस्तरकथनं, वर्णना २. स्तवनं, गुणकथनं ३. रंजनं, चित्रणम् ।
—करना, क्रि. स., विवृ (स्वा. उ. से.), निरूप्, वर्ण् (चु.), सविस्तरं कथ् (चु.), व्याख्या (अ. प. अ.) ।
वर्णनीय, वि. (सं.) वर्णयितव्य, निरूपयितव्य, व्याख्येय, वर्ण्य ।
वर्णित, वि. (सं.) निरूपित, व्याख्यात २. उक्त, कथित ।
वर्णी, सं. पुं. (सं.-र्णिन्) ब्रह्मचारिन् २. लेखकः ३. चित्रकारः ।
वर्ण्य, वि. (सं.) वर्णनीय, निरूपयितव्य, प्रस्तुत, उपमेय, व्याख्यातव्य ।
वर्तन, सं. पुं. (सं. न.) व्यवहारः, वृत्तं, चेष्टितं, आचरणं २. वृत्तिः (स्त्री.), आ-उप,-जीविका ३. पात्रम्, भाजनं, दे. 'बर्तन' ।
वर्तनी, सं. स्त्री. (सं.) मार्गः, पथः, पथिन् २. पेषणभृतिः (स्त्री.) ३. तर्कुः (पुं. स्त्री.), तर्कुटम् । ४. वसती-तिः (स्त्री.), अवस्थितिः (स्त्री.) ५. वर्णविन्यासः, शब्दाक्षरोच्चारणम् ।
वर्तमान, वि. (सं.) प्रचरि(लि)त, प्रचल, सर्वसंमत २. उपस्थित, विद्यमान ३. आधुनिक(-की), अधुना-इदानीं,-तन(-नी स्त्री.) । सं. पुं. (सं.) क्रियायाः कालभेदः (व्या.) २. वृत्तांतः ३. प्रचलितव्यवहारः ।
वर्ती, सं. स्त्री. (सं.) वर्तिः-र्तिका (स्त्री.), दे. 'बत्ती' २. शलाका ।
—वर्ती, वि. (सं.-र्तिन्)-स्थ,-वासिन् ।
वर्तुल, वि. (सं.) गोल, मंडल-चक्र,-आकार ।
वर्दी, सं. स्त्री., दे. 'वरदी' ।
वर्द्धन, सं. पुं. (सं. न.) वृद्धिः-उन्नतिः (स्त्री.) २. समृद्धिः (स्त्री.) ।
वर्मा, सं. पुं. (सं. वर्मन्) क्षत्रियोपाधिः ।
वर्बर, सं. पुं. (सं.) देशविशेषः २. वर्बरवासिन् ३. असभ्यः, ग्राम्यः ४. म्लेच्छः, वर्वरः, वर्वरः, अनार्यः ।
वर्ष, सं. पुं. (सं. पुं. न.) अब्दः, हायनः, समा, शरद् (स्त्री.), सं,-वत्सरः, संवत् (अव्य.) २. मेघः ३. वृष्टिः (स्त्री.) ४. महाभूभागः ।
—गांठ, सं. स्त्री. (सं+हिं.) वर्षवृद्धिः (स्त्री.), जन्म,-दिवसः-दिनं-तिथिः ।
—फल, सं. पुं. (सं. न.) वार्षिकग्रह-फल-दर्शिका-पत्रिका ।
वर्षा, सं. स्त्री. [सं. वर्षाः (स्त्री. बहु.)] प्रावृषा-ष् (स्त्री.), मेघागमः, घनकालः, जलार्णवः, घनाकारः २. वृष्टिः (स्त्री.), वर्षः-र्षं-र्षणं, गोघृतं, परामृतम् ।
—काल, सं. पुं. (सं.) दे. 'वर्षा' (१) ।
—होना, क्रि. अ., वृष् (भ्वा. प. से.), वृष्टिः भू । मु., अतिमात्रं अवपत् (भ्वा. प. से.) ।
वलद, सं. पुं. (अ. वल्द) पुत्रः २. संतानः ।
वलय, सं. पुं. (सं. पुं. न.) कटकः, आवापकः २. वेष्टनं ३. मंडलम् ।
वलयित, वि. (सं.) परिवेष्टित, परिवृत ।
वलवला, सं. पुं. (अ.) उत्साहः, औत्सुक्यम् ।
वलाहक, सं. पुं. (सं.) मेघः, जलदः २. पर्वतः ।
वलि, सं. स्त्री. (सं.) दे. 'वली' ।
वलित, वि. (सं.) न(ना)मित, आभुग्न २. आवर्जित, प्रह्व ३. वलयित, दे. ४. वलीमत्, वलिभ, वलिन ५. आच्छादित ६. सहित ७. लग्न ।
वली, सं. स्त्री. (सं.) वलिः (स्त्री.), वली-लिः (स्त्री.), दे. 'झुर्री' २. श्रेणी, अवली-लिः (स्त्री.) ३. रेखा ४. पुटः, भंगः ।

वली, सं. पुं. (अ.) स्वामिन्, प्रभुः २. शासकः ३. साधुः ।
—अहद, सं. पुं. (अ.) युवराजः ।
वल्कल, सं. पुं. (सं. पुं. न.) वल्कः-कं, वृक्षत्वचा-च् (स्त्री.), चोचं, शल्कं, छल्ली २. वल्कल-वल्क, वसनं-वस्त्रम् ।
वल्द, सं. पुं. (अ.) दे. 'वलद' ।
वल्दियत, सं. स्त्री. (अ.) पितृनामन् (न.) ।
वल्मीक, सं. पुं. (सं.) वामलूरः, वल्मकूटं, कृमिशैलकः, नाकुः २. वाल्मीकिः मुनिः ।
वल्लभ, वि. (सं.) प्रियतम, दयित । सं. पुं. (सं.) नायकः, प्रियतमः, कांतः २. पतिः, भर्तृ ।
वल्लभा, वि. (सं.) प्रियतमा, कांता, दयिता । सं. स्त्री. (सं.) प्रिय-, पत्नी-भार्या ।
वल्लरी-रि, सं. स्त्री. (सं.) लता, वल्ली-ल्लिः (स्त्री.) २. मंजरी ।
वशंवद, वि. (सं.) वश-वर्तिन्-अनुग, आज्ञाकारिन् । सं. पुं. (सं.) सेवकः, दासः ।
वश, सं. पुं. (सं. पुं. न.) अधिकारः, प्रभुत्वं २. शक्तिः (स्त्री.), प्रभावः, सामर्थ्यं ३. अधीनता, आयत्तता ४. इच्छा, कामना । वि. (सं.) अधीन, आयत्त ।
—(में) करना, क्रि. स., वशीकृ, दम् (प्रे., दि. प. से.), वशं नी (भ्वा. प. अ.), नियम् (भ्वा. प. अ.) ।
—वर्ती, वि. (सं.-वर्तिन्) वशग, वशानुग, -वश,-अधीन,-आयत्त, परतंत्र ।
वशिष्ठ, सं. पुं., दे. 'वसिष्ठ' ।
वशी, वि. (सं.-शिन्) जितात्मन्, संयमिन् २. अधीन,-आयत्त ३. शक्तिमत्, समर्थ ।
वशीकरण, सं, पुं. (सं. न.) (मणिमंत्रौषधादिभिः) स्वायत्तीकरणं २. दमः-मनं, निग्रहः-हणं, वशीकारः ।
वशीकृत, वि. (सं.) वशं नीत २. मंत्रमोहित ३. मुग्ध ।
वशीभूत, वि.(सं.)अधीन, आयत्त २. परवशग ।
वश्य, वि. (सं.) विनेय, शिक्ष्य, दम्य ।
वश्यक, वि. (सं.) आज्ञा-वचन,-अनुवर्तिन्-ग्राहिन्-सेविन्-पालक ।
वश्यका, सं. स्त्री. (सं.) आज्ञानुवर्तिनी पत्नी ।
वश्यता, सं. स्त्री. (सं.) अधीनता, परवशता, पराधीनता ।
वश्या, सं. स्त्री. (सं.) वशवर्तिनी,-आज्ञानुवर्तिनी,-पत्नी ।
वषट्, अव्य.(सं.) देवनिमित्तकहविस्त्यागमंत्रः ।
—कार, सं. पुं. (सं.) होमः, देवयज्ञः ।
वसंत, सं. पुं. (सं.) ऋतुराजः, दे. 'बसंत' २. शीतलारोगः ३. मसूरिकारोगः ४. रागभेदः ५. तालभेदः ।
—तिलक, सं. पुं. (सं.-कः-कं-का)वर्णवृत्त-भेदः ।
—पंचमी, सं. स्त्री. (सं.) श्रीपंचमी, माघशुक्लपंचमी ।
वसंती, वि., दे. 'बसंती' ।
वसती, सं. स्त्री. (सं.) वसतिः-वस्तिः (स्त्री.), नि-, वासः २. गृहं, सद्मन् (न.) ।
वसन, सं. पुं. (सं. न.) वस्त्रं, वासस् (न.) ।
वसिष्ठ, सं. पुं. (सं.) ऋषिविशेषः २. सप्तर्षिमंडलांतर्गतो नक्षत्रविशेषः ।
वसीका, सं. पुं. (अ.) समय-प्रतिज्ञा-संविद्,-लेखः-पत्रम् ।
—नवीस, सं.पुं.(अ.+फ़ा.) दे. 'अर्ज़ीनवीस' ।
वसीयत, सं. स्त्री. (अ.) (मरणासन्नस्य) अंत्यादेशः २. रिक्थविभागव्यवस्था ।
—करना, क्रि. स., मृत्युपत्रेण दा (जु. उ. अ.)-ऋ (प्रे., अर्पयति) ।
—नामा, सं. पुं. (अ.+फ़ा.) मृत्यु,-पत्रं-लेखः ।
वसीला, सं. पुं. (अ.) उपायः, साधनं, २. साहाय्यं ३. संबंधः ।
वसुंधरा, सं. स्त्री. (सं.) वसुधा-दा, पृथिवी, दे. ।
वसु, सं. पुं. (सं. न.) धनं २. रत्नं ३. सुवर्णं ४. जलम् । (सं. पुं.) गणदेवताविशेषः, अष्टवसवः (धरो ध्रुवश्च सोमश्च विष्णुश्चैवानिलोऽनलः । प्रत्यूपश्च-प्रभातश्च वसवोऽष्टौ क्रमात् स्मृताः) २. वकवृक्षः ३. रश्मिः । अष्ट इति संख्या ४. सूर्यः ५. विष्णुः ६. सज्जनः ।
वसुदेव, सं. पुं. (सं.) कृष्णपितृ, आनकदुंदुभिः ।
वसुधा, सं. स्त्री. (सं.) वसुदा, वसुमती, पृथिवी, दे. ।
वसूल, वि. (अ.) प्राप्त, लब्ध २. समाहृत ।
वसूली, सं. स्त्री. (अ. वसूल) प्राप्तिः (स्त्री.), अभिगमः २. समाहारः ।
वस्ति, सं. स्त्री. (सं. पुं. स्त्री.) नाभेरधोभागः, दे. 'पेड़ू' २. मूत्राशयः ३. रेचनयंत्रं, शृङ्गकः-कं, दे. 'पिचकारी' ।

—कर्म, सं. पुं. [सं.-मंन् (न.)] यंत्रेण मलमूत्रनिष्कासनम् ।

वस्तु, सं. स्त्री. (सं. न.) पदार्थः, द्रव्यं २. सत्यं ३. वृत्तांतः ४. नाटकीयाख्यानं, कथावस्तु(न.)।

वस्तुतः, अव्य. (सं.) यथार्थतः, तत्त्वतः, याथार्थ्येन, सत्यं, यथार्थम् ।

वस्त्र, सं. पुं. (सं. न.) नि-,वसनं, वासस् (न.), आच्छादनं चेलः-लं, अंशुकं, अंबरं, पटः, भिचयः, परिधानं, छादं, वासं, कर्पटः ।

वस्फ़, सं. पुं. (अ.) सद्-,गुणः, विशेषः, धर्मः २. स्तुतिः (स्त्री.) ।

वस्ल, सं. पुं. (सं.) संगमः, समागमः, मिलनम् ।

वह, सर्व. (सं. सः) तद् तथा अदस् के रूप । [उ. सः, असौ (पुं.), सा, असौ (स्त्री.), तद्, अदः (न.)] ।

वहन, सं. पुं. (सं. न.) प्रापणं, स्थानांतरे नयनं, २. धारणं, उत्थापनम् ।

वहम, सं. पुं. (अ.) भ्रमः, भ्रांतिः (स्त्री.) २. मिथ्या,-शंका-संदेहः ३. मिथ्याधारणा ४. व्याधिकल्पना, कुक्षिरोगः ।

वहमी, वि. (अ. वहम) संशयात्मन्, शंकाशील, आशंकिन् ।

वहशी, वि. (अ.) वन्य, आरण्य २. असभ्य, अशिष्ट ३. दुर्दांत, दुर्दमनीय ।

वहाँ, क्रि. वि. (हिं. वह) तत्र, तस्मिन् स्थाने ।

—से, क्रि. वि., ततः, तस्मात् स्थानात् ।

वहीं, क्रि. वि. (हिं. वहां+ही) तत्रैव, तस्मिन्नेव स्थाने ।

वही, सर्व. (हिं. वह+ही) स एव, असावेव (पुं.), सैव, असावेव (स्त्री.), तदेव, अद एव (न.) इ. ।

वह्नि, सं. पुं. (सं.) अनलः, अग्निः, दे. 'आग' ।

वांछनीय, वि. (सं.) स्पृहणीय, कमनीय, काम्य २. वांछित, दे. ।

वांछा, सं. स्त्री. (सं.) इच्छा, अभिलाषः, कामना ।

वांछित, वि. (सं.) अभिलषित, अभीष्ट ।

वा, अव्य. (सं.) अथवा । २. दे. 'वह' ।

वाइदा, सं. पुं., दे. 'वादा' ।

वाइस चान्सलर, सं. पुं. (अं.) विश्वविद्यालयस्य उपाध्यक्षः, कुलपतिः ।

वाइस-प्रेसिडेंट, सं. पुं. (अं.) उपसभापतिः, उपप्रधानः ।

वाइसराय, सं. पुं. (अं.) राजप्रतिनिधिः ।

वाक्, सं. पुं. [सं. वाच् (स्त्री.)] वाणी, वाक्यं २. सरस्वती, शारदा ३. वागिन्द्रियं, वाक्शक्तिः (स्त्री.) ।

—पटु, वि. (सं.) वाक्कुशल, वाग्मिन् ।

—पटुता, सं. स्त्री. (सं.) वाक्पाटवं, वाग्मिता, वाग्वैदग्ध्यम् ।

—पारुष्य, सं. पुं. (सं. न.) अप्रियवाक्योच्चारणं, कटुभाषणम् ।

—संयम, सं. पुं. (सं.) वाग्यमः, मितवाच् (स्त्री.) ।

वाक, सं. पुं (सं.) वाक्यं, वचनम्, उक्तिः (स्त्री.) । सं. स्त्री., वाणी, सरस्वती, शारदा ।

वाक़ई, क्रि. वि. (अ.) वस्तुतः, यथार्थतः । वि., यथार्थ, सत्य ।

वाक़ा, वि. (अ.) स्थित,-वर्ति,-स्थ ।

वाक़ि (के) आ, सं. पुं. (अ.) घटना, वृत्तं २. समाचारः ।

वाक़िफ़, वि. (अ.) परिचित, अभ्यस्त २. ज्ञातृ, बोद्धृ, अभिज्ञ ३. अनुभविन् ।

—कार, वि. (अ.+फ़ा.) कार्याभिज्ञ, कुशल, निष्णात ।

वाकफ़ियत, सं. स्त्री. (अ.) परिचयः, परिज्ञानं २. अनुभवः ।

वाक्य, सं. पुं. (सं. न.) पदसमूहः, योग्यताकांक्षासक्तियुक्तः पदोच्चयः २. कथनं, वचनं ३. सूत्रं ४. आभाणकः ।

वागा, सं. स्त्री. (सं.) वल्गा, दे. 'लगाम' ।

वागीश, सं. पुं. (सं.) बृहस्पतिः २. ब्रह्मन् (पुं.) ३. वाग्मिन्, कविः । वि. (सं.) सुवक्तृ, सुव्याख्यातृ ।

वागुरा, सं. स्त्री. (सं.) मृगबंधनार्थं जालभेदः ।

वागुरिक, सं. पुं. (सं.) व्याधः, शाकुनिकः ।

वाग्जाल, सं. पुं. (सं. न.) वागडंबरः, शब्दाडंबरः, वाक्प्रपंचः ।

वाग्दंड, सं. पुं. (सं.) निर्भर्त्सना, अधिक्षेपः ।

वाग्दत्ता, सं. स्त्री. (सं.) *नियतवरा, *वाचार्पिता (कन्या) ।

वाग्दान, सं. पुं. (सं. न.) कन्यादानप्रतिज्ञा ।

वाग्दुष्ट, वि. (सं.) कटुभाषिन् २. अभिशप्त ।

वाग्देवी, सं. स्त्री. (सं.) सरस्वती, दे. ।

वाग्मी, सं. पुं. (सं. वाग्मिन्) वाग्विदग्धः, वाक्पटुः, सुवक्तृ २. पंडितः, प्राज्ञः ३. बृहस्पतिः ।

वाग्विलास, सं. पुं. (सं.) सानन्दो वार्तालापः ।

वाङ्मय, वि. (सं.) वाक्यात्मक २. वाग्विहित (पापादि)। सं. पुं. (सं. न.) भाषा २. साहित्यम् ।

वाच्, सं. स्त्री. (सं.) वाणी २. वाक्यम् ।

वाच, सं. स्त्री. (अं.) *घटिका ।

वाचक, वि. (सं.) ज्ञापक, द्योतक, सूचक, बोधक २. पाठक, वाचयितृ ३. वक्तृ ।

—लुप्ता, सं. स्त्री. (सं.) उपमालंकारभेदः ।

वाचन, सं. पुं. (सं.) पठनं, अध्ययनं, उच्चारणं २. कथनं ३. प्रतिपादनम् ।

वाचस्पति, सं. पुं. (सं.) बृहस्पतिः, सुविद्वस् ।

वाचा, सं. स्त्री. (सं.) वाणी, गिरा २. वाक्यं, वचनम् ।

वाचाट-ल, वि. (सं.) बहुभाषिन्, मुखर, जल्प(ल्पा)क २. वाक्पटु ।

वाचाल(ट)ता, सं. स्त्री. (सं.) मुखरता, बहुभाषिता २. वाग्वैदग्ध्यम् ।

वाचिक, वि. (सं.) वाग्विषयक २. मौखिक ।

वाची, वि. (सं.-चिन्)-सूचक,-बोधक ।

वाच्य, वि. (सं.) वचनीय, कथनीय २. अभिधेय, अभिधावृत्त्या बोध्य (अर्थ.) ३. कुत्सित, हीन ।

वाच्यार्थ, सं. पुं. (सं.) अभिधेय-मूलशब्द,-अर्थः, शब्दार्थः ।

वाच्यावाच्य, वि. (सं.) भद्राभद्र (वाक्यादि)।

वाज़, सं. पुं. (अ.) उपदेशः, धार्मिक-व्याख्यानम् ।

वाजपेय, सं. पुं. (सं. पुं. न.) श्रौतयागभेदः ।

वाजपेयी, सं. पुं. (सं.-यिन्) हुतवाजपेयः २. ब्राह्मणोपाधिभेदः ३. सुकुलजः ।

वाजसनेय, सं. पुं. (सं.) यजुर्वेदस्य शाखा-विशेषः २. याज्ञवल्क्यः ।

वाजिब-बी, वि. (अ.) उचित, योग्य, युक्त ।

वाजी, सं. पुं. (सं.-जिन्) अश्वः, घोटकः २. आमिक्षामस्तु (न.), मोरटः (=फटे हुए दूध का पानी) ३. पक्षिन् ४. बाणः ५. वासकः ।

—कर, वि. (सं.) कामोद्दीपक (औषधादि) ।

—करण, सं. पुं. (सं. न.) वीर्यवृद्धिकरः प्रयोगः ।

वाट, सं. पुं. (सं.) मार्गः २. वास्तु ३. मंडपः ।

वाटर, सं. पुं. (अं.) जलं, वारि (न.) २. जलाशयः ३. मूत्रम् ४. हीराभा ।

—प्रूफ़, वि. (अं.) अक्लेद्य, जलाभेद्यम् ।

—फ़ाल, सं. पुं. (अं.) जलप्रपातः ।

—वर्क्स, सं. पुं. (अं.) *जलयंत्रं २. जलयंत्रालयः ।

वाटिका, सं. स्त्री. (सं.) क्षुद्र,-आरामः-उद्यानं, दे. 'बग़ीचा' ।

वाडवाग्नि, सं. स्त्री. (सं.) वाडवः, व(वा)ड-वानलः ।

वाण, सं. पुं. (सं.) बाणः, दे. ।

वाणिज्य, सं. पुं. (सं. न.) क्रयविक्रयः, निगमः, वणिक्कर्मन् (न.), व्यापारः ।

वाणी, सं. स्त्री. (सं.) दे. 'बाणी' ।

वात, सं. पुं. (सं.) पवनः, वायुः, दे. । २. देहस्थवायुः ३. रोगभेदः ।

—चक्र, सं. पुं. (सं.न.) चक्रवातः, वातावर्त्तः ।

—ज, वि. (सं.) वातप्रकोपज (रोगादि) ।

—जात, सं. पुं. (सं.) हनुमत्, मारुतिः ।

—तूल, सं. पुं. (सं. न.) वृद्धसूत्रकं, ग्रीष्म-हासम् ।

—ध्वज, सं. पुं. (सं.) वातरथः, मेघः ।

—पट, सं. पुं. (सं.) ध्वजः, पताका ।

—पुत्र, सं. पुं. (सं.) हनुमत् २. भीमः ३. महाधूर्त्तः ।

—प्रकोप, सं. पुं. (सं.) (शरीरे) वायुवृद्धिः (स्त्री.) ।

—रोग, सं. पुं. (सं.) वायु-वात,-व्याधिः, चलातंकः, अनिलामयः, दे. 'गठिया' ।

—वैरी, सं. पुं. (सं.-रिन्) वाताढः, दे. ।

वाताद, सं. पुं. (सं.) नेत्रोपमफलः, वाताम्रः, वातवैरिन् । (फल) वाताम्रं, वादामम् (दे. बादाम)।

वातायन, सं. पुं. (सं. न.) क्षुद्रखडक्किका २. दे. 'रोशनदान' ।

वातुल, सं. पुं. (सं.) उन्मत्तः, दे. 'बावला' ।

वात्सल्य, सं. पुं. (सं.) रसविशेषः (काव्य.)। (सं. न.) पित्रोः अपत्यस्नेहः, वत्सलता ।

वात्स्यायन, सं. पुं. (सं.) न्यायसूत्रभाष्य-कारः २. कामसूत्रप्रणेतृ, पक्षिलः, मंदनागः ।

वाद, सं. पुं. (सं.) वादानुवादः, वादप्रतिवादः, ऊहापोहः, *शास्त्रार्थः, दे. । २. सिद्धांतः, राद्धांतः ३. कलहः, विवादः ।
—विवाद, सं. पुं. (सं.) दे. 'वाद' (१) ।
वादक, सं. पुं. (सं.) वाद्यवादयितृ २. वक्तृ ३. वादिन्, तार्किक ।
वादन, सं. पुं. (सं. न.) वाद्य-वादित्र,-ध्वननं २. वाद्यं, दे. ।
वादरायण, सं. पुं. (सं.) महर्षिः वेदव्यासः ।
वादा, सं. पुं. (अ. वाइदा) नियतसमयः २. प्रतिज्ञा, वचनं, संगरः ।
वादानुवाद, सं. पुं. (सं.) दे. 'वाद' (१) ।
वादी, स. पुं. (सं.–दिन्) अभियोक्तृ, अभियोगिन्, अर्थिन्, शिरोवर्तिन्, दे. 'मुद्दई' २. प्रस्तावकः, प्रणेतृ ३. वक्तृ ।
—प्रतिवादी, सं. पुं. (सं. वादिप्रतिवादिनौ) अर्थिप्रत्यर्थिनौ २. पक्षिप्रतिपक्षिणौ (सब द्वि.) ।
वाद्य, सं. पुं. (सं.) वादित्रं, आतोद्यम् ।
वानप्रस्थ, सं. पुं. (सं.) तृतीयाश्रमिन्, वैखानसः, आरण्यकः, तापसः २. तृतीयाश्रमः ३-४. मधूक-पलाश,-वृक्षः ।
वानर, सं. पुं. (सं.) कपिः, मर्कटः, दे. 'बंदर' ।
वानरी, सं. स्त्री. (सं.) मर्कटी, वलीमुखी ।
वापस, वि. (फ़ा.) वि-प्रत्या-प्रतिनि,-वृत्त, प्रति,-गत-आगत-यात-आयात ।
—आना, क्रि. अ., प्रत्यागम्, प्रत्यावृत् (भ्वा. आ. से.) ।
—करना, क्रि. स., प्रतिगम्, प्रतिनिवृत् (प्रे.) २. प्रतिदा (जु. उ. अ.), प्रति-ऋ (प्रे. प्रत्यर्पयति) ।
—जाना, क्रि. अ., प्रति,-गम्-निवृत् ।
—लेना, क्रि. स., प्रत्यादा, पुनः स्वीकृ ।
—होना, क्रि. अ., दे. 'वापस जाना' २. प्रतिदा-आदा (कर्म.) ।
वापसी, वि. (फ़ा. वापस) प्रत्या-प्रतिनि,-वृत्त । सं. स्त्री., प्रति,-गमनं-आगमनं-आवृत्तिः (स्त्री.) २. प्रति,-दानं-अर्पणं-आदानम् ।
वापी, सं. स्त्री. (सं.); वापिः (स्त्री.) दीर्घिका, वापिका ।
वाबस्ता, वि. (फ़ा.) बद्ध, संयत, २. लग्न, श्लिष्ट ३. संबद्ध, संग्रथित ।
वाम, वि. (सं.) सव्य, दक्षिणेतर, दे. 'बायाँ' २. प्रतिकूल, विरुद्ध, प्रतीप ३. कुटिल ४. दुष्ट, नीच ५. अभद्र, अमंगल ।
—देव, सं. पुं. (सं.) शिवः ।
—मार्ग, सं. पुं. (सं.) वामाचारः, वेदविरुद्ध-संप्रदायविशेषः ।
—मार्गी, सं. पुं. (सं.-र्गिन्) वामाचारिन्, वेदविरोधिन् ।
—लोचन, सं. स्त्री. (सं.) वामाक्षी, सुंदरी, शोभना ।
वामन, वि. (सं.) खर्व, ह्रस्व, लघुकाय । सं. पु. (सं.) खट्टनः, खट्टेरकः, खर्वः, ह्रस्वः २. विष्णुः ३. शिवः ४. पुराणग्रंथविशेषः ।
—अवतार, सं. पुं. (सं. वामनावतारः) अदितिगर्भजो विष्णोः पंचमावतारः ।
वामनी, सं. स्त्री. (सं.) खर्वा, खट्टनी ।
वामा, सं. स्त्री. (सं.) नारी, रामा, २. दुर्गा, गौरी ३. लक्ष्मीः, सरस्वती ४. स्कन्दानुचरी ।
वामी, सं. स्त्री. (सं.) बडवा, २. रासभी ३. शृगाली ।
वायव्य, वि. (सं.) १-३. वायु,-संबंधिन्-देवताक-निर्मित, वायवीय ।
—कोण, सं. पुं. (सं.) पश्चिमोत्तर,-कोणः-दिशा, वायवी ।
वायस, सं. पुं. (सं.) काकः, ध्वांक्षः ।
—वायु, सं. स्त्री. (सं. पुं.) वातः, पवनः, अनिलः, गंधव(वा)हः, समीरः-रणः, मरुत्, मा(म)रुतः, श्वसनः, मातरिश्वन्, सदागतिः, जगत्प्राणः, नभस्वत्, पवमानः, प्रभंजनः, धूलिध्वजः, फणिप्रियः ।
—कोण, सं. पुं. (सं.) पश्चिमोत्तरदिशा, वायवी ।
—गुल्म, सं. पुं. (सं.) वातचक्रं, चक्रवातः, वात्या २. जल,-गुल्मः-आवर्तः ३. वातगुल्मः, उदरव्याधिभेदः ।
—पुत्र, सं. पुं. (सं.) पवन,-सुतः-पुत्रः, हनुमत् ।
—भक्षण, सं. पुं. (सं.) वायु,-भक्षः-भुज्, यतिभेदः २. पवनाशनः, सर्पः ।
—मंडल, सं. पुं. (सं. न.) अंतरि(री)क्षं, गगनं २. वातावरणम् ।
वारंट, सं. पुं. (अं.) अधिकारपत्रम् ।
—गिरफ्तारी, सं. स्त्री. (अं.+फ़ा.) *आसेधाधिकारपत्रम् ।

—तलाशी, सं. पुं. (अं.+फ़ा.) *अन्वेषणाधिकारपत्रम् ।
—रिहाई, सं. पुं. (अं.+फ़ा.) (कारागारादिभ्यः) मोचनाधिकारपत्रम् ।
वारंवार, क्रि. वि., दे. 'बारंबार' ।
वार, सं. पुं. (सं.) पर्यायः, क्रमः २. अवसरः, समयः ३. सप्ताह,-दिनं-दिवसः, वासरः, ४. द्वारं ५. आघातः, प्रहारः, आक्रमणं ६. आवरणं ७. समूहः ८. पारः-रम् ।
—करना, क्रि. स., अभिद्रु (भ्वा. प. अ.), अवस्कंद् (भ्वा. प. अ.), आक्रम् (भ्वा. प. से., भ्वा. आ. अ.) ।
—ख़ाली जाना, मु., लक्ष्यं न व्यध् (कर्म.), अस्त्रं अपलक्ष्यं पत् (भ्वा. प. से.) २. युक्तिः निष्फलीभू ।
वारक, वि. (सं.) निषेधक, प्रतिबंधक ।
वारण, सं. पुं. (सं. न.) नि-प्रति,-षेधः, २. विघ्नः, अंतरायः । (सं. पुं.) गजः, वाणवारः, कवचः-चम् ।
वारदात, सं. स्त्री. (अ.) दुर्घटना २. विप्लवः, संक्षोभः ।
वारना, क्रि. स. (सं. वारणं>) अनिष्टवारणाय उत्सृज् (तु. प. अ.)-त्यज् (भ्वा. प. अ.) । सं. पुं., शांतिकरः उत्सर्गः, कष्टवारकं दानम् ।
वारनारी, सं. स्त्री. (सं.) वारमुखी, वारांगना, वेश्या, वारविलासिनी ।
वारपार, सं. पुं. [सं. अवारपारौ-रे (पुं. न.)] (नद्यादीनां) तटद्वयं २. अंतः, सीमा । क्रि. वि., अवारात् पारं यावत् २. निकटपार्श्वात् परपार्श्वपर्यंतम् ।
वारांगना, सं. स्त्री. (सं.) वारनारी, दे. ।
वारा, सं. पुं. (सं. वारणं>) मितव्ययः २. लाभः ।
वाराणसी, सं. स्त्री. (सं.) काशी-शिका, शिवपुरी, तपःस्थली, व(वा)रणसी ।
वारान्यारा, सं. पुं. (हिं. वार+न्यारा) निर्णयः, निश्चयः, निर्धारणं २. समाधानं, संधिः, शमः-मनम् ।
वारापार, सं. पुं. तथा क्रि. वि., दे. 'वारपार' ।
वाराह, सं. पुं. (सं.) वराहः, दे. ।
वारि, सं. पुं. (सं. न.) पानीयं, जलं, दे. ।
—चर, सं. पुं. (सं.) जलजन्तुः २. मत्स्यः ।
—ज, सं. पुं. (सं. न.) कमलं,वारि-जातं-रुहम् ।
—द, सं. पुं. (सं.) वारि,-धरः-वाहः, मेघः ।
—धि, सं. पुं. (सं.) वारिनिधिः, सागरः ।
—यंत्र, सं. पुं. (सं. न.) जलयंत्रं, दे. 'फव्वारा' ।
वारित, वि. (सं.) नि-अव,-रुद्ध, निवारित २. निषिद्ध, प्रतिषिद्ध, प्रत्यादिष्ट ३. आच्छादित, आवृत ।
वारिद[1], सं. पुं. (सं.) मेघः, जलदः ।
वारिद[2], वि. (अ.) आगत, आयात २. प्रकट, आविर्भूत ।
वारिस, सं. पुं. (अ.) अंश,-हरः-हारिन्-भाज्, दायादः, दायिकः २. उत्तराधिकारिन् ।
—होना, क्रि. अ., पैतृकसंपदाधिकारी जन् (दि. आ. से.), दायादो भू ।
वारींद्र, सं. पुं. (सं.) वारीशः, सागरः ।
वारुणी, सं. स्त्री. (सं.) मदिरा, मद्यं, सुरा २. पश्चिमदिशा ३. वरुणानी ।
वार्ड, सं. पुं. (अं.) रक्षणं, गोपनं २. पुर-विभागः ३. कारागारादीनां विभागः ।
वार्डर, सं. पुं. (अं.) रक्षकः २. कारारक्षकः ।
वार्त्ता, सं. स्त्री. (सं.) विषयः, प्रसंगः २.किंवदंती, जनश्रुतिः (स्त्री.) ३. समाचारः, वृत्तं ४. वार्त्तालापः, दे. ।
वार्त्तालाप, सं. पुं. (सं.) संलापः, संवादः, संभाषणं, आलापः ।
—करना, क्रि. अ., संलप्-संवद् (भ्वा. प. से.), संभाष् (भ्वा. आ. से.) ।
वार्त्तिक, सं. पुं. (सं. न.) उक्तानुक्तदुरुक्तार्थप्रकाशको ग्रंथः;-टीका । (सं.पुं.) चरः २. दूतः ।
वार्द्धक्य, सं. पुं. (सं. न.) वार्द्धकं, वृद्धत्वं, वृद्धावस्था, स्थविरम् ।
वार्षिक, वि. (सं.) आब्दिक, वात्सरिक, सांवत्सरिक २. प्रावृषेण्य ।
वालंटेयर, सं. पुं. (अं.) स्वयंसेवकः, स्वेच्छासेवकः ।
वाल(लि)दैन, सं. पुं. (अ.) पितरौ, मातापितरौ (दोनों द्वि.) ।
वालिद, सं. पुं. (अ.) पितृ, जनकः ।
वालिदा, सं. स्त्री. (अ.) मातृ (स्त्री.), जननी ।
वाल्मीकि, सं. पुं. (सं.) रामायणप्रणेतृमुनिविशेषः, व(वा)ल्मीकः, प्राचेतसः, आद्यकविः, कविज्येष्ठः ।
वावदूक, सं. पुं. (सं.) वाग्मिन् २. वाचालः ।

वावैला, सं. पुं. (अ.) विलापः २. कोलाहलः ।
वाष्प, सं. पुं. (सं.) उष्मन्, दे. 'भाप' २. अश्रु (न.) ।
वासंती, सं. स्त्री. (सं.) माधवी, प्रहसंती, वसंतजा २. यूथी ।
वास, सं. पुं. (सं.) अव,-स्थानं-स्थितिः (स्त्री.) नि-,वस्तिः (स्त्री.) २. गृहं, भवनं ३. सु-,गंधः ४. दुर्-,गंधः ।
वासक, सं. पुं. (सं.) अटरूषः, वैद्य-भिषड्,-मातृ (स्त्री.), वासा-सकः ।
वासकेट, सं. स्त्री. (अं. वेस्टकोट) वासकटिः ।
वासना, सं. स्त्री. (सं.) कामना, अभिलाषः, वांछा २. संस्कारः, भावना, स्मृतिहेतुः ३. ज्ञानं ४. प्रत्याशा ५. देहात्मबुद्धिजन्यो मिथ्यासंस्कारः (न्याय.) ।
वासर, सं. स्त्री. (सं. पुं. न.) दिवसः, दिनम् ।
वासव, सं. पुं. (सं.) इन्द्रः, दे. ।
वासित, वि. (सं.) भावित, सुरभीकृत २. वस्त्रवेष्टित ३. पर्युषित ।
वासी, सं. पुं. (सं-सिन्) निवासिन्, वास्तव्य ।
वासुदेव, सं. पुं. (सं.) श्रीकृष्णः ।
वास्तव, वि. (सं.) सत्य, यथार्थ, अवितथ ।
—में क्रि. वि., वस्तुतः, सत्यम् ।
वास्तविक, वि. (सं.) तथ्य, सत्य, तात्त्विक, दे. 'वास्तव' ।
वास्ता, सं. पुं. (अं.) संबंधः, संपर्कः ।
—पड़ना, मु., व्यवहारावसरः जन् (दि. आ. से.) ।
वास्तु, सं. पुं. (सं. पुं. न.) वेश्मभूः, गृहपोतकः २. गृहं, सौधः ।
—विद्या, सं. स्त्री. (सं.) भवननिर्माणकला, स्थापत्यम् ।
वास्ते, अव्य. (अ.)—अर्थं,—निमित्तम्, चतुर्थी विभक्ति से भी (उ., तेरे वास्ते = त्वदर्थं, तुभ्यम् ।
वाह[1], अव्य. (फ़ा.) साधु, वरं, भद्रं, शोभनं २. अद्भुतं, आश्चर्यं ३. धिक् ४. हंत ।
वाह[2], अव्य., साधु-साधु इ. ।
—करना, क्रि. स., अभि-प्रति,-नंद् (भ्वा. प. से.), साधु-वादान् दा २. करतलध्वनिं कृ. ।
—होना, मु., अभि-प्रति-नंद् (कर्म.) ।

वाहक, सं. पुं. (सं.) भारवाहः, भारिकः २. सारथिः, यंतृ ।
वाहन, सं. पुं. (सं. न.) यानं, युग्यं, दे. 'सवारी' ।
वाहवाही, सं. स्त्री. (फ़ा.) ख्यातिः-विश्रुतिः (स्त्री.), साधुवादः, प्रशंसा ।
—लेना या लूटना, मु., यशः वितन् (त. उ. से.), साधुवादान् लभ् (भ्वा. आ. अ.), प्रशंसापात्रं भू ।
वाहिद, वि. (अ.) एक, एकाकिन्, एकल, अद्वितीय ।
वाहिनी, सं. स्त्री. (सं.) सेना २. नदी ३. सैन्यभेदः (=८१ हस्ती, ८१ रथ, २४३ घोड़े, ४०५ पैदल) ।
—पति, सं. पुं. (सं.) सेनापतिः ।
वाहियात, वि. (अ. वाही+फ़ा. यात) व्यर्थ, निरर्थक २. दुष्ट, खल ।
वाहीतबाही, वि. (अ.+फ़ा.) निरर्थक, निष्प्रयोजन २. असंगत, असंबद्ध । सं. स्त्री., प्र-, जल्पः-पनं २. गालिः (स्त्री.), अपभाषणम् ।
वाह्य, वि. (सं.) वोढव्य २. वोढृ ।
विंदु, सं. पुं., दे. 'बिंदु' ।
विंध्याचल, सं. पुं. (सं.) विंध्यः, पर्वतविशेषः ।
वि, उप. (सं.) वैशिष्ट्यनिषेधादिबोधकः उपसर्गः (व्या.) ।
विकच, वि. (सं.) विकसित, उत्फुल्ल २. केशहीन ।
विकट, वि. (सं.) कठिन, दुस्साध्य, दुष्कर २. भीम, भीषण, भयप्रद ३. विशाल, विस्तीर्ण ४. दुर्गम ५. वक्र, कुटिल ।
विकराल, वि. (सं.) दे. 'विकट' (२) ।
विकल, वि. (सं.) विह्वल, उद्विग्न, वि-,आकुल, अशांत २. खंडित, अपूर्ण ।
विकलांग, वि. (सं.) अ-,पोगंड, अंगहीन, विकल-न्यून,-अङ्ग-इंद्रिय ।
विकला, सं. स्त्री. (सं. न.) कलायाः षष्टितमो भागः ।
विकल्प, सं. पुं. (सं.) भ्रमः, भ्रांतिः (स्त्री.) २. संदेहः, संशयः ३. विभाषा (व्या.) ४. विरुद्ध-विपरीत,-विचारः-कल्पना ५. चित्तवृत्तिभेदः (योग.) ६. अर्थालंकारभेदः (सा.) ७. अवांतरकल्पः ८. ऐच्छिकविषयः ।

विकसित, वि. (सं.) विकच, स्फुट-टित, स्मित, उज्जृंभ-म्भित, उन्निद्र, उन्मीलित, प्र-उत्-सं-, फुल्ल, भिन्न, उद्‌बुद्ध ।

विकस्वर, वि. (सं.) विकासशील, विकश्वर, विकासिन् ।

विकाम, वि. (सं.) निष्काम, निःस्पृह, विकांक्ष ।

विकार, सं. पुं. (सं.) परिणामः, विक्रिया, विकृतिः (स्त्री.), विकृत्या २. रोगः, आमयः ३. दोषः, अवगुणः ४. मनो,-वृत्तिः-(स्त्री.) -वेगः ५. उपद्रवः, हानिः (स्त्री.) ।

विकारी, वि. (सं.-रिन्) विकारवत्, परिणामिन् २. विकृत, परिवर्तित ३. कुवासनान्वित ।

विकाल, सं. पुं. (सं.) अतिकालः, विलंबः २, सायः-यं, दिनांतः ।

विकाश, सं. पुं. (सं.) क्रमशो वृद्धिः (स्त्री.), (२-४) दे. 'विकास' (१-३) ।

विकास, सं. पुं. (सं.) क्रमशो वृद्धिः (स्त्री.), क्रमिकोन्नतिः (स्त्री.) २. प्रसारः, विस्तारः ३. विकसनं, प्रस्फुटनम् ।

—का सिद्धांत, सं. पुं. विकासवादः ।

विकीर्ण, वि. (सं.) विक्षिप्त, व्यस्त, प्रसृत, विश्लिष्ट २. विख्यात ।

विकृत, वि. (सं.) परिणत, परिवर्तित, विकारान्वित, विकृतिमत् २. कुरूप, विरूप ३. अपूर्ण, विकल ४. रुग्ण ५. कृतक, कृत्रिम ।

विकृति, सं. स्त्री, (सं.) (१-३) दे. 'विकार' (१-३) । ४. परि,-वर्तनं-वृत्तिः (स्त्री.) ५. मनोविक्षोभः ६. धातुप्रत्ययजं शब्दरूपं (व्या.) ७. माया ८. वैरूप्यं, कुरूपता ।

विक्टोरिया, सं. स्त्री. (अं.) सम्राज्ञीविशेषः २. घोटकशकटीभेदः ३. उपग्रहविशेषः ।

विक्रम, सं. पुं. (सं.) शौर्यं, पराक्रमः, वीर्यं, साहसं, पौरुषं २. विक्रमादित्यः, दे. ।

विक्रमादित्य, सं. पुं. (सं.) साहसांकः, शकारिः, विक्रमसंवत्प्रवर्तक उज्जयिन्या नृपविशेषः ।

—संवत्, सं. पुं. (सं. अव्य.) विक्रमाब्दः ।

विक्रमी, सं. पुं. (सं.-मिन्) पराक्रमिन्, वीरः, शूरः २. सिंहः ३. विष्णुः ।

विक्रय, सं. पुं. (सं.) विक्रयणं, विपणः-णनम् ।

विक्रांत, सं. पुं. (सं.) दे. 'विक्रमी' (१-२) ।

विक्रीत, वि. (सं.) विपणायित, मूल्येन दत्त, कृतविक्रय ।

विक्रेता, सं. पुं. (सं.-तृ) विक्रयिन्, विक्रयिकः, विक्रायकः, विपणितृ ।

विक्रेय, वि. (सं.) पण्य, पणितव्य, विक्रेतव्य ।

विक्लव, वि. (सं.) भीत, त्रस्त २. भीरु, कातर, त्रस्नु ३. रुग्ण, रोगार्त्त ४. विक्षुब्ध, विह्वल ५. संतप्त, दुःखित ६. विरक्त, उदासीन ।

विक्लांत, वि. (सं.) श्रान्त, श्रमार्त्त, ग्लान, क्लान्त २. उत्साह,-हीन-रहित, निर्-हत,-उत्साह ।

विक्षत, वि. (सं.) विशेषेण,-व्रणित-विद्ध-भिन्नदेह ।

विक्षिप्त, वि. (सं.) दे. 'विकीर्ण' (१) २. त्यक्त, उज्झित ३. उन्मत्त, वातुल ।

विक्षेप, सं. पुं. (सं.) (इतस्ततः) विक्षेपणं, प्रासनं, निपातनं, प्रेरणं २. चित्तचांचल्यं, संयमाभावः २. विघ्नः, अंतरायः ।

विक्षोभ, सं. पुं. (सं.) मनोलौल्यं, चित्तचांचल्यं, उद्वेगः, क्षोभः ।

विख्यात, वि. (सं.) प्रसिद्ध, दे. ।

विख्याति, सं. स्त्री. (सं.) प्रसिद्धिः (स्त्री.), दे. ।

विगत, वि. (सं.) वि-,अतीत, वीत, गत २. उपांत्य, उपांत ३. निष्प्रभ ४. विरहित, विहीन ।

विगलित, वि. (सं.) शिथिल, श्लथ, स्रस्त २. अव-अधः-,पतित ३. विकृत ४. प्रस्नुत, स्यन्न ।

विगुण, वि. (सं.) निर्गुण, गुणहीन ।

विग्रह, सं. पुं. (सं.) युद्धं, संग्रामः २. कलहः, कलिः ३. शरीरं, कायः ४. विभागः ५. विश्लेषणं, पृथक्करणं ६. व्यासः, विस्तरः, समासांगविश्लेषणं (व्या.) ७. आकारः, आकृतिः (स्त्री.) ।

विघटन, सं. पुं. (सं. न.) विश्लेषः-षणं, पृथक्,-करणं-क्रिया, विच्छेदः, विभेदः २. त्रोटनं ३. वि-,ध्वंसः-सनम् ।

विघटित, वि. (सं.) विश्लेषित, विश्लिष्ट २. त्रुटित, त्रोटित ३. नष्ट, नाशित ।

विघट्टन, सं. पुं. (सं. न.) उद्घाटनं, अपावरणं २. प्रसह्य अवपातनं ३. घर्षणं (४-६) दे. 'विघटन' (१-३) ।

विघात, सं. पुं. (सं.) विघ्नः २. आघातः, प्रहारः ३. खंडनं, शकलीकरणं ४. नाशः ५. वैफल्यम् ।

विघ्न, सं. पुं. (सं.) व्याघातः, अंतरायः,प्रत्यूहः, प्रतिबंधः, बाधः-धा, रोधः, प्रति-वि,-ष्टम्भः।

—कारी, वि. (सं.-रिन्) बाधाजनकः विघ्न,-कर-कर्तृ, विघातिन्।

—नाशक, सं. पुं. (सं.) विघ्न,-विनायकः-पतिः-राजः-नायकः, गणेशः।

विचक्षण, वि. (सं.) विद्वस्, बुद्धिमत् २. कुशल, दक्ष, निपुण।

विचरण, सं. पुं. (सं.) चलनं, गमनं, २. भ्रमणं, पर्यटनं, विहरणम्।

विचल, वि. (सं.) कंपमान, कंप्र २. चञ्चल, चल।

विचलता, सं. स्त्री. (सं.) अस्थैर्यं, चाञ्चल्यं २. वि-,आकुलता।

विचलित, वि. (सं.) पतित, स्खलित २. लोल, अधीर, चञ्चल।

विचार, सं. पुं. (सं.) मतिः (स्त्री.), कल्पना, भावना, संकल्पः, तर्कः, मतं, अभिप्रायः २. चिंतनं, ध्यानं, आलोचनं, विचारणं-णा, तत्त्व-निर्णयः, वितर्कः-र्कणं, मनसा कल्पनं, विवेचनं ३. व्यवहारदर्शनं, विचारकरणम्।

—शील, वि. (सं.) विचारवत्, विवेकिन् समीक्ष्य-विमृश्य,-कारिन्।

—शीलता, सं. स्त्री. (सं.) विवेकिता, बुद्धिमत्ता।

विचारक, सं. पुं. (सं.) विचार-धर्म-न्याय,-अध्यक्षः, आधिकरणिकः २. विवेकिन्, गुण-दोषज्ञः, विवेचकः, आलोचकः।

विचारणीय, वि. (सं.) विचार्य, चिंतनीय, विचारार्ह, ध्येय २. संदिग्ध।

विचारना, क्रि. अ. (सं. विचारणं) विचर्—सभू (प्रे.), चिंत्-तर्क् (चु.) ध्यै (भ्वा. प. अ.), विमृश् (तु. प. अ.), आ-पर्या,-लोच् (चु.)।

विचारित, वि. (सं.) ध्यात, चिंतित, तर्कित, पर्यालोचित, विमृष्ट २. निर्णीत, निश्चित।

विचार्य, वि. (सं.) दे. 'विचारणीय'।

विचिकित्सा, सं. स्त्री. (सं.) संशयः, संदेहः।

विचित्र, वि. (सं.) कर्बुर-रित, कल्माष-षित, शार, शबल २. विशिष्ट, विलक्षण, असाधारण ३. अद्भुत, आश्चर्य, विस्मापक ४. सुन्दर।

—वीर्य, सं. पुं. (सं.) चन्द्रवंशीयो नृपविशेषः।

—शाला, सं. स्त्री. (सं.) अद्भुतालयः।

विच्छिन्न, वि. (सं.) निकृत्त, विलून, विवृक्ण २. वियुक्त, विश्लिष्ट, पृथक्-स्थित ३. समाप्त, अवसित।

विच्छेद, सं. पुं. (सं.) लवनं, लावः, कर्तनं, विच्छेदनं २. विश्लेषः-षणं, वियोजनं ३. क्रम,-भंगः-भञ्जनं ४. विरहः, वियोगः।

विछोह, सं. पुं. (सं. विक्षोभः>) वियोगः, विरहः।

विजन, वि. (सं.) निर्जन, विविक्त, निःशलाक, एकांत।

विजय, सं. पुं. (सं.) जयः, जयनं, वशी-स्वायत्ती-करणम्।

—दशमी, सं. स्त्री. (सं.) दे. 'दशहरा'।

—पताका, सं.स्त्री. (सं.) जयकेतुः २. जयचिह्न।

—शील, वि. (सं.)विजयिन्, सदाजयिन्, जिष्णु।

—श्री, सं. स्त्री. (सं.) जयलक्ष्मीः (स्त्री.)।

विजया, सं. स्त्री. (सं.) भंगा, हर्षिणी, दे. 'भांग' २. उमासखी ३. दुर्गा।

—दशमी, सं. स्त्री. (सं.) आश्विनशुक्लदशमी, आर्याणां पर्वविशेषः, विजयोत्सवः।

विजयी, वि. (सं.-यिन्) वि-, जेतृ, जयिन्,-जित, जिष्णु (विजयिनी स्त्री.)।

विजयोत्सव, सं. पुं. (सं.) विजयदशमी-विजयादशमी,-उत्सवः-पर्वन् (न.)-क्षणः। २. जय,-उत्सवः-क्षणः-उद्धर्षः।

विजर, वि. (सं.) अजर, निर्जर, वार्द्धक्य-रहित २. नूतन, नवीन।

विजल, वि. (सं.) अजल, निर्जल, जल-वारि,-रहित।

विजातीय, वि. (सं.) भिन्न-असमान,-जाति-वर्ण २. साम्यरहित, असम।

विजिगीषा, सं. स्त्री. (सं.) विजयकामना २. उत्कर्षः।

विजिगीषु, वि. (सं.) जयाभिलाषिन्।

विज़िट, सं. स्त्री. (अं.) अभिगमः, अभ्यागमः, दर्शनार्थं गमनं,-दर्शनयात्रा।

विज़िटर, सं. पुं. (अं.) दर्शकः, प्रेक्षकः २. अभ्यागतः, गृहागतः।

विज़िटिंग कार्ड, सं. पुं. (अं.) *दर्शकपत्रम्।

विजित, वि. (सं.) पराजित, अभि-परा,-भूत, वशी-स्वायत्ती,-कृत।

विजेता, सं. पुं. (सं.-तृ) दे. 'विजयी'।

विज्ञ, वि. (सं.) प्रवीण, कुशल, विशेषज्ञ २. धीमत्, बुद्धिमत् ३. कोविद, पंडित ।

विज्ञता, सं. स्त्री. (सं.) प्रवीणता २. बुद्धिमत्ता ३. विद्वत्ता ।

विज्ञप्ति, सं. स्त्री. (सं.) सूचनं, ख्यापनम् ।

विज्ञात, वि. (सं.) अवगत, अवबुद्ध २. प्रसिद्ध ।

विज्ञान, सं. पुं. (सं. न.) ज्ञानं, बोधः, अवगमः, उपलब्धिः (स्त्री.) २. विषयविशेषस्य विशिष्ट-ज्ञानं ३. अध्यात्म,-विद्या-ज्ञानं ४. कर्मन् (न.) ५. आत्मानुभवः ।

—मयकोष, स. पुं. (सं.) ज्ञानेन्द्रियसहिता बुद्धिः (स्त्री.) ।

विज्ञापन, सं. पुं. (सं. न.) बोधनं, सूचनं, घोषणं, ख्यापनं, विज्ञप्तिः (स्त्री.), विज्ञापना २. विज्ञापनपत्रम् ।

विट, सं. पुं. (सं.) कामुकः, लंपटः २. धूर्त्तः ३. नायकभेदः (सा.) ३. कामुकानुचरः ।

विटप, सं. पुं. (सं. पुं. न.) शाखा, शाखा-पल्लवसमुदायः २. क्षुपः, गुल्मः-मं ३. वृक्षः ।

विटपी, सं. पुं. (सं-पिन्) वृक्षः, पादपः ।

विटामिन, सं. पुं. (अं.) खाद्यौजम् ।

विडंबना, सं. स्त्री. (सं.) अनु,-करणं-कारः-कृतिः (स्त्री.) २. अव-उप,-हासः, अवहेलना २. निर्भर्त्सनं-ना ।

—करना, क्रि. स., अव-उप,-हस् (भ्वा. प. से.) २. सोपहासं अनुकृ, विडंब् (चु.) सावहासं अवमन् (दि. आ. अ.) ।

—नशीन, सं. पुं. (अ.+फ़ा.) दे. 'सदर'(४) ।
—बाजार, सं. पुं. (अ.+फ़ा.) प्रधानापणः २. सैन्यापणः ।
—बोर्ड, सं. पुं. (अ.+अं.) *राजस्वपरिषद् ।
—मुकाम, सं. पुं. (अ.) मुख्यकार्यालयः ।
सदरी, सं. स्त्री. (अ.) दे. 'वास्कट' ।
सदस्य, सं. पुं. (सं.) दे. 'सभासद्' ।
सदा, अव्य. (सं.) नित्यं, सर्वदा, अनिशं, सततं, सर्वकालं २. निरन्तरं, अनवच्छिन्नं, अविरतम् ।
—गति, सं. पुं. (सं.) वायुः ।
—बहार, वि. (सं.+फ़ा.) *सदावसंत, नित्य-हरित, शश्वत्पत्र ।
—वर्त, सं.पुं.(सं.-व्रतं>) नैत्यिकभोजन, दानं-वितरणं-उत्सर्गः, *सदाव्रतं २. नैत्यिकदानम् ।
—सुखी, वि. (सं.-खिन्) सर्वदानंद ।
—सुहागिन, वि. स्त्री. (सं+हिं.) नित्य-सौभाग्यवती, अमरपतिका २. वेश्या ।
सदाचार, सं. पुं. (सं.) सच्चर्या, सदाचरणं, सच्चारित्र्यं, सद्वृत्तं-त्तिः (स्त्री.), सच्चरितं, सद्-

व्यवहारः २. शिष्टता, सौजन्यं, भद्रता ३. रीतिः (स्त्री.), प्रथा ।
सदाचारी, सं. पुं. (सं.-रिन्) सद्वृत्त, सुचरित-सच्चरित्र २. धर्मात्मन्, पुण्यात्मन् [सदाचारिणी-सद्वृत्ता आदि (स्त्री.)] ।
सदानन्द, वि. (सं.) आनन्दशील, नित्यानंद । सं. पुं. (सं.) परमेश्वरः ।
सदार, वि. (सं.) सपत्नीक, जायान्वित ।
सदारत, सं. स्त्री. (अ.) सभा,-पतित्वं-अध्यक्षता ।
सदाश्रित, वि. (सं.) परावलंबशील, परावलंविन् ।
सदी, सं. स्त्री. (अ.) शताब्दी, शती २. शतम् ।
सदुपदेश, सं. पुं. (सं.) सच्छिक्षा २. सन्मंत्रणा ।
सदृश, वि. (सं.) सरूप, तुल्याकार २. सम, समान, तुल्य, सदृक्ष ३. योग्य, उचित ।
सदृशता, सं. स्त्री. (सं.) समानता, तुल्यता ।
सदेह, क्रि. वि. (सं. न.) सशरीरं, सकायम् ।
सदैव, अव्य. (सं.) सर्वदैव, नित्यमेव ।
सदोष, वि. (सं.) सापराध, अपराधिन्, दोषिन्, त्रुटि-दोष,-युक्त ।
सद्गति, सं. स्त्री. (सं.) मोक्षः, मुक्तिः (स्त्री.) २. सुदशा, सुगतिः (स्त्री.) ३. सदाचारः ।
सद्गुण, सं. पुं. (सं.) सु-,गुणः, सल्लक्षणम् ।
सद्भाव, सं. पुं. (सं.) हित-शुभ,-चिंता, हितैषणा-षिता २. सख्यं ३. निष्कपटता, सरलता, ऋजुता ४. सत्ता, अस्तित्वम् ।
सधना, क्रि. अ. (हिं. साधना) विनी (कर्म.), वशीभू, दम् (दि. प. से.) २. अभ्यस्त (वि.) भू ।
सधर्मिणी, सं. स्त्री. (सं.) धर्मपत्नी २. तुल्यमतावलंबिनी ।
सधर्मी, वि. (सं.-र्मिन्) सधर्मन्, सधर्म, समानधर्मानुयायिन् २. तुल्यगुण ।
सधवा, सं. स्त्री. (सं.) सिन्दूरतिलका, सभर्तृका, सनाथा, पतिवत्नी, जीवत्पतिका, सौभाग्यवती ।
सधाना, क्रि. स. (हिं. सधना) विनी (भ्वा-प. अ.), दम् (प्रे.), शिक्ष् (प्रे.), वशी कृ । सं. पुं., विनयनं, दमनं, वशे करणम् ।
सधानेवाला, सं. पुं., विनेतृ, दमयितृ ।
सधा हुआ, वि., विनीत, दांत, शिक्षित, वशग ।
सन्, सं. पुं. (अ.) दे. 'संवत्' (१, ३) ।
—ईसवी, सं. पुं., खिस्त,-शाकः-संवत् (अव्य.) ।
—हिजरी, सं. पुं., यवन,-शाकः-संवत् ।
सन[1], सं. पुं. (सं. शणः) दीर्घ,-शाखः-पल्लवः, त्वक्सारः, वमनः ।
सन[2], सं. स्त्री. (अनु.) सणिति, सणत्कारः, शीघ्रनिर्गमनध्वनिः । वि., स्तब्ध २. निःशब्द ।
—से, क्रि. वि., ससणत्कारम् ।
सनई, सं. स्त्री. (हिं. सन) क्षुद्रशणः ।
सनक, सं. स्त्री. (सं. शंका>) दृढाग्रहः, उत्कटाभिनिवेशः, चित्तलहरी, छन्दः ३. उन्मादः, चित्तभ्रमः ।
सनकना, क्रि. अ. (हिं. सनक) उन्मद् (दि. प. से.), व्यामुह् (दि. प. वे.) ।
सनकी, वि. (हिं. सनक) उत्कटाभिनिवेशिन्, दृढाग्रहिन् ।
सनद, सं. स्त्री. (अ.) प्रमाणपत्रं २. प्रमाणम् ।
—याफ़्ता, वि. (अ.+फ़ा.) प्रमाणपत्रधारिन् ।
सनना, क्रि. अ. (सं. संधानं>) व. 'सानना' के कर्म. के रूप ।
सनम, सं. पुं. (अं.) प्रियतमः, दयितः, वल्लभः ।
सनमान, सं. पुं., दे. 'संमान' ।
सनसनाना, क्रि. अ. (अनु. सनसन) सणसणायते (ना. धा.) २. ससणसणशब्दं वा (अ. प. अ.) ।
सनसनाहट, सं. स्त्री. (हिं. सनसनाना) पवनवहनध्वनिः, वातगतिशब्दः २. (शरादीनां) सणसणायितं, सणसणत्कारः ३. दे. 'सनसनी' ।
सनसनी, सं. स्त्री. (अनु. सनसन) संवेदननाडीनां स्पंदनभेदः, सणसणत्कृतिः (स्त्री.) २. स्तब्धता ३. संक्षोभः, उद्वेगः ४. नीरवता ।
—खेज़, वि. (अनु.+फ़ा.) संक्षोभजनक, उद्वेगकर ।
सनस्ट्रोक, सं. पुं. (अं.) अंशुघातः ।
सनातन, वि. (सं.) अति,-पुराण-प्राचीन-पुरातन २. क्रमागत, परंपरालब्ध ३. नित्य, शाश्वत [सनातनी (स्त्री.)] । सं. पुं., प्राचीनकालः २. पुरातनी परंपरा ३. विष्णुः ४. ब्रह्मन् ५. शिवः ।
—धर्म, सं. पुं. (सं.) प्राचीन-पुरातन-धर्मः

२. परंपरागतो धर्मः ३. प्रतिमापूजनमृतकश्राद्धादिविश्वासी हिंदूधर्मशाखाविशेषः, पौराणिकधर्मः ।

—धर्मी, सं. पुं. (सं.-र्मिन्) सनातनधर्मानुयायिन्, पुराणमतावलंबिन् ।

—पुरुष, सं. पुं. (सं.) विष्णुः ।

सनातनी, सं. पुं. (सं. सनातन) दे. 'सनातनधर्मी' । वि., पुरातन, परंपरालब्ध ।

सनाथ, वि. (सं.) मातृपितृमत् २. सपतिक, सभर्तृक, संरक्षकयुत, सहायवत् [सनाथा (स्त्री.) जीवद्भर्तृका] ।

सनाभि, सं. पुं. (सं.) सोदरः, सहोदरः २. सपिंडः, सगोत्रः, सनाभ्यः ।

सनाय, सं. स्त्री. (अ. सनाऽ) स्वर्णपत्री-त्रिका, रेचनी, कल्याणी, मलहारिणी ।

सनाह, सं. पुं. (सं. सनाहः) तनुत्राणं, कवचः-चं दे. ।

सनिद्र, वि. (सं.) निद्रित, निद्राण, शयित, सुप्त, शयान ।

सनीचर, सं. पुं., दे. 'शनैश्चर' ।

सनीड, वि. (सं.) सकुलाय, सम-एक,-नीडवासिन् २. सम्बन्धिन्, सम्बन्धकः, सम्पर्किन् । सं. पुं., सामीप्यं, नैकट्यम् २. प्रातिवेश्यम्, प्रतिवेशः ।

सनोबर, सं. पुं. (अ.) दे. 'चीड़' (वृक्ष) ।

सन्न, वि. (सं. शून्य) चकितचकित, अतिविस्मित २. स्तब्ध, जड़ीभूत, व्यामोहित ३.निःसंज्ञ, अचेतन ४.ससाध्वस, भयाभिभूत ।

संनद्ध, वि. (सं.) बद्धकवच, धृतसंनाह २. सायुध, सशस्त्र ३. सज्ज, सिद्ध, उद्यत, उपक्लृप्त ४. संबद्ध, संलग्न ।

सन्नाटा, सं. पुं. (हिं. सुन्न) निःशब्दता, नीरवता २. निर्जनता, विजनता, विविक्तं ३. भयविस्मयादिजनिता निःस्तब्धता । वि., नीरव २. निर्जन ।

सन्मान, सं. पुं., दे. 'संमान' ।

सन्मुख, अव्य., दे. 'संमुख' ।

सन्यास, सं. पुं., दे. 'संन्यास' ।

सपक्ष, सं. पुं. (सं.) स्वपक्ष,-पातिन्-अवलंबिन्, सहायकः, मित्रम् ।

सपत्नी सं. स्त्री. (सं.) समानपतिका, समानभर्तृका ।

सपत्नीक, वि. (सं.) सकलत्र, सपरिग्रह ।

सपना, सं. पुं., दे. 'स्वप्न' ।

—होना, मु., दुर्दृश्य-दुर्लभ (वि.) भू ।

सपरदाई, सं. पुं. (सं. संप्रदायिन्>) दे. 'सारंगिदा' ।

सपर्या, सं. स्त्री. (सं.) पूजा-जनं, आराधनानम् ।

सपाट, वि. (सं.) सम, समरेख, समस्थ, समतल ।

सपाटा, सं. पुं. (सं. सर्पणं>) चलनधावनोड्डयनादीनां) जवः, वेगः, रयः २. त्वरितगतिः (स्त्री.), धावनम् ।

सैर—, सं. पुं., परिभ्रमणं पर्यटनं, विहरणम् ।

सपिंड, सं. पुं. (सं.) सनाभिः, सप्तपुरुषांतर्गतज्ञातिः (पुं.), सगोत्रः, सवंशीयः, बंधुः ।

सपूत, सं. पुं. (सं. सुपुत्रः) सत्पुत्रः, सुतनयः ।

सपेरा, सं. पुं., दे. 'सँपेरा' ।

सपो(पे)ला, सं. पुं., 'सँपोला' ।

सप्त, वि. (सं. सप्तन्) सं. पुं., उक्ता संख्या तद्बोधकोऽङ्कश्च (७) ।

—ऋषि, सं. पुं. [सं. सप्तर्षयः (बहु.) =मरीचिः, अत्रिः, अंगिरस्, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठः, अथवा गौतमः, भरद्वाजः, विश्वामित्रः, जमदग्निः, वसिष्ठः, कश्यपः] ।

—जिह्व, सं. पुं. (सं.) सप्तज्वालः, अग्निः ।

—धातु, सं. पुं. [सं. सप्तधातवः (बहु.) = रसासृग्मांसमेदोऽस्थिमज्जानः शुक्रसंयुताः ।]

—पदी, सं. स्त्री. (सं.) विवाहांगसप्तपदीगमनम् ।

—पाताल, सं. पुं. (सं. न.) सप्तसंख्याकाधोभुवनं (= अतलं, वितलं, सुतलं, रसातलं, तलातलं, महातलं, पातालम्) ।

—पुरी, सं. स्त्री. (सं.) सप्तपुण्यनगराणि (न. ब.) (=अयोध्या, मथुरा, माया (हरिद्वारं) काशी, काँची, अवंतिका, (उज्जयिनी), द्वारका) ।

—प्रकृति, सं. स्त्री. (सं.-प्रकृतयः (स्त्री. बहु.) राज्यस्य सप्तांगानि (बहु.) (=नृपः, मंत्रिन्, सामंतः, देशः, कोशः, दुर्गं, सेना) ।

—भुवन, सं. पुं. (सं. न.) सप्तोर्ध्वलोकाः (पुं. बहु.) भूर्भुवः स्वर्महश्चैव जनश्च तप एव च सत्यलोकश्च) ।

—सप्ति, सं. पुं. (सं.) सूर्यः, सप्ताश्वः ।
सप्तक, सं. पुं. (सं. न.) सप्तवस्तुसमूहः २. सप्तस्वरसमूहः (संगीत) ।
सप्तमी, सं. स्त्री. (सं.) शुक्लकृष्णपक्षयोः सप्तमतिथिः (पुं. स्त्री.) । २. अधिकरणकारकस्य विभक्तिः (स्त्री.) ।
सप्तर्षि, सं. पुं. [सं. सप्तर्षयः (बहु.)] दे. 'सप्तऋषि' ।
सप्ताश्व, सं. पुं. (सं.) सूर्यः, भानुः, रविः, अर्कः ।
सप्ताह, सं. पुं. (सं.) सप्तदिवसात्मकः कालः, *दिनसप्तकं २. साप्ताहिकं कृत्यं ३. श्रीमद्भागवतादीनां साप्ताहिकी कथा ।
सप्रज, वि. (सं.) सबाल, सापत्य, ससन्तान, अपत्यवकृत् ।
सफ़, सं. स्त्री. (अ.) श्रेणी-णिः (स्त्री.), पंक्तिः (स्त्री.) २. लंबकटः ।
सफ़र, सं. पुं. (अ.) यात्रा दे. ।
—खर्च, सं. पुं. (अ+फ़ा.) मार्गव्ययः ।
सफरमैना, सं. स्त्री. (अं. सैपर+माइनर) खनकसौरुगिकाः (पुं. बहु.) ।
सफ़री, वि. (अ. सफ़र) यात्रोपयोगिन् ।
सफ़री, सं. स्त्री. (शफरी) शफरः, मत्स्यभेदः ।
सफल, वि. (सं.) फलिन्, फलवत्, फलित, सशस्य, फल्युत २. सार्थक, अमोघ, अर्थवत् २. निष्पन्न, सिद्ध, पूर्ण ४. कृत,-कार्य-कृत्य सफलमनोरथ, सिद्धार्थ, कृतार्थ, कृतिन्, चरितार्थ, प्राप्त-पूर्ण-लब्ध,-काम ।
—होना, क्रि. अ., कृतकार्य-सफल (वि.) भू ।
सफलता, सं. स्त्री. (सं.) साफल्यं, अर्थ-मनोरथ,-सिद्धिः (स्त्री.), कृत,-कार्यता-कृत्यता २. पूर्णता, निष्पन्नता ३.फलवत्ता ४. सार्थकता ।
सफ़हा, सं. पुं. (अ.) पत्रं, पर्णं, पृष्ठम् ।
सफ़ा, वि. (अ.) अ-वि-निर्,-मल, स्वच्छ, २. शुचि, पूत, पवित्र ३. श्लक्ष्ण, मसृण ४.समतल, समस्थ ।
—चट, वि., अतिस्वच्छ, नितांतनिर्मल २.अति,-श्लक्ष्ण-मसृण ।
—चट करना, क्रि. स., क्षुरेण मुंड् (भ्वा. प. से.; चु.), केशान् सम्यक् आवप् (भ्वा. उ. अ.; प्रे.) २. विनश्-विध्वंस् (प्रे.) ।
सफ़ाई, सं. स्त्री. (अ. साफ़) स्वच्छता, निर्मलता २. शौचं, शुद्धिः (स्त्री.) ३. अवस्करापसारणं ४. निष्कपटता, आर्जवं ५. चित्त-मानस,-शुद्धिः (स्त्री.) ६. निर्दोषिता ७. ऋणशोधनं ८. निर्णयः ।
—देना, मु., स्वनिर्दोषितां प्रमाणीकृ, आरोपितापराधं निरस् (दि. प. से.) ।
सफ़ीना, सं. पुं. (अ.) पुस्तकं २. दे. 'संमन' ।
सफ़ीर, सं. स्त्री. (अ.) राजदूतः ।
सफ़ेद, वि. (फ़ा. सुफ़ैद) श्वेत, धवल, श्येत, श्येन, शुक्र, सित, शुक्ल, शुभ्र, गौर (-री स्त्री.) २. अंक-चिह्न-लेख,-रहित (पत्रादि) ।
—स्याह, सं. पुं. (फ़ा.) हिताहित, इष्टानिष्टम् ।
—पोश, सं. पुं. (फ़ा.) आर्यः, भद्रजनः । वि., श्वेतवासस् ।
रंग—पड़ना, मु., विवर्णतां आपद् (दि. आ. अ.) ।
सफेदा, सं. पुं. (फ़ा. सुफ़ैदा) सीसकभस्मन् (न.), *श्वेतसीसं २. आम्रभेदः ३. *श्वेतः (वृक्षभेदः) ।
सफ़ेदी, सं. स्त्री. (फ़ा. सुफ़ैदी) शुक्लता, श्वेतता, धवलता, धवलिमन्, शुक्लिमन्, श्वेतिमन् २. सुधा, सुधालेपः ३. प्रत्यूषः, प्रभातम् ।
—करना, क्रि. स., सुधया लिप् (तु. प. अ.)-धवलयति (ना. धा.), सुधालेपं कृ ।
—आना, मु., जॄ (दि. प. से.), ज्या (क्र्-प. अ.); केशा धवलायते (ना. धा.) ।
सब, वि. (सं. सर्व) विश्व, समस्त, सकल, अखिल, निखिल, कृत्स्न, अशेष, निःशेष २. पूर्ण, अनून, अखंड, समग्र ।
—कहीं, क्रि. वि., सर्वत्र ।
—का सब, वि., समग्र, संपूर्ण ।
—कुछ, सं. पुं., सर्वम् ।
—कोई, सर्व., सर्वे, विश्वे (पुं. बहु.) ।
—से अच्छा, वि., उत्तम, परम, श्रेष्ठ, प्रशस्ततम ।
—हाल, सं. पुं., संपूर्ण,-वृत्तं-वृत्तांतः ।
—मिलाकर, मु., सर्वं, समस्त २. सर्वाणि संकलय्य-परिगणय्य ।
सब—, वि. (अ.) सहायक, उप— ।
—इन्स्पेक्टर, सं. पुं. (अं.) उप,-निरीक्षकः-अवेक्षकः ।
—जज, सं. पुं. (अं.) उपाधिकरणिकः, उपन्यायाधीशः ।
सबक़, सं. पुं. (फ़ा.) पाठः, दे. । २. शिक्षा ।
सबब, सं. पुं. (अ.) कारणं, हेतुः ।

सबर, सं. पुं., दे. 'सब्र'।

सबल, वि. (सं.) बलवत्, बलशालिन्, बलिन्, वीर्यवत्, शक्तिमत्, शक्त, प्रबल, ऊर्जित, ऊर्जस्वल, समर्थ २. ससैन्य।

सबा, सं. स्त्री. (अ.) प्रभातपवनः।

सबाध, वि. (सं.) दुःखद, कष्टदायक २. हानिकारक, अहितकर।

सबील, सं. स्त्री. (अ.) मार्गः, पथिन् २. उपाय ३. प्रपा, दे.।

सबूत, सं. पुं., दे. 'सुबूत'।

सब्ज़, वि. (फ़ा.) हरित-त्, प(पा)लाश, हरिद्वर्ण २. नव, प्रत्यग्र, सरस (फलशाकादि)।

—बाग़ दिखाना, मु., मोघाशाभिः वंच्-प्रतॄ (प्रे.)।

सब्ज़ा, सं. पुं. (फ़ा. सब्जह्) हरितत्वं, हारित्यं, शादः, शाद्वलता २. भंगा, विजया ३. हरिन्मणिः, मरकतम्।

—ज़ार, सं. पुं. (फ़ा.) शाद्वलः-लम्।

सब्ज़ी, सं. स्त्री. (फ़ा.) दे. 'सब्जा'(१) २. शाकः-कं, शि(सि)ग्रुः, हरितकः-कं ३. भंगा, विजया।

सब्जेक्ट, सं. पुं. (अ.) विषयः, प्रकरणं, प्रसंगः २. प्रजा।

—(क्ट्स) कमिटी, सं. स्त्री. (अं.) विषयसमितिः (स्त्री.)।

सब्र, सं. पुं. (अ.) संतोषः, धैर्यं, तितिक्षा, सहिष्णुता।

बे—, वि. (फ़ा.+अ.) संतोषहीन २. असहिष्णु।

बेसब्री, सं. स्त्री., तितिक्षाभावः, असहिष्णुता २. धीरताभावः, व्याकुलता।

सभा, सं. स्त्री. (सं.) समाजः, गोष्ठिः-(ष्ठी) -समितिः-परिषद्-संसद्-पर्षद् (स्त्री.), समज्या, सदस् (न.), आस्थानं २. सभा,-भवनं-गृहं-आगारं-मंडपः-निकेतनं, आस्थानं-नी।

—पति, सं. पुं. (सं.) सभाध्यक्षः, संसत्पतिः, (सभायाः) प्रधानः।

—सद, सं. पुं. (सं.-सद्) सदस्यः, सभ्यः, सामाजिकः, परिष(पर्ष)द्वलः, प(पा)रिषदः, पार्षदः, सभास्तारः, प(पा)रिषद्यः।

धर्म—, सं. स्त्री. (सं.) धार्मिकपरिषद् (स्त्री.)।

न्याय—, सं. स्त्री. (सं.) व्यवहारमंडपः।

राज—, सं. स्त्री. (सं.) राजकीयपरिषद् (स्त्री.)।

सभागा, वि. (सं. सुभाग्य) सौभाग्य,-वत्-शालिन्, महाभाग, धन्य।

सभाला, सं. पुं. (सं. संभलः) वरसखः, परिणेतृमित्रम्।

सभ्य, सं. पुं. (सं.) सभासद्, दे. २. सज्जनः, भद्रपुरुषः। वि., शिष्ट, नागरिक, दक्षिण, भद्र, विनीत, सुशील, आर्यवृत्त, संस्कृत, संस्कृतिः (स्त्री.)।

सभ्यता, सं. स्त्री. (सं.) शिष्टता, नागरिकता, दाक्षिण्यं, सुजनता, आर्यवृत्तिः (स्त्री.) २. सदस्यता।

समंजस, वि. (सं.) उचित, न्याय्य, योग्य।

सम, वि. (सं.) समान, तुल्य, सदृश-श्, सदृक्ष, संनिभ, सविध,-उपम,-निभ,-प्रकार, -विध (समासांत में) २. समतल, दे. ३. युग्म, दे. 'जुफ़्त'। सं. पुं. (सं.) तालमानभेदः (संगीत) २. अर्थालंकारभेदः (सा.)।

—कक्ष, वि. (सं.) तुल्य, सदृश।

—काल, अव्य. (सं.-लं) युगपद् (अव्य.), यौगपद्येन, एक-सम,-कालं(-ले)।

—कालीन, वि. (सं.) एक,-कालिक-कालीन, समकाल।

—कोण, सं. पुं. (सं.) नवत्यंशात्मकः कोणः। वि., तुल्याभिमुखकोण (त्रिभुज अथवा चतुर्भुज)।

—चित्त, वि. (सं.) सम,-चेतस्-बुद्धि, धीर, शांतमनस्क।

—तल, वि. (सं.) सम, समस्थ, समरेख, सपाट।

—दर्शी, वि. (सं.) सम,-दर्शन-दृश्-दृष्टि-बुद्धि।

—भाव, वि. (सं.) सम,-प्रकृति-गुण २. समता, तुल्यता।

—भूमि, सं. स्त्री. (सं.) सम,-भूः (स्त्री.) -स्थली।

—वयस्क, वि. (सं.) सवयस्क, समायुष्क।

समक्ष, अव्य. (सं.-क्षं) अग्रे, अग्रतः, पुरः, पुरतः, पुरस्तात् (सब अव्य.)।

समग्र, वि. (सं.) दे. 'सब' (१-२)।

समझ, सं. स्त्री. (हिं. समझना) बुद्धिः-धीः-मतिः (स्त्री.), प्रज्ञा २. ज्ञानं, बोधः, उपलब्धिः (स्त्री.)।

—**में आना**, क्रि. अ., अवगम्-बुध्-ज्ञा (कर्म.)।
—**दार**, वि. (हिं.+फ़ा.) धीमत्, बुद्धिमत्, प्राज्ञ, विचक्षण।
समझना, क्रि. स. (सं. संज्ञानं>) ज्ञा (क्र्. उ. अ.), बुध् (भ्वा. प. से.), अवगम्, बुद्ध्या ग्रह् (क्र्. प. से.) २. क्लृप् (प्रे.), उत्प्रेक्ष् (भ्वा. आ. से.), तर्क् (चु.) ३. विचर् (प्रे.) ४. प्रतिकृ, निर्यत् (चु.)। सं. पुं., ज्ञानं, बोधनं, अवगमनं, उपलब्धिः (स्त्री.)।
समझने योग्य, वि., ज्ञेय, अवगंतव्य, बोध्य।
समझनेवाला, सं. पुं., ज्ञातृ, बोद्धृ, अवगंतृ।
समझाना, क्रि. प्रे. (हिं. समझना) व. 'समझना' (१) के प्रे. रूप २. विशदी-स्पष्टीकृ, व्याख्या (अ. प. अ.), व्याचक्ष् (अ. आ.) ३. उपदिश् (तु. प. अ.), शिक्ष् (प्रे.) ४. निर्भर्त्स् (चु. आ. से.) ५. प्रति इ (प्रे.), अभिज्ञा (प्रे.)।
—**बुझाना**, क्रि. प्रे., दे. 'समझाना'।
समझा हुआ, वि., ज्ञात, बुद्ध, अवगत।
समझौता, सं. पुं. (हिं. समझना) संधिः, सं-समा,-धानं, कलह-विवाद,-शमः-शांतिः(स्त्री.), २. संमतिः (स्त्री.), ऐकमत्यम्।
समता, सं. स्त्री. (सं.) तुल्यता, सादृश्यं, समानता, साम्यं, समत्वम्।
समद, वि. (सं.) मत्त, क्षीव, उन्मद, मदोद्धत २. मदोत्कट, मत्त (गजादि) ३. प्रसन्न, प्रहृष्ट।
समध(धि)न, सं. स्त्री. (हिं. समधी) १-२. पुत्र-पुत्री-अपत्य,-श्वश्रूः (स्त्री.), जामातृ-स्नुषा,-जननी।
समधियान,-ना, सं. पुं. (हिं. समधी) पुत्र-पुत्री,-श्वशुरालयः।
समधी, सं. पुं. (सं. संबंधिन्>) १-२. पुत्र-पुत्री-अपत्य,-श्वशुरः, जामातृ-स्नुषा,-जनकः।
समन्वय, सं. पुं. (सं.) संयोगः, मिलनं २. आनुरूप्यं, विरोधाभावः, सवादः ३. कार्य-कारणनिर्वाहः।
समन्वित, वि. (सं.) संयुक्त, मिलित, संबद्ध २. युक्त, युत, सहित २. निर्बाध।
समय, सं. पुं. (सं.) वेला, कालः, दिष्टः, अनेहस् २. प्रस्तावः, प्रसंगः ३. ऋतुः ४. अवकाशः, क्षणः ५. अवसरः, उचितसमयः।
समर, सं. पुं. (सं. पुं. न.) संग्रामः, युद्धं दे.।
—**भूमि**, सं. स्त्री. (सं.) समरांगणं, युद्ध-रण,-क्षेत्रम्।
—**शायी**, सं. पुं. (सं.-यिन्) लब्धवीरगति, धराशायिन्।
समर्थ, वि. (सं.) क्षम, योग्य, शक्त, सामर्थ्यवत् २. बलिन्, सबल।
समर्थक, वि. (सं.) समर्थनकार, साहाय्यकारिन्, उपोद्बलक, अनुमोदक।
समर्थन, सं. पुं. (सं. न.) दृढी-प्रमाणी,-करणं, उपोद्बलनं, अनुमोदनम्।
—**करना**, क्रि. स., समर्थ् (चु.), दृढी-प्रमाणी-कृ, द्रढयति (ना. धा.), उपोद्बलयति (ना. धा)।
समर्थित, वि. (सं.) उपोद्बलित, दृढीकृत, अनुमोदित।
समर्पक, वि. (सं.) समर्पयितृ, समर्पणकर, उपहारिन्, उपहारक।
समर्पण, सं. पुं. (सं.) उपहरणं, ससंमानं उत्सर्जनं ३. दानं, उत्सर्गः।
—**करना**, क्रि. स., सं.-ऋ (प्रे., समर्पयति), सादरं दा, उपहृ (भ्वा. प. अ.)।
समर्पित, वि. (सं.) उपहृत, सादरं उत्सृष्ट-दत्त।
समवाय, सं. पुं. (सं.) समूहः २. नित्य-गुण-गुणि-जातिव्यक्ति-अवयवावयवि,-संबंधः(न्याय.)
समवेत, वि. (सं.) संचित, संगृहीत २. युक्त, मिलित ३. नित्यसंबंधविशिष्ट।
समष्टि, सं. स्त्री. (सं.) संघः, समुदायः, समूहः।
समस्त, वि. (सं.) समग्र, संपूर्ण, निःशेष, दे. 'सब' २. समासयुक्त ३. संक्षिप्त।
समस्या, सं. स्त्री. (सं.) समासार्था, समाप्त्यर्था, (पद्यरचनार्थै) श्लोकांशः २. विकटप्रश्नः ३. कठिनावसरः।
—**पूर्ति**, सं. स्त्री. (सं.) निर्दिष्टपद्यांशमाश्रित्य काव्यरचना।
समाँ, सं. पुं. (सं. समयः) कालः, वेला।
—**बँधना**, मु. (संगीतादिमग्नतया) स्तब्धीभू।
समाख्या, सं. स्त्री. (सं.) यशस् (न.), नामन् (न.)।
समागम, सं. पुं. (सं.) आगमनं, आयानं २. संमिलनं, संयोगः २. मैथुनम्।
समाचार, सं. पुं. (सं.) वृत्तं, वृत्तांतः, उदंतः, वार्ता।

—पत्र, सं. पुं. (सं.) वृत्तपत्रम् ।

समाज, सं. पुं. (सं.) सभा, दे. २. समूहः, संघः, दलं, समुदायः ३. आर्यसमाजः ।

—वाद, सं. पुं. (सं.) संपत्तौ राज्याधिकारः इति सिद्धान्तः ।

समाजी, सं. पुं. (सं.-जिन्) सभासद् २. आर्य-समाज,-सदस्यः सभासद्, आर्यसामाजिकः ३. दे. 'सपरदाई' ।

समादृत, वि. (सं.) सम्मानित, पूजित, सत्कृत ।

समाधान, सं. पुं. (सं. न.) समाधिः, अंत-र्ध्यानं, प्रणिधानं २. शंका-संदेह,-निवारणं ३. शंकानिवारकमुत्तरं ४. आ-समा,-श्वासनं, सांत्वनं ५. विरोधापहरणं ६. निराकरणं ७. अनुसंधानं ८. तपस् (न.) ९. ध्यानं १०. समर्थनं, दृढ़ीकरणं, उपोद्वलनम् ।

—करना, क्रि. स., समाधा (जु. उ. अ.), शंकां निवृ (प्रे.) ।

शंका—, सं. पुं. (सं. न.) संदेहनिवारणम् ।

समाधि, सं. स्त्री. (सं. पुं.) अंतर्ध्यानं, समा-धानं, ब्रह्मणि स्थितिः (स्त्री.), योगस्य चरम-फलं २. प्रेतावटः, शव-अस्थि,-गर्तः ३. निद्रा ४. चित्तैकाग्र्यं, अनन्यमनस्कता ५. योगः ६. मौनं ७. प्रतिशोधः ८. अर्थालंकारभेदः (सा.) ।

—लगाना, क्रि. अ., ब्रह्मणि मनो निविश् (प्रे.) -समाधा (जु. उ. अ.), अंतः ध्या (भ्वा. प. अ.), समाहित-समाधिस्थ (वि.) भू ।

समान, वि. (सं.) तुल्य, सदृक्ष-श-श्, सम, सन्निभ, सविध, सवर्ण,-उपम,-विध,-रूप, -प्रकार ।

समानता, सं. स्त्री. (सं.) समता, साम्यं, सादृश्यं, औपम्यं, सारूप्यं, सावर्ण्यम् ।

समाना, क्रि. अ. (सं. समावेशनम्) प्रविश् (तु. प. अ.), अन्तः या (अ. प. अ.), क्रि. स., प्रविश् (प्रे.), अन्तः स्था (प्रे.), धा-धृ-भृ (कर्म.) ।

समाप्त, वि. (सं.) अवसित, अंतं,-गत-इत, संपूरित, संपूर्ण, निःशेषीभूत ।

—करना, क्रि. स., समाप् (स्वा. प, अ., प्रे.), निर्वृत् (प्रे.), सं-पृ (प्रे.)-पूर् (चु.), पारं-अंतं गम् (प्रे.), निःशिष् (प्रे.), संपद् (प्रे.) ।

—होना, क्रि. अ., समाप्-अवसो (कर्म.)., निःशेषीभू , समाप्तिं-अंतं गम् ।

समाप्ति, सं. स्त्री. (सं.) अंतः, परि-, अवसानं, निर्वृत्तिः-सिद्धिः (स्त्री.), निःशेषता २. प्राप्तिः (स्त्री.) ।

समारोह, सं. पुं. (सं.) आडंबरः, विभवः, दे. 'धूमधाम' २. आडंबरमय उत्सवः ।

—से, क्रि. वि., साडंबरं, साटोपम् ।

समार्थक, वि. (सं.) समानार्थक, पर्यायवाचिन्, तुल्याशय (शब्द) ।

समालोचक, सं. पुं. (सं.) गुणदोष-निरूपकः-विवेचकः, आलोचकः ।

समालोचना, सं. स्त्री. (सं.) सं.-,आलो-चनं-ना, गुणदोष,-निरूपणं-विवेचनं-दर्शनं-परीक्षणम् ।

—करना, क्रि. स., गुणदोषान् निरूप् (चु.)-विविच् (रु. उ. अ.)-विचर् (प्रे.), समालोच् (प्रे.) २. छिद्राणि अन्विष् (दि. प. से.) ।

समावर्तन, सं. पुं. (सं. न.) (गुरुकुलात्) प्रत्यागमनं, प्रत्यावृत्तिः (स्त्री.) २. आर्याणां संस्कारभेदः, समा-वर्तः-वृत्तिः (स्त्री.) (धर्म.) ।

समाविष्ट, वि. (सं.) अंतर् ,-गत-भूत-गणित २. एकाग्रचित्त ।

समावेश, सं. पुं. (सं.) अंतर्भावः, अंतर्गणना ।

—करना, क्रि. स., अंतर्भू (प्रे.), अंतर्गण् (चु.) ।

समास, सं. पुं. (सं.) पदसंयोगः (व्या.) २. संक्षेपः ३. संमिश्रणं ४. संग्रहः ।

—करना, क्रि. स., समस् (दि. प. से.), एकीकृ, संमिश्र् (चु.) ।

समासोक्ति, सं. स्त्री. (सं.) अर्थालंकारभेदः (सा.) ।

समाहार, सं. पुं. (सं.) संचयनं, संग्रहणं २. चयः, राशिः ३. संक्षेपः ।

—द्वंद्व, सं. पुं. (सं.) द्वंद्वसमासभेदः (व्या.) ।

समिति, सं. स्त्री. (सं.) परिषद् (स्त्री.) सभा, दे. ।

समिधा, सं. स्त्री. [सं. समिध् (स्त्री.)] यज्ञिय-होमीय,-इंधनं-एधः २. एधः, इंधनं दे. ।

समीकरण, सं. पुं. (सं. न.) समानीकरणं, समीक्रिया २. क्रियाभेदः ।

समीक्षा, सं. स्त्री. (सं.) समालोचना, दे. ।

समीचीन, वि. (सं.) सत्य, यथार्थ, अवितथ २. उचित, उपपन्न, योग्य, ३. न्याय्य, धर्म्य ।

समीप, क्रि. वि. (सं. समीपं-पे) अंतिकं-के-कात्, आरात्, निकषा, निकटं-टे, उपकंठं-ठे, समया, सविधे, सकाशं-शे-शात्, संनिधौ, उप– ।

—वर्ती, वि. (सं.-र्तिन्) समीप, निकट, संनिहित, अंतिक, अभ्याश, आसन्न, उपकंठ, उपांत, अभ्यर्ण, अभ्यग्र, सविध, समीप-निकट-स्थ-वर्तिन् ।

समीपता, सं. स्त्री. (सं.) सामीप्यं, नैकट्यं, संनिधिः (पुं.), आसन्नता, संनिकर्षः ।

समीर, सं. पुं. (सं.) समीरः, समीरणः, पवनः, वायुः दे. ।

समीहा, सं. स्त्री. (सं.) उद्योगः, प्रयत्नः २. इच्छा ३. अनुसंधानम् ।

समुंदर, सं. पुं. (सं. समुद्रः) सागरः ।

—झाग, सं. पुं., दे. 'समुद्रफेन' ।

—सोख, सं. पुं. (सं. समुद्रशोषः) क्षुपभेदः ।

समुचित, वि. (सं.) यथेष्ट, उचित दे. ।

समुच्चय, सं. पुं. (सं. समाहारः) संमिलनं २. राशिः, समूहः ३. अर्थालंकार-भेदः (सा.) ।

समुद, वि. (सं.) सहर्ष, सामोद, सानन्द । अ., सहर्षं, सानन्दम् ।

समुदाय, सं. पुं. (सं.) नि-सं,-चयः, निकरः, राशिः २. गणः, संघः, वृंदं, समूहः ।

समुद्र, सं. पुं (सं.) सागरः, अब्धिः, वारि-अंभो-उद-जल-नीर-अंबु-पाथो,-धिः, पारावारः, सरित्पतिः, सिंधुः, अर्णवः, रत्नाकरः, नीर-वारि-जल,-निधिः, मकरालयः, ऊर्मिमालिन् ।

—तट, सं. पुं. (सं. पुं. न.) सागर,-तीरं-कूलं, रोधस् (न.), वेला ।

—पत्नी, सं. स्त्री. (सं.) समुद्र,-कांता-गा, नदी ।

—फेन, सं. पुं. (सं.) समुद्रकफः, जलहासः, सामुद्रम् ।

—यान, सं. पुं. (सं. न.) पोतः ।

—लवण, सं. पुं. (सं. न.) अक्षि(क्षी)वं, वशि(सि)रं, समुद्रकं, लवणाब्धिजम् ।

—वह्नि, सं. पुं. (सं.) वडवानलः, वाडवः ।

समुद्रगुप्त, सं. पुं. (सं.) गुप्तवंशीयः सम्राड्विशेषः ।

समुद्रीय, वि. (सं.) समुद्रिय, समुद्रथ ।

समुल्लास, सं. पुं. (सं.) परिच्छेदः, अध्यायः २. आनंदः, हर्षः ।

समूचा, वि. (सं. समुच्चयः>) समस्त, समग्र, संपूर्ण ।

समूल, वि. (सं.) सकारण, सहेतुक २. मूल,-वत्-अन्वित । क्रि. वि. (सं. न.) मूलतः, सम्पूर्णतया, अशेषेण, साकल्येन ।

समूलोन्मूलन, सं. पुं. (सं. न.) (मूलतः) उत्पाटनं-उच्छेदनं-व्यपरोपणम् ।

—करना, क्रि. स., उत्पट् (चु.) विध्वंस्-उत्सद् (प्रे.), आमूलं उत्खन् (भ्वा. प. से.)-व्यपरुह् (प्रे., व्यपरोपयति) ।

समूह, सं. पुं. (सं.) निवहः, व्यूहः, संदोहः, विसरः, व्रजः, स्तोमः, ओघः, निकरः, व्रातः, वारः, संघातः, नि-प्र-सं,-चयः, समुद(दा)यः, समवायः, गणः, संहतिः (स्त्री.), वृंदं, निकुरंबं, कदंबकं, समाहारः, समुच्चयः, –मंडलं, –जालं, -पूगः,-ग्रामः (समासांत में) । (सदृश पदार्थों का) वर्गः । (जंतुओं का) संघः, सार्थः । (सजातीय जंतुओं का) कुलम् (टेढ़े जंतुओं का) यूथः-थं । (पशुओं का) समजः । (औरों का झुंड) समाजः । (एक धर्मवालों का) निकायः । (अन्नादि का ढेर) पुंजः, पिंजः, पुंजिः (स्त्री.), राशिः, उत्करः, कूटः-टं २. जनता, जनमेलकः, जन–लोक,-संघः-समुदायः-संमर्दः-संकुलं ३. बहुत्वं, बाहुल्यं, बहु-बृहत, संख्या ।

समूहनी, सं. स्त्री. (सं.) संमार्जनी, 'दे. झाड़' ।

समृद्ध, वि. (सं.) अति-शय-, धनाढ्य–धनिक-संपन्न ।

समृद्धि, सं. स्त्री. (सं.) एधा, अतिशय-प्रचुर-, संपद्-संपत्तिः (दोनों स्त्री.)-वित्तं विभवः–वैभवम् ।

समेटना, क्रि. स. (हिं. सिमटना) एकत्र कृ, संग्रह् (क्र्. प. से.), संचि (स्वा. उ. अ.), संनी-समाहृ (भ्वा. प. अ.) २. आकुंच् (प्रे.), संकुच् (तु. प. से.), संहृ (भ्वा. प. अ.) । सं. पुं. तथा भाव, एकत्रकरणं संग्रहणं, संचयनं, संनयनं, समाहरणं, आकुञ्चनं, संकोचनम् ।

समेत, क्रि. वि. (सं. न.) सह, साकं, सार्धं, सहितं, समं (सब तृतीया के साथ) । वि. (सं.) संयुक्त ।

समोसा, सं. पुं. (फ़ा.) *समोषः, त्रिकोणाकारः पक्वान्नभेदः ।

सम्यक्, क्रि. वि. (सं.) सर्वथा, सर्वप्रकारेण २. संपूर्णतया, सामस्त्येन, साद्यंतं, संपूर्णं ३. सुष्ठु साधु ।

सम्राज्ञी, सं. स्त्री. (सं.) सम्राट्पत्नी २. राज-राजेश्वरी, अधि-महा-राजाधि,-राज्ञी ।

सम्राट्, सं. पुं. (सं. सम्राज्) महा-, राजाधि-राजः, सार्वभौमः, चक्रवर्तिन्, मण्डलेश्वरः, एक,-अधिपतिः-राजः, अधि,-ईश्वरः-राजः ।

सयाना, वि., दे. 'स्याना' ।

सयूथ्य, वि. (सं.) एक-स-समान-अभिन्न,-वर्ण-गण-संघ ।

सयोनि, वि. (सं.) सोदर, सहोदर, सगर्भ, सोदर्य २. निकट-समीप,-सम्बन्धिन् । सं. पुं. (सं.) सहोदरः, सोदरः, सोदर्यः २. इन्द्रः, शचीपतिः ।

सर[1], सं. पुं. [सं. सरस् (न.)] सरसी, कासारः, ह्रदः, सरोवरः, पद्माकरः, तटाकः-कं, तडागः-गं, जलाशयः ।

सर[2], सं. पुं. (फ़ा.) शिरस् (न.), दे. 'सिर' २. शिखरं, शिखा, अग्रम् । वि., पराजित, अभिभूत ।

—अंजाम, सं. पुं. (फ़ा.) सामग्री, संभारः २. सिद्धिः, समाप्तिः (स्त्री.) ।

—कश, वि, (फ़ा.) उद्धत, उद्दंड २. अवश्य ३. कु-दुश् -,चेष्टक ।

—कशी, सं. स्त्री. (फ़ा.) औद्धत्यं, उद्दण्डता २. कुचेष्टा, चापल्यम् ।

—ग़ना,—गरोह, सं. पुं. (फ़ा.) अग्रणीः, नायकः ।

—गर्म, वि. (फ़ा.) उत्साहिन्, उत्साहवत् ।

—गर्मी, सं. स्त्री., उत्साहः, व्यग्रता ।

—ज़ोर, वि. (फ़ा.) बलवत् २. उद्दण्ड ।

—ज़ोरी, सं. स्त्री., बलात्कारः २. उद्दण्डता ।

—ताज़, सं. पुं. (फ़ा.) पुरोगः, नायकः, शिरो-चूडा-मुकुट,-मणिः ।

—पंच, सं. पुं. (फ़ा.+हिं.) सभा,-पतिः-अध्यक्षः, *पञ्चप्रधानः ।

—परस्त, सं. पुं. (फ़ा.) त्रातृ, रक्षकः २. संरक्षकः, आश्रयदः ।

—परस्ती, सं. स्त्री., रक्षणं, त्राणं २. संरक्षणं, आश्रयः ।

—पेच, सं. पुं. (फ़ा.) उष्णीषभूषणभेदः ।

—बराह, सं. पुं. (फ़ा.) कार्याध्यक्षः, अधि-ष्ठातृ, *प्रवन्धकः ।

—बराही, सं. स्त्री., अधिष्ठानं, *प्रवन्धः, अवेक्षा २. अधिष्ठातृत्वम् ।

—हद, सं. स्त्री. (फ़ा.+अ.) सीमन् (स्त्री.), सीमा, दे. २. सीमांतः, पर्यंतः, प्रांतः ।

—हदी सूबा, सं. पुं. (फ़ा.) (पश्चिमोत्तर-) सीमाप्रांतः ।

—करना, मु., विजि (भ्वा. आ. अ.), अभिभू, वशीकृ ।

सर[3], सं. पुं. (अं.) आंगलीयानामुपाधिभेदः, *शिरोमणिः २. भद्रः, आर्यः ।

सरकंडा, सं. पुं. (सं. शरकांडः) कांडः, तेजनः, गुंद्रकः, क्षुरिकापत्रः, उत्कटः ।

सरकना, क्रि. अ. (सं. सरणं) शनैः-मृदु चल् (भ्वा. प. से.)-सुप्-सृ (दोनों भ्वा. प. अ.) २. सत्वरं सृ ३. अलक्षितं अती (अ. प. अ.) ४. उरसा गम्-चल् । सं. पुं. तथा भाव, मृदु सरणं-सर्पणं-चलनं, इ. ।

सरकाना, क्रि. स., व. 'सरकना' के प्रे. रूप ।

सरकार, सं. स्त्री. (फ़ा.) राज्य,-संस्था-तंत्रं शासक-अधिकारि,-वर्गः, राजमंत्रिणः (बहु.) २. प्रभुः, स्वामिन् ३. राज्यं, राष्ट्रम् ।

सरकारी, वि. (फ़ा.) आधिकारिक, राजकीय, राज्यसंबंधिन् ।

—नौकर, सं. पुं. (फ़ा.) राज्य,-भृत्यः-सेवकः-परिचारकः ।

—नौकरी, सं. स्त्री. (फ़ा.) राज्य,-सेवा-परिचर्या ।

सरगम, सं. पुं. (हिं. सा+रे+गा+मा) स्वर-,ग्रामः (संगीत) ।

सरघा, सं. स्त्री. (सं.) मधुमक्षिका, दे. ।

सरजा, सं. पुं. (फ़ा. सरजाह=उच्चपदाधिकारी, अ. शरजह् = शेर) नायकः, अग्रणीः, नर-शार्दूलः २. सिंहः ।

सरणी, सं. स्त्री. (सं.) सरणिः (स्त्री.), पथिन्, मार्गः २. पंक्तिः (स्त्री.), रेखा ३. पद्या, पद्धतिः (स्त्री.) ४. शैली, प्रकारः ।

सरद, वि., दे. 'सर्द' ।

सरदई, वि. (फ़ा. सर्दह्) हरित्पीत ।

सरदल, सं. पुं. (देश.) द्वारोर्ध्वस्थूणा ।

सरदा, सं. पुं (फ़ा. सर्दह्) *शीतखर्बुजम् ।

सरदार, सं. पुं. (फ़ा.) नायकः, अग्रणीः,पुरोगः, अध्यक्षः, प्रधानः २. शासकः ३. धनिकः ।

सरदारी, सं. स्त्री. (फ़ा.) नायकत्वं, प्रधानत्वम् ।

सरन, सं. स्त्री., दे. 'शरण' ।

सरना, क्रि. अ. (सं. सरणं) दे. 'सरकना' । २. कृ-अनुष्ठा (कर्म.), संपद् (दि. आ. अ.), साध् (दि, प. अ.) ।

सरनामा, सं. पुं. (फ़ा.) (निबंधादीनां) शीर्षकं २. पत्रसंज्ञा, दे. 'पता' ३. पत्र,-संबोधनं-प्रारम्भः ।

सरपट, क्रि. वि. (फ़ा. सर+हिं. पटकना) आस्कंदितं-तकम् । क्रि. वि., जवेन, वेगेन ।

—भागना, क्रि. अ., आस्कंद् (भ्वा. प. अ.) २. द्रुतं-सवेगं धाव् (भ्वा. प. से.) ।

सरपत, सं. पुं. (सं. शरपत्रं) कुशाकारो घासभेदः ।

सरमा, सं. स्त्री. (सं.) देवशुनी २. कुक्कुरी ।

सरमाया, सं. पुं. (फ़ा.) दे. 'पूंजी' ।

—दार, सं. पुं. (फ़ा.) दे. 'पूंजीपति' ।

सरयू, सं. स्त्री. (सं.) अयोध्यासमीपवर्तिनदीविशेषः ।

सरल, वि. (सं.) ऋजु, निर्व्याज, निष्कपट, निश्छल, साधु-सत्य,-वृत्त-शील, शुद्ध,-मति-भाव-आत्मन्, दक्षिण, शुचि २. दे. 'सीधा' ३. सुकर, सुसाध्य ४. कृत्रिमतारहित, वास्तविक । (सं. पुं.) पीतः, धूपवृक्षकः, दे. 'चीड़' ५. सरलनिर्यासः, वृकधूपः, दे. 'गंधाबिरोजा' ।

सरलता, सं. स्त्री. (सं.) सारल्यं, निष्कापट्यं, आर्जवं, साधुता, शुचिता, शुद्धभावः २. दे. 'सीधापन' ३. सुकरता, सुसाध्यता ४.बालिश्यं, मौर्ख्यम् ।

सरवन, सं. पुं. (सं. श्रमणः) अंधकमुनिपुत्रः (रामायण) ।

सरवर, सं. पुं., दे. 'सर' (१) ।

सरविस, सं. स्त्री. (अं. सर्विस) सेवा, दे. ।

सरशार, वि. (फ़ा.) मग्न, लीन २. मत्त, क्षीब ।

सरस, वि. (सं.) रस,-युक्त-अन्वित, दे. 'रसीला' २. आर्द्र, उन्न, क्लिन्न ३. हरित, अभ्यग्र ४. सुन्दर ५. मधुर ६. भावपूर्ण, हृदिस्पृश् ७. भावुक, रसिक, सहृदय ।

सरसठ, वि. तथा सं. पुं., दे. 'सड़सठ' ।

सरसता, वि. (सं.) रसवत्ता, दे. 'रसीलापन' २. आर्द्रता, क्लिन्नता ३. हारित्यं, प्रत्यग्रता ४. सुंदरता ५.मधुरता ६. रसिकता, भावुकता ।

सरसब्ज़, वि. (फा.) हरित-त, हरितपर्ण, सरस २. शाद्वल, शाद-तृण,-आवृत ।

—मैदान, सं. पुं. (फ़ा.) शाद्वलः-लं, शाद्वलस्थलं-ली, तृणावृतभूमिः (स्त्री.), शादहरितः-तम् ।

सरसर, सं. पुं. (अनु.) दे. 'सरसराहट' ।

सरसराना, क्रि. अ. (अनु. सरसर) सरसरायते (ना. धा.), सरसरध्वनिः जन् (दि. आ. से.) २. ससरसरशब्दं वा (अ. प. अ.) ३. सृप् (भ्वा. प. अ.), उरसा गम् ।

सरसराहट, सं. स्त्री. (हिं. सरसर) सरसरायितं, सरसरशब्दः, सर्पणध्वनिः २. कंडुः-डूः, खर्जुः-र्जूः (चारों स्त्री.) ३. पवनध्वनिः ।

सरसरी, वि. (फ़ा. सरासरी) सत्वर, सरभस, त्वरित २. स्थूल ।

—तौर पर, क्रि. वि., सत्वरं, त्वरया २. स्थूलरूपेण, मनोयोगं विना ।

—निगाह, सं. स्त्री. विहंगमदृष्टिः (स्त्री.), विहंगावलोकनम् ।

सरसाई, सं. स्त्री. (हिं. सरस) सरसता, रस,-युक्तता-पूर्णता २. शोभा ३. आधिक्यम् ।

सरसाम, सं. पुं. (फ़ा.) त्रिदोषं, संनिपातः, दे. ।

सरसिज, सं. पुं. (सं, न.) पद्मं, अब्जं, कमल, दे. ।

—योनि, सं. पुं. (सं.) चतुर्मुखः, ब्रह्मन् (पुं.) ।

सरसिरुह, सं. पुं. (सं. न.) कमलं, सरोपंके,-रुहम् ।

सरसी, सं. स्त्री. (सं.) दे. 'सर' (१) २. वापी ।

—रुह, सं. स्त्री. (सं. न.) पद्मं, कमलं, दे. ।

सरसों, सं. स्त्री. (सं. सर्षपः) (सफ़ेद) सिद्धार्थः, सर्षपः, शुभकः, कदंबकः २. (काली) कृष्णिका, क्षवः, राजिका ।

—का तैल, सं. पुं., सर्षपस्नेहः, *कटुतैलम् ।

सरस्वती, सं. स्त्री. (सं.) शारदा, भारती, वाग्देवी, ब्राह्मी, गीर्देवी, वर्णमातृका २. कुरुक्षेत्रसमीपवर्तिप्राचीननदीविशेषः ३. विद्या, ज्ञानम् ।

सरहज, सं. स्त्री. (सं. श्यालजाया) श्वशुर्यपत्नी ।

सराप, सं. पुं. (सं. शापः) अभिशापः, आक्रोशः, अकरणिः-अजीवनिः-अजननिः (स्त्री.), अवग्रहः, निग्रहः ।
—देना, क्रि. स., अभि-, शप् (भ्वा. उ. अ.), अभिशंस् (भ्वा. प. से.), आक्रुश् (भ्वा. प. अ.), शापं दा ।
सरापा हुआ, वि., अभि,-शप्त, आक्रुष्ट, अभिशप्त ।
सराफ़, सं. पुं. (अ. सर्राफ़) सुवर्णाजीविन्, कनकवणिज् २. टंक-नाणक,-परिवर्तकः ३. श्रेष्ठिन्, कुसीदिकः ।
सराफ़ा, सं. पुं. (अ. सर्राफ़ह्) सुवर्णव्यवसायः, रत्नवाणिज्यं २. सुवर्णाजीवि,-निगमः-हट्टः ३. धनागारं, दे. 'बैंक' ।
सराफ़ी, सं. स्त्री. (हिं. सराफ़) दे. 'सराफ़ा' (१) २. वर्णमालाभेदः, देः. 'महाजनी' ३. टंक-परिवर्तन-शुल्कः ।
सराबोर, वि., दे. 'लथपथ' ।
सराय, सं. स्त्री. (फ़ा.) पांथगृहं, पथिकशाला, दे. 'मुसाफ़िरखाना' २. गृहम् ।
—का कुत्ता, मु., स्वार्थपरायणः ।
—की भठियारी, मु., निर्लज्जा कलहप्रिया च नारी ।
सरावन, सं. पुं. (सं. सरणं>) मत्यं, कोटि-(टी)शः ।
सरासर, क्रि. वि. (फ़ा.) सर्वथा, पूर्णतया, सामस्त्येन २. साद्यंतं ३. साक्षात्, प्रत्यक्षम् ।
सराहना, क्रि. स. (श्लाघनं) श्लाघ् (भ्वा. आ. से.), प्रशंस् (भ्वा. प. से.), ईड् (अ. आ. से.), स्तु (अ. प. अ.) कृत् (चु.), नू (तु. प. से.)। सं. पुं. तथा भाव, प्रशंसा, श्लाघा, स्तवः-वनं, कीर्तनं नुतिः-स्तुतिः (स्त्री.)।
सराहनीय, वि, (सं. श्लाघनीय) स्तुत्य, प्रशस्य, प्रशंसनीय २. उत्तम, श्रेष्ठ ।
सराहनेवाला, सं. पुं., प्रशंसकः, स्तावकः, नावकः ।
सरि, सं. स्त्री. (सं.) निर्झरः, उत्सः, प्रपातः २. जल-धारा,-यन्त्रम् । (हि.) नदी २. माला ३. समता । वि. तुल्य, सदृश । अव्य., पर्यन्तम्,-अवधि, आ- ।
सरित्, सं. (स्त्री.) निम्नगा, नदी दे. २. सूत्रम् ३. दुर्गा ।
—फ़फ, सं. पुं. (सं.) नदी-तटिनी-सरित्,-फेनः-डिंडीरः-कफः ।
—पति, सं. पुं. (सं.) सागरः, समुद्रः ।
—सुत, सं. पुं. (सं.) भीष्मः, गांगेयः ।
सरिता, सं. स्त्री., दे. 'सरित्' ।
सरिश्ता, सं. पुं. (फ़ा.-तह) अधिकरणं, न्यायालयः, दे. २. शासन-,विभागः ३. कार्यालयः ।
सरिश्तेदार, सं. पुं. (फ़ा,-तह्दार) शासन-, विभागाध्यक्षः, *पंजिकाध्यक्षः ।
सरिस, वि. (सं. सदृश, दे.)।
सरीखा, वि. (सं. सदृक्ष) सदृश, दे. ।
सरीसृप, सं. पुं. (सं.) सर्पणशीलो जंतुः २. अहिः, सर्पः ।
सरूप, वि. (सं.) साकार, रूप,-युक्त-अन्वित २. सदृश, तुल्य ३. सुंदर ।
सरूर, सं. पुं. (फ़ा. सुरूर) आनंदः, उल्लासः २. ईषन्म(मा)द्वः, आमत्तता ।
सरे दस्त, क्रि. वि. (फ़ा.) इदानीं, अधुना २. वर्तमाने, अस्मिन् काले ।
सरे बाज़ार, क्रि. वि. (फ़ा.) सर्व,-समक्षं-संमुखं २. प्रकाशं, प्रकटं, व्यक्तम् ।
सरेस, सं. पुं. (फ़ा. सरेश) संश्लेपकद्रव्यभेदः, *श्लेषः ।
सरो, सं. पुं. (फ़ा. सर्व) *सरुः, वृक्षभेदः ।
सरोकार, सं. पुं. (फ़ा.) संबंधः, संपर्कः २. अर्थः, प्रयोजनम् ।
सरोज, सं. पुं. (सं. न.) पद्मं, कमलं, दे. ।
सरोजिनी, सं. स्त्री. (सं.) कमलिनी, पद्मिनी, मृणालिनी २. पद्मवनं ३. कमलम् ।
सरोता, सं. पुं. (सं. सारपत्रं>) *पूग,-कर्तनी-छेदनी ।
सरोरुह, सं. पुं. (सं. न.) सरोजं, कमलं,दे. ।
सरोवर, सं. पुं. (सं.) दे. 'सर'[१] ।
सरोष, वि. (सं.) सकोप, रुष्ट, क्रुद्ध ।
सरोसामान, सं. पुं. (फ़ा. सर+व+सामान) सामग्री, परिच्छदः ।
सरोही, सं. स्त्री. (देश.) राजस्थानप्रदेशे पुरविशेषः २. (तत्र निर्मितः) खड्गः ।
सर्कस, सं. पुं. (अं.) (पशु-) क्रीडा,-अंगणं-(नं.)-रंगः-मण्डलम् ।
सर्ग, सं. पुं. (सं.) (काव्यादीनां) अध्यायः, परिच्छेदः, प्रकरणं २. सृष्टिः-जगदुत्पत्तिः

(स्त्री.) ३. संसारः, जगत् (न.) ४. स्वभावः, प्रकृतिः (स्त्री.) ५. संततिः (स्त्री.), संतानः ६. उद्गमः, मूलं ७. प्रवाहः, स्रावः ८. क्षेपणं, प्रासनं ९. प्राणिन् १०. प्रवृत्तिः (स्त्री.)।

सर्जन[1], सं. पुं. (सं. न.) सृष्टिः-जगदुत्पत्तिः (स्त्री.) २. विसर्जनं, दे.।

सर्जन[2], सं. पुं. (अं.) शस्त्रवैद्यः, शल्य-चिकित्सकः।

सर्जरी, सं. स्त्री. (अं.) शल्य,-चिकित्सा-शास्त्रं, शस्त्रवैद्यकं २. शल्यक्रिया।

सर्जि, सं. स्त्री. (सं.) सर्ज्जी, सर्ज्जिका, सर्ज्जि-सर्ज्जिका,-क्षारः, क्षारः, कापोतः, सौवर्चलं, रुचकं, दे. 'सज्जी'।

सर्जू, सं. स्त्री. दे. 'सरयू'।

सर्टिफ़िकेट, सं. पुं. (अं.) प्रमाणपत्रं, दे.।

सर्द, वि. (फ़ा. मि. सं. शरद>) शीत, शीतल दे. २. अलस, मंद ३. नपुंसक, निर्वीर्य ४. निःस्वाद, नीरस।

—ऋतु, सं. स्त्री. (फ़ा.+सं.) शरद् (स्त्री.) दे.।

—ख़ाना, सं. पुं., हिमगृहम्।

—मिजाज़, वि. (फ़ा.+अ.) निरुत्साह २. रूक्ष।

—होना, मु., मृ. (तु. आ. अ.) २. शीतली-मंदी,-भू।

सर्दी, सं. स्त्री. (फ़ा.) शीतं, शैत्यं, हिमः २. प्रतिश्यायः।

—का बुख़ार, सं. पुं., शीतज्वरः।

—खाना, मु., शीतपीडित (वि.) भू।

सर्प, सं. पुं. (सं.) अहिः, भुजगः, दे. 'साँप'।

—भक्षक, सं. पुं. (सं.) मयूरः।

—मणि, सं. पुं. (सं.) भुजगफणजः।

—याग, सं. पुं. (सं.) जनमेजयकृतो नागयज्ञः।

—राज, सं. पुं. (सं.) शेषनागः २. वासुकिः-केयः।

—लता, सं. स्त्री. (सं.) नागवल्ली, दे. 'पान'।

सर्पिणी, सं. स्त्री. (सं.) भुजगी, दे. 'सांपिन'।

सर्फ़, वि. (अ.) व्ययित, विनियोजित, दे. 'खर्च'।

सर्फ़ा, सं. पुं. (अ. सर्फ़ह्) व्ययः, विनियोगः २. मितव्ययः।

सर्राफ़, सं. स्त्री. (अ.) दे. 'सराफ़'।

सर्व, सर्व. (सं.) सकल, समस्त।

—काम्य, वि. (सं.) सर्व,-प्रिय-इष्ट।

—काल, अ० (सं.) सर्वदा, नित्यम्।

—कालीन, वि. (सं.) सार्वकालिक, सदातन।

—जनीन, वि. (सं.) सार्वजनिक, विश्वजनीन।

—जित्, वि. (सं.) विश्व,-जित्-विजेतृ २. उत्तम, श्रेष्ठ। (सं. पुं.) यज्ञभेदः २. मृत्युः।

—ज्ञ, वि. (सं.) सर्व-विश्व-वेत्तृ-विद्। (सं. पुं.) परमेश्वरः।

—ज्ञता, सं. स्त्री. (सं.) विश्ववेत्तृत्वम्।

—तंत्र, वि. (सं.) सर्वशास्त्रसंमत। (सं. न.) सर्वशास्त्रम्।

—तंत्रस्वतंत्र, वि. (सं.) सर्वशास्त्रपारग।

—दमन, सं. पुं. (सं.) भरतराजः, दुष्यंत-पुत्रः। वि. (सं.) सर्वाभिभावक।

—दर्शी, वि. (सं.-र्शिन्) विश्वद्रष्टृ।

—नाम, सं. पुं. (सं.-मन् (न.) शब्दभेदः (व्या.)।

—नाश, सं. पुं. (सं.) विध्वंसः, विनाशः, समूलोच्छेदः।

—नियंता, सं. पुं. (सं.-तृ) विश्वनियामकः, परमेश्वरः।

—प्रिय, वि. (सं.) विश्व,-प्रिय-इष्ट-वल्लभ।

—भक्षी, सं. पुं. (सं.-क्षिन्) सर्वभक्षकः २. अग्निः।

—भूत, सं. पुं. (सं. न.) चराचर, सर्वसृष्टिः (स्त्री.)।

—मेध, सं. पुं. (सं.) सोमयागभेदः २. सार्वजनिकसत्रम्।

—वल्लभा, सं. स्त्री. (सं.) कुलटा, पुंश्चली।

—व्यापक, वि. (सं.) विश्वव्यापिन्, विश्व-सर्व,-ग-गत।

—शक्तिमान्, वि. (सं.-मत्) सर्वसामर्थ्ययुत। (सं. पुं.) परमेश्वरः।

—श्रेष्ठ, वि. (सं.) सर्व-,उत्तम, प्रशस्ततम।

—साक्षी, सं. पुं. (सं.-क्षिन्) परमेश्वरः २. अग्निः ३. वायुः।

—साधारण, सं. पुं., जनाः, लोकाः, जनता, पृथग्-प्राकृत,-जनाः। वि. (सं.) साधारण, सामान्य।

—सामान्य, वि. (सं.) साधारण, प्राकृत, प्रायिक।

सर्वत्र, अव्य. (सं.) सर्वदिग्देशकाले ।
—ग, वि. (सं.) सर्वव्यापक ।
सर्वथा, अव्य. (सं.) सर्वप्रकारं-रेण २. सामस्त्येन ३. नितांतं, अत्यन्तम् ।
सर्वदा, अव्य. (स.) सदा, दे. ।
सर्वस्व, सं. पुं. (सं. न.) समस्तसंपद् (स्त्री.), समग्रद्रव्यं, निखिलधनम् ।
सर्वांग, सं. पुं. (सं. न.) समस्तशरीरं २. सर्ववेदांगानि (न. बहु.) ३. समग्रावयवाः (पुं. बहु.) ।
सर्वांगीण, वि. (सं.) सार्वदेहिक-सर्वांगिक (-की स्त्री.) ।
सर्वात्मा, सं. पुं. (सं.-त्मन्) परमात्मन्, ब्रह्मन् (न.) ।
सर्वाधिकार, सं. पुं. (सं.) पूर्णप्रभुत्वं, ऐकाधिपत्यम् ।
सर्वे, सं. पुं (अं.) सर्वेक्षणम्, भूमापनम् ।
सर्वेयर, सं. पुं. (अं.) सर्वेक्षकः, भूमापकः ।
सर्वेश्वर, सं. पुं. (सं.) सर्वेशः, परमेशः-श्वरः २. चक्रवर्तिन्, सार्वभौमः ।
सर्षप, सं. पुं. (सं.) दे. 'सरसों' ।
सलगम, सं. पुं., दे. 'शलगम' ।
सलज्ज, वि. (सं.) ह्रीमत्, लज्जाशील दे. ।
सलतनत, सं. स्त्री. (अ.) राज्यं २. साम्राज्यं ३. शासनम् ।
सलना, क्रि. अ. (सं. शल्यं) ब. 'सालना' के कर्म. के रूप ।
सलफ़, वि. (अ.) प्राचीन, पुरातन, पुराण । सं. पुं., पूर्वजाः, पूर्वपुरुषाः, पितरः (सभी बहु.) ।
सलब, वि. (अ. सल्ब) नष्ट, उच्छिन्न ।
सलवाई, सं. स्त्री. (हिं. सलवाना) वेधन,-शुल्कं-भृतिः (स्त्री.) ।
सलवाना, क्रि. प्रे., ब. 'सालना' के प्रे. रूप ।
सलहज, सं. स्त्री., दे. 'सरहज' ।
सलाई[१], सं. स्त्री. (सं. शलाका) धात्वादिनिर्मिता तनुयष्टिः (स्त्री.) २. दीपशलाका ।
सलाई[२], सं. स्त्री. (हिं. सालना) वेधः-धनं २. दे. 'सलवाई' ।
सलाख, सं. स्त्री. (फ़ा. मि. सं. शलाका) दे. 'सलाई' २. धातु-दंडः-यष्टिः (स्त्री.) ३. रेखा ।

सलाजीत, सं. स्त्री., दे. 'शिलाजीत' ।
सलाद, सं. पुं. (अं. सैलाड) शिग्रुखाद्यम् ।
सलाम, सं. पुं. (अ.) प्रणामः, दे. ।
—अलैक या अलैकम, प्रणामः, नमस्ते, नमस्कारः ।
दूर से—करना, मु. (अनिष्टं दुर्जनं वा दूरतः) परिहृ (भ्वा. प. अ.)-हा (जु. प. अ.) ।
सलामत, वि. (अ.) सुरक्षित, अक्षत, संकटमुक्त २. जीवत्, सजीव ३. स्वस्थ, नीरोग ४. विद्यमान, वर्तमान । क्रि. वि., सकुशलं, क्षेमेण ।
—रहना, क्रि. अ., स्वस्थ (वि.) जीव् (भ्वा. प. से.) कुशली वृत् (भ्वा. आ. से.) ।
सलामती, सं. स्त्री. (अ. सलामत) स्वास्थ्यं २. कुशलं, क्षेमः ।
—से, मु., ईश्वरकृपया ।
सलामी, सं. स्त्री. (अ. सलाम) नमस्क्रिया, अभिवादनं, २. सैनिक,-प्रणामः-प्रणतिः (स्त्री.)-नमस्कारः ३. अग्न्यस्त्रैः संमानना-संभावना ४. प्रवणं, निम्न-अवसर्पि,-भूमिः (स्त्री.) ।
—उतारना, मु., अग्न्यस्त्रैः संभू संमन् (प्रे.) ।
सलाह, सं. स्त्री. (अ.) अभिप्रायः, तर्कः, मतं-तिः (स्त्री.) २. परामर्शः, मंत्रणा ३. उपदेशः, मंत्रः ।
—करना, क्रि. अ., विचर (प्रे.), संमंत्र् (चु. आ. से.), परामृश् (तु. प. अ., तृतीया के साथ) उपदेशार्थं प्रच्छ् (तु. प. अ.) ।
—कार, स. पुं. (अ.+फ़ा.) उपदेष्टृ, मंत्रदः, परामर्शप्रदः, बुद्धिसहायः ।
—देना, क्रि. स., उपदिश् (तु. प. अ.), अनुशास् (अ. प. से.), मंत्र् (चु. उ. से.) ।
—ठहरना, मु., सर्वैः निश्चि-निर्णी (कर्म.), सांमत्यं जन् (दि. आ. से.) ।
सलिल, सं. पुं. (सं. न.) अंबु, वारि, जलं दे. ।
—निधि, सं. पुं. (सं.) सागरः, समुद्रः दे. ।
सलिलाहार, वि. (सं.) सलिल-जल-नीर,-अशन-भोजन । सं. पुं. (सं.) जल-नीर,-अशनम्-आहारः ।
सलीका, सं. पुं. (अ.) कौशलं, दाक्ष्यं, वैदग्ध्यं, चातुर्यं २. समय-शिष्ट,-आचारः, शिष्टता ३. आचारः, चरित्रं, व्यवहारः ४. सभ्यता ।

—मंद, वि. (अ.+फ़ा.) दक्ष, कुशल, विदग्ध, चतुर २. शिष्ट, शिष्टाचारिन् ३. सभ्य ।

सलीस, वि. (अ.) सुगम, सुबोध २. दे. 'मुहावरेदार' ।

सलूक, सं. पुं. (अ.) व्यवहारः, वृत्तिः (स्त्री.), वर्तनं २. स्नेहः, सद्भावः ३. उपकारः ।

सलूना, वि. (सं. सलवण) ल(ला)वण, लावणिक । सं. पुं., व्यंजनं, दे. 'भाजी' ।

सलोतर, सं. पुं. (सं. शालिहोत्रः>) १-२, पशु-अश्व,-चिकित्सा ।

सलोतरी, सं. पुं. (हिं. सलोतर) १-२. पशु-अश्व,-चिकित्सकः-वैद्यः ।

सलोना, वि. (सं. सलवण) दे. 'सलूना' वि. २. सुन्दर, लावण्यमय, छविमत् ३. स्वादु, सरस ।

सलोनो, सं. स्त्री. (सं. श्रावणी) ऋषितर्पणी, रक्षाबंधनं दे. ।

सवन, सं. पुं. (सं. न.) यज्ञस्नानं २. सोमपानं ३. यज्ञः ४. प्रसवः ।

सवर्ण, वि. (सं.) तुल्य-समान-स-एक,-जाति-जातीय-वर्ण २. सदृश, समान, तुल्य ।

सवा, वि. (सं. सपाद) पादाधिक, पादोर्ध्व ।

सवाब, स. पुं. (अ.) पुण्यं, सुकृतफलं २. हितं, उपकारः ।

सवाया, वि., दे. 'सवा' ।

सवार, सं. पुं. (फ़ा.) सादिन्, तुरगिन्, अश्व,-आरोहः-आरोहिन् । वि., आरूढ़, अधिरूढ़, उपर्यासीन ।

—होना, क्रि. स. (अश्वादिकं) अधि-अध्या-आ-समा-रुह् (भ्वा. प. अ.), अधिस्था (भ्वा. प. अ.), अध्यास् (अ. आ. से.) ।

सवारी, सं. स्त्री. (फ़ा.) अधि-अध्या-आ,-रोहणं, आ,-रोहः-रूढं, (रथादिभिः) संचरणं-विहरणं २. यानं, वाहनं ३. आरोहकः, आरोहिन्, यात्रिन्, यात्रिकः ४. यात्रा, दे. 'जलूस' ।

—करना, क्रि. अ., अश्वादिभिः गम्-या (अ. प. अ.) ।

सवाल, सं. पुं. (अ.) अनुयोगः, प्रश्नः दे. । २. निवेदनं, प्रार्थना ३. भिक्षायाच्ञा ४. गणित-प्रश्नः ५. प्रार्थनाविषयः ।

—जवाब, सं. पुं. (अ.) प्रश्नोत्तरं २. वाद-प्रतिवादः ३. कलहः ।

—जवाब करना, मु., विवद् (भ्वा. आ. से.), विचर् (प्रे.), तर्क् (चु.), ऊहापोहं कृ ।

सवालिया, वि. (अ. सवाल>) प्रश्नात्मक, पृच्छापर ।

सवाली, वि. (अ. सवाल>) याचक, भिक्षुक, अर्थिन् ।

सविकल्प, वि. (सं.) संशय-संदेह-विकल्प,-युक्त, संदिग्ध २. साशंक, संशयान, संदिहान । सं. पुं. (सं.) समाधिभेदः ।

सविता, सं. पुं. (सं.-तृ) सूर्यः, भानुः ।

सवित्री, सं. स्त्री. (सं.) साविका, दे. 'दाई' २. जननी ३. गौः (स्त्री.) ।

सवेरा, सं. पुं. [सं. सुवेला>(स्त्री.)] अरुणोदयः, अहर्मुखं, प्रातःकालः, दे. विलम्ब-चिरता-चिरत्व,-अभावः ।

सवैया, सं. पुं. (हिं. सवा) मालिनी, छंदोभेदः २. सपादसेरात्मकं भारमानं ३. सपादगुणन-सूची ।

सव्य, वि. (सं.) वाम, दे. 'बायाँ' २. दक्षिण (कभी ही) ३. विरुद्ध, प्रतिकूल ।

—साची, सं. पुं. (सं.-चिन्) अर्जुनः ।

सशंक, वि. (सं.) दोलायमानं, संशयापन्न, संशयान २. भीत, उद्विग्न, त्रस्त ३. भीम, भयंकर ।

ससुर, सं. पुं. (सं. श्वशुरः) पतिपितृ २. जाया-जनकः ३. (गाली) दुष्टः, शठः, खलः ।

ससुराल, सं. स्त्री. (सं. श्वशुरालयः) १-२. पति-पत्नी,-पितृगृहं, श्वशुरगृहम् ।

ससुरी, सं. स्त्री. (हिं. ससुर) श्वश्रूः (स्त्री.), दे. 'सास' २. दुष्टा, पापा ।

सस्ता, वि. (सं. स्वस्थ>) अल्प,-अर्घ-मूल्य, सुखक्रेय २. सुलभ ३. सामान्य, साधारण, अवर ।

—होना, क्रि. अ., अल्पमूल्य-सुखक्रेय (वि.) भू ।

सस्ते छूटना, मु., स्तोकात् मुच् (कर्म.) ।

सस्य, सं. पुं. (सं. न.) शस्यं, धान्यं, व्रीह्यं, व्रीहिः, स्तंबकरिः २. वृक्षादीनां फलम् ।

सह, अव्य. (सं.) साकं, सार्धं, समं, सहितं (सब तृतीया के साथ) दे. 'साथ' ।

—कार, सं. पुं. (सं.) आम्रः, आम्रं २. सहायकः ३. सहयोगः ।

—कारिता, सं, स्त्री. (सं.) सहयोगिता २, सहायता ।

—कारी, सं. पुं. (सं.-रिन्) सह,-कृत्-कृत्वन्-योगिन्, सव्यवसायिन् २. सहायकः ।
—गमन, सं. पुं. (सं. न.) सह,-चरणं-व्रजनं २. पतिशवेन सह ज्वलनं, सह,-मरणं-अनुगमनम् ।
—गामिनी, सं. स्त्री. (सं.) सहमृता, पत्या सह ज्वलिता नारी २. पत्नी ३. सहचरी ।
—गामी, सं. पुं. (सं.-मिन्) संगिन्, सह,-चरः-चारिन्-यायिन्-वर्तिन् २. अनुयायिन् ।
—चर, सं. पुं. (सं.) दे. 'सहगामी' (१) । २. सेवकः ३. सखि, मित्रम् ।
—चरी, सं. स्त्री. (सं.) पत्नी, भार्या २. सखी, वयस्या ३. सहगामिनी, संगिनी ।
—चार, सं. पुं. (सं.) दे. 'सहगामिन्' (१) । २. संगः, संगतिः (स्त्री.) ।
—चारिणी, सं. स्त्री. (सं.) दे. 'सहचरी'(१-३)।
—चारी, सं. पुं. (सं.-रिन्) दे. 'सहगामिन्' (१) । २. सेवकः, अनुचरः ।
—जात, वि. (सं.) सहजन्मन्, यमज २. सोदर, सहोदर ।
—जीवी, वि. (सं.-विन्) समकालीन २. महवासिन् ।
—धर्मिणी, सं. स्त्री. (सं.) सहधर्म,-चरी-चारिणी, धर्मपत्नी ।
—पाठी, सं. पुं. (सं.-ठिन्) सह,-अध्यायिन्-पाठकः ।
—भोज, सं. पुं. (सं.) सन्धिः (स्त्री.), सहभक्षणं, संभक्षः ।
—भोजी, सं. पुं. (सं.-जिन्) सहभक्षकः ।
—मत, वि. (सं.) एक,-मत-चित्त, संवादिन्, संप्रतिपन्न ।
—योग, सं. पुं. (सं.) सह,-कारः-कारिता-योगिता २. संगतिः (स्त्री.) ३. सहायता ।
—योगी, सं. पुं. (सं.-गिन्) दे. 'सहकारी' (१-२) ३. समवयस्क ४. समकालीन ।
—वाद, सं. पुं. (सं.) वादप्रतिवादः, हेतु-,वादः।
—वास, सं. पुं. (सं.) सहवसतिः (स्त्री.) २. संगः ३. मैथुनम् ।
—वासी, सं. पुं. (सं.-सिन्) सहवासकृत २. दे. 'सहगामी' ।
सहज, वि. (सं.) सुगमं, सरल, सुकर २. सहजात, दे. ३. स्वाभाविक, प्राकृतिक ४. साधारण । क्रि. वि., सौकर्येण, सुखम् ।
—पथ, सं. पुं. (सं. सहज+पथिन्>) सहजपथनामा वैष्णवसंप्रदायविशेषः ।
—मित्र, सं. पुं. (सं. न.) स्वाभाविकसुहृद् २. भागिनेयः ३. भ्रातृष्वसेयः ४. पैतृष्वसेयः ।
—शत्रु, सं. पुं. (सं.) स्वाभाविकशत्रुः, सहजारिः २. पितृव्यपुत्रः ३. वैमात्रेयभ्रातृ ।
सहजन, सं. पुं., दे. 'सहिजन' ।
सहजिया, सं. पुं. (सं. सहज>) सहजमतानुयायिन् ।
सहदेव, सं. पुं. (सं.) पांडुराजस्य पंचमपुत्रः ।
सहन[1], सं. पुं. (सं. न.) सहिष्णुता, मर्षः, मर्षणं २. क्षमा, तितिक्षा, क्षांतिः (स्त्री.) ।
—करना, क्रि. अ. दे., 'सहना' ।
—शील, वि. (सं.) सहिष्णु, तितिक्षु २. क्षमिन्, क्षमितृ, सहन ।
—शीलता, सं. स्त्री. (सं.) दे. 'सहन' (१-२) ।
सहन[2], सं. पुं. (अ.) अंगनं, प्रांगणं, अजिरं, चत्वरम् ।
सहना, क्रि. अ. (सं. सहनं) क्षम्,सह् (भ्वा. आ. से.), तिज् (सन्नन्त, तितिक्षते), मृष् (दि. प. से., चु.) । सं. पुं. तथा भाव, सहनं, सहिष्णुता, सहनशीलता, क्षमा, मर्षणं, क्षान्तिः (स्त्री.), तितिक्षा ।
सहनीय, वि. (सं.) मर्षणीय, सह्य, सोढव्य, क्षमार्ह, क्षन्तव्य ।
सहने वाला, सं. पुं., सोढृ, क्षन्तृ,-सहः ।
सहम, सं. पुं. (फ़ा.) भयं, त्रासः २. संकोचः, दे. 'लिहाज़' ।
सहमना, क्रि. अ. (फ़ा. सहम) दे. 'डरना' ।
सहर, सं. स्त्री. (अ.) उषा, प्रभातम् ।
सहरा, सं. पुं. (अ.) मरुः, मरु,-स्थलं-भूमिः (स्त्री.) २. वनं, निविडकाननम् ।
सहरी, सं. स्त्री. (सं. शफरी) मीनभेदः ।
सहल, वि. (अ.) सरल, सुगम, सुकर, सुसाध्य ।
सहला(रा)ना, क्रि. स. (हिं-सहर = धीरे अथवा अनु०) मृद् (क्र्. प. से.), घृष् (भ्वा. प. से.) । सं. पुं. अंगमर्दनं, संवाहनम् ।
सहसा, अव्य. (सं.) अकस्मात्, एकपदे, अकांडे-डे, अतर्कितं, झटिति (सब अव्य.) ।
सहस्र, वि. (सं. न.) दशशतं-तकम् । सं. पुं., दशशतसंख्या २. तद्बोधकांकाश्च (१०००) ।

—कर, सं. पुं. (सं.) सहस्र,-किरणः-रश्मिः, सूर्यः ।

—दल, सं. पुं. (सं. न.) सहस्रपत्रं, कमलम् ।

—नयन, सं. पुं. (सं.) सहस्र,-लोचनः-नेत्रः-दृश् ।

—नाम, सं. पुं. [सं.-मन् (न.)] सहस्र-नामयुतं देवस्तोत्रम् ।

—बाहु, सं. पुं. (सं.) शिवः, २. कार्तवीर्योऽर्जुनः, नृपविशेषः ३. बलिनृपस्य ज्येष्ठसुतः ।

सहस्रांशु, सं. पुं. (सं.) सूर्यः ।

सहस्राक्ष, सं. पुं. (सं.) इन्द्रः २. विष्णुः ।

सहाइ-ई, सं. पुं. (सं. सहायः) सहायकः दे. ।

सहाध्यायी, सं. पुं. (सं.-यिन्) दे. 'सहपाठी'।

सहानुभूति, सं. स्त्री. (सं.) समवेदनं-ना, समदुःख(खि)ता २. समदुःखसुखता ।

—करना या दिखाना, क्रि. अ., सहानुभूतिं प्रकटयति (ना. धा.), प्रकाश् (प्रे.) ।

सहाय, सं. पुं. (सं.) सहायकः, दे. २. सहायता, दे. ३. आश्रयः ।

सहायक, वि. (सं.) सहायः, उप,-कर्तृ-कारिन्-कारकः, साहाय्यदः. अभिसरः, अनु,-चरः-प्लवः २. उप–, (उ. उपमंत्री) ।

सहायता, सं. स्त्री. (सं.) साहाय्यं, उप,-कारः-कृतं-कृतिः (स्त्री.) २. अनुग्रहः ।

—करना, क्रि. स., साहाय्यं कृ, सहायकः भू, उपकृ (षष्ठी के साथ), अनुग्रह् (क्र्. प. से.)।

सहारना, क्रि. स. (हिं. सहारा) दे. 'सहना' २. धृ (चु.), भृ (जु. उ. अ.) ३. उत्तम्भ्-उपस्कम्भ् । (क्र्. प. से.) । सं. पुं., दे. 'सहना' सं. पुं. २. धारणं, उत्तम्भनं, उपस्तम्भः ।

सहारा, सं. पुं. (सं. सहाय>) दे. सहायता (१) २. आश्रयः, अवलंबः, अवष्टंभः ३. विश्वासः, प्रत्ययः, विश्रंभः ।

—देना, क्रि. स., साहाय्यं कृ, उपकृ २. उत्तंभ्-उपस्तम्भ् (क्र्. प. से.) ३. शरणं-आश्रयं दा, गुप् (भ्वा. प. से.) ४. समाश्वस् (प्रे.) ।

—ढूंढ़ना, मु., आश्रयं अन्विष् (दि. प. से.)।

सहिजन, सं. पुं. (सं. शोभांजनः) तीक्ष्णगंधः, सु-,तीक्ष्णः, रुचिरांजनः ।

सहित, वि. (सं.) समेत, युक्त, संगत, अन्वित, दे. 'साथ' तथा 'सह' । क्रि. वि., साकं, सार्धं, समं, सह ।

सहिष्णु, वि. (सं.) सहनशील, दे. ।

सहिष्णुता, सं. स्त्री. (सं.) सहनशीलता, दे. ।

सही, वि. (फ़ा. सहीह) सत्य, यथार्थ २. प्रामाणिक ३. शुद्ध, निर्दोष ।

सहीफ़ा, सं. पुं. (अ.) ग्रन्थः, पुस्तकम् २. धर्म,-ग्रन्थः-पुस्तकम् ३. पत्रम् ४.पत्रिका ।

—सलामत, वि. (हिं+अ.) स्वस्थ, नीरोग २. संपूर्ण, निर्दोष, त्रुटिरहित ।

सहूलियत, सं. स्त्री. (फ़ा.) सुकरता, सुगमता २. शिष्टाचारः ।

सहृदय, वि. (सं.) समवेदना-सहानुभूति,-युक्त २. दयालु ३. रसिक ४. भद्र, महाशय ५. सत-साधु,-स्वभाव ६. प्रसन्नमनस्क, आनंदिन् ।

सहृदयता, सं. स्त्री. (सं.) समवेदना, सहानुभूतिः (स्त्री.) २. सज्जनता, सौजन्यं ३. रसिकता-त्वं ४. अनुक्रोशः, दयालुता ।

सहेजना, क्रि. स. (अ. सही+हिं. जांचना) सम्यक् परीक्ष्-निरीक्ष् (भ्वा. आ. से.) सुष्ठु बोधयित्वा प्रतिपद् (प्रे.)-दा ।

सहेली, सं. स्त्री. (सं. सह+हेलनं>) सखी, आली-लिः (स्त्री.), संगिनी २. परिचारिका, अनुचरी ।

सहोक्ति, सं. स्त्री. (सं.) अर्थालंकारभेदः (सा.)।

सहोदर, सं.पुं. (सं.) सोदरः, सोदर्य्यः, सहजः, सगर्भः, समानोदर्य्यः, भ्रातृ ।

सह्य, वि. (सं.) सहनीय, दे. । सं. पुं. (सं.) सह्याद्रिः ।

साँई, सं. पुं. (सं. स्वामिन्) प्रभुः, ईशः, अधिकारिन् २. परमात्मन्, परमेश्वरः ३. पतिः, भर्तृ ४. यवनभिक्षुः ।

सांकड़, सांकल, सं. स्त्री. (सं. शृङ्खला, दे.) ।

सांकेतिक, वि. (सं.) संकेतात्मक, लाक्षणिक, संकेत,-सम्बन्धिन्-विषयक ।

सांख्य, सं. पुं. (सं. पुं. न.) महर्षिकपिल-प्रणीतो दर्शनग्रन्थविशेषः ।

सांग[1], सं. पुं., दे. 'स्वांग' ।

सांग[2], सं. स्त्री. (सं. शक्तिः) काशूः-सूः (दोनों स्त्री.), अस्त्रभेदः ।

सांग[3], वि. (सं.) संपूर्ण, सर्वांगयुत ।

सांगी, सं. स्त्री. (हिं. सांग) दे. 'सांग[2]' २. शकटवाहकासनं, युगः-गं ३. शकटाधोवर्तिजालकम् ।

सांगोपांग, वि. (सं.) अंगोपांगयुक्त, सं,-पूर्ण, समग्र, समस्त ।

साँच, वि. (सं. सत्य) अवितथ, यथार्थ ।

साँचा, सं. पुं. (सं. स्थातृ) आकारसाधनं, संस्थानं, संस्थानपुरः २. दे. 'छापा' ।

साँचे में ढला होना, मु., सर्वांगसुंदर (वि.) वृत् (भ्वा. आ. से.) ।

साँझ, सं. स्त्री. (सं. संध्या) सायंकालः, दे. ।

साँझा, सं. पुं., दे. 'साझा' ।

साँट, सं. स्त्री. (अनु. सट) सूक्ष्म-तनु,-दंडः-यष्टिः (स्त्री.) २. कशः-शा ३. यष्टि-कशा,-प्रहारचिह्नं, *नीलं ४. कंडनी ।

सांठी, सं. स्त्री. (हिं. गांठ का अनु.) मूलधनं, दे. 'पूँजी' ।

सांड-ड़, सं. पुं. (सं. पंडः) श(षं)ढः, गोपतिः, वृषन्, वृषभः २. दिवंगतस्मृत्यामुत्सृष्टोऽकितो वृषभः ३. वृषणाश्वः, वृषन् । वि., दृढांग, बलिन् २. स्वैरिन्, दुराचारिन् ।

साँड(ड़)नी, सं. स्त्री. (हिं. सांड) उष्ट्री, दे. 'ऊंटनी' ।

—सवार, सं. पुं. (हि.+फ़ा.) उष्ट्र,-आरोहः-आरोहिन् २. उष्ट्र-क्रमेलक,-वाहकः ।

साँडा, सं. पुं. (सं. शयानकः) कृकलाशः-सः, क्रकचपादः, प्रतिसूर्यः, सरटः-डुः, गोधिका, चित्रकोलः ।

सांत, वि. (सं.) अंतवत्, नश्वर, नाशवत् ।

सांत्वना, सं. स्त्री. (सं.) सांत्वः-त्वनं, आसमा,-श्वासनं २. शमः, शांतिः (स्त्री.), ३. प्रणयः ।

—देना, क्रि. स., सां(शां)त्व् (चु.), आसमा,-श्वस् (प्रे.), शोकं शम् (प्रे.) ।

सांद्र, सं. पुं. (सं.) वनं २. राशिः । वि. (सं.) घन, निबिड, सुसंहत ।

सांद्रता, सं. स्त्री. (सं.) निबिडता, घनता इ. ।

सांधिविग्रहिक, सं. पुं. (सं.) सन्धियुद्धमंत्रिन् ।

सांध्य, वि. (सं.) संध्या,-सम्बन्धिन्-विषयक, वैकालिक, वैकालीन ।

सांनिध्य, सं. पुं. (सं. न.) सामीप्यं, निकटता २. मोक्षभेदः ।

सांप, सं. पुं. (सं. सर्पः) भुज(जं)गः, भुजंगमः, अहिः, फण-विष,-धरः, व्यालः, सरीसृपः, आशीविषः, कुंडलिन्, चक्षुःश्रवस्, फणिन्, विलेशयः, उरगः, पन्नगः, पवनाशनः, दंष्ट्रिन्, द्वि,-जिह्वः-रसनः, पृदाकुः, चक्रिन्, दंदशूकः, भोगिन्, गूढपाद्-दः, दीर्घपृष्ठः, जिह्मगः । (धब्बोंवाला सांप) मातुलाहिः, मालुधानः । (धारीदार सांप) राजि(जी)लः । (फनियर साँप) भोग-फण,-भृत्-धरः, फणिन्, भोगिन् ।

—की लहर, मु., अहिदंशव्यथा ।

—के मुँह में, मु., महासंकटे ।

—छछूँदर की दशा, मु., द्वैधीभाव, दोलावृत्तिः (स्त्री.), संदेहः ।

—सूँघ जाना, मु., सर्पेण दंश् (कर्म.), मृ (तु. आ. अ.) ।

कलेजे पर—लोटना, मु. (ईर्ष्यादिभिः) मनोऽत्यंतं संतप् (कर्म.) ।

सांपत्तिक, वि. (सं.) आर्थिक, दे. ।

सांपिन, सं. स्त्री. (हिं. सांप) सर्पिणी, सर्पी, पन्नगी, उरगी, भुजगी इ. ।

सांप्रत, अव्य. (सं.-तं) अधुनैव, इदानीमेव, सद्यः, संप्रति । वि. (सं.) उचित, योग्य, २. प्रासंगिक, प्रास्ताविक ।

सांप्रदायिक, वि. (सं.) शाखागत, संप्रदायधर्म-मत,-विषयक-संबंधिन् २. परंपरीण, क्रमागत ।

सांब, सं. पुं. (सं.) श्रीकृष्णपुत्रः ।

सांभर, सं. पुं. (सं. सांबरं) संबरोद्भवं, रौमकं, वसुकं २. राजपुत्रस्थानप्रदेशे कासारविशेषः ।

सांमुख्य, सं. पुं. (सं. न.) दे. 'सामना'(२) ।

साँय साँय, सं.स्त्री.(अनु.)दे. 'सनसनाहट'(१)।

साँवला, वि. (सं. श्यामल) कृष्ण, श्याम २. ईषच्छ्याम, आकृष्ण ३. कृष्णनील । सं. पुं., श्रीकृष्णः २. पतिः ३. प्रेमिन्, प्रणयिन् ।

साँवलापन, सं. पुं. (हिं. साँवला) श्यामलता, श्यामता, आ-,कृष्णता, कृष्णनीलता ।

साँवाँ, सं. पुं. (सं. श्यामाकः) श्यामः-मकः, त्रिबीजः, अविप्रियः ।

साँस, सं. स्त्री. [सं. श्वासः (पुं.)] उच्छ्वासः, उच्छ्वसितं, नि(निः)श्वासः, निः(नि)श्व-सितं, आनः, आहरः, पतनः, असवः-प्राणाः (दोनों पुं. बहु.) २. दीर्घश्वासः, निश्वासः, उच्छ्वासः ३. विरामः; विश्रामः ४. स्फोटः, भंगः ५. श्वासरोगः, दे. 'दमा' ।

—रुकना, क्रि. अ., श्वासः निरुध् (कर्म.) ।
—लेना, क्रि. अ., अन्-प्राण्-श्वस् (अ. प. से.) २. जीव् (भ्वा. प. से.) ३. विश्रम् (दि. प. से.) विरम् (भ्वा. प. अ.) ।
—उखड़ना, मु., (निधनकाले) कृच्छ्र-कष्टं श्वस् ।
—खींचना, मु., श्वासमंतः निरुध् (रु.प.से.) ।
—चढ़ना या—फूलना, मु., सवेगं प्राण् ।
—तक न लेना, मु., मौनं आकल् (चु.) ।
—रहते, मु., यावज्जीवं-वनं, आमृत्योः ।
गहरी या लंबी—लेना, मु., दीर्घं श्वस् ।
सांसारिक, वि. (सं.) ऐहिक, लौकिक, प्रापंचिक, व्यावहारिक ।
सा, वि. (सं. सदृश) सम, समान, तुल्य, सदृश २. इव, मात्रं (उ. थोड़ा सा=किंचिदिव, किंचिन्मात्रं) ३. आ,-ईषत् (उ. काला सा=आ-ईषत्,-कृष्ण) ।
साइक्लोपीडिया, सं. स्त्री. (अं.) (विषयविशेष-निरूपकः) बृहद्ग्रंथः २. विश्वकोशः-पः ।
साइत, सं. स्त्री. (अ. साअत) होरा, दे. 'घंटा' २. पलं, क्षणः-णं ३. मंगलमुहूर्तः, शुभलग्नम् ।
साइनबोर्ड, सं. पुं. (अं.) चिह्नपट्टः-ट्टम् ।
साइन्स, सं. स्त्री. (अं.) विज्ञानं, शास्त्रं २. रासायनिकविज्ञानं भौतिकविज्ञानं च ।
साइफ़न, सं. स्त्री. (अं-) उत्क्षेपणनाली ।
साई, सं. स्त्री., दे. 'पेशगी' ।
साईस, सं. पुं. (रईस का अनु.) अश्व,-सेवकः-पालः-पालकः-रक्षकः, यावासिकः ।
साईसी, सं. स्त्री. (हिं. साईस) अश्वसेवा, अश्वसेवकत्वम् ।
साक, सं. पुं., दे. 'साग' ।
साकांक्ष, वि. (सं.) इच्छु, इच्छुक, आकांक्षिन् , अभिलाषिन् ।
साका, सं. पुं. (सं. शाकः) संवत् (अव्य.), दे. २. यशस् (न.), कीर्तिः-ख्यातिः (स्त्री.) ३. कीर्ति,-चिह्नं-स्मारकं ४. आतंकः, प्रभावः ५. कीर्तिकरं कर्मन् (न.) ।
साकार, वि. (सं.) आकारवत्, आकृतिमत्, रूपवत् २. स्थूल, मूर्त्त ३. मूर्तिमत्, वपुष्मत्, देहधारिन् ।
साकारोपासना, सं. स्त्री. (सं.) मूर्त्यादिभिः प्रभुपूजनं,-मूर्त्तिपूजा ।
साकिन, वि. (अ.) नि,-वासिन् , वास्तव्य ।
साक़ी, सं. पुं. (अ.) सुरापरिवेषकः २.वल्लभः, प्रेमपात्रं, दे. 'माशूक़' ।
साकूत, वि. (सं.) सार्थक. अर्थवत्, साभिप्राय, सप्रयोजन ।
साकेत, सं. पुं. (सं. न.) अयोध्या, दे. ।
साक्षर, वि. (सं.) शिक्षित, अक्षर,-ज्ञ-अभिज्ञ ।
साक्षात् , अव्य. (सं.) पुरतः, अग्रतः, समक्षं, प्रत्यक्षम् । वि., मूर्तिमत्, साकार, विग्रहवत् । सं. पुं., सं-समा,-गमः, मेलः, संमिलनम् ।
—करना, क्रि. स., साक्षात् कृ. स्वचक्षुर्भ्यां दृश् (भ्वा. प. अ.), निजेन्द्रियैः अवगम् ।
—कार, सं. पुं. (सं.) दे. 'साक्षात्' । सं. पुं. २. प्रत्यक्षं, इंद्रियार्थसंनिकर्षजं ज्ञानम् ।
साक्षी, सं. पुं. (सं.-क्षिन्) दे. 'गवाह' २. द्रष्टृ, प्रेक्षकः । सं. स्त्री., साक्ष्यम् ।
साक्ष्य, सं. पुं. (सं. न.) साक्षिता-त्वं, दे. 'गवाही' २. दृश्यम् ।
साख, सं. स्त्री. (हिं. साका) प्रभावः, वशः-शं, आतंकः २. (हट्टे) प्रतिष्ठा, प्रत्ययः, विश्वसनीयता ।
साग, सं. पुं. (सं. शाकः-कं) शि(सि)ग्रु, ह(हा)रितकं २. व्यंजनं, अन्नोपस्करः, दे. 'भाजी' ।
—पात, सं. पुं., शाकपत्रं, कंदमूलं २. साधारण-नीरस,-भोजनम् ।
सागर, सं. पुं. (सं.) समुद्रः, दे. २. महा,-ह्रदः-तटाकः(-कम्) ।
सागवान, सं. पुं., दे. 'सागौन' ।
सागू, सं. पुं. (अं. सैगो) *सागुः, वृक्षभेदः ।
—दाना, सं. पुं. (हिं.+फ़ा.) *सागुदानः ।
सागौन, सं. पुं. (सं. शाकवनं>) गृहद्रुमः, श्रेष्ठकाष्ठः, शाकः, शाक,-तरुः-वृक्षः, अर्णः ।
साज़, सं. पुं. (फ़ा., मि. सं. सज्जा) सामग्री, उपकरणं २. (अश्व–) सज्जा-संनाहः ३. वाद्यं, वादित्रं ४. अस्त्रशस्त्रं ५. सुपरिचयः, प्रगाढसख्यम् । वि. (फ़ा.)-कारः २. प्रतिसमाधातृ । (उ. घड़ीसाज़=घटीकारः, घटीप्रतिसमाधातृ) ।
—बाज, सं. स्त्री., सुपरिचयः ।
—सामान, सं. पुं., सामग्री, उपकरणं, परिच्छदः २. दे. 'ठाठबाट' ।
साजन, सं. पुं. (सं. सज्जनः) भद्रजनः, आर्यः, सत्पुरुषः २. पतिः ३. वल्लभः ४. परमेश्वरः ।

साजना, क्रि. स., दे. 'सजाना'।

साज़िंदा, सं. पुं. (फ़ा.) वाद्य-वादित्र-,वादकः।

साज़िश, सं. स्त्री. (फ़ा.) दे. 'षड्यंत्र'।

साझा, सं. पुं. (सं. साहाय्यं >) अंशिता, भागिता, भागधरत्वं २. अंशः, भागः।

साझी, सं. पुं. (हिं. साझा) दे. 'साझेदार'।

साझेदार, सं. पुं. (हिं. साझा) अंशकः, अंशिन्, भागधरः, अंशयितृ।

साझेदारी, सं. स्त्री. (हिं. साझेदार) दे. 'साझा' (१)।

साटन, सं. पुं. (अं. सैटिन) *साटनं, कौशेय-वस्त्रभेदः।

साटा, सं. पुं. (देश.) विनिमयः, परिवर्तः।

साठ, वि. [सं. षष्टिः (नित्य स्त्री.)] सं. पुं. उक्ता संख्या तद्बोधकांकौ (६०) च।

साठवाँ, वि. (हिं. साठ) षष्टितमः-मी-मं (पुं. स्त्री. न.)।

साठा, वि. (हिं. साठ) षष्टिवर्ष।

साठी, सं. पुं. (सं. षष्टिकः-का) स्निग्धतंडुलः, षष्टिजः।

साड़ी, सं. स्त्री. (सं. शाटी) नारीवस्त्रभेदः।

साढ़साती, सं. स्त्री. (हिं. साढ़े+सात) सार्द्धसप्तवर्ष(-मास-दिवस-)वर्तिनी शनिदशा।

—आना या—चढ़ना, मु., दुर्दिनानि आपत् (भ्वा. प. से.)।

साढ़ू, सं. पुं. (सं. श्यालीधवः) श्यालीपतिः, जायानशिकः।

साढ़े, वि. (सं. सार्ध) अध्यर्ध।

सात, वि. (सं. सप्तन्) सं. पुं., उक्ता संख्या, तद्बोधकांकश्च (७)।

—गुना, वि., सप्त,-गुण-गुणित।

—प्रकार का, वि., सप्त,-विध-प्रकार।

—फेरी, सं. स्त्री., दे. 'भाँवर'।

—पांच, मु., शाठ्यं, कापट्यम्।

—पांच करना, मु., प्रतृ-वंच् (प्रे.), विप्रलभ् (भ्वा. आ. अ.)।

—पुश्तों से, मु., अनादिकालात्।

—समुद्र पार, मु., अति,-दूरं-दूरे।

सातवाँ, वि. (हिं. सात) सप्तमः-मी-मं (पुं. स्त्री. न.)।

सात्यकि, सं. पुं. (सं.) यादवयोधविशेषः, श्रीकृष्णसारथिः।

सात्विक, वि. (सं. सात्त्विक) १-३. सत्त्वगुण,-संबंधिन्-निष्पादित-प्रधान ४. शुद्धात्मन्, निष्कपट, ऋजु, सरल। सं. पुं. (सं.) सत्त्व-गुणजा अष्टप्रकारा भावाः (=स्वेदः स्तंभोऽथ रोमांचः स्वरभंगोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः, सा.)।

साथ, अव्य. (सं. सहितं) सह, साकं, सार्धं, समं, तृतीया से भी (उ. क्रोध के साथ=क्रोधेन इ.), स-, -पूर्वकं, -पुरःसरं (उ. आदर के साथ=सादरं, आदर,-पूर्वकं-पुरःसरं इ.), सं-, (उ. साथ रहना=संवासः)। सं. पुं. संगः, संगतिः (स्त्री.) सहचारः, साहचर्य्यं, संसर्गः।

—का, मु., व्यंजनं, अन्नोपस्करः।

—छूटना, मु., विश्लिष् (दि. प. अ.), व्यप-इ. (अ. प. अ.)।

—देना, मु., साहाय्यं कृ २. रक्ष् (भ्वा. प. से.) ३. सह या (अ. प. अ.)।

—ही, मु., अपरं च, अन्यच्च, अपि च, किं च, -अतिरिक्तम्।

एक—, मु., युगपत्, समकालं-ले, यौगपद्येन २. संभूय, मिलित्वा।

साथिन, सं. स्त्री. (हिं. साथी) सहचरी २. सखी।

साथी, सं. पुं. (हिं. साथ) संगिन्, सहचरः २. मित्रं, सखि (पुं.)।

सादगी, सं. स्त्री. (फ़ा.) साधुता, सरलता, आर्जवं, निष्कापट्यं २. आडंबरहीनता।

सादर, वि. (सं.) सगौरव, सविनय। क्रि. वि. (सं.-रं) सप्रश्रयं, सविनयम्।

सादा, वि. (फ़ा.-दः) निष्कपट, निश्छल, सरल, ऋजु, माया,-रहित, निर्व्याज, शुद्धात्मन् २. अज्ञ, मूर्ख ३. श्वेत, रंग-वर्ण,-हीन ४. अक्ष-रांकादिरहित, रेखारहित ५. शुद्ध, केवल ६. अलंकाररहित ७. विनीत-अनुद्धत,-वेश(ष) ८. अल्पावयव (यंत्रादि)।

सादापन, सं. पुं. (फ़ा. सादह्) दे. 'सादगी'।

सादि, वि. (सं.) सारम्भ, सोपक्रम, आरम्भ-उपक्रम,-वत्-युक्त।

सादिक़, वि. (अ.) सत्य, यथार्थ २. शुद्ध, त्रुटिरहित।

सादृश्य, सं. पुं. (सं. न.) समता, समानता, साम्यं, सदृशता, तुल्यता।

साध[1], सं. पुं., दे. 'साधु'।
साध[2], सं. स्त्री. (सं. उत्साहः>) अभिलाषः, कामना, लालसा, वाञ्छा।
साधक, सं. पुं. (सं.) सं-निष्,-पादकः, समापकः, सिद्धिकरः, निर्वर्तयितृ २. तपस्विन्, तापसः, योगिन् ३. करणं, साधनं ४. परहितकारिन्, परकार्यसहायः ५. भक्तः, उपासकः ६. भूतापसारकः, दे. 'ओझा'।
साधन, सं. पुं. (सं. न.) निष्पादनं, विधानं, संपादनं, करणं, अनुष्ठानं, समापनं, निर्वर्तनं २. उपकरणं, सामग्री ३. युक्तिः (स्त्री.), उपायः ४. उपासना, पूजा ५. सहायता ६. धातुशोधनं ७. कारणं, हेतुः ८. धनं ९. पदार्थः १०. सिद्धिः (स्त्री.)।
साधना, सं. स्त्री. (सं.) सिद्धिः-निर्वृत्तिः-निष्पत्तिः (स्त्री.) २. आराधना, उपासना ३. अभ्यासः, क्रियासातत्यं, नित्यानुष्ठानम्। क्रि. स. (सं. साधनं) साध् (स्वा. प. अ., प्रे.), सिध् (प्रे. साधयति) २. निर्वृत्-संपद्-समाप् (प्रे.), अनुष्ठा (भ्वा. प. अ.) २. विनी (भ्वा. प. अ.), शिक्ष् (प्रे.) ३. दम् (प्रे. दमयति) वशीकृ ४. अभ्यस् (दि. प. से.), अभ्यासंव्यवहारं कृ ५. नियंत्र् (चु.), अनुशास् (अ. प. से.)। सं. पुं. तथा भाव, साधनं, निर्वर्तनं, सं-निप्,-पादनं, अनुष्ठानं, विनयनं, दे. 'साधक', 'साधन' इ.।
साधर्म्य, सं. पुं. (सं. न.) सधर्मता-त्वं, समानतुल्य,-धर्मता-गुणता।
साधारण, वि. (सं.) सामान्य, विशिष्टता-रहित, प्रायिक, प्राकृत, मध्यम, अवर २. सुकर, सुसाध्य ३. सार्वजनिक, सर्वजनीन ४. सदृश, तुल्य।
—धर्म, सं. पुं. (सं.) सार्वजनिकधर्मः २. चातुर्वर्ण्यस्य सामान्यधर्मः।
—स्त्री, सं. स्त्री. (सं.) वेश्या।
साधारणतः, अव्य. (सं.) सामान्यतः, प्रायशः, प्रायेण, बहुशः (सब अव्य.)।
साधारणतया, अव्य. (सं.) दे. 'साधारणतः'।
साधारणता, सं. स्त्री. (सं.) सामान्यता, विशिष्टताऽभावः, साधारण्यम्।
साधु, सं. पुं. (सं.) सन्न्यासिन्, परिव्राजकः, महात्मन्, तापसः, मुनिः, यतिः २. सत्पुरुषः, सज्जनः, आर्यः ३. अभिजातः, कुलीनः। वि. (सं.) भद्र, उत्तम, श्रेष्ठ २. यथार्थ, सत्य, अवितथ ३. प्रशंसनीय, स्तुत्य ४. निपुण ५. अर्ह, योग्य ६. उचित, युक्त।
—वाद, सं. पुं. (सं.) साधु,-वचनं-उक्तिः (स्त्री.), शंसात्मकं वचनम्।
—साधु, अव्य. (सं.) धन्य-धन्य, सम्यक्-सम्यक्, शोभनं शोभनं, वरं वरम्।
साधुता, सं. स्त्री. (सं.) सज्जनता, श्रेष्ठता, भद्रता, आर्यता २. सरलता, आर्जवं ३-४. साधु,-चरितं-धर्मः।
साधू, सं. पुं., दे. 'साधु'।
साध्य, वि. (सं.), निष्पादनीय, करणीय, अनुष्ठेय, समाप्तव्य २. शक्य, संभाव्य, संभवनीय ३. सुकर, सुगम ४. प्रमाणयितव्य, सत्यापयितव्य, उपपादयितव्य ५. प्रतिकारार्ह, प्रतिकार्य ६. ज्ञेय। सं. पुं. (सं.) देवता २. गणदेवताभेदः ३. साधनीयपदार्थः (न्या.)।
साध्वस, सं. पुं. (सं. न.) भयं २. व्याकुलता।
साध्वी, सं. स्त्री. (सं.) सती, सच्चरित्रा २. पति,-व्रता-परायणा।
सानंद, वि. (सं.) प्रहृष्ट, मुदित। क्रि. वि. (सं. न.) सकुशलं, सहर्षम्।
सान, सं. पुं. (सं. शाणः) शाणी, शाणाश्मन्।
—देना, क्रि. स., तिज् (प्रे.), नि-, शो (दि. प. अ.), तीक्ष्णीकृ, क्ष्णु (अ. प. से.)।
सानना, क्रि. स. (हिं. सनना, सं. संधा से) मर्दनेन संमिश्र् (चु.), हस्ताभ्यां मृद् (क्र्. प. से., प्रे.)-संपीड् (चु.) २. मलिनयति, कलुपयति-कलंकयति (ना. धा.) ३. संश्लिष् (प्रे.), संबंध् (क्र्. प. अ.)।
सानी[1], सं. स्त्री. (हिं. सानना) *सिक्तान्नम्।
सानी[2], वि. (अ.) द्वितीय, अपर २. तुल्य, समान।
ला—, वि. (अ.) अद्वितीय, अनुपम, अप्रतिम।
सापत्न्य, सं. पुं. (सं. न.) सपत्नीभावः, सदारत्वम्। (सं. पुं.) सपत्नीसुतः २. शत्रुः।
साफ़, वि. (अ.) स्वच्छ, निर्मल दे.। २. शुद्ध, केवल ३. निर्दोष, त्रुटिहीन ४. स्पष्ट, विशद ५. श्वेत, उज्ज्वल, भास्वर ६. निष्कपट, निश्छल ७. सम, सम,-तल-रेख ८. निर्विघ्न, निर्बाध ९. अंकाक्षरशून्य, लेखरहित। क्रि. वि.,

निष्कलंकं निरपवादं २. प्रच्छन्नं, निभृतं ३. हानिं-क्षतिं विना ४. अत्यंतं नितांतं ४. निराहारम्।

—करना, क्रि. स., प्रक्षल् (चु.), प्र-सं,-मृज् (अ. प. से., प्रे.), धाव् (भ्वा. प. से., चु.), निर्णिज् (जु. उ. अ.) २. शुध् (प्रे.), पू (क्र्. उ. से.), पवित्रीकृ ३. (ऋणादिकं) निस्तॄ-शुध् (प्रे.)-अपाकृ।

—गो, वि., स्पष्ट-यथार्थ,-भाषिन्-वादिन्।

—गोई, सं. स्त्री. स्पष्ट-यथार्थ,-भाषिता-वादिता।

—दिल, वि. (अ.+फ़ा.) ऋजु, सरल, निष्कपट।

—साफ़, अव्य., स्पष्टतः, प्रकटम्, प्रकाशम्, स्फुटं, व्यक्तम् (सब अव्य.)।

साफल्य, सं. पुं. (सं. न.) सफलता, दे. २. लाभः।

साफ़ा, सं. पुं (अ. साफ़) उष्णीषः-षं, शिरोवेष्टनम्।

साफ़ी, सं. स्त्री. (अ. साफ़) गालनी।

साबन, सं. पुं., दे. 'साबुन'।

साबर, सं. पुं. (सं. शंबरः) मृग-भेदः २.शंबर-चर्मन् (न.) ३. वातमृगचर्मन् (न.)।

साबिक़, वि. (अ.) पुराण, पुरातन, पूर्व, प्राचीन, प्राक्तन।

साबिक़ा, सं. पुं. (अ.) व्यवहारः, संबंधः २. परिचयः।

साबित, वि. (अ.) प्रमाणित, सिद्ध दे.।

साबु(बू)त, वि. (फ़ा. सबूत) संपूर्ण, समस्त, पूर्णांग २. निर्दोष ३. स्थिर।

साबुन, सं. पुं. (अ.) *फेनलं, स्वफेनम्।

साबूदाना, सं. पुं. दे. 'सागूदाना'।

सामंजस्य, सं. पुं. (सं. न.) औचित्यं, योग्यता २. उपयुक्तता ३. अनुकूलता ४. आनुकूल्यं, आनुरूप्यम्।

सामंत, सं. पुं. (सं.) वीरः, भटः, योधः, २. नायकः, गणाधिपतिः ३. क्षेत्र,-पतिः-स्वामिन्।

साम, सं. पुं. [सं.- मन् (न.)] सामवेदः २. गेयवेदमंत्रः ३. प्रियवाक्यादिभिः सांत्वनं, मधुरभाषणं ४. उपायभेदः (राजनीति)।

—वेद, सं. पुं. (सं.) आर्याणां प्रसिद्धो धर्म-ग्रंथविशेषः।

सामक, सं. पुं., दे. 'साँवाँ'।

सामग्री, सं. स्त्री. (सं.) उपकरणजातं, संभारः, साधनसमूहः, आवश्यकद्रव्याणि (न. बहु.) २. परिच्छदः, उपस्करः।

सामग्र्य, सं. पुं. (सं. न.) समग्रता, पूर्णता, समष्टिः (स्त्री.) २. अनुचर-सेवक,-वर्गः-समुदायः ३. उपकरणसंग्रहः ४. कोषः ५. परिच्छदः, उपस्करः।

सामना, सं. पुं. (हिं. सामने) अग्र-पूर्व,-भागः, मुखं २. सं(समा)गमः, संमिलनं, दर्शनं, सांमुख्यं ३. विरोधः, विपक्षता।

—करना, क्रि. स., वि-प्रति-रुध् (रु. उ. अ.), प्रत्यव-स्था (भ्वा. आ. अ.), बाध् (भ्वा. आ. से.)।

सामने, क्रि. वि. (सं. संमुखे) अग्रतः, अग्रे, पुरः, पुरतः, समक्षं, अभि-सं,-मुखं-मुखे २. उप-स्थितौ, विद्यमानतायां ३. तुलनायां, प्रतियो-गितायां, विरुद्धम्।

—आना या—होना, क्रि. अ., अभि-सं,-मुखी भू, संमुखं स्था (भ्वा. प. अ.)।

—करना क्रि. स., अग्रे-पुरतः स्था (प्रे.), समक्षं नी (भ्वा. प. अ.)।

—से, क्रि. वि., अग्रतः, पुरस्तात्, पुरतः।

आमने—, क्रि. वि. (अन्योन्यस्य) संमुखं-खे, मुखामुखि, प्रतिमुखम्।

सामयिक, वि. (सं.) कालिक [—की (स्त्री.)] काल-समय,-विषयक २. सांप्रतिक, इदानींतन, आधुनिक, वर्तमान ३.समयोचित, कालानुरूप।

—पत्र, सं. पुं. (सं. न.) समाचारपत्रं, दे.।

सम—, वि. (सं.) समकालीन, दे.।

सामर्थ्य, सं. पुं. स्त्री. (सं. न.) धीशक्तिः (स्त्री.), योग्यता, कार्यक्षमता २. बलं, शक्तिः (स्त्री.) ३. तेजस् (न.), पराक्रमः ४. शब्द-संबंधः (व्या.)।

सामाजिक, वि. (सं.) सामुदायिक, समाज-जनसंघ,-संबंधिन्,-समाज।

सामान, सं. पुं. (फ़ा.) दे. 'सामग्री' (१-२)। यंत्राणि, उपकरणानि (दोनों न. बहु.) ४. दे. 'प्रबंध'।

सामान्य, वि. (सं.) दे. 'साधारण'। सं. पुं. (सं. न.) सादृश्यं, समानता २. साधारण,-धर्मः-गुणः (वैशेषिक.) ३. अर्थालंकार-भेदः (सा.)।

—वनिता, सं. स्त्री. (सं.) वेश्या, वारांगना।

सामान्यतः, क्रि. वि. (सं.) दे. 'साधारणतः'।

सामान्यतया, क्रि. वि. (सं.) दे. 'साधारणतया'।

सामिग्री, सं. स्त्री., दे. 'सामग्री'।

सामीप्य, सं पुं. (सं. न.) सान्निध्यं, नैकट्यं २. मुक्तिभेदः।

सामुदायिक, वि. (सं.) सामूहिक, सामवायिक।

सामुद्रिक, सं.पुं. (सं. न.) *तनुचिह्नविज्ञानम्। वि. (सं.) सामुद्र, समुद्रीय।

साम्य, सं. पुं. (सं. न.) समता, समानता, तुल्यता।

—वाद, सं. पुं. (सं.) समाज-समष्टि,-वादः, पाश्चात्यः सामाजिकसिद्धांतविशेषः।

साम्राज्य, सं. पुं. (सं. न.) आधिपत्यं, आधिराज्यं, पूर्णाधिकारः; दशलक्षाधिपत्यं २. महाविस्तृत,-राज्यं-विषयः-राष्ट्रम्।

सायं, क्रि. वि. (सं.) दिनांते, सायंकाले। सं. पुं., दे. 'सायंकाल'।

—काल, सं. पुं. (सं.) सायाह्नः, सायः-यं, सायंसंध्यासमयः, रजनीमुखं, प्रदोषः, दिवस-दिन,-अंतः-अवसानं, संध्या, वि-वै,-कालः।

—कालीन, वि. (सं.) सायंतन (-नी स्त्री.), सायं-, प्रादोपिक-वैकालिक(-की स्त्री.),सायंभव।

—संध्या, सं. स्त्री. (सं.) पश्चिमा संध्या।

सायंस, सं. स्त्री., दे. 'साइन्स'।

सायक, सं. पुं. (सं.) इषुः, बाणः २. खड्गः।

सायण, सं. पुं. (सं.) चतुर्वेदभाष्यकारो मायणपुत्रः।

सायत, सं. स्त्री., दे. 'साइत'।

सायबान, सं. पुं. (फ़ा. सायः बान) प्रघ(घा,)णः, अलिंदः २. *तृणप्रच्छदिस् , *प्रच्छायवत्।

सायल, सं. पुं. (अ.) प्रश्न,-क(का)रः-कर्तृ, प्रष्टृ, पृच्छकः २. याचकः, भिक्षुः ३. प्रार्थिन्, आवेदकः ४. पद-आकांक्षिन्-अन्वेषिन्।

साया, सं. पुं. (फ़ा.-यह्) दे. 'छाया'।

सायुज्य, सं. पुं. (सं. न.) एकीभावः, ऐक्यं, सारूप्यं २. मुक्तिभेदः।

सारंग, सं. पुं. (सं.) मृगभेदः २. मृगः ३. वाद्यभेदः ४. रागिणीभेदः ५. धनुस् (न.) ६. इषुः ७. सर्पः ८. रात्री ९. रमणी १०.खड्गः ११. मेघः १२. खगः १३. मयूरः १४. हंसः १५. चातकः १६. भ्रमरः १७. सागरः १८. कमलं १९. चंद्रः २०. श्रीकृष्णः, इ.।

—पाणि, सं. पुं. (सं.) विष्णुः।

—लोचना, सं. स्त्री. (सं.) मृगलोचनी, हरिणाक्षी, कुरंगाक्षी, मृगनयनी।

सारंगिया, सं. पुं. (सं. सारंगी>)सारंग(गी)-वादकः।

सारंगी, सं. स्त्री. (सं.) शारंगी, सारंगः, पिनाकी, वाद्यभेदः।

सार, सं. पुं. (सं. पुं. न.) तत्त्वं, मुख्यांशः, स्थिरांशः, मूलं, मूलवस्तु (न.) २. भावः, तात्पर्यं, निष्कर्षः, पिंडित-निष्कृष्ट-निर्गलित,-अर्थः ३. मज्जा, अस्थि,-जं-संभवं-स्नेहः-तेजस् (न.)। (सं. पुं.) रसः, द्रवः, निर्यासः २. संक्षेपः, संग्रहः ३. शक्तिः (स्त्री.), बलं ४. वीर्यं, पराक्रमः ५. वज्रक्षारं ६. वायुः ७. रोगः ८. पाशकः ९. दध्युत्तरं १०. अर्थालंकारभेदः (सा.)। (सं. न.) जलं २. धनं ३.नवनीतं ४. अमृतं ५. लौहं ६. वनम्। वि. (सं.)उत्तम, श्रेष्ठ २. दृढ, बलवत् ३. न्याय्य, धर्म्य।

—गर्भित, वि. (सं.) तत्त्वपूर्ण, सार,-युक्त-वत्।

—वर्जित, वि. (सं.) निस्सार, तत्त्वहीन।

सारथि-थी, सं. पुं. (सं.-थि:) सूतः, हयंकषः, नि-,यंतृ, नियामकः, क्षत्तृ, प्राजितृ, दक्षिणस्थः, रथः,-नागरः-कुटुंबिन्।

सारल्य, सं. पुं. (सं. न.) सरलता, दे.।

सारस, सं. पुं. (सं.) पुष्कराह्वः, लक्ष्मणः, लक्षणः, कामिन्, रसिकः, सरसीकः २. हंसः ३. चंद्रः। (सारसी स्त्री.)।

सारस्वत, सं. पुं. (सं.) ब्राह्मणजातिभेदः २. व्याकरणग्रन्थविशेषः। वि. (सं.) सारस्वतीय।

सारांश, सं. पुं. (सं.) सारः, निष्कर्षः, पिंडितार्थः २. अभिप्रायः, आशयः ३.परिणामः, फलं ४. उपसंहारः।

सारा, वि. (सं. सर्व) संपूर्ण, समग्र, समस्त।

सारिका, सं. स्त्री. (सं.) सारी, शारीरिका, चित्रलोचना, पीतपादा, कलहप्रिया, मधुरालापा।

सारूप्य, सं. पुं. (सं. न.) तुल्य,-सम-स-एक,-रूपता, तुल्यता, समता २. मोक्षभेदः।

सार्थ, वि. (सं.) सार्थक, साभिप्राय २. समान-तुल्य,-अर्थक-अर्थिन् (शब्दादि) ३. धनिन्, धनाढ्य। सं. पुं. (सं.) धनाढ्यः, धनिकः २. यात्रि-यात्रिक,-समूहः-समुदायः

३. तीर्थयात्रिकाः (बहु.) ४. पण्याजीवः, सार्थिकः, व्यापारिन् ।

सार्थक, वि. (सं.) सार्थ, अर्थ,-वत्-युक्त-पूर्ण २.सकल, पूर्णकाम ३. गुणकारिन्, उपयोगिन्, हितकर।

सार्थकता, सं. स्त्री. (सं.) अर्थवत्ता २. सफलता, सिद्धिः (स्त्री.) ।

सार्दूल, सं. पुं. (सं. शार्दूलः) सिंहः ।

सार्वकालिक, वि. (सं.) सार्वसामयिक, शाश्वत-तिक ।

सार्वजनिक, वि. (सं.) सर्वजनहित, स(सा)र्वजनीन, सार्वलौकिक ।

सार्वत्रिक, वि. (सं.) सर्वत्र,-भव-व्यापिन् ।

सार्वदेशिक, वि. (सं.) सर्व-समग्र,-देशविषयक ।

सार्वभौतिक, वि. (सं.) चराचरसंबंधिन् ।

सार्वभौम, सं.पुं. (सं.) चक्रवर्तिन्, नृपाग्रणीः, सर्वभूमीश्वरः, एकजन्मन् । वि. (सं.) अखिलभूमंडलविषयक ।

सार्वलौकिक, वि. (सं.) सकलब्रह्मांडसंबंधिन् २. सार्वभौम ।

साल[1], सं. पुं. (सं.) सर्जः, चीरपर्णः, अग्निवल्लभः, रालनिर्यासः ।

साल[2], सं. पुं. स्त्री. (हिं. सालना) छिद्रं, विवरं १. व्रणः, क्षतं ३. पीडा, व्यथा ।

साल[3], सं. पुं. (फ़ा.) दे. 'वर्ष' ।

—गिरह, सं. स्त्री. (फ़ा.) जन्म,-दिनं-दिवसः, नववर्षारंभः ।

सालग्राम, सं. पुं., दे. 'शालग्राम' ।

सालन, सं. पुं. (सं. सलवण>) व्यंजनं, दे. 'भाजी' ।

सालना, क्रि. स. तथा क्रि. अ. (सं. शल्यं>) दे. 'चुभाना' तथा 'चुभना' ।

सालममिश्री, सं. स्त्री. (अ. सालब+मिस्री = मिस्र देश का) सुधामूली, वीरकंदा, अमृतोत्था ।

सालसा, सं. पुं. (अं. सार्सापेरिल्ला) रक्तशोधकक्वाथभेदः ।

साला, सं. पुं. (सं. श्यालः-लकः) श्वशुर्य्यः, आत्मवीरः, वाक्कीरः, पत्नीभ्रातृ ।

सालाना, वि. (फ़ा.) वार्षिक, दे. ।

सालिक, वि. (अ.) पथिकः, पान्थः, अध्वगः, यात्रिन्, यात्रिकः ।

सालिबमिश्री, सं. स्त्री., दे. 'सालममिश्री' ।

सालिम, वि. (अ.) समग्र, सं-,पूर्ण, अखंडित, अक्षत ।

सालिस, सं. पुं. (अ.) निर्णेतृ, मध्यस्थः, प्रमाणपुरुषः ।

सालिसी, सं. स्त्री. (अ.) माध्यस्थ्यं, निर्णयः २. दे. 'पंचायत' ।

साली, सं. स्त्री. (सं. श्याली) श्यालिका, केलीकुंचिका, पत्नीभगिनी, (छोटी) यन्त्रणी, यन्त्रिणी, (बड़ी) कुली ।

सालू, सं. पुं. (देश.) मांगलिको रक्तपटभेदः ।

सालोत्री, सं. पुं., दे. 'सलोतरी' ।

सावधान, वि. (सं.) अवहित, दत्तावधान, समाहित, तन्द्रा-प्रमाद,-रहित, जागरूक, दक्ष ।

—करना, क्रि. स., प्राक् सूच् (चु.)-प्रबुध् (प्रे.) ।

—होना, क्रि. अ., सावधान-अवहित-जागरूक (वि.) भू २. अवधा (जु. उ. अ.), मनो युज् (चु.) ।

सावधानता, सं. स्त्री. (सं.) अवधानं,दक्षता, जागरूकता, मनोयोगः, अभिनिवेशः ।

सावन, सं. पुं. (सं. श्रावणः) नभः, नभस् (पुं.), श्रावणिकः ।

—की झड़ी, सं. स्त्री., श्रावणिकी सततवृष्टिः (स्त्री.) ।

—हरे न भादों सूखे, मु., अपरिवर्तितदशा, सदैकरसता ।

सावनी, सं. स्त्री., दे. 'श्रावणी' ।

सावित्री, सं. स्त्री. (सं.) गायत्री २. सरस्वती ३. ब्रह्मणः पत्नी ४. उपनयनसंस्कारः ५. दक्षकन्या, धर्मस्य पत्नी ६. सत्यवतो नृपस्य पत्नी ७. सधवा नारी ८. यमुना ।

—सूत्र, सं. पुं. (सं. न.) यज्ञोपवीतं, दे. ।

साष्टांग, वि. (सं.) अष्टांगयुत ।

—प्रणाम, सं. पुं. (सं.) अष्टांगपातः, साष्टांगनमस्कारः, दे. 'अष्टांग' ।

—करना, मु., दूरतः परिहृ (भ्वा. प. अ.) ।

सास, सं. स्त्री. (सं. श्वश्रूः) साधुधीः (स्त्री.), २. पति-पत्नी,-प्रसूः (स्त्री.)-जननी ।

सास्ना, सं. स्त्री. (सं.) गलकंबलः ।

साह, सं.पुं. (सं.साधुः)सज्जनः, सत्पुरुषः, आर्यः २. वाणिजः, आपणिकः ३. धनिन्, श्रेष्ठिन् ।

साहब, सं. पुं., दे. 'साहिब' ।

साहस, सं. पुं. (सं. न.) धृष्टता, निर्भीकता, प्रगल्भता, धैर्यं, धार्ष्ट्यं २. लुंठनं, बलात् अप-

हरणं ३. कुकृत्यं ४. द्वेषः ५. क्रूरता, निर्दयता ६. क्रूर-घोर,-कर्मन् (न.) ७. परदारगमनं ८. बलात्कारः ९. दंडः १०. अर्थ-धन,-दंडः ।

साहसांक, सं. पुं. (सं.) विक्रमादित्यः, शकारिः ।

साहसिक, सं. पुं. (सं.) साहसिन्, आततायिन्, वधोद्यतः २. लुंठकः, दस्युः ३. परतल्पगः, परदारगामिन् । वि. (सं.) साहसवत्, पराक्रमिन्, वीर २. निर्भीक, प्रगल्भ ३. मिथ्या,-भाषिन्-वादिन् ४. परुषभाषिन्, कटुवादिन् ५. हठकारिन् ।

साहसी, वि. (सं.-सिन्) दे. 'साहसिक' वि. (१-२) ।

साहाय्य, सं. पुं. (सं. न.) सहायता, दे. ।

साहित्य, सं. पुं. (सं. न.) वाङ्मयं, सारस्वतं, ग्रंथसमूहः २. संगतिः (स्त्री.), संमिलनं, साह्यं ३-४. साहित्य-अलंकार,-शास्त्रम् ।

साहित्यिक, वि.(सं.) साहित्यसंबंधिन्, वाङ्मयविषयक । सं. पुं., साहित्य,-सेवकः,-सेविन् ।

साहिब, सं. पुं. (अ.) मित्रं, सुहृद् २. प्रभुः, स्वामिन् ३. परमेश्वरः ४. महाशयः, श्रीमत् ५. श्वेतवर्णो वैदेशिकः ।

—इक़बाल, वि. (अ.) संपन्न, समृद्ध ।

—ज़ादा, सं. पुं. (अ.+फ़ा.) पुत्रः, तनुजातः ।

—दिमाग़, वि. (अ.) धी-बुद्धि,-मत् ।

—सलामत, सं. स्त्री. (अ.) मिथः प्रणामः, पारस्परिकनमस्कारः २. परिचयः ।

साहिबा, सं. स्त्री. (अ.) स्वामिनी, ईश्वरा-री ३. आर्या, कुलांगना २. देवी, भट्टिनी ४. अत्र-तत्र,-भवती, भद्रा, भवंती, श्रीमती ।

साहिल, सं. पुं. (अ.) वेला, तटः-टम् ।

साही, सं. स्त्री. (सं. शल्लकी) शल्यः, शल्यकः, श्वाविध्, क्रकचपादः, शल्यमृगः, विलेशयः, छेदारः ।

साहु-हू, सं. पुं. (सं. साधुः) सज्जनः, आर्यः, भद्रमानुषः २. कुसीदिक-दिन, वार्द्धुषिकः ।

साहु(हू)ल, सं. पुं. (फ़ा. शाकूल) लंबकः, लंबसीसकम् ।

साहूकार, सं. पुं. (हिं. साहु) धनिकः, धनाढ्यः २. सार्थवाहः, सार्थिकः, श्रेष्ठिन् ३. कुसीदिन्, वार्द्धुषिकः ।

साहूकारा, सं. पुं. (हिं. साहूकार), वृद्धि,-जीवनं-जीविका २.अर्थव्यवसायः ३. अर्थार्पणः ।

साहूकारी, सं. स्त्री. (हिं. साहूकार) दे. 'साहूकारा'(१-२) ।

सिंगा, सं. पुं. (सं. शृंगं>) दे. 'नरसिंहा' ।

सिंगार, सं. पुं. (सं. शृंगारः दे.) ।

—दान, सं. पुं. (हिं.+फ़ा.) *शृङ्गारधानं, *प्रसाधनपिटकम् ।

—हाट, सं. स्त्री., शृङ्गारहट्टः-वेश्यापणः ।

सिंगारिया, सं. पुं. (हिं. सिंगार) शृङ्गारकारः, प्रसाधकः ।

सिंगिया, सं. पुं. (सं. शृंगिकं) विषभेदः ।

सिंगौटी, सं. स्त्री. (हिं. सींग) (वृषादीनां) शृंगभूषणम् ।

सिंगौटी, सं. स्त्री. (हिं. सिंगार) दे. 'सिंगारदान' ।

सिंघ, सं. पुं., दे. 'सिंह' ।

सिंघण, सं. पुं. (सं. न.) सिंघाणम्, शिंघणी, शिंघाणकम्, नासिकामलम् २. अयोमलः-लं, अयोरसः ।

सिंघाड़ा, सं. पुं. (सं. शृंगाटः-टकः) संघाटिका, जल-वारि, कंटकः-कुब्जकः, शृंग,-कंदः-मूलः, शुक्लदुग्धः ।

सिंघासन, सं. पुं., दे. 'सिंहासन' ।

सिंचाई, सं. स्त्री. (हिं. सींचना) सेकः,सेचनं, जलप्लावनं, सिक्तिः (स्त्री.) २. अभि-प्र,-उक्षणं ३. सेचन-प्रोक्षण,-भृतिः (स्त्री.) भृत्या ।

सिंचित, वि., दे. 'सींचा हुआ' ।

सिंडिकेट, सं. पुं. (अं.) व्यापार-समितिः (स्त्री.) व्यवहारसंघः २. विश्वविद्यालय-प्रबन्धसमितिः (स्त्री.) ।

सिंदूर, सं. पुं. (सं. न.) सीमंतकं, मंगल्यं, गणेशभूषणं, शृंगारकं, सौभाग्यं, नाग,-जं-संभवं-गर्भं, अरुणं, शोणं, रक्तम् ।

सिंदूरिया-री, वि. (सं. सिंदूरं>) शोण-सिंदूर,-वर्ण ।

सिंध, सं. पुं. (सं. सिंधुः) सिंधुखेलः, भारतवर्षस्य प्रांतविशेषः । सं. स्त्री. (सं. पुं.) पंचनदप्रांतवर्तिनदविशेषः ।

—सागर, सं. पुं. (सं. सिंधुसागरः) सिंधुवितस्तामध्यवर्तिप्रदेशः ।

सिंधी, सं. स्त्री. (हिं. सिंध) सैंधवी, सिंधुप्रांतभाषा । सं. पुं., सिंधु,-देशीयः-वासिन्, सैंधवाः (प्रायः बहु.) २. सैंधवः (घोड़ा) ।

सिंधु, सं. पुं. (सं.) सागरः २. नदः ३. नद-विशेषः ४. प्रांतविशेषः, सिंधुखेलः ।
—कन्या, सं. स्त्री. (सं.) सिंधु,-जा-सुता, लक्ष्मीः (स्त्री.) ।
—पुत्र, सं. पुं. (सं.) चंद्रः ।
—माता, सं. स्त्री. (सं.-तृ) सरस्वती (नदी) ।
सिंधुर, सं. पुं. (सं.) गजः, द्विपः ।
—वदन, सं. पुं. (सं.) गजाननः, गणेशः ।
सिंधोरा, सं. पुं. (सं. सिंदूरं>) सिंदूरपुटः ।
सिंह, सं. पुं. (सं.) हरिः, हर्यक्षः, मृग,-राजः-इन्द्रः-अधिपः, पंच,-आस्यः शिखः-मुखः, केश(स)रिन्, महा,-नादः-वीरः, नखिन्, क्रव्यादः २. लेयः, पंचमराशिः (ज्यो.) ३.वीरः, श्रेष्ठः (उ., पुरुषसिंह) ४. दे. 'सिक्ख' ।
—के(श)सर सं. पुं. (सं. पुं. न.) सटा-टा २. बकुलवृक्षः ।
—नाद, सं. पुं. (सं.) सिंह,-गर्जनं-गर्जना-ध्वनिः २. क्ष्वेडा, रणोत्साहजरवः ३. निःशंककथनम् ।
—पौर, सं. पुं. (सं.+हिं.) सिंहद्वारं, प्रवेशनम् ।
सिंहनी, सं. पुं. (हिं. सिंह) नखिनी, सिंही, पंचमुखी ।
सिंहल, सं. पुं. (सं.) स्वर्णद्वीपः-पं (सीलोन या लंका) ।
सिंहली, वि. (सं. सिंहलः>) सैंहलः २.सिंहल-वासिन् ।
सिंहावलोकन, सं. पुं. (सं. न.) सिंहावलोकित २. पूर्व,-अनुदर्शनं-वृत्तांतविमर्शः ३. पद्यरचना-रीतिभेदः ।
सिंहासन, सं. पुं. (सं.न.) नृप-राज,-आसनम् ।
—पर बैठना, क्रि. अ., सिंहासने उपविश् (तु. प. अ.), राज्ये अभिषिच् (कर्म.) ।
—से उतारना, क्रि. स., राज्यात् भ्रंश्-च्यु (प्रे.) ।
सिंहिका, सं. स्त्री. (सं.) राहुमातृ, राक्षसी-विशेषः ।
—सूनु, सं. पुं. (सं.) सैंहिकः,-केयः, राहुः ।
सिंहिनी, सं. स्त्री. दे. 'सिंहनी' ।
सिंही, सं. स्त्री. (सं.) दे. 'सिंहनी' २. सिंहिका ३. श्रृंगं, वाद्यभेदः ।
सिआर, सं. पुं. (सं. श्रृगालः) दे. 'गीदड़' ।
सिकंजबीन, सं. स्त्री. (फ़ा.) दे. 'शिकंजबीन' ।
सिकड़ी, सं. स्त्री. (सं. श्रृंखला) द्वार-कपाट,-श्रृंखला, दे. 'कुंडी' २. गलभूषणभेदः ३.कांची, मेखला ।
सिकता, सं. स्त्री. (सं. बहु.) वालुकाः (स्त्री. बहु.), दे. 'रेत' २. अश्मरी, दे. 'पथरी' ३. शर्करा, सिता ।
—मेह, सं. पुं. (सं.) प्रमेहभेदः ।
सिकत्तर, सं. पुं. (अं. सेक्रेटरी दे.) ।
सिकलीगर, सं. पुं. (अ. सैकाल+फ़ा. गर) दे. 'सैकलगर' ।
सिकहर, सं. पुं. (सं. शिक्यं+हर) शिक्यं-क्या, शिच् (स्त्री.), काचः, दे. 'छींका' ।
सिकुड़न, सं. स्त्री. (हिं. सिकुड़ना) संकोचः-चनं, आकुंचनं २. दे. 'शिकन' ।
सिकुड़ना, क्रि. अ. (हिं. सिकोड़ना) संकुच् (भ्वा. तु. प. से.), आकुंच् (भ्वा. आ. से; तु. प. से.), संहृ (कर्म.) २. वलिमत् जन् (दि. आ. से.) ३. अल्पी-न्यूनीभू ।
सिकोड़ना, क्रि. स. (सं. संकोचनं) संकुच् (प्रे.) संहृ (भ्वा. प. अ.), आकुंच् (प्रे.) २. संक्षिप् (तु.प.अ.), अल्पीकृ ३. वलिनं(वि.) कृ । सं. पुं. तथा भाव, संकोचः-चनं, संहरणं, आकुञ्चनं, संक्षेपः-पणं, अल्पीकरणम् ।
सिक्का, सं. पुं. (अ.) टंकः-कं, नाणकं, मुद्रा २. पदकम् ।
—जमाना या बैठाना, मु., शासनं-प्रभुत्वं-आधिपत्यं स्था (प्रे.), वशीकृ, अधि-ष्ठा (भ्वा. प. अ.) २. प्रतापं-प्रभावं प्रसृ (प्रे.) ।
सिक्ख, सं. पुं. (सं. शिष्यः) अंतेवासिन्, छात्रः २. गुरुनानकमतानुयायिन् , *सिक्खः ।
—मत, सं. पुं., शिष्य-सिक्ख,-मत-संप्रदायः-धर्मः, नानकपथः ।
सिक्त, वि. (सं.) अभ्युक्षित २. कृतसेचन, आर्द्र, क्लिन्न, दे. 'सींचना' ।
सिख, सं. स्त्री. (सं. शिक्षा) उपदेशः ।
सिखलाना } क्रि. स., व. 'सीखना' के प्रे.
सिखाना } रूप ।
सिगरेट, सं. पुं. (अं.) तमाखुवर्त्तीं-र्त्तिः(स्त्री.)।
सिगार, सं. पुं. (अं.) तमाखुशलाका ।
सिजदा, सं. पुं. (अ.) प्रणामः, नमस्कारः ।
सिटकिनी, सं. स्त्री. (अनु.) दे. 'चटकनी' ।
सिटपिटाना, क्रि. अ. (अनु.) दे. 'सिट्टापिट्टी भूलना' २. विक्लृप् (भ्वा. आ. से.), दोला-

यते (ना. धा.), संज्ञी (अ. आ. से.)।
सिटी, सं. स्त्री. (अं.) नगरं-री, पुरं-री।
सिट्टा, सं. पुं.(देश.) कणिश, मंजरी, दे. 'भुट्टा' तथा 'बाली' (अन्न की)।
सिट्टी, सं. स्त्री. (अनु. सीटना) वाक्पाटवम्।
—पिट्टी भूलना, मु., व्यामुह् (दि. प. वे.), किंकर्तव्य-।मूढ़ (वि.) जन् (दि. आ. से.), संभ्रम् (भ्वा. दि. प. से.)।
सिठनी, सं. स्त्री. (सं. अशिष्टं >) वैवाहिक-गालिः (स्त्री.), *गालिगीतिका।
सिड़, सं. स्त्री. (हिं. सिड़ी) उन्मादः, वातुलता २. दे. 'धुन'।
—बिल्ला, सं. पुं. (हिं. सिड़ी+बिल्ला) उन्मत्तः २. मूर्खः।
सिड़ी, वि. (सं. शृणिः>) उन्मत्त, वातुल २. दृढाग्रहिन् ३. स्वेच्छाचारिन्।
सितंबर, सं. पुं. (अ.) भाद्रपदाश्विनं, आंग-लीयो नवममासः।
सित, वि. (सं.) श्वेत, शुक्ल २. शुभ्र,भास्वर ३. निर्मल, स्वच्छ। सं. पुं. (सं.) शुक्रग्रहः २. शुक्लपक्षः ३. सिता, शर्करा ४. रजतम्।
—च्छद, सं. पुं. (सं.) हंसः, सितपक्षः।
—भानु, सं. पुं. (सं.) सितांशुः, चंद्रः।
सितम, सं. पुं. (फ़ा.) अर्दनं, पीडनं, नैष्ठुर्यं, क्रौर्यं २. अन्यायः, अनीतिः (स्त्री.)।
—गर, सं. पुं. (फ़ा.) निष्ठुरः, क्रूरचित्तः, अनर्थकरः २. अन्यायशीलः।
—ढाना, क्रि. स., पीड् (चु.), अर्द् (भ्वा. प. से., प्रे.)।
सितरी-ली, सं. स्त्री. (सं. शीतल >)शीतल-प्रस्वेदः।
सिताँ, सं. पुं. (फ़ा.) स्थानं, स्थलम् २. निवासः, स्थानम् ३. देशः।
सितांशु, सं. पुं. (सं.) चन्द्रः, सोमः।
सिता, सं. स्त्री. (सं.) दे. 'चीनी' २. दे. 'शक्कर' २. मल्लिका ४. चंद्रिका।
—खंड, सं. पुं. (सं.) मधुशर्करा २. दे. 'मिस्री'।
सितार, सं. पुं. (सं. सप्त+तार) वीणा, वल्लकी, विपंची, (सात तारोंवाला) परिवादिनी।
—बाज़, सं. पुं. (हिं+फ़ा.) वीणावादकः।
सितारा, सं. पुं. (फ़ा.-रः) तारा, तारका, भं, नक्षत्रं, रात्रिजं, उडु (स्त्री. न.) २. भाग्यं, दैवं ३. *त्रितारः, वाद्यभेदः।
—चमकना या बलंद होना, मु., भाग्यम् उत्+इ (अ. प. अ.), भाग्यं-पुण्यं फल् (भ्वा. प. से.)।
सितोपल, सं. पुं. (सं.) कठिनी, दे. खड़िया (सं. पुं.) स्फटिकः, सितमणिः।
सितोपला, सं. स्त्री. (सं.) शर्करा दे. 'शक्कर' २. दे. 'चीनी' ३. सिताखंडः, दे. 'मिस्री'।
सिद्ध, वि. (सं.) निष्-सं,-पन्न-पादित, साधित, अनुष्ठित, कृत २. प्राप्त, उपलब्ध ३. कृतकृत्य, सफल ४. अतिकुशल, सुनिपुण ५. दिव्यशक्ति-युत ६. योगविभूतिज्ञ ७. मोक्षाधिकारिन् ८. प्रमाणित, साधित ९. निर्णीत १०. शोधित ११. अनुकूल १२. पक्व, शृत, श्राण १३. प्र-ख्यात १४. सज्जी,-भूत-कृत, उपक्लृप्त, १५. प्र-स्तुत, उपस्थित। सं. पुं. (सं.) मुनिः, ऋषिः, पुण्यजनः, योगिन्, महात्मन् २.देवयोनिभेदः।
—करना, क्रि. स., साध् (भ्वा. प. अ.या प्रे.), सिध् (प्रे., साधयति) संपद् (प्रे.) २. मंत्रैः वशीकृ ३. प्रमाणीकृ, सत्याकृ।
—होना, क्रि. अ., सिध् (दि. प. अ.) सं.-निष् ,-पद् (दि. आ. अ.) २. मंत्रैः वशीभू ३. प्रमाणीकृ (कर्म.)।
—हस्त, वि. (सं.) प्रवीण, कुशल, पटु, निपुण।
सिद्धांत, सं. पुं. (सं.) राद्धान्तः, पूर्वपक्षं निरस्य स्थापितं मतं २. तत्त्वं, मतं, वादः।
—पक्ष, सं. पुं. (सं.) तर्कसंगत-युक्तियुक्त,-पक्षः-मतम्।
सिद्धांती, सं. पुं. (सं.-तिन्) मीमांसकः, तार्किकः २. शास्त्रविद् ३. सिद्धान्त-नियम,-निष्ठः।
सिद्धार्थ, वि. (सं.) आप्त-पूर्ण,-काम, कृतकृत्य। सं. पुं. (सं.) गौतमबुद्धः।
सिद्धि, सं. स्त्री. (सं.) निष्पत्तिः, समाप्तिः (स्त्री.), पूर्णता २. साफल्यं, कृतकार्यता ३. योगजा दिव्यशक्तिः (स्त्री.), विभूतिः (स्त्री.) (योग की आठ सिद्धियाँ :—अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा। ईशित्वं च वशित्वं च सर्वकामावसायिता॥) ४. समृद्धिः (स्त्री.), भाग्योदयः ५. निर्णयः ६. निश्चयः ७. मोक्षः ८. नैपुण्यं, दाक्ष्यम्,
सिधाई, सं. स्त्री. (हिं. सीधा) सरलता, ऋजुता, सारल्यं, आर्जवम्।

सिधारना, क्रि. अ. (सं. सिद्ध) प्रस्था (भ्वा. आ. अ.), प्रया (अ. प. अ.) २. प्र-इ (अ. प. अ.), मृ (तु. आ. अ.), दे. 'मरना'।
सिन, सिन्न, सं. पुं. (अ.) वयस्-आयुस् (न.), दे. 'उम्र'।
सिनक, सं. स्त्री. (सं. सिंहा(घा)णकं) नासा-नासिका,-मलं, सिंघ(घा)णं, दे. 'रेंट'।
सिनकना, क्रि. स. (हिं. सिनक) सिंघणं स्रु (प्रे.), नासिकां शुध् (प्रे.)।
सिनेट, सं. स्त्री., दे. 'सीनेट'।
सिनेमा, सं. पुं. (अं.) चलचित्र,-गृहं-शाला, २. चलचित्रम्, चित्रपटः।
सिन्नी, सं. स्त्री. (फ़ा. शीरीनी) दे. 'मिठाई'।
सिपर, सं. स्त्री. (फ़ा.) खड्गरीटः, खेटकं, ढालं, दे.।
सिपाह, सं. स्त्री. (फ़ा.) सेना, सैन्यम्।
—गिरी, सं. स्त्री. (फ़ा.) युद्धव्यवसायः, सैनिकवृत्तिः (स्त्री.)।
—सालार, सं. पुं. (फ़ा.) प्रधान,-सेनापतिः-सेनानीः-चमूपतिः।
सिपाही, सं. पुं. (फ़ा.) सैनिकः, योधः, योद्धृ, भटः २. राजपुरुषः, यष्टि-दंड,-धरः, रक्षिन्, शान्तिरक्षकः, रक्षापुरुषः।
सिपुर्द, दे. 'सुपुर्द'।
सिप्रा, सं. स्त्री. (सं.) उज्जयिनीसमीपवर्तिनदी-विशेषः।
सिफ़त, सं. स्त्री. (अ.) गुणः, विशेषता २. लक्षणं ३. स्वभावः, धर्मः।
सिफ़र, सं. पुं. (अ.) शून्यं, बिंदुः, खम्।
सिफ़ारिश, सं. स्त्री. (फ़ा.) गुणवर्णनं, प्रशंसनं २. अनुशंसा, परकार्यसिद्ध्यर्थमनुरोधः ३. प्रशंसा,-पत्रं-लेखः।
—करना, क्रि. स., प्रशंस् (भ्वा. प. से.), गुणान् वर्ण् (चु.) २. परकार्यसिद्ध्यै अनुरुध (रु. अ. अ.), अनुशंस् (भ्वा. प. से.)।
सिफ़ारिशी, वि. (फ़ा.) गुणश्लाघिन्, प्रशंसात्मक।
—टट्टू, सं. पुं. (फ़ा.+हिं.) परप्रभावलब्धाधिकारः, परानुग्रहनियुक्तः, गुणहीनः।
सिमटना, क्रि. अ. (सं. समित) आकुंच्-संकुच्-संक्षिप्-संहृ (कर्म.), संकुचित भू, दे. 'सिकुड़ना'।
सिमेटना, क्रि. स., दे. 'समेटना'।
सियापा, सं. पुं. (फ़ा. सियाहपोश) संविलापः, संपरिदेवनं-ना।
सियार, सं. पुं. (सं. शृगालः) जंबुकः, दे. 'गीदड़'।
सिर, सं. पुं. [सं. शिरस् (न.)] शीर्षं, शीर्षकं, मस्तकः-कं, मूर्धन् (पुं.), मौलिः (पुं. स्त्री.), मुंडः-डं, उत्तम-वर,-अंगं, शिरं २. अग्रं, शिखरं, शिखा, सानु (पुं. न.) शृङ्गम्।
—कटा, वि., छिन्न,-शीर्ष-मस्तक-शिर।
—का घूमना, सं. पुं., भ्र(भ्रा)मरं, भ्रमः-मिः (स्त्री.), घूर्णिः (स्त्री.)।
—का दर्द, सं. पुं., शिरः,-शूलं-पीडा, शिरोवेदना।
—के बल, क्रि. वि., अवाक्शिरं, अधोशीर्षम्।
—गुंथी, सं. स्त्री., *शिरग्रंथनं, आर्याणामौद्वाहिकरीतिविशेषः।
—चढ़ा, वि., दुर्लळित, अतिलालित, दृप्त, उत्सिक्त।
—मुंड़ा, सं. पुं., मुंडः, क्लृप्तकेशः, मुण्डितशिरः।
—आँखों पर होना, मु., शिरोधार्य(वि.)वृत् (भ्वा. आ. से.), सहर्षं स्वीकार्य(वि.)वृत्।
—आँखों पर बैठाना, मु., अत्यंतं सत्कृ, अत्यर्थं मन्-संभू (प्रे.)-आदृ (तु. आ. अ.)।
—उतारना या काटना, मु., शिरः छिद् (रु. प. अ.), मस्तकं कृत् (तु. प. से.), शिरश्छेदं कृ।
—गंजा करना, मु., बलवत् तड् (चु.), परुषं प्रहृ (भ्वा. प. अ.)।
—चढ़ाना, मु., दृप्तं-उत्सिक्तं-अवळिप्तं विधा (जु. उ. अ.) २. अत्यंतं लल् (चु.)।
—झुकाना, मु., नम् (भ्वा. प. अ.), अभिवद् (प्रे.)।
—धुनना, मु., शुच् (भ्वा. प. से.) सशीर्षताडनं रुद् (अ. प. से.)।
—नीचा करना, मु., त्रप् (भ्वा. आ. से.), लज्ज् (तु. आ. से.)।
—पर, मु., समीपं-पे, निकटं-टे।
—पर खून सवार होना, मु., जिघांसाविष्ट (व.) वृत् (भ्वा. आ. से), वधोद्यत (वि.) भू।
—पर पड़ना, मु., आ-सम्-आ-पत् (भ्वा. प. से.), उपनम् (भ्वा. प. अ., षष्ठी के साथ)।
—पर लेना, मु., उत्तरदायित्वं उररीकृ, भारं स्वीकृ।

—परस्ती करना, मु., अनु-प्रति-पा (प्रे. पालयति), संवृध् (प्रे.), साहय्यं कृ ।

—पीटना, मु , दे. 'सिर धुनना' ।

—भारी होना, मु., भ्रामरेण घूर्ण्या वा पीड् (कर्म.) २. शिरोवेदना वृत् ।

—मारना, मु , अत्यंतं प्रयत् (भ्वा. आ. से.), भूरि परिश्रम् (दि. प. से.) २. सपरिश्रमं अन्विष् (दि. प. से.)-विचि (स्वा. उ. अ.) ।

—मुँडाना, मु., परिव्रज् (भ्वा. प. से.), संन्यस् (दि. प. से.) ।

—मूँडना, मु., लुंठ् (भ्वा. प. से., चु.), छलेन अपहृ (भ्वा. प. अ.) ।

—सफ़ेद होना, मु., केशा धवलीभू , पलित-शीर्ष (वि.) जन् (दि. आ. से.) ।

—से कफ़न बाँधना, मु., निधनोद्यत (वि.) भू , मरणाय सज्जीभू ।

—से पाँव तक, मु., आमूलचूलं, आपादशीर्षं, आनखशिखम् ।

—होना, मु., कलहायते (ना. धा.), कलहोद्यत (वि.) भू ।

बिना—पैर का, वि., निराधार, निर्मूल २. असंबद्ध, अप्रासंगिक, असंगत ।

सिरका, सं. पुं. (फ़ा.) शुक्तं, शौक्तिकम् ।

सिरकी, सं. स्त्री. (हिं. सरकंडा) शरकांडः, क्षुरिकापत्रः३.शरकांड,-तिरस्करिणी-प्रतिसीरा ।

सिरजनहार, सं. पुं. (सं. सर्जनं>) स्रष्टृ, जगत्कर्तृ, विधातृ (सब पुं.) ।

सिरताज, सं. पुं. (हिं+फ़ा.) किरीटः-टं, मु(म)कुटं दे. २. शिरोमणिः, अग्रणीः, पुरोगः, श्रेष्ठः, मुख्यः, प्रधानम् ।

सिरनामा, सं. पुं., दे. 'सरनामा' ।

सिरपेच, सं. पुं. (फ़ा.) उष्णीषः-षं, दे. 'पगड़ी' ।

सिरहाना, सं. पुं. (सं. शिरं+धानं>) शिरोधानम् (न.), खट्वादीनां शिरो-अग्र,-भागः २. उपधानं, खुरालिकः, उपबर्हः-र्हणं, उच्छीर्षं, बालिशं, मसूरकः ।

सिरा, सं. पुं. (सं. शिरस्>) अंतः, प्रांतः, अवधिः, सीमा २. ऊर्ध्व-शीर्ष,-भागः, शिखा, शिखरं ३. अंत्य-अन्तिम,-भागः ४. आद्य-आदिम,-भागः ५. अग्रं, अग्रभागः ६. अणी-णिः (स्त्री.) अश्रिः-कोटिः (स्त्री.) ।

सिरिंज, सं.स्त्री.(अं.) शृंगकः-कं, दे, 'पिचकारी'।

सिरोपाव, सं. पुं. (सं. शिरःपाद>) संमान-वेशः-षः ।

सिरोही, सं. स्त्री. (देश०) सिरोहीनगर-निर्मित खड्गः, शिरोघ्नी ।

सिर्फ़, क्रि. वि. (अ.) दे. 'केवल' ।

सिर्री, वि., दे. 'सिड़ी' ।

सिल, सिला, सं. स्त्री. (सं. शिला) पाषाणः, प्रस्तरः, उपलः २. शैलः, शिलोच्चयः, महा-प्रस्तरः ३. शिला,-पट्टः-फलकः ।

—बट्टा, सं. पुं., शिलावटकं, *पेषणपाषाणौ (द्वि) ।

सिलना, क्रि. अ. (हिं. सीना) सिव् (कर्म.) ।

सिलपट, वि. (सं. शिलापट्टः>) सम, समस्थ, सपाट ।

सिलबट्टा, सं. पुं. (सं. शिला+वटकः>) शिलावटकं-कौ, पेषण,-पाषाणौ-प्रस्तरौ ।

सिलवट, सं. स्त्री. (हिं. सिलना) वलिः(स्त्री.), वस्त्रभंगः, पुटचिह्नम् ।

सिलवाई, सं. स्त्री. (हिं. सिलवाना) सीवन-सेवन स्यूति,-भृतिः-भृत्या-कर्मण्या ।

सिलवाना, (हिं. सीना) सिव् (प्रे.) ।

सिलसिला, सं. पुं. (अ.) क्रमः, आनुपूर्वी, परंपरा २. पंक्तिः-राजिः-श्रेणिः (स्त्री.), ३. शृङ्खला ४. व्यवस्था, संविधानं, विन्यासः ५. वंशानुक्रमः, कुलपरंपरा ।

—लेवार, क्रि. वि. (अ.+फ़ा.) क्रमेण, क्रमशः, यथाक्रमं, आनुपूर्व्या, अनुपूर्वशः ।

सिलह, सं. पुं. (अ. सिलाह) अस्त्रं, शस्त्रम् ।

—ख़ाना, सं. पुं. (अ.+फ़ा.) शस्त्रशाला, अस्त्रागारम् ।

—पोश, वि., सन्नद्ध, शस्त्रास्त्रसज्ज ।

सिला[1], सं. पुं. (अ.) पुरस्कारः, पारितोषि-कम् २. परिणामः, फलम् ।

सिला[2], सं. स्त्री., दे. 'शिला' ।

सिलाई, सं. स्त्री. (हिं. सिलाना) संधिः, सीवनं २. सी(से)वनं, स्यूतिः (स्त्री.) ३. दे. 'सिलवाई' ।

सिलाजीत, सं. पुं. [सं. शिलाजतु (न.)] अद्रिजं, अश्मजं, दे. 'शिलाजीत' ।

सिलारस, सं. पुं. (सं. सिह्लकीरसः) श(स)ल्ल-की,-द्रवः-रसः-निर्यासः ।

सिलिंडर, सं. पुं. (अं.) रम्भं वर्तुलं (पात्रभेदः) ।

सिली, सिल्ली, सं. स्त्री. (हिं. सिल) शाणः-णी, सामकः, शाणाश्मन् (पुं.)।
सिलौट, सिलौटा, सं. पुं. (हिं. सिल+वट्टा) शिला,-पट्टः-फलकः २. दे. 'सिलवट्टा'।
सिंवई, सं. स्त्री., दे. 'सेंवई'।
सिवान, सं. पुं. (सं. सीमांतः) सीमा, प्रांतः, पर्यंतः।
सिवाय, क्रि. वि. (अ. सिवा) अपि च, अपरं च २. ऋते, विना, अंतरेण, विहाय, वर्जयित्वा। वि., अधिक, भूयस् २. अपेक्षाधिक।
सिवार-ल, सं. स्त्री. पुं. (सं. शैवालं) शेपालः-लं, जल,-केशः-नीली-नीलिका, शैवलं, सलिल-कुन्तलम्।
सिविल, वि. (अं.) नागरिक, पौर २. सभ्य, शिष्ट।
—डिसओबिडिएंस, सं. स्त्री. (अं.) सविनयावज्ञा।
—सर्जन, सं. पुं. (अं.) नागरिकः शस्त्रवैद्यः।
—सर्विस, सं. स्त्री. (अं.) नागरिकसेवा।
सिसकना, क्रि. अ. (अनु.) सगद्गदं रुद् (अ. प. से.) २. निधनासन्न (वि.) क्लृप् (भ्वा. आ. से.)।
सिसकी, सं. स्त्री. (हिं. सिसकना) गद्गदः-दं, गद्गदध्वनिः।
—भरना या लेना, क्रि. अ., दे. 'सिसकना'।
सिहरा, सं. पुं., दे. 'सेहरा'।
सींक, सं. स्त्री. (सं. इषीका) इषिका, तृण-घास,-सूक्ष्मनालं-सूक्ष्मकांडम्।
सींकुर, सं. पुं. (हिं. सींक) इषीकापुष्पम्।
सींकिया, सं. पुं. (हिं. सींक) सरेखो वस्त्रभेदः।
सींग, सं. पुं. (सं. शृङ्गं) विषाणः-णं, कूणिका २. काहल,-लं-ला, शृङ्गमयो वाद्यभेदः।
(किसी के सिर पर)**—होना** मु., वैशिष्ट्यं वृत् (भ्वा. आ. से.)।
—दिखाना, मु., अंगुष्ठ दृश् (प्रे.), किमप्यदत्त्वा उपहस् (भ्वा. प. से.)।
—निकलना, मु., (पशुः) युवा जन् (दि. आ. से.) २. उन्मद् (दि. प. से.), दे. 'इतराना'।
—समाना, मु., आश्रयः-शरणं लभ् (कर्म.)।
सींगी, सं. स्त्री. (हिं. सींग) दे. 'सींग' (२)। २. रक्तचूषणशृङ्गं, रक्तचूषणी ३. शृङ्गी, मीनभेदः।
—लगाना या तोड़ना, मु. शृङ्गेण रक्तं निष्कस् (प्रे.)।
सींचना, क्रि. स. (सं. सेचनं) अव्-, सिच् (तु. प. अ.), वारिणा आप्लु (प्रे.)-अभ्युक्ष् (भ्वा. प. से.), अभिवृष् (भ्वा. प. से.), जलं दा २. अभि-प्र-सं-, उक्ष्, अव-आ-नि-, सिच् ३. अव-वि,-कृ (तु. प. से.)। सं. पुं., अव-आ-,सेकः-सेचनं, जलप्लावनं, अभिवर्षणं, अभ्युक्षणं, प्रोक्षणम्।
सींचने योग्य, वि. अव-आ-,सेचनीय-सेक्तव्य, अभ्युक्षणीय, अभिवर्षणीय।
सींचने वाला, सं. पुं., सेचकः, सेक्तृ, प्रोक्षकः।
सींचा हुआ, वि., सिक्त, अभ्युक्षित, जलप्लावित।
सींह, सं. पुं. (देश.) शल्यः, शल्यकः, शल्लकी, शल्यमृगः।
सी, वि. स्त्री. (हिं. सा) समा, तुल्या, सदृशी, सदृक्षी।
सी. आई. डी., सं. पुं. (अं.) गुप्तचरविभागः, अपसर्प-च(चा)र-प्रणिधि,-विभागः।
सीकर, सं. पुं. (सं.) कणः, द्रप्सः, पृषतः, लवः, बिंदुः, विप्रुष् (स्त्री.) २. शीकरः, तुषारः ३. प्रस्वेदः, घर्मः, स्वेदजलम्।
सीख, सं. स्त्री. (सं. शिक्षा) शिक्षणं, विनयनं, अध्यापनं, अनुशासनं, बोधनं २. शिक्षाविषयः ३. मंत्रणा, परामर्शः, उपदेशः।
सीख़, सं. स्त्री. (फ़ा.) शलाका, धातु-लोह,-दंडः २. लघुसूक्ष्मयष्टिः (स्त्री.) ३. शंकुः, शल्यं, महासूचिः (स्त्री.) ४. (मांसभर्जनाय) शूलः-लम्।
सीख़चा, सं. पुं. (फ़ा.) दे. 'सीख़' (१, ४)।
सीखना, क्रि. स. (सं. शिक्षणं) शिक्ष् (भ्वा. आ. से.), अधि-इ (अ. आ. अ.), अभ्यस् (दि. प. से.), अभ्यासेन विद्यां लभ् (भ्वा. आ. अ.)-प्राप् (स्वा. प. अ.), पठ् (भ्वा. प. से.)। सं. पुं., शिक्षणं, अध्ययनं, अभ्यासः, विद्या,-अर्जनं-लाभः, प्राप्तिः (स्त्री.)।
सीखने योग्य, वि., शिक्षणीय, अध्येतव्य, अभ्यसनीय।

सीखने वाला, सं. पुं., छात्रः, शिष्यः, शिक्षकः (क्वचित्), अध्येतृ, विद्यार्थिन्, शिक्षार्थिन् ।
सीखा हुआ, वि. (मनुष्य) शिक्षित, कृतविद्य, पंडित, प्राज्ञ, बुध । (विषय) शिक्षित, ज्ञात, बुद्ध, पठित, अधीत ।
सीग़ा, सं. पुं. (अ.) शासन-,विभागः २. व्यवसायः, वृत्तिः (स्त्री.) ।
सीझना, क्रि. अ. (सं. सिद्ध>) तापेन सिध् (दि. प. अ.), ऊष्मणा श्री-पच् (कर्म.), सिद्ध (वि.) भू २. (तापादिभिः) मृद्भू, मार्दवं भज् (भ्वा. आ. अ.) ३. कष्टं सह् (भ्वा. आ. से.) ४. ऋणं शुध् (दि. प. अ.), ऋणनिस्तारः जन् (दि. आ. से.) ५. शीतेन वि-, गल् (भ्वा. प. से.) ।
सीटी, सं. स्त्री. [सं. शीत्कृतिः (स्त्री.)] शीत-कृतं-कारः, शीच्छब्दः २. *शीत्करी, वाद्यभेदः ।
—**बजाना**, क्रि. अ., शीच्छब्दं कृ । क्रि. स., शीत्करीं वद् (प्रे.) ।
—**देना**, मु., शीच्छब्देन आकृ (प्रे.) ।
सीठना, सं. पुं. (सं. अशिष्ट>) अश्लील-गीतं-तिः (स्त्री.), वैवाहिकगालिः (स्त्री.) ।
सीठनी, सं. स्त्री. (हिं. सीठना) दे. 'सीठना' ।
सीठा, वि. (सं. शिष्ट>) अरस, विरस, नीरस, स्वादहीन ।
—**पन**, सं. पुं., नीरसता, निस्स्वादता ।
सीठी, सं. स्त्री. (सं. शिष्टं) (पत्रपुष्पफलादीनां) उच्छिष्टं, नीरसांशः २. निस्सारद्रव्यं ३. नीरसपदार्थः ।
सीड़, सं. स्त्री. (सं. शीतं>) क्लेदः, स्तेमः, आर्द्रता २. क्लिन्नभूमिः (स्त्री.) ।
सीढ़ी, सं. स्त्री. (सं. श्रेणी>) सोपानः, पथः-मार्गः-पंक्तिः (स्त्री.) पद्धतिः (स्त्री.)-पदवी, अधिरोह(हि)णी, नि(निः) श्रेणी-णिः (स्त्री.), नि(निः)श्रय(यि)णी २. काष्ठनिश्रेणी ।
—**का डंडा**, सं. पुं., सोपानदंडः ।
—**चढ़ना**, मु., क्रमशः उत्कर्षं व्रज् (भ्वा. प. से.) ।
सीतल, वि., दे. 'शीतल' ।
—**पाटी**, सं. स्त्री., *शीतलकटः ।
सीतला, सं. स्त्री., दे. 'शीतला' ।
सीता, सं. स्त्री. (सं.) जानकी, मैथिली, वैदेही, अयोनिजा, भूसुता, पार्थिवी । २. फाल-रेखा, लांगलपद्धतिः (स्त्री.), हलिः (पुं.) ।
—**द्रव्य**, सं. पुं. (सं. न.) कृषि-कर्षण,-उपकरणानि (न. बहु.) ।
—**पति**, सं. पुं. (सं.) श्रीरामः, राघवः ।
—**फल**, सं. पुं. (सं.) दे. 'शरीफ़ा' २. दे. 'कुम्हड़ा' ।
सीत्कार, सं. पुं. (सं.) सीत,-कृतं-कृतिः (स्त्री.), आनंदपीडादिजः सीच्छब्दः ।
सीध, सं. स्त्री. (हिं. सीधा) सरलायामः, अंजसायतिः (स्त्री.) २. लक्ष्यम् ।
सीधा[1], वि. (सं. शुद्ध>) सरल, वक्रतारहित, ऋजु, अंजस, प्रगुण २. निर्व्याज, निष्कपट, निश्छल ३. शिष्ट, सुशील ४. शांतस्वभाव, सौम्य, ५. सुकर, सुसाध्य ६. सुबोध, सुगम ७. दक्षिण, अपसव्य । क्रि. वि., सरलं, अवक्रं, अजिह्मम् ।
—**करना**, क्रि. स., सरली-प्रगुणी,-कृ २. दम् (प्रे.), वशीकृ, विनी (भ्वा. प. अ.) ।
—**पन**, सं. पुं., सरलता, वक्रताऽभावः २. आर्जवं, सौम्यता, निष्पटता ।
—**होना**, सरली-प्रगुणी,-भू २. वशीभू । ३. सन्मार्गं अवलंब् (भ्वा. आ. से.) ।
सीधा[2], सं. पुं. (सं. असिद्ध) असिद्ध-अपक्व-आम,-अन्नम् ।
सीधी तरह, क्रि. वि., शांत, शान्त्या २.सम्यक्, सुचारुरूपेण ३. धर्मेण, न्यायेन ।
सीधे, क्रि. वि., सरलं, अञ्जसं २. दे. 'सीधी तरह' ।
सीन, सं. पुं. (अं.) दृश्यं, दृक्पातविषयः २. ज(य)वनिका, अपटी ।
सीनरी, सं. स्त्री. (अं.) दृश्यप्रदेशः, प्राकृतिक-दृश्यं २. रंगसज्जा ।
सीना[1], क्रि. स. (सं. सीवनं) सिव् (दि.प.से.) । सं. पुं., सेवनं, सीवनं, स्यूतिः (स्त्री.), ऊतिः-व्यूतिः (स्त्री.) ।
—**पिरोना**, सं. पुं., सूची(चि)-कर्मन् (न.) -शिल्पम् ।
सीना[2], सं. पुं. (फ़ा.) उरस्-वक्षस् (न.) ।
—**ज़ोर**, वि. (फ़ा.) प्रबल, दुर्दम, उद्धत ।
—**ज़ोरी**, सं. स्त्री., औद्धत्यं, बलात्कारः ।
—**बंद**, सं. पुं. (फ़ा.) आंगिकः-कं, दे. 'अंगिया'।
—**उभार कर चलना**, मु., साटोपं, चल (भ्वा. प. से.) ।

सीने से लगाना, मु., आलिंग् (भ्वा. प. से.), उपगुह् (भ्वा. उ. से.) ।

सीनियर, वि. (अं.) वरीयस्-ज्यायस् (-सी स्त्री.) । सं. पुं., गुरुजनः ।

सीनेट, सं. स्त्री. (सं.) वृद्ध-प्रधान-महा,-सभा ।

सीने योग्य, वि. सीवनीय, सीवितव्य, सीवनार्ह ।

सीने वाला, सं. पुं., सेवकः, सीवनकर्तृ,सीवकः ।

सीप, सं. पुं. [सं. शुक्तिः (स्त्री.)] शुक्तिका-मुक्ता,-मातृ(स्त्री.)-प्रसूः(स्त्री.)-स्फोटः,मौक्तिक-प्रसवा, तौतिकः ।

—सुत, सं. पुं. (सं. शुक्तिसुतः) मौक्तिकं, मुक्ता, शक्ति,-जं-बीजम् ।

सीपी, सं. स्त्री., दे. 'सीप' ।

—सा मुँह निकल आना, मु., अत्यन्तर्दुर्बल-अत्यधिकक्षीण (वि.) भू ।

सीमंत, सं. पुं. (सं.) केशेपु वर्त्मन् (न.), दे. 'माँग' । २. अस्थिसंधिः ।

सीमंतिनी, सं. स्त्री. (सं.) नारी, दे. ।

सीमन्तोन्नयन, सं. पुं. (सं. न.) गर्भस्थितेः पष्ठेऽष्टमे वा मासे करणीयः संस्कारः (धर्म.) ।

सीमांत, सं. पुं. (सं.), सीमा, सीमन् (स्त्री.), उपांतः, पर्यंतः, प्रांतः २. ग्रामसीमा ।

सीमा, सं. स्त्री. (सं.) सीमन् (स्त्री.), अवधिः, आधाटः, प्रान्तः, पर्यन्तः, मर्य्यादा २. दे. 'सीमंत'(१) ।

सीमित, वि. (सं.) परि,-मित, ससीम, मर्यादित ।

सीया हुआ, वि., स्यूत, स्यून ।

सीमेंट, सं. पुं. (अं.) वज्रचूर्णम् ।

सीर. सं. पुं. (सं.) हलं, हालः २. सूर्यः ३. अर्कवृक्षः । सं. स्त्री., क्षेत्रपतेः आत्मकृष्ट-भूमिः (स्त्री.) ।

—ध्वज, सं. पुं. (सं.) जनकः २. बलरामः ।

—में, मु., संभूय, एकत्र मिलित्वा ।

सीरम, सं. पुं. (अं.) रक्तरसः ।

सीरा[1], सं. पुं. (फ़ा. शीरह्) मधु-शर्करा,-क्वाथः, दे. 'चाशनी' २. लप्सिका ।

सीरा[2], वि. (सं. शीतल) शीत, शिशिर, उष्णत्वशून्य २. शांत, मौनिन् ।

सील, सं. स्त्री. (सं. शीतल>) क्लेदः, स्तेमः, आर्द्रता ।

सीला[1] वि. (सं. शीतल) आर्द्र, क्लिन्न ।

सीला[2], सं. पुं. (सं. शिलः-लं) मुनीनां जीव-नोपायभेदः, मंजर्यात्मकानेकधान्योच्चयनम् ।

सीवन, सं. पुं. (सं. न.) सेवनं, स्यूतिः(स्त्री.), सूचीकर्मन् (न.) २. सीवनं, (स्यूति-) संधिः ३. लिंगमण्यधःसूत्रम् ।

सीस, सं. पुं. (सं. शीर्ष) दे. 'सिर' ।

—फूल, सं. पुं. (हिं.) *शीर्षफुल्लं, शिरोभूषण-भेदः ।

सीसा, सं. पुं. (सं. सीसं) सीसकं, सिन्दूर-कारणं, त्रपु (पुं. न.), महाबलं, बहुमलं, सुवर्णारिः, जडम् ।

सीसे का दर्द, सं. पुं., सीसकशूलम् ।

सी-सी, सं. स्त्री. (अनु.) सीत्,-कारः-कृतिः, (स्त्री.)-कृतं, हर्षपीडाशीतादिजनितध्वनिः ।

सीह, सं. पुं., दे. 'सींह' ।

सुँघनी, सं. स्त्री. (हिं. सूँघना) नस्यं, दे. 'नसवार' ।

सुँघाना, क्रि. प्रे., बनाओ 'सूँघना' के प्रे. रूप ।

सुंदर, वि. (सं.) रुचिर, सुषम, चारु, शोभन, कान्त, रुच्य, मंजु, मंजुल, मनोहर, मनोज्ञ, मनोरम, (मनो-)हारि, रमणीय, रामणीयक, बंधु(धू)र, पेश(स)ल, वाम, (अभि-)राम, नन्दित, सुमन, वल्गु, सुरूप, अभिरूप, दिव्य २. शुभ, भद्र, मंगल ३. उत्तम, श्रेष्ठ, उत्कृष्ट । ('सु' से भी रूप बनाते हैं, जैसे-सुमुखम् ।)

—कांड, सं. पुं. (सं. पुं. न.) लंकावर्तिसुंदर-पर्वतमधिकृत्य रचितंरामायणस्य पंचमं कांडम् ।

सुंदरता, सं. स्त्री. (सं.) सौन्दर्यं, रुचिरता, सुषमा, कांतिः (स्त्री.), मंजुता, मंजुलत्वं, मनोज्ञता-त्वं, रमणीयता, अभिरूपता, लावण्यं, शोभा, रूपं, अभिख्या, श्रीः-लक्ष्मीः (स्त्री.) ।

सुंदरी, सं. स्त्री. (सं.) रूपलावण्यसंपन्ना नारी, रामा, वामा, रोचना, वरांगना, वरवर्णिनी, सिता । वि. (सं.) रूपवती, मनोज्ञा, रुचिरा ।

सुंबा, सं. पुं. (सं. सूचकः) *लोहवेधनी, शतघ्नी, शोधनी ।

सुंबुल, सं. पुं. (फ़ा.) सुगंधितघासभेदः, सुंबुलम् ।

सु, उप. (सं.) सौन्दर्योत्कर्षभद्रत्वादिबोधकः उपसर्गः (उ. सुपुत्रः इ.) ।

सुकचाना, क्रि. अ., दे. 'सकुचाना'।
सुकड़ना, क्रि. अ., दे. 'सिकुड़ना'।
सुकर, वि. (सं.) सु-सुख-अयत्न,-साध्य-निष्पाद्य-कार्य, अनायास।
सुकरता, सं. स्त्री. (सं.) सु-सुख,-साध्यता, सौकर्य्यं, सुकरत्वम्।
सुकर्म, सं. पुं. [सं.-र्मन् (न.)] सु-सत्-उत्तम-पुण्य-श्रेष्ठ,-कर्मन् (न.)-कृत्यं-कार्यम्।
सुकर्मी, वि. (सं.-र्मिन्) सुकर्मन्, सुकृत, सत्क्रिय, सुकर्मशील २. धर्मात्मन्, पुण्यात्मन् ३. सदाचारिन्, सद्वृत्त।
सुकवि, सं. पुं. (सं.) कविवरः, सुकाव्यकारः।
सुकाल, सं. पुं. (सं.) सुसमयः २. सुभिक्षम्।
सुकुमार, वि. (सं.) अति-,कोमल, मृदु, मृदुल, प्र,-तनु, परि-,पेलव, श्लक्ष्ण, ललित। सं. पुं. (सं.) सुन्दर-उत्तम,-बालकः।
सुकुमारता, सं. स्त्री. (सं.) सौकुमार्यं, मार्दवं, पेलवता, मृदुलता, तनुता।
सुकुमारी, सं. स्त्री. (सं.) सुन्दर-श्रेष्ठ,-कन्या २. दुहितृ (स्त्री.), पुत्री। वि. (सं.) कोमलांगी, तन्वंगी, तनुगात्री।
सुकुल, वि. (सं.) महाकुल, अभिजात, सद्वंशज, कुलीन। सं. पुं. (सं. न.) सु-सद्,-वंशः।
सुकुलीन, वि. (सं.) दे. 'सुकुल' वि.।
सुकृत, सं. पुं. (सं. न.) पुण्यं, सत्-सु-पुण्य,-कार्य-कृत्यं-कर्मन् (न.) वि. (सं.) सौभाग्यवत्, भाग्यशालिन् २. धार्मिक, पुण्यात्मन् ३. सुविहित।
सुकृति, सं. स्त्री. (सं.) पुण्यं, सत्कृत्यम्।
सुकृती, वि. (सं.-तिन्) धार्मिक, पुण्यवत्, सत्कर्मन् २.सौभाग्यशालिन् ३.प्राज्ञ, बुद्धिमत्।
सुकेशी, सं. स्त्री. (सं.) सुन्दरकेशवती नारी, सुकेशिनी।
सुख, सं. पुं. (सं. न.) मुद् (स्त्री.), मुदा, मुदितं-ता, प्रीतिः (स्त्री.), हर्षः, आ-प्र-,मोदः, संमदः, शर्मन् (न.), शा(सा)तं, आ-,नंदः, आ-,नंदथुः प्र-,मदः, भोगः, रभसः, निर्वृतिः (स्त्री.), सौख्यं, जोषः।
—कर, वि. (सं.) सुख,-कार-कारिन्-कारक-आवह-दः-दायकः, सुखंकरः।
—की नींद सोना, मु., सुखं जीव् (भ्वा. प. से.)-वस् (भ्वा. प. अ.)।
—चैन, सं. पुं. (सं.+हिं.) दे. 'सुख'।
—दायी, वि. (सं.-यिन्) सुख,-द-प्रद-दायक-दातृ-आवह, दे. 'सुखकर'।
—देना, क्रि. स., सुखयति (ना. धा.), सुखी कृ, सुखं दा, निर्वृतं-सुखिनं कृ।
—धाम, सं. पुं. [सं.-मन् (न.)] स्वर्गः, स्वर्लोकः।
—पाना, क्रि.अ., सुखमनुभू, सुखायते (ना. धा.), निर्वृत-सुखित (वि.) स्था (भ्वा. प. अ.), सौख्यं लभ् (भ्वा. आ. अ.)।
—पाल, सं. पुं. (सं.+हिं. पालकी) *सुख-शिबिका।
—पूर्वक, क्रि. वि, (सं.-कं.) सुखेन, सौकर्येण, सुखं, लीलया, अनायासम्।
—लूटना, मु., सुखायते (ना. धा.), यथेष्टसुखं भुज् (रु. आ. अ.)।
—साध्य, वि. (सं.) सुकर, अयत्नसाध्य।
सुखांत, सं. पुं. (सं. न.) सुखप्रधानं नाटकं रूपकं वा २. प्रहसनं (सा.)।
सुखागत, सं. पुं. (सं. न.) स्वागतम्, शुभागमनम्।
सुखाना, क्रि. स., बनाओ 'सूखना' के प्रे. रूप।
सुखार्थी, वि. (सं.-र्थिन्) सुखैषिन्, सुखेच्छुक, सुखकामिन्।
सुखी, वि. (सं.-खिन्) सुखित, निर्वृत, निश्चित, स्वस्थ, सुस्थ, निरुद्वेग, शांत, आनंदित, मुदित, वीतचिंत, प्रसन्न, सानंद, संतुष्ट।
सुखेच्छा, सं. स्त्री. (सं.) सुख,-अभिलाषः-कामना-वांछा।
सुख्यात, वि. (सं.) प्रख्यात, प्रसिद्ध, विश्रुत।
सुख्याति, सं. स्त्री. (सं.) सुकीर्तिः-विश्रुतिः (स्त्री.), यशस् (न.)।
सुगंध, सं. स्त्री. (सं. पुं.) सु-, वासः, सुरभिः, सु-,गंधः, सौरभं-भ्यं, आमोदः, परिमलः।
सुगंधि, सं. स्त्री. (सं.>) दे. 'सुगंध' सं. स्त्री.। वि. (सं.) दे. 'सुगंधित'।
सुगंधित, वि. (सं.) सुरभि, सुगंधि, सुवास, आमोद-परिमल,-वत-युक्त, सुवासित, सद्गंध, इष्टगंध, घ्राणतर्पण, सुगंधाढ्य।
सुगम, वि. (सं.) उपगम्य, उपसर्पणीय, सुगम्य, सुख,-गम्य-उपसर्य २.सुबोध, सुखज्ञेय ३. सुकर, सुसाध्य, सरल ४. सुलभ, सुप्राप्य, सुप्राप।

सुगमता, सं. स्त्री. (सं.) सौकर्यं, सुसाध्यता ।
सुगम्य, वि. (सं.) दे. 'सुगम' (१) ।
सुग्गा, सं. पुं. (सं. शुकः) दे. 'तोता' [सुग्गी (स्त्री.) = शुकी] ।
सुग्रीव, सं. पुं. (सं.) सुकंठः, वानरेन्द्रः, श्रीरामसखः । वि., सुकंठ, शोभनग्रीव ।
सुघट, वि. (सं.) सुकर, सुखसाध्य २. सुंदर, मनोहर ३. सुघटित, सुरचित, सुरेख ।
सुघटित, वि. (सं) सुरचित, सुनिर्मित ।
सुघड़, वि. (सं. सुघट) सुंदर, सुरेख, सुघटित २. निपुण, दक्ष, प्रवीण ।
सुघड़(ड़ा)ई, सं. स्त्री. (हिं. सुघड़) सुंदरता, सुरूपता २. चातुर्यं, कौशलम् ।
सुघड़ता, सं. स्त्री., दे. 'सुघड़ई' ।
सुघड़ी, सं. स्त्री. (सं. सुघटी) सु-शुभ,-कालः-समयः-मुहूर्तम् ।
सुघर, वि., दे. 'सुघड़' ।
सुचित, वि. (सं. सुचित्त) सावकाश, निर्व्यापार २. निश्चित ३. सावधान ।
सुचेत, वि. (सं. सुचेतस्) अवहित, सावधान, प्रमादशून्य ।
सुजन[1], सं. पुं. (सं.) आर्यः, सत्पुरुषः, भद्रजनः, सज्जनः दे. ।
सुजन[2], सं. पुं. (सं. स्वजनाः) आत्मीय-पारिवारिक,-जनाः,संबंधिनः, बांधवाः (सब बहु.) ।
सुजनता, सं. स्त्री. (सं.) सौजन्यं, भद्रता, सज्जनता दे. ।
सुजाति, सं. स्त्री. (सं.) सत्कुलं, सद्वंशः, वरान्वयः । वि. (सं.) अभिजात, कुलीन दे. ।
सुजान, वि. (सं. सुजान) प्राज्ञ, बुद्धिमत्, पंडित, विज्ञ २. प्रवीण, निपुण । सं. पुं., पतिः २. प्रणयिन्, रमणः ३. परमात्मन् ।
सुजाना, क्रि. स., बनाओ 'सूजना' के प्रे. रूप ।
सुझाना, क्रि. स., बनाओ 'सूझना' के प्रे. रूप ।
सुठि, वि. [सं. सुष्ठु (अव्य.)] सुंदर, वर, उत्कृष्ट २. अतिशय, बहु. । क्रि. वि., सामग्र्येण, संपूर्णतया, सम्यक् ।
सुड़पना, क्रि. स. (अनु. सुड़-सुड़) ससुड़-सुड़शब्दं पा (भ्वा. प. अ.)-आचम् (भ्वा. प. से.) ।
सुड़कना, क्रि. सं. (अनु. सुड़सुड़) सशब्दं सत्वरं च निगॄ (तु. प. से.) २. सशब्दं श्वस् (अ. प. से.) ।

सुडौल, वि. (सं. सु+हिं. डौल) सुरूप,सुरेख, सदाकार, सदाकृति, सुन्दर, सुघटित ।
सुढंग, सं. पुं. (सं. स+हिं. ढंग) सुरीतिः-सुरूढ़िः (स्त्री.) । वि., सुरूप, सुंदर ३.सद्वृत्त ।
सुत, सं. पुं. (सं.) आत्मजः, सूनुः, पुत्रः दे. ।
सुतनु, वि. (सं.) सुगात्र, सुन्दरशरीर । सं. स्त्री. (सं.) कोमलांगी, कृशांगी, सुन्दरी ।
सुतराम्, अव्य. (सं.) अतः २. अपितु ३. अगत्या ४. अत्यंतं ५. अवश्यम् ।
सुतली, सं. स्त्री. दे. 'सुतली' ।
सुता, सं. स्त्री. (सं.) पुत्री, दुहितृ (स्त्री.), तनुजा ।
—पति, सं. पुं. (सं.) जामातृ (पुं.), दे. 'दामाद' ।
सुतारी, सं. स्त्री. (सं. सूत्रकारः>) आरा, चर्म,-प्रभेदिका-प्रभेदिनी-वेधनी, *चर्म,-सूची-सीवनी ।
सुतार्थी, वि. (सं.-र्थिन्) पुत्र-सन्तान-सन्तति-अपत्य,-अभिलाषिन्-कामिन्-इच्छुक ।
सुतिनी, सं. स्त्री. (सं.) पुत्रवती, सुतवती, प्रजावती, सन्तानवती, ससन्ताना ।
सुतीक्ष्ण, वि. (सं.) अत्यन्त-अत्यधिक,-शित-शात-तीव्र-प्रखर । दे. 'तीक्ष्ण' । सं. पुं. (सं.) अगस्त्यभ्रातृ, ऋषिविशेषः । २. शोभांजनः, तीक्ष्णगंधः, दे. 'सहिजन' ।
सुत्थन, सं. स्त्री. (देश.) सुस्थूणा, *सूत्थानं, जंघावस्त्रभेदः ।
सुथना, सं. पुं. } दे. 'सुत्थन' ।
सुथनी, सं. स्त्री. }
सुथरा, वि. (सं. स्वच्छ वा सुस्थ>) स्वच्छ, निर्मल, विमल ।
—पन, सं. पुं., स्वच्छता, नैर्मल्यम् ।
सुदर्शन, वि. (सं.) शोभन, सुरूप, सुन्दर, प्रियदर्शन [सुदर्शना-नी (स्त्री.)] । सं. पुं. (सं.) सुदर्शनचक्रम् ।
—चक्र, सं. पुं. (सं. न.) विष्णुचक्रं, सुनाभं, श्रीकृष्णस्यास्त्रविशेषः ।
—चूर्ण, सं. पुं. (सं. न.) ज्वरौषधभेदः ।
सुदामा, सं. पुं. (सं.-मन्) श्रीकृष्णसखः । वि. (सं.) सुदातृ ।
सुदिन, सं. पुं. (सं. न.) शुभ,-दिनं-दिवसः-पुण्याहम् ।

सुदी, सं. स्त्री. (सं. सुदि अव्य.) शुक्ल-सित,-पक्षः-अर्द्धमासः ।

सुदूर, वि. (सं.) अति-सु-बहु-दूर-दूरवर्तिन्-दूरस्थ, अतिविप्रकृष्ट, द्रवीयस्, दविष्ठ । क्रि. वि. (सं. न.) अतिदूरं-रे ।

सुदृढ़, वि. (सं.) सुस्थिर, सुनिश्चल, सुधीर २. अति,-गाढ़-घन-कीकस, दुर्भेद्य ३. अतिबलिन्, सुशक्तिमत् ।

सुदेह, वि. (सं.) सुतनु, सुकाय, सुन्दर । सं. पुं. (सं.) सुन्दरशरीरम् ।

सुध, सं. स्त्री. [सं. शुद्ध-(बुद्धिः) >] स्मरणं, स्मृतिः (स्त्री.) २. संज्ञा, चैतन्यं, उपलब्धिः (स्त्री.), प्रति-,बोधः, चेतना ३. अवधानं, वृत्तज्ञानम् ।

—बुध, सं. स्त्री., चेतना, चैतन्यं, संज्ञा ।

—दिलाना, मु., स्मृ (प्रे.) ।

—न रहना या बिसरना, मु., विस्मृ (कर्म.) ।

—बिसराना या बिसारना, मु., विस्मृ (भ्वा. प. अ.) ।

—रखना, मु., सावधान-जागरूक (वि.) स्था (भ्वा. प. अ.) ।

—लेना, मु., वृत्तान्तं ज्ञा (क्र्. उ. अ.) ।

बे—, वि., निःसंज्ञ, मूर्च्छित २. प्रमादिन् ।

सुधना, क्रि. अ. (हिं. सोधना) शुध् (दि. प. अ.) निर्मलीभू ।

सुध-बुध, सं. स्त्री. (सं. शुद्धबुद्धिः>) दे. 'सुध' (२) ।

—जाती रहना या मारी जाना, मु., गतचेतन-नष्टसंज्ञ-निःसंज्ञ-मूर्च्छित (वि.) भू ।

—ठिकाने न रहना, मु., विक्षिप्त (वि.) जन् (दि. आ. से.) ।

सुधरना, क्रि. अ. (हिं. सुधना) दोष-त्रुटि,-रहित-हीन (वि.) भू , परि-वि-सं-, शुध् (दि. प. अ.), शुद्ध-निर्दोष (वि.) जन् (दि. आ. से.), प्रतिसमाधा (कर्म.) ।

सुधवाना, क्रि. प्रे. (हिं. सोधना) शुध् (प्रे.), पू (प्रे.), दोष-मल,-हीनं कृ (प्रे.) ।

सुधांशु, सं. पुं. (सं.) चंद्रः दे. ।

सुधा, सं. स्त्री. (सं.) पीयूषं, अमृतं दे. २. मकरंदः, पुष्परसः ३. मधु (न.) ४. जलं ५. दुग्धं ६. विषं ७. चूर्णः, दे. 'चूना' ।

—कंठ, सं. पुं. (सं.) पिकः, कोकिलः ।

—कर, सं. पुं. (सं.) सुधा,-घटः-दीधितिः-(पुं.)-धरः-आधारः-मयूखः-रश्मिः-योनिः (पुं.) -सूतिः (पुं.)-निधिः, चंद्रः ।

—कार, सं. पुं. (सं.) सुधाजीविन्, पलगंडः, लेपकः ।

—धौत, वि. (सं.) सुधा-चूर्ण,-सित-क्षालित-धवलित ।

—निधि, सं. पुं. (सं.) दे. 'सुधाकर' ।

—भोजी, सं. पुं. (सं.-जिन्) सुधाभुज्, देवः ।

—स्पर्धी, वि. (सं.-र्धिन्) अमृत-पीयूष,-उपम-सदृश, सुमधुर ।

सुधाना, क्रि. प्रे., दे. 'सुधवाना' ।

सुधार, सं. पुं. (हिं. सुधारना) दोष,-हरणं-अपनयनं, सं,-शोधनं, संस्करणं, प्रति-,समाधानम् ।

—करना, क्रि. स., सं-,शुध् (प्रे.), निर्दोषं-दोषरहितं विधा (जु. उ. अ.) कृ-प्रति-, समाधा, संस्कृ ।

सुधारक, सं. पुं. (हिं. सुधार) संशोधकः, दोषहारिन्, संस्कारकः ।

सुधारना, क्रि. स. (हिं. सुधारना) दे. 'सुधार करना' ।

सुधित, वि. (सं.) सुव्यवस्थित २. सु-सम्यक्,-पक्व-सिद्ध-शृत ।

सुधी, सं. पुं. (सं.) पंडितः, विद्वस् (पुं.), २. चतुर, सुबुद्धि ।

सुनना, क्रि. स. (सं. श्रवणं) श्रु (भ्वा. प. अ., शृणोति), आ-समा-कर्ण् (चु.), निशम् (दि. प. से. या प्रे. निशामयति), श्रवणगोचरीकृ २. अवधा (जु. उ. अ.) ३. भर्त्सनावचनानि श्रु । सं. पुं., श्रवणं, आ-समा,-कर्णनं, निश(शा)मनं, श्रुतिः (स्त्री.) ।

सुनने योग्य, वि., श्रोतव्य, श्राव्य, आ-समा,-कर्णनीय, निशमनीय ।

सुनने वाला, सं. पुं., श्रावकः, आ-समा,-कर्णयितृ-श्रोतृ (पुं.) ।

सुन लेना, मु., छलेन यदृच्छया अलक्षितं वा श्रु ।

सुना हुआ, वि., श्रुत, आ-समा,-कर्णित, श्रवणगोचरीकृत ।

सुनी अनसुनी कर देना, मु., श्रुत्वापि न अवधा (जु. उ. अ.)-उपेक्ष् (भ्वा. आ. से.) ।

सुनय, सं. पुं. (सं.) सु-उत्तम-श्रेष्ठ-,नीतिः (स्त्री.)।

सुनयन, सं. पुं. (सं.) मृगः । वि. (सं.) सुलोचन।

सुनयना, सं. स्त्री. (सं.) नारी । वि. (सं.) सुलोचना-नी ।

सुनवाई, सं. स्त्री. (हिं. सुनना) श्रवणं, निश-(शा)मनं २. व्यवहारदर्शनं, कार्य,-अवेक्षणं-विचारणम् ।

हाँकना, क्रि. स. (हिं. हाँक) दे. 'हाँक देना' २. सिंहनादं कृ, युद्धाय-आह्वे (प्रे.) ३. वि-कत्थ् (भ्वा. आ. से.), आत्मानं श्लाघ् (भ्वा. आ. से.) ४. नुद्-प्रणुद् (तु. प. अ., प्रे.) प्रेर् (प्रे.), चर्-चल् (प्रे.), चुद् (चु.), अज् (भ्वा. प. से.) ५. अपसृ-निष्कस् (प्रे.) ६. वीज् (चु.)। सं. पुं. तथा भाव, दे. 'हाँक' (१-२) ३. विकत्थनं, आत्मश्लाघनं-घा ४. प्रणोदनं, प्रेरणं, प्रचोदनं, प्रचालनं, प्राजनं ५. अपसारणं, निष्कासनं ६. वीजनम्।

हाँकनेवाला, सं. पुं., प्रेरकः, वाहकः, चालकः, प्रमोदकः, प्रचोदकः इ.।

हाँडी, सं. स्त्री. (सं. हंडी) हंडिका २. काच,-हंडी-हंडिका।

—पकना, मु., उपजप् (कर्म.), कूटं, रच् (कर्म.), उपजापः कृ (कर्म.)।

हाँफ(प)ना, क्रि. अ. (अनु-हँफ हँफ या सं. हाफिका >) सकष्टं श्वस् (अ. प. से.), सत्वरं प्राण् (अ.प.से.)। सं. पुं., कृच्छ्रश्वासः, त्वरितप्राणनम्।

हाँसी, सं. स्त्री., दे. 'हँसी'।

हा, अव्य. (सं.) हर्षशोकभयविस्मयक्रोधनिंदा-सूचकमव्ययम्।

हाइड्रोजन, सं. पुं. (अं.) उदजनम्, आर्द्र-जनम्।

हाइड्रोफ़ोबिया, सं. पुं. (अं.) अलर्करोगः, आलर्कं, जल,-भय-संत्रासः।

हाइफ़न, सं. पुं. (अं.) समासचिह्नं (-)। (उ. राज-सेवक)।

हाईकोर्ट, सं. पुं. (अं.) प्रधानन्यायालयः, उच्चाधिकरणम्।

हाई-स्कूल, सं. पुं. (अं.) उच्च-,विद्यालयः।

हाउस, सं. पुं. (अं.) गृहं, गेहः-हं, अ(आ)गारः-रम् २. सभा, परिषद् ३. नृपवंशः।

हाऊ, सं. पुं. (अनु.) दे. 'हौवा'।

हाकिम, सं. पुं. (अ.) शासकः, शासितृ, अधिकारिन्, नियोगिन्, आधिकारिकः।

हाकिमी, सं. स्त्री. (अ. हाकिम) शासनं, अधिकारः, प्रभुत्वं, आधिपत्यं, शिष्टिः (स्त्री.), राज्यम्।

हॉकी, सं. स्त्री. (अं.) आंगलक्रीडाभेदः।

हाजत, सं. स्त्री. (अ.) आवश्यकता, अपेक्षा २. कामना, लालसा ३. मल-मूत्र,-उत्सिसृक्षा ४. गुप्तिः (स्त्री.), दे. 'हवालात' (१)।

हाज़मा, सं. पुं. (अ.) पचनं, वि-परि-,पाकः, पक्तिः (स्त्री.) २. जठर,-अग्निः-अनलः, पाचनशक्तिः (स्त्री.)।

—बिगड़ना, मु., अग्निमांद्यं जन् (दि. आ. से.), अन्नं न पच् (कर्म.)।

हाज़िम, वि. (अ.) पाचक, पाचन, अग्नि-वर्द्धक।

हाज़िर, वि (अ.) उपस्थित, पुरःस्थित, वर्त-मान, विद्यमान २. संनद्ध, सज्ज, उद्यत।

—करना, क्रि. स., उप-पुरः-संमुखं स्था (प्रे.)।

—जवाब, वि. (अ.) प्रत्युत्पन्नमति, विदग्ध।

—जवाबी, सं. स्त्री., प्रत्युत्पन्नमतिता-त्वं, वैद-ग्ध्यम्।

—व नाज़िर, वि., प्रत्यक्षदर्शक।

—होना, क्रि. अ., उपस्था (भ्वा. उ. अ.), उपस्थित (वि.) भू।

ग़ैर—, वि., अनुपस्थित, अविद्यमान।

हाज़िरी, सं. स्त्री. (अ.) उपस्थितिः (स्त्री.), विद्यमानता।

—का रजिस्टर, सं. पुं., उपस्थितिपंजिका।

—लेना, क्रि. स. उपस्थितिं अंक् (चु.)।

हाज़िरीन, सं. पुं. (अ. 'हाज़िर' का बहु.) उपस्थितजनाः (बहु०) श्रोतृवर्गः।

—(ने) जलसा, सं. पुं., सभ्याः-सदस्याः (बहु.)।

हाजी, सं. पुं. (अ.) मक्कायात्रिन्, *हाजिन २. कृत-मक्कायात्रः-हजः।

हाट, सं. स्त्री., दे. 'हट्ट' (१-२)।
हाटक, सं. पुं. (सं. न.) सुवर्णं, दे. 'सोना'।
हाता, सं. पुं., दे. 'इहाता'।
हातिम, सं. पुं. (अ.) अरबदेशीयोऽत्युदारः सामतविशेषः २. मुक्तहस्तमनुष्यः ३. निपुण-दक्ष-,मनुष्यः।
हाथ, सं. पुं. (सं. हस्तः) करः, पाणिः, शयः, पंचशाखः, भुजादलः, शमः, कुलिः २. चतुर्विंशत्यंगुलिपरिमाणं ३. वारः, दे. 'दाँव' ४. कर्मकरः ५. दंडः, मुष्टिः (स्त्री.), वारंगः ६. वशः, अधिकारः।
—आना, मु., अधिगम्-उपलभ् (कर्म.)।
—उठाना, मु., तड् (चु.), प्रहृ (भ्वा. प. अ.)।
—की चालाकी, मु., हस्तकौशलं, दे.।
—की मैल, मु., तुच्छ-क्षुद्र-असार,-वस्तु (न.)।
—खींचना, मु., परिहृ-विरम् (भ्वा. प. अ.), वर्ज् (चु.)।
—चढ़ना, मु., दे. 'हाथ आना' २. वशं आया (अ. प. अ.)।
—जोड़ना, मु., हस्तौ समानीय अथवा अंजलिं बद्ध्वा अथवा सांजलि प्रार्थ् (चु. आ. से.) । -अनुनी (भ्वा. प. अ.)-याच् (भ्वा. आ. से.)
—डालना, मु., दे. हस्तक्षेप करना'।
—धोना, मु., वियुज् (कर्म.), वंचित-विरहित-विहीन (वि.) भू।
—तंग होना, मु., दारिद्र्येण-निर्धनतया पीड् (कर्म.)।
—पर हाथ धरे रहना, मु., निरुद्योगं-निरुद्यमं स्था (भ्वा. प. अ.)।
—पसारना, मु., याच् (भ्वा. आ. से.)।
—पाँव फूलना मु., भयेन निस्तब्धीभू, शोकेन जडीभू।
—पाँव मारना, मु., प्र-, यत् (भ्वा. आ. से.), उद्युज् (रु. उ. अ.)।
—फेरना, मु., लल् (चु.)।
—बढ़ाना, मु., ग्रहीतुं-आदातुं प्रयत् (भ्वा. आ. से.)।
—बाँधना, मु., दे. 'हाथ जोड़ना'।
—मलना, मु., अनुशी (अ. आ. से.), पश्चात्तापं कृ २. निराश-दुःखित (वि.) भू।
—मारना, मु., छलेन अपहृ (भ्वा. प. अ.) २. असिना प्रहृ (भ्वा. प. अ.)।
—मिलाना, मु., करौ स्पृश् (तु. प. अ.) २. मल्लयुद्धाय सज्ज (वि.) भू।
—में रखना, मु., वशे-अधिकारे स्था (प्रे.)।
—लगना, मु., दे. 'हाथ आना' २. आरभ् (कर्म.)।
—समेटना, मु., दानात्, वितरणात् निवृत् (भ्वा. आ. से.)-विरम् (भ्वा. प. अ.)।
—साफ़ करना, मु., हन् (अ. प. अ.) २. अन्यायेन हृ (भ्वा. प. अ.)।
—से जाना, मु., दे. 'हाथ धोना'।
हाथों-हाथ, मु., सत्वरं, शीघ्रं २. कर-हस्त,-परंपरया।
हाथा, सं. पुं. (सं. हस्तः>) दे. 'हत्थी' २. कुड्यर्पितं मंगल्यं हस्तचिह्नम्।
—पाई, सं. स्त्री., हस्ताहस्ति (अव्य.), संमर्दः, कलहः।
—पाई करना, क्रि. अ., हस्ताहस्ति युध् (दि. आ. से.), कलहायते (ना. धा.)।
—बाँही, सं. स्त्री., दे. 'हाथापाई'।
हाथी, सं. पुं. (सं. हस्तिन्) करिन्, दन्तिन्, दन्तावलः, द्विपः, अनेकपः, द्विरदः, गजः, नागः, कुंजरः, वारणः, इभः, स्तम्बेरमः, म(मा)तंगः, पद्मिन्, पुष्करिन्, महामृगः, कर्शूर्पकर्णः, सिंधुरः, महानदः, सिन्दूरतिलकः, रदनिन्, महाबलः, द्रुमारिः।
—खाना, सं. पुं. (हि+फ़ा.) गजगृहं, हस्तिशाला।
—दाँत, सं. पुं. (सं. हस्तिदंतः) गजदंतः।
—पाँव, सं. पुं., श्लीपदः-दं, शिलीपदः-दं, प(पा)द,-गंडीरः-वल्मीकः।
—वान, सं.पुं., आधोरणः,हस्तिपकः, हास्तिकः, दे. 'महावत'।
—पर चढ़ना या बाँधना, मु., सुसमृद्ध (वि.) वृत् (भ्वा. आ. से.)।
हादसा, सं. पुं. (अ.) दुर्घटना, दे.।
हानि, सं. स्त्री. (सं.) क्षतिः (स्त्री.), अप,-चयः-हारः, अपायः २. क्षयः, नाशः, अभावः, ३. स्वास्थ्यबाधा ४. अनिष्टं, अहितं, अशुभम्।
—करना, क्रि. स., हानिं कृ, नश् (प्रे.), क्षि (प्रे.), अपचि (भ्वा. उ. अ.), क्षतिं जन् (प्रे.)।
—कारक, वि. (सं.) हानि,-कर-कार-कारिन्, अपचय-क्षय,-कारिन्, नाशक, अनिष्टोत्पादक।

—होना, क्रि. अ., क्षतिः जन् (दि. आ. से.), नश् (दि. प. वे.), वियुज् (कर्म.), वि-परि,-हा (कर्म.), वियुक्त-हीन-रहित (वि.) भू ।

हाफ़िज़, सं. पुं. (अ.) रक्षकः, त्रातृ २. *कुरानपाठिन् ।

हाफ़िज़ा, सं. पुं. (अ.) स्मृतिः, दे. 'स्मरण-शक्ति' ।

हामिल, वि. (अ.) भारवाह-हक, भारिन् २. नेतृ, प्रापक ।

हामिला, सं. स्त्री. (अ.) गर्भिणी, गर्भवती, अन्तर्वत्नी, ससत्त्वा ।

हामी, सं. स्त्री. (हिं. हाँ) अनुमतिः-स्वीकृतिः (स्त्री.), स्वीकारः, अनुज्ञा ।

—भरना, मु., स्वी-अंगी,-कृ, अनुज्ञा (क्र्. उ. अ.), अनुमन् (दि. आ. अ.) ।

हाय, अव्य. (सं. हा) आः, अहह, कष्टं, हंत (सब अव्य.) । सं. स्त्री., नि-दीर्घ-श्वासः, उच्छ्वसितं २. कष्टं, पीड़ा) ।

—हाय, अव्य. (सं. हा हा) आः आः इ. । सं. स्त्री., शोकः २. व्याकुलता ।

—पड़ना, मु., दुष्कृतं शापः फल् (भ्वा.प.से.) ।

—मारना, मु., दीर्घं श्वस् (अ. प. से.), (शोकेन) हा-हा कृ, निश्वासं मुच् (तु.प.अ.) ।

हार[1], सं. स्त्री. (सं. हारिः) पराजयः, परि-परा-अभि,-भवः २. श्रांतिः, क्लांतिः (स्त्री.), आयासः ३. हानिः-क्षतिः (स्त्री.) ।

—जीत, सं. स्त्री., जयपराजयौ (पुं. द्वि.) ।

—खाना, मु., दे. 'हारना' ।

—देना, मु., दे. 'हराना' ।

हार[2], सं. पुं. (सं.) कंठ,-भूषा-आभरणं-माला, ग्रैवं, ग्रैवेयकं २. दे. 'मोतियों का हार' ।

—का मनका, सं. पुं., हार-,-गुटिका-गुलिका-अक्षः ।

फूलों का—, सं. पुं., माला, माल्यं, स्रज् (स्त्री.) आपीडः ।

मोतियों का—, सं. पुं., मुक्तावली-लिः (स्त्री.), मुक्ता,-लता-माला, मौक्तिकसरः, हारा ।

रत्नों का—, सं. पुं. मणिमाला, रत्नावली-लिः (स्त्री.) ।

सोने का—, सं. पुं., कनकसूत्रम् ।

—हार, प्रत्य., दे. 'हारा' ।

हारना, क्रि. अ. (सं. हारणं >) परा-,जि (कर्म.), अभि-परा-परि,-भू (कर्म.) अभिभूत-पराजित (वि.) भू २. विफल (वि.) जन् (दि. आ. से.) ३. श्रन् क्लम् (दि. प. से.), खिद् (दि. आ. अ.) । क्रि. स., हा (जु. प. अ., प्रे. हापयति), अप,- हृ (प्रे.) २. नश्-क्षि (प्रे.) ३. त्यज् (भ्वा. प. अ.) ४. दा (जु. उ. अ.) । सं. पुं. तथा भाव, दे. 'हार[1]' ।

हारने योग्य, वि., अभिभवनीय, पराजेय ।

—वाला, सं. पुं., आसन्नपराजय, पराजित,-कल्प-प्राय !

हारा हुआ, वि., वि-परा-,जित, अभि-परा-परि,-भूत २. हृत, हारित, नष्ट, ३. श्रान्त, क्लान्त, खिन्न ४. अकृतकार्य ।

हारमोन, सं. पुं. (अं.) जीवनरसः ।

हारमोनियम, सं. पुं. (अं.) *मधुरध्वनम् ।

—हारा, प्रत्य. (सं.-त्यार>) (प्रायः कर्तृवाचक प्रत्ययों, (-अक,-तृच् ,-तन् आदि) से अनुवाद किया जाता है । उ. देनेहारा=दायकः, दातृ इ०) ।

हारिल, सं. पुं. (सं. हरितालकः) हरितवर्णः पीतपादः नीलचंचुः चटकभेदः, हारि(री)तः, हारीतकः ।

हारी, वि. (सं.-हारिन्) अप,-हर्तृ हारक, आच्छेदक, बलात् ग्रहीतृ २. वाहक, प्रापक, नायक,-हर ३. लुंटक, लुंठक, मोषक, चौर ४. नाशक, ध्वंसक ५. संग्राहक, समाहर्तृ (कर आदि) मनो-चेतो,-हर ।

हारीत, सं. पुं. (सं.) चौरः, लुंठकः, कितवः २. स्मृतिकारविशेषः ३. दे. 'हारिल' ।

हार्ट-फ़ेल, सं. पुं. (अं.) हृत्स्यन्दनविरोधः, हृदयावरोधः ।

हार्दिक, वि. (सं.) हृदय,-संबंधिन्-विषयक, चैत्त(-त्ती स्त्री.), चैत्तिक (-की स्त्री.), मानस -सी स्त्री.), मानसिक(-की स्त्री.) २.निर्व्याज्, निष्कपट ३. स्नेहशील, स्निग्ध, स्नेहिन्, अनुरागवत्, अनुरागिन् ।

हाल[1], सं. पुं. (अ.) अवस्था, दशा २. परि-स्थितिः (स्त्री.) ३. समाचारः, वृत्तांतः ४. विवरणं, इतिवृत्तं ५. चरित्रं, कथा ६. समाधिः, ईशैकाग्रता ७. वर्तमानकालः । वि., वर्तमान, विद्यमान, उपस्थित । अव्य., अधुनैव २. शीघ्रं, त्वरितम् ।

—का, मु., अभि-,नव, नूतन, अचिर, प्रत्यग्र ।
—बेहाल होना, मु., शुभात् अशुभं, मंगलात् अमंगलं, क्रमशो विकारवृद्धिः (स्त्री.) ।
—में, मु., वर्तमाने, आधुनिकसमये, इदानींतने काले ।
हाल², सं. स्त्री. (सं. हल्लनं) कंपः, कंपनं २. संघट्टः, समाघातः ३. लौहं चक्रवलयम् ।
हाल³, सं. पुं. (अं.) मुख-,शाला, बाह्यकोष्ठः, आस्थानी ।
हालत, सं. स्त्री. (अ.) दशा, अवस्था, स्थितिः (स्त्री.) २. आर्थिकावस्था ३. परिस्थितिः (स्त्री.) ।
हालहूल, सं. स्त्री. (सं. हल्लनम् >) कलकलः, कोलाहलः २. उपद्रवः, संमर्दः ।
हालाँ कि, अव्य. (फ़ा.) यद्यपि (अव्य.) ।
हाला, सं. स्त्री. (सं.) मद्यं, सुरा दे. ।
हालाहल, सं. पुं., दे. 'हलाहल' ।
हाली, अव्य. (अ. हाल) शीघ्रं, सत्वरम् ।
हाव, सं. पुं. (सं.) शृङ्गारभावजा चेष्टा (लीला, विभ्रम, विलास आदि) आह्वानम् ।
—भाव, सं. पुं. (सं.) पुरुषमनोहारी स्त्रीचेष्टाभेदः, विभ्रमः, विलासः, लीला ।
हावनदस्ता, सं. पुं. (फ़ा.) उलूखल-खल्ल,-मुसलं-ले-लौ (द्वि.) ।
हाशिया, सं. पुं. (अ.—यह्) प्रांतः, उपांतः, सीमा २. वस्त्रप्रांतः, चीरी-रिः (स्त्री.), दशा ।
हास, सं. पुं. (सं.) दे. 'हँसी' (१-४) ।
—कर, वि. (सं.) हास्यजनक २. अव-उप,-हास्य ।
हासिद, वि. (अ.) ईर्षा(र्ष्या)लु, ईर्षु-र्ष्यु ।
हासिल, वि. (अ.) लब्ध, अधिगत, प्राप्त दे. ।
हास्य, वि. (सं.) हास,-कर-जनक-उत्पादक, हास,-योग्य-आस्पद २. अव-उप,-हास्य, अव-उप,-हासार्ह। सं. पुं. (सं.न.) दे. 'हँसी' (१-४)।
—कर, वि. (सं.) दे. 'हास्य' वि. (१-२) ।
हास्यास्पद, सं. पुं. (सं. न.) हासविषयः २. उपहासविषयः। वि., दे. 'हास्य' (वि.१-२)।
हास्योत्पादक, वि. (सं.) दे. 'हास्य' (वि. १-२) ।
हा हा, सं. पुं. (अनु.) हास(स्य), शब्दः-ध्वनिः, अट्टहासः, अनुनय-दैन्य,-शब्दः-ध्वनिः ३. अहह, कष्टं, हा हंत ।

—ही ही, }
—ठी ठी, } सं. स्त्री., परिहासः, विनोदः ।
—खाना, मु., सदैन्यं आक्रू (प्रे.)-प्रार्थ् (चु. आ. से.) ।
—ही ही करना, मु., हस् (भ्वा. प. से.) २. परिहस्, विनोदवाक्यानि उदीर् (प्रे.) ।
हाहाकार, सं. पुं. (सं.) हाहा,-रवः-शब्दः-ध्वनिः २. आ-वि,-क्रोशः, आ-,क्रन्दनं, क्रन्दितं, चीत्कारः, भयजः कोलाहलः ।
—करना, क्रि. अ., हा हा कृ, हा हा ध्वनिं उत्पद् (प्रे.) २. आ-वि,-क्रुश् (भ्वा. प. अ.), आ-, क्रंद् (भ्वा. प. से.) ।
हिंजीर, सं. पुं. (सं.) गजपद,-बन्धनं-शृंखला-रज्जुः (स्त्री.) ।
हिंडोल, सं. पुं. (सं. हिंदोलः) रागभेदः ।
हिंडोला, सं. पुं. (सं. हिंदोलः-ला) हिंदोलकः, २. दोलः-ला-लिका, प्रेंखा, आन्दोलः, हिन्दोलः ३. दोला,-गीतं-गीतिका ।
हिंद, सं. पुं. (फ़ा.) भारतं, भारतवर्षं, आर्यावर्त्तः ।
हिंदवाना, सं. पुं., दे. 'तरबूज' ।
हिंदवी, सं. स्त्री. (फ़ा.) भारतीयभाषा २. हिन्दीभाषा ।
हिंदसा, सं. पुं. (अ.) अंकः (गणित) ।
हिंदी, वि. (फ़ा.) भारतीय, भारत,-वर्षीय-देशीय । सं. पुं., भारतः, भारतवासिन्, भारतवर्षवासिन्, भारतीयः । सं. स्त्री., उत्तरभारतस्य मुख्यभाषा, हिंदीभाषा ।
हिंदुस्तान, सं. पुं. (फ़ा. हिंदोस्तान) दे. 'हिंद' २. उत्तरभारतस्य मध्यमभागः (दिल्ली से पटने तक) ।
हिंदुस्तानी, वि. (फ़ा. हिन्दोस्तानी) दे. 'हिंदी' वि. । सं. पुं., दे. हिंदी' सं. पुं. । सं. स्त्री., अखिलभारतीयभाषा, *हिन्दुस्थानी ।
हिंदू, सं. पुं. (फ़ा.) आर्यः, वेद-स्मृति-पुराण,-अनुयायिन्-अनुगामिन्, *हिन्दुः ।
—पन, सं. पुं., *हिंदुत्व, आर्यत्वम् ।
हिंदोस्तान, सं. पुं. (फ़ा.) दे. 'हिंदुस्तान' ।
हिंसक, वि. (सं.) घात(तु)क, घातन, हिंस्र, शरारु, हन्तृ, हिंसालु, वध-हिंसा,-शील २. मांसभक्षक, क्रव्याद (पशु) ।

हिंसनीय, वि. (सं.) हन्तव्य, व्यापादनीय, मारणीय, वध्य।

हिंसा, सं. स्त्री. (सं.) अप,-कारः-कृतिः (स्त्री.)-क्रिया-करणं, पीडा, बाधा, अर्दनं २. वधः, हत्या, हननं, हिंसनं, घातः,मारणं, निषूदनम्।

—करना, क्रि. स., पीड् (चु.), अपकृ, व्यथ् (प्रे.), अर्द् (भ्वा. प. सें., प्र.) २. हन् (अ. प. अ.), हिंस् (रु. प. से.), व्यापद्-मृ (प्रे.), निषूद् (चु.)।

हिंसात्मक, वि. (सं.) पीडा-बाधा,-आत्मक-युक्त-दायक २. हत्यात्मक, जीववधयुक्त।

हिंसालु, वि. (सं.) हिंसक, घातक, हिंस्र, वधशील। सं. पुं. (सं.) हिंसक,-कुक्कुरः-भषकः-शुनसः, अलर्कः, मत्तश्वन्।

हिंस्र, वि. (सं.) दे. 'हिंसक'।

हिकमत, सं. स्त्री. (अ.) तत्त्वज्ञानं, दर्शनं २. शिल्पं, कलाकौशलं ३. उपायः, युक्तिः (स्त्री.) ४. नीतिः (स्त्री.), नयः ५. मित-व्ययः ६. चिकित्सा, वैद्यकम्।

हिकमती, वि. (अ. हिकमत) कर्मकुशल, कार्यपटुः २. चतुर, विदग्ध ३. मितव्ययिन्।

हिकायत, सं. स्त्री. (अ.) कथा, आख्यानम्।

हिकारत, सं. स्त्री. (अ.) तिरस्कारः, अवगणना।

—की नजर से देखना, मु., लघयति (ना. धा.), अवमन् (दि. आ. अ.), अवगण् (चु.)।

हिचक, सं. स्त्री. (हिं. हिचकना) आ-वि-परि-,शंका, संदेहः, संशयः, विकल्पः, निश्चय-निर्णय,-अभावः।

हिचकना, क्रि. अ. (अनु. हिच) दोलायते (ना. धा.), विक्लृप् (भ्वा. आ. से.), आ-वि,-शंक् (भ्वा. आ. से.), संशी (अ. आ. से.) २. दे. 'हिचकी आना'।

हिचकिचाना, क्रि. अ., दे. 'हिचकना'।

हिचकिचाहट, सं. स्त्री., दे. 'हिचक'।

हिचकिची, सं. स्त्री., दे. 'हिचक'।

हिचकी, सं. स्त्री. (अनु. हिच) हि(हे)क्का, हिक्किका, हिध्मा, झिणिका।

—आना, क्रि. अ., हिक्क् (भ्वा. उ. से.)।

—लगना, मु., मरणोन्मुख (वि.) वृत् (भ्वा. आ. से.) २. हिक्क्।

हिचर-पि(मि)चर, सं. स्त्री., दे. 'हिचक' २. दे. 'टालमटूल'।

हिजड़ा, सं. पुं., दे. 'हीजड़ा'।

हिजरी, सं. पुं. (अ.) यवनसंवत् (अव्य.) (यह १५।७।६२२ ई० अर्थात् श्रावण शुक्ल२, संवत् ६७९ वि. से चला है)।

हिजाब, सं. पुं. (अ.) अवगुंठनं २. लज्जा।

हिज्जे, सं. पुं. (अ. हिज्जह्) *शब्दाक्षरोच्चारणं।

—करना, क्रि. स., शब्दाक्षराणि उच्चर् (प्रे.)।

हिज्र, सं. पुं. (अ.) वियोगः, विरहः।

हित, वि. (सं.) लाभ,-प्रद-दायक, उप,-कारिन्-योगिन्, हितकर २. अनुकूल, योग्य२.हितेच्छु-च्छुक, हितैषिन्। सं. पुं. (सं. न.) लाभः, अर्थः २. मंगलं, भद्रं ३. अनुकूलता ४. स्वास्थ्य-लाभः ५. स्नेहः, अनुरागः ६. मैत्री, हितेच्छा ७. मित्रं ८. संबंधः, बंधुता ९. संबंधिन्, बंधुः। अव्य., लाभाय, हिताय २. कारणात्, हेतोः ३. अर्थे, कृते।

—कर, वि. (सं.) हित,-कर्तृ-कारक-कारिन् २. लाभ,-दायक-प्रद, उपयोगिन्, फलावह ३. स्वास्थ्य,-कर-प्रद।

—काम, सं. पुं. (सं.) हित,-कामना-इच्छा। वि. (सं.) हितैषिन्।

—कारी, वि. (सं.-रिन्) दे. 'हितकर'।

—चिंतक, वि. (सं.) हितेच्छु-च्छुक, हितैषिन्।

—चिंतन, सं. पुं. (सं. न.) हितेच्छा, उप-चिकीर्षा।

—वादी, वि. (सं.-दिन्) सत्परामर्शिन्।

हिताहित, सं. पुं. (सं. न.) हानिलाभौ-उप-कारापकारौ (पुं. द्वि.), इष्टानिष्टे-भद्राभद्रे (न. द्वि.)।

हितू, सं. पुं. (सं. हितः) मित्रं, हितैषिन्, सुहृद् २. संबंधिन्, बंधुः।

हितैषी, वि. (सं.-षिन्) हितचिंतक, दे.।

हितोपदेश, सं. पुं. (सं.) सत्परामर्शदानं २. विष्णुशर्मरचितो नीतिग्रंथविशेषः।

हिदायत, सं. स्त्री. (अ.) पथप्रदर्शनं २. शिक्षा, अनुशिष्टिः (स्त्री.)।

हिनहिनाना, क्रि. अ. (अनु. हिनहिन) हेष्-ह्रेष् (भ्वा. आ. से.)।

हिनहिनाहट, सं. स्त्री. (हिं. हिनहिनाना) हेषा, ह्रेषा, हे(ह्रे)षितम्।

हिना, सं. स्त्री. (अ.) दे. 'मेहंदी' ।

हिफ़ाज़त, सं. स्त्री. (अ.) रक्षा, दे. । २. निरीक्षणम् ।

हिफ़्ज़, वि. (अ.) कंठस्थ, मुखस्थ ।

—करना, क्रि. स., कंठस्थं कृ ।

हिब्बा, सं. पुं. (अ.) दानम् ।

—नामा, सं. पुं. (अ.+फ़ा.) दानपत्रम् ।

हिम, सं. पुं. (सं. न.) आकाश-ख,-वाष्पः, अवश्यायः, नीहारः, तुषारः, तुहिनं, प्रालेयं, मिहिका, रजनीजलं, इन्द्राग्निधूमः, कुज्झटिका २. हिम,-राशिः (पुं.)-संहतिः (स्त्री.), हिमानी ३. शीतं, शैत्यं ४. कमलं ५. नवनीतं ६. मौक्तिकं (सं. पुं.) हेमन्तर्तुः । २. चंदन-तरुः ३. कर्पूरः ४. चंद्रः ५. हिमालयः । वि. (सं.) शीत, शीतल, शिशिर ।

—कण, सं. पुं (सं.) तुषार,-लवः-बिंदुः ।

—कर, सं. पुं. (सं.) हिम,-किरणः-दीधितिः-भानुः-मयूखः-रश्मिः-रुचिः, चंद्रः ।

—गिरि, सं. पुं. (सं.) हिमालयः, दे. ।

—गृह, सं. पुं. (सं. न.) शीत-शीतल-शिशिर,-गृहं-अगारं-कोष्ठः ।

—जा, सं. स्त्री. (सं.) पार्वती, उमा, गौरी, भवानी ।

—पात, सं. पुं. (सं.) हिम-तुषार,-वृष्टिः (स्त्री.) -वर्षः-संपातः ।

हिमांशु, सं. पुं. (सं.) चंद्रः, दे. 'हिमकर' २. कर्पूरः ।

हिमाक़त, सं. स्त्री. (अ.) मूर्खता, दे. ।

हिमाचल, सं. पुं. (सं.) हिमाद्रिः, हिमालयः दे. ।

हिमामदस्ता, सं. पुं., दे. 'हावनदस्ता' ।

हिमायत, सं. स्त्री. (अ.) सं-,रक्षा-रक्षणं २. पक्षपातः ३. साहाय्यं, सहायता ।

—करना, क्रि. स., साहाय्यं कृ, सं-,रक्ष् (भ्वा. प. से.) ।

हिमायती, वि. (अ.) साहाय्यकारिन्, सहायक २. समर्थक, अनुमोदक ३. सपक्ष ४. रक्षक, त्रातृ ।

हिमालय, सं. पुं. (सं.) हिम,-अचलः-प्रस्थः-अद्रिः-शैलः, नग,-पतिः-अधिपः, उमा-भवानी,-गुरुः, हिमवत्, मेना-मेनका,-धवः-प्राणेशः, अद्रि-राजः ।

हिम्मत, सं. स्त्री. (अ.) साहसं, धैर्यं २. परा-वि,-क्रमः, शौर्यं, वीरता ।

—पड़ना, मु., साहसं विद् (दि. आ. अ.) ।

—हारना, मु., धैर्यं त्यज् (भ्वा. प. अ.), साहसं मुच् (तु. प. अ.), अधीर-निस्साहस (वि.) जन् (दि. आ. से.) ।

हिम्मती, वि. (फ़ा. हिम्मत) धीर, धैर्यवत्, साहसिन्, साहसिक २. वीर, शूर, पराक्रमिन् ।

हिया, सं. पुं. (सं. हृदयं), मानसं २. वक्षस् (न.) ।

हिरण्य, सं. पुं. (सं. न.) सुवर्णं, दे. 'सोना'' २. धनं ३. शुक्रं ४. रजतं ५. अमृतम् ।

—कशिपु, सं. पुं. (सं.) हिरण्याक्षभ्रातृ, दैत्यविशेषः, प्रह्लादपितृ ।

—गर्भ, सं. पुं. (सं.) सृष्टिकारणं ज्योतिर्मयांडं २. ब्रह्मन् (पुं.) ३. प्राण-सूत्र,-आत्मन्, सूक्ष्मशरीरयुतात्मन् ४. विष्णुः ।

हिरण्याक्ष, सं. पुं. (सं.) हिरण्यकशिपुभ्रातृ, दैत्यविशेषः ।

हिरन, सं. पुं. (सं. हरिणः,) कुरंगः-गमः, एणः, एणकः, कृष्णसारः, पृषत्-तः, अ-,जिन-योनिः, चारु-सु,-लोचनः, रुरुः,रोहितः, वननः, चलनः, प्लाविन्, मरुकः, लिगुः, ऋ(रि)श्यः-ष्यः ।

—हो जाना, मु., अतिवेगेन धाव् (भ्वा. प. से.), पलाय् (भ्वा. आ. से.) ।

हिरनी, सं. स्त्री. (सं. हरिणी) मृगी, कुरंगी, एणी ।

हिरनौटा, सं. पुं. (हिं. हिरन) हरिण-मृग-,पोतः-शावः-शावकः-शिशुः-कुरंगकः ।

हिरफ़त, सं. स्त्री. (अ.) व्यवसायः २. शिल्पं, हस्तकार्यं, दे. 'दस्तकारी' ३. चातुर्यं ४. माया, धूर्तता ।

हिरमज़ी, सं. स्त्री. (अ.) सौराष्ट्री, रक्तमृत्तिकाभेदः ।

हिरास, सं. स्त्री. (फ़ा.) दे. 'हरास' ।

हिरासत, सं. स्त्री. (अ.) निरोधः, बंधनं २. कारा, गुप्तिः (स्त्री.) ।

हिर्स, सं. स्त्री. (अ.) लोभः, तृष्णा, लिप्सा ।

हिर्सी, वि. (अ. हिर्स) लुब्ध, गृध्नु, लोलुप ।

हिलना[1], क्रि. अ. (सं. हल्लनं) चल्-चर् (भ्वा. प. से.), इ-या (अ. प. अ.), गम् २. सृ-सृप् (भ्वा. प. अ.) ३. कंप् वेप्-स्पंद् (भ्वा. आ. से.) ४. दोलायते (ना. धा.) प्रेंख् (भ्वा. प. से.), इतस्ततः वि-सं,-चल् ५. (जले) प्रविश् (तु. प. अ.)। सं. पुं. तथा भाव, चलनं, चरणं, अयनं, यानं, गमनं, सरणं, सर्पणं, कंपः, वेपनं, स्पदनं, चेष्टा, चेष्टितं, क्रिया, प्रवृत्तिः, व्यापारः ।

—डोलना, मु., अट्-भ्रम् (भ्वा. प. से.) २. श्रम् (दि. प. से.), प्रयत् (भ्वा. आ. से.) ।

हिलनेवाला, वि., चर, चल, जंगम, चलन-गमन,-शील, कंपमान, वेपमान, चेष्टमान, स्पंदमान ।

हिला हुआ, वि., चलित, सृत, यात, इत इ. ।

हिलना[2], क्रि. अ. (हिं. हिलगना, सं. अधि-लग्न) सुपरिचित-बद्धसख्य-रूढसौहृद् (वि.) जन् (दि. आ. से.) ।

— मिलना, क्रि. अ., परस्परं सख्येन वृत् (भ्वा. आ. से.)-व्यवहृ-अस् (दोनों भ्वा. प. अ.) ।

हिलमिलकर, मु., सौमनस्येन, सौहार्देन २. सं-भूय, मिलित्वा ।

हिल-मिला, मु., सुपरिचित, गाढसौहृद, बद्ध-सख्य ।

हिलाना, क्रि. स., व. 'हिलना' (१-२) के प्रे. रूप ।

हिलोर-रा, सं. पुं. (सं. हिल्लोलः) उल्लोलः, तरंगः, भंगः, ऊर्मिः (पुं. स्त्री.) ।

हिलोरे लेना, मु., तरंगायते (ना. धा.), तरं-गित (वि.) भू ।

हिलोरना, क्रि. स. (हिं. हिलोर) तरंगयति-उल्लोलयति (ना. धा.), इतस्ततः चल् (प्रे.)-विधू (स्वा. उ. से.) ।

हिलोल, सं. पुं., दे. 'हिलोर' ।

हिसाब, सं. पुं. (अ.) गणनं-ना, संख्यानं २.आयव्यय देयादेय,-लेखः-विवरणं ३. गणितं, अंकविद्या ४. अर्घ-मूल्य,-मानं-प्रमाणं ५.नियमः, व्यवस्था ६. विचारः, मतं ७. रीतिः (स्त्री.), विधिः ।

—करना या लगाना, क्रि. स., गण् (चु.), संख्या (अ. प. अ.) ।

—किताब, सं. पुं. (अ.) दे. 'हिसाब'(२) ।

—चलना, मु., व्यवहारः-दानादानं वृत् (भ्वा. आ. से.) ।

—चुकाना या चुकता करना, मु., ऋणं निस्तॄ-शुध् (प्रे.) ।

—बंद करना, मु.,व्यवहारं त्यज् (भ्वा.प.अ.) ।

हिस्टीरिया, सं. पुं. (अं.) योषापस्मारः, वात-गर्भाशय,-उन्मादः, हर्षमोहः ।

हिस्सा, सं. पुं. (अ.) वि-,भागः, अंशः २. वंटः, उद्धारः ३. खंडः-डं, एकदेशः ४. अंगं, अवयवः ।

—करना, क्रि. स., अंश् (चु.), विभज् (भ्वा. उ. अ.) ।

—दार, सं. पुं. (अ.+फ़ा.) अंशिन्, अंश-ग्राहिन्, सह-, भागिन् ।

—दारी, सं. स्त्री., सहभागिता, अंशिता ।

हींग, सं. स्त्री. [सं. हिंगु (पुं. न.)] र(रा)-मठं, वाल्हीकं, जंतु,-घ्नं-नाशनं, सूपधूपनं, उग्रगंधं, रक्षोघ्नं, जरणं, अगूढगंधम् ।

हींसना, क्रि. अ. (सं. हेषणं) दे. 'हिनहिनाना' २. दे. 'रेंकना' ।

ही, अव्य. (सं. हिं.) एव, अवश्यं, केवलं (सब अव्य.) ।

हीक, सं. स्त्री. (सं. हिक्का) दे. 'हिचकी' दुर्गंधः ।

हीजड़ा, सं. पुं. (देश.) शं(षं)डः-ढः, तृतीया प्रकृतिः, क्लीबः, नपुंसकः ।

हीन, वि. (सं.) वि-,रहित, शून्य, वर्जित, वंचित, वियुक्त,अ-,निर्-, वि-, (उ. धनहीन= अधन इ.) २. परि-,त्यक्त, उत्सृष्ट ३. अपकृष्ट, निकृष्ट,नीच, अधम ४. क्षुद्र, तुच्छ ५. कुत्सित, निंद्य, असत्, दुष्ट, कु- ६.दीन, दरिद्र, अकिंचन ७. अल्प, ऊन, स्तोक ।

—जाति, वि. (सं.) नीच,-वर्ण-जाति २. अ-पांक्तेय, पतित ।

—यान, सं. पुं. (सं. न.) बौद्धसंप्रदायभेदः ।

हीनता, सं. स्त्री. (सं.) अभावः, राहित्यं, त्रुटिः (स्त्री.), न्यूनता २. क्षुद्रता, तुच्छता ३. नि-अप,-कृष्टता ।

हीमोग्लोबिन, सं. पुं. (अं.) रक्तकणः, रक्तरञ्जकम् ।

हीर¹, सं. पुं. (सं.) शिवः २. इन्द्रवज्रं ३. सर्पः ४. हारः ५. सिंहः ६. हीरकः ।

हीर², सं. पुं. (हिं. हीरा) सारः, सारांशः, अन्तर्भागः, तत्त्वं २. वीर्यं, शुक्रं ३. बलं, शक्तिः (स्त्री.) ।

हीरक, सं. पुं. (सं.) दे. 'हीरा' ।

हीरा, सं. पुं. (सं. हीरः) हीरकः, वज्र-ज्रं, रत्नमुख्यं, सूचीमुखं, दधीच्यस्थि (न.), वरारकम् ।

—मन, सं. पुं. (हिं.+सं. मणिः) हेमवर्णः कल्पितः शुकभेदः, *हीरमणिः ।

हीला, सं.पुं. (अ. हीलः) व्याजः, छद्मन्(न.)-व्यपदेशः, मिषं, २. साधनं, उपायः ।

—करना, क्रि. अ., वि-, अपदिश् (तु. प., अ.), कपट-छद्मन् कृ ।

—बाज़, वि., कापटिक-छाद्मिक (-की स्त्री.) ।

—हवाला, सं. पुं., दे. 'हीला' ।

—निकलना, मु., उपायः ज्ञा (कर्म.), साधनं प्राप् (कर्म.) ।

हीहो, अव्य. (सं.) हर्षाश्चर्यसूचकमव्ययं, (हर्ष) हन्त २. (आश्चर्य) अहह ।

हुँ, अव्य. (सं.) ओं, आं, २. साधु, वाढं, अस्तु ।

हुंकार, सं. पुं. (सं.) हुंकृतिः (स्त्री.), हुंकृतं, भर्त्सनाशब्दः २. गर्जनं-ना, निनादः, हुहुतं ३. चीत्कारः, उत्क्रोशः ।

हुंकारना, क्रि. अ. (सं. हुंकार>) निर्भर्त्स् (चु. आ. अ.), तर्ज् (चु.), अधिक्षिप् (तु. प. अ.) २. गर्ज्-गर्द्-निनद् (भ्वा. प. से.) ३. चीत्कृ, उत्क्रुश् (भ्वा. प. अ.) ।

हुंडावन, सं. पुं. (हिं. हुंडी) *विधिपत्रशुल्कः-ल्कम् ।

हुंडी, सं. स्त्री. (देश.) *विधिपत्रं, धनार्पणादेशपत्रम् ।

हुकूमत, सं. स्त्री. (अ.) शासनं, राज्यं २. अधिकारः, प्रभुत्वम् ।

हुक्का, सं. पुं. (अ.) *धूमपानयंत्रम् ।

—पानी, सं. पुं. (अ.+हिं.) सामाजिकव्यवहारः ।

—गुड़गुड़ाना, मु., धूमपानं कृ ।

—पानी बंद करना, मु., समाजात् वहिष्-अपांक्ती कृ, जातेः निष्कस् (प्रे.) ।

हुक्काम, सं, पुं. (अ. हाकिम का बहु.) शासक-अधिकारि,-वर्गः-वृन्दम् ।

हुक्म, सं. पुं. (अ.) आदेशः, आज्ञा दे. २. अनुमतिः (स्त्री.) ३. प्रभुत्वं, अधिकारः ४. नियमः, विधि-, उपदेशः (धर्मशास्त्रादि का) ५. क्रीडापत्ररंगभेदः ।

—नामा, सं. पुं. (अ.+फ़ा.) आज्ञापत्रम् ।

—बरदार, सं. पुं. (अ.+फ़ा.) आज्ञा,-पालक-अनुसारिन्-अनुवर्तिन्-अधीन ।

हुक्मी, वि. (अ. हुक्म) आज्ञा,-पालक-अनुवर्तिन् २. अमोघ, सफल, सिद्धिकर ३. लक्ष्य, भेदिन्-वेधिन् ४. विकल्परहित, अवश्य-कर्तव्य, अनिवार्य ।

हुजूम, सं. पुं. (अ.) जन, समूहः-समुदायः-संमर्दः-ओघः ।

हुजूर, सं. पुं. (सं.) सामीप्यं, संनिधिः २. न्याय,-आलयः-सभा ३. (संबोधनशब्द) भगवन् ! श्रीमन् ! (संबोधन एक.), भगवन्तः ! श्रीमन्तः ! (संबोधन बहु.) ।

हुजूरी, सं. स्त्री. (अ. हुजूर>) निकटता, समीपता २. उपस्थितिः (स्त्री.), विद्यमानता ३. राज-राजकीय,-सभा । सं. पुं. विशिष्ट,-सेवकः-भृत्यः २. राजसमासद्, सभ्यः, सभिकः ।

हुज्जत, सं. स्त्री. (अ.) कुतर्कः, व्यर्थयुक्तिः (स्त्री.) २. विवादः, वाग्युद्धम् ।

—करना, क्रि. अ., व्यर्थं तर्क् (चु.) २. विवद् (भ्वा. आ. से.), वाग्युद्धं कृ ।

हुज्जती, वि. (अ. हुज्जत) कुतार्किक २. कलह-विवाद,-प्रिय ।

हुड़दंग-गा, सं. पुं. (अनु. हुड़+हिं. दंगा) उपद्रवः, तुमुलं, संक्षोभः ।

हुड़दंगी, वि. (हिं. हुड़दंग) कुचेष्टित, कुचेष्टक, कुचेष्टाप्रिय, उपद्रविन्, उद्दण्ड ।

हुत, वि. (सं.) वषट्कृत, सविधि अग्नौ क्षिप्त ।

—भुज्, सं. पुं. (सं.) अग्निः ।

हुताशन, सं. पुं. (सं.) हुतवहः, हुताशः, अग्निः ।

हुदहुद, सं. पुं. (अ.) दार्वाघाटः, काष्ठकूटः, दे. 'कठफोड़ा' ।

हुनर, सं. पुं. (फ़ा.) कला, शिल्पं २. दाक्ष्यं, कौशलं ३. गुणः, विशिष्टधर्मः ।

—मंद, वि. (फ़ा.) कला,-विद्-कुशल २. दक्ष, निपुण ३. गुणिन् ।

हुमा, सं. स्त्री. (फ़ा.) कल्पितखगभेदः, *राज्यदः, हुमा ।

हुरमत, सं. स्त्री. (फ़ा.) आदरः, संमानः ।

हुर्रा, सं. पुं. (अं.) हर्षनादः, जयशब्दः, जयजयकारः ।

हुलास, सं. पुं. (सं. उल्लासः) आनंदः, आह्लादः २. उत्साहः ।

हुलिया, सं. पुं. (अ.-यः) आकारः, आकृतिः (स्त्री.) २. आकार-रूपरेखा,-विवरणम् ।

हुल्लड़, सं. पुं. (अनु. हुल हुल) कोलाहलः, कलकलः २.संक्षोभः, उपद्रवः ३. प्रजाविप्लवः, व्यवस्थाभंगः ।

हुश्, अव्य. (अनु.) शान्तं, मौनं, तूष्णीं (सब अव्य.) ।

हुस्न, सं. पुं. (अ.) लावण्यं, सौन्दर्यम् ।

—परस्त, वि. (अ.+फ़ा.) सौन्दर्योपासक ।

—परस्ती, सं. स्त्री., सौन्दर्योपासना ।

हूँ[1], क्रि. अ. (हिं. होना) अस्मि-वर्ते (लट्, उत्तम. एक.) ।

हूँ[2], अव्य. (सं. पुं.) आम्, ओम्, तथा २. साधु, सुष्ठु ३. अवधानतासूचकशब्दः, हुंकारः ।

—करना या हूँकारी भरना, क्रि. अ., हुंकृ २. आमिति उच्चर् (प्रे.) ३. अनुमन् (दि. आ. अ.), अनुज्ञा (क्र्. उ. अ.) ४. स्वी-अंगी,-कृ ।

—हाँ करना, मु., अप-व्यप-दिश् (तु. प. अ.), शाठ्येन परिहृ (भ्वा. प. अ.), अस्पष्टं व्याहृ ।

हू, सं. पुं. (अनु.) शृगाल-जम्बुक,-रावः-रुतं-शब्दः-ध्वनिः, हूकारः ।

—रव, सं. पुं. (सं.) शृगालः, सृगालः, जम्बु-(म्बू)कः, भूरिमायः ।

हूक, सं. स्त्री. (अनु.) हृद्ग्रहः, हृल्लेखः, हृदय-पीडा, वक्षोवेदना २. पीडा, व्यथा, आर्तिः (स्त्री.), वेदना ३. आधिः, सं-परि,-तापः, दुःखं ४. आशंका ।

हूकना, क्रि. अ. (हिं. हूक) व्यथ् (भ्वा. आ. से.), पीड् (कर्म.) ।

हूड़, वि, (सं. हूणः>) उद्दण्ड, असभ्य, ग्राम्य २. प्रमत्त, निरवधान ३. मंदबुद्धि, मूर्ख ४. दुराग्राहिन् ।

हूण, सं. पुं. (सं.) हूनः, म्लेच्छजातिविशेषः ।

हूबहू, वि. (अ.) पूर्णतया तुल्य सम-समान-सदृश ।

हूर, सं. स्त्री. (अ.) स्वर्-स्वर्ग,-वधूः (स्त्री.) -स्त्री, अप्सरस् (न.), अप्सरा, दिव्यांगना ।

हूल, सं. स्त्री. (सं. शूलः-लं) दे. 'हूक' (१) (खड्गादीनां) वेधः, आघातः, प्रहारः, निवेशनम् ।

—देना या मारना, क्रि. स., दे. 'हूलना' ।

हूलना, क्रि. स. (हिं. हूल) शस्त्राग्रं सहसा निविश् (प्रे.), अप-,व्यध् (दि. प. अ.) २. प्रेर्-प्रणुद्-प्रचल् (प्रे.) ।

हूहा, सं. पुं. (अनु.) किंवदन्ती, जनप्रवादः २. आडंबरः, विजृम्भणम् ।

हृत, वि. (सं.) नीत, प्रापित २. गृहीत, आदत्त ३. चोरित, स्तेनित, मुषित ।

हृत्कंप, सं. पुं. (सं.) हृदय,-कंपनं-स्फुरणं-स्पंदनम् ।

हृत्पिंड, सं. पुं. (सं. पुं. न.) हृदयं, दे. ।

हृद्, सं. पुं. (सं. न.) हृदयं, दे. ।

हृदयंगम, वि. (सं.) सम्यक्,-ज्ञात-बुद्ध-अवगत २. करुण, रोमहर्षण ३. सुन्दर, मनोहर ।

हृदय, सं. पुं. (सं. न.) हृद् (नं.), हृत्पिंडः-डं, बुक्का, अग्रमांसं २. वक्षस्-उरस् (न.) ३.मनस्-चेतस् (न.), मानसं, चित्तं ४. सारः, सारांशः, तत्त्वं ५. रहस्यं ६. प्रियजनः, प्राणाधारः (दे. 'दिल', 'कलेजा', 'मन', 'जी') ।

—ग्राही, वि. (सं.-हिन्) हृदयहारिन्, मनोमोहक २. रुचिकर, प्रिय ।

—वान्, वि. (सं.-वत्) सहृदय, हृदयालु २. भावुक, रसिक ।

—विदारक, वि. (सं.) हृदयवेधिन्, शोकजनक, करुणोत्पादक ।

—स्पर्शी, वि. (सं.-र्शिन्) हृदिस्पृश्, प्रभावोत्पादक २. दयोत्पादक, करुणाजनक ।

—हारी, वि. (सं.-रिन्) चेतोहर, मनोहारिन् ।

हृदयेश्वर, सं. पुं. (सं.) वल्लभः, प्रियतमः, प्रेमपात्रं २. पतिः, भर्तृ ।

हृदयेश्वरी, सं. स्त्री. (सं.) हृदयेशा, प्राणेशा, कान्ता २. पत्नी, भार्या ।

हृद्गत, वि. (सं.) आन्तर, आभ्यन्तर,अभि-, अन्तर, हृद्य, अन्तर्,-वर्तिन्-गत, मानस, चैत्त २. अवगत, ज्ञात, बुद्ध ३. प्रिय, रुचिकर ।

हृद्य, वि. (सं.) (१-२) दे. 'हृद्गत' (१-३) २. सुन्दर ३. शान्तिप्रद ४. स्वादु, सुरस ।

हृषीक, सं. पुं. (सं. न.) इन्द्रियं, दे. ।

हृषीकेश, सं. पुं. (सं.) विष्णुः २. श्रीकृष्णः ३. तीर्थविशेषः ।

हृष्ट, वि. (सं.) हर्षित, सुप्रसन्न, प्रमुदित, आनंदित, प्रीत, पुष्ट, प्रमनस् ।

—पुष्ट, वि. (सं.) दृढ़,-अंग-देह-तनु, पीन, मांसल, बलवत् ।

हेंगा, सं. पुं. (सं. अभ्यंगः>) मत्यं, कोटि-(टी)शः ।

हेंहें, सं. स्त्री. (अनु.) मन्दहासध्वनिः २. दैन्यसूचकशब्दः ।

हे, अव्य. (सं.) अंग, भोः, हंहो, हुंहो, अरे, अये, अयि, पाट्, प्याट् (सब अव्य.) ।

हेकड़, वि. (हिं. हिया+कड़ा) दे. 'हृष्टपुष्ट' २. प्रचंड, उग्र ३. उद्दंड, वियात, धृष्ट ।

हेकड़ी, सं. स्त्री. (हिं. हेकड़) उग्रता, चंडता, उद्दंडता २. बलं, बलात्कारः, रभस् (न.), रभसः ।

हेच, वि. (फ़ा.) तुच्छ, क्षुद्र २. निस्सार, तत्त्वहीन ।

हेठ, क्रि. वि. (सं. अधःस्थ>) नीचैः, अधः (दोनों अव्य.) ।

हेठा, वि. (हिं. हेठ) अवर, अधर २. ऊन, हीन ३. तुच्छ, क्षुद्र ।

—पन, सं. पुं., तुच्छता, क्षुद्रता, ऊनता ।

हेठी, सं. स्त्री. (हिं. हेठा) मानहानिः (स्त्री.), अवधीरणा, अपमानः ।

हेड[1], सं. पुं. (सं.) तिरस्कारः, अवज्ञा, अपमानः ।

—ज, सं. पुं. (सं.) क्रोधः, कोपः, रोषः ।

हेड[2], सं. पुं. (अं.) शिरस् (न.), शीर्षं, मुण्डं, मस्तकम् २. मुख्यः, प्रधानः, अध्यक्षः ।

—क्वार्टर, सं. पुं. (अं.) मुख्यालयः, मुख्यकार्यालयः ।

हेडिंग, सं. स्त्री. (अं.) शीर्षकं, शिरःपंक्तिः (स्त्री.), नामन् (न.), संज्ञा ।

हेत, सं. पुं., दे. 'हेतु'(१, २) ।

हेतु, सं. पुं. (सं.) प्रयोजनं, अभिप्रायः, निमित्तं, उद्देशः २. कारणं, बीजं, मूलं ३. युक्तिः-उपपत्तिः (स्त्री.), प्रमाणं ४. अर्थालंकारभेदः (सा.) ।

—वाद, सं. पुं. (सं.) ऊहापोहः, तर्कः २. कुतर्कः, नास्तिकता, नास्तिक्यम् ।

—वादी, वि. (सं.-दिन्) तार्किकः २. नास्तिकः ।

—विद्या, सं. स्त्री. (सं.) तर्क-हेतु,-शास्त्रम् ।

—हेतुमद्भाव, सं. पुं. (सं.) कार्यकारण,-भावसंबंधः ।

हेत्वाभास, सं. पुं. (सं.) असद्-दुष्ट,-हेतुः ।

हेमंत, सं. पुं. (सं.) हैमनः, उष्मासहः, शरदन्तः, हिमागमः, अग्रहायणपौषमासात्मकः ऋतुः ।

हेम, सं. पुं. [सं.-मन् (न.)] सुवर्णं, दे. 'सोना' ।

—गिरि, सं. पुं. (सं.) सुमेरुः, हेम,-अचलः-अद्रिः ।

—चंद्र, सं. पुं. (सं.) जैनाचार्यविशेषः ।

हेय, वि. (सं.) त्याज्य, त्यक्तव्य, उत्सर्जनीय, हातव्य २. निकृष्ट, अपकृष्ट, गर्ह्य, निन्द्य ।

हेरना, क्रि. स. (सं. आखेटः>) अन्विष् (दि. प. से.), गवेष् (भ्वा. आ. से., चु. प. से.) २. दृश् (भ्वा. प. अ.) ३. विचर् (प्रे.) ।

—फेरना, क्रि. स. (अनु.+हिं.) परिवृत्-विपर्यस् (प्रे.), अन्यथा-वि,-कृ, विनिमे (भ्वा. आ. अ.) ।

हेर-फेर, सं. पुं. (हिं. हेरना+फेरना) परिवर्तः-र्तनं, परिवृत्तिः (स्त्री.), विनिमयः २. विकारः, विक्रिया, विकृतिः (स्त्री.) ३. विपर्यासः, क्रमाभावः, अव्यवस्था ४. वक्रोक्तिः (स्त्री.), वागाडंबरः ५. कपटं, छलं ६. अन्तरं, भेदः ।

हेरा-फेरी, सं. स्त्री., दे. 'हेर-फेर' ।

हेलमेल, सं. पुं. (हिं. हिलना+मिलना) दृढ़-गाढ,-सौहृदं-सौहार्द-सख्यं-मैत्री २. संगतिः (स्त्री.), संपर्कः ३. परिचयः ।

हेला[1], सं. स्त्री. (सं.) अव-अप,-मानः,अवज्ञा, तिरस्कारः २. प्रमादः, उपेक्षा ३. क्रीडा, खेला ४. सुकर-सुसाध्य,-कार्यं ५. शृंगारचेष्टा, केलिः (स्त्री.)-ली ६. नारीणां सुरतलालसा ।

हेला[2], सं. पुं. दे. 'हल्ला' ।

हैं[1], अव्य. (अनु.) (निषेध) मा, मास्म, अलं २. (आश्चर्य) अहो, ही ।

—हैं, अव्य. (अनु.) मा मा, अलं अलं २. ही ही ।

हैं[2], क्रि. अ. (हिं. होना) सन्ति-विद्यन्ते-वर्तन्ते (लट्, बहु.) ।

हैंडबेग, सं. पुं. (अं.) (चर्ममयी) करपेटिका २. कर,प्रसेवः-संपुटः ।

हैंडल, सं. पुं. (अं.) मुष्टिः (स्त्री.), वारंगः ।

है, क्रि. अ., (हिं. होना) अस्ति-विद्यते-वर्तते (लट्) ।

हैकल, सं. स्त्री. (सं. हयः+गलः>) अश्व-ग्रैवेयकं २. 'हमेल' ।

हैज़ा, सं. पुं. (अ.-जह्) विषूचिका, दे. ।

हैट, सं. पुं. (अं.) गुरुंड-आंगल,-शिरस्त्राणं-शीर्षकम् ।

हैफ़, अव्य. (अ.) हा, हन्त, खेदः, शोकः ।

हैबत, सं. स्त्री. (अ.) त्रासः, भयम् ।

—नाक, वि. (अ.) भीम, भयंकर ।

हैरत, सं. स्त्री. (अ.) आश्चर्यं, विस्मयः ।

हैरान, वि. (अ.) चकित, विस्मित २. विं-, आकुल, उद्विग्न ।

हैवान, सं. पुं. (अ.) पशुः, चरिः, मृगः २. जडः, मूर्खः, असभ्यः ।

हैवानियत, सं. स्त्री. (अ.) पशुता-त्वं २. अशिष्टता, असभ्यता ३. क्रूरता ।

हैवानी, वि. (अ. हैवान) पाशव, पशु-तुल्य-सम २. क्रूर, निष्ठुर ।

हैसियत, सं. स्त्री. (अ.) सामर्थ्यं, योग्यता २. आर्थिकावस्था, धनबलं ३. धनं, वित्तं ४. संमानः । प्रतिष्ठा ४. मूल्यं, अर्घः ।

है है, अव्य. (सं. हा हा) हंत, हा हन्त, कष्टं, दुःखम् ।

होंठ, सं. पुं. (सं. ओष्ठः) दंत-रद-दशन,-च्छदः, दे. 'ओठ' ।

—फटना, सं. पुं., ओष्ठभेदः ।

—काटना या चबाना, मु., क्रुध् (दि. प. अ.), आन्तरक्षोभं प्रकटयति (ना. धा.) ।

—हिलाना, मु., वक्तुं उपक्रम् (भ्वा. आ. अ.) ।

हो, अव्य. (सं.) 'हे' ।

होटल, सं. पुं. (अं.) भोजनशाला २. पांथ-शाला ।

होड़, सं. स्त्री. (सं. हारः = युद्ध) पणः, ग्लहः २. प्रति-,स्पर्द्धा, विजिगीषा ३. आग्रहः ।

—बदना, बाँधना या लगाना, क्रि. स., ग्लह् (भ्वा. प. से , चु.), दिव् (दि. प. से.), पण् (भ्वा. आ. से.) २. विजिगीषते (सन्नन्त), स्पर्ध् (भ्वा. आ. से.) ।

होड़ाबादी, सं. स्त्री. } (हिं. होड़+बदना)
होड़ाहोड़ी, सं. स्त्री. } (हिं. होड़)दे. 'होड़' (१-२) ।

होता, सं. पुं. (सं. होतृ) ऋत्विग्भेदः, होत्रिन्, होमकर्तृ, यष्टृ ।

होत्र, सं. पुं. (सं. न.) यज्ञः, यागः, मखः हवनम् २. यज्ञ-हवन,-सामग्री, हविस् (न.), हव्यम् ।

होत्री, सं. पुं. (सं.-त्रिन्), होतृ, याजकः, यष्टृ, ऋत्विग्भेदः, होमकर्तृ ।

होनहार, वि. (हिं. होना) सल्लक्षण, उन्नति-शील, आशाजनक, सिद्धिसूचक २. भाविन्,

भविष्यत्, भवितव्य। सं. स्त्री., भवितव्यता, नियतिः (स्त्री.), भाग्यं, दैवं, विधिः।

होना, क्रि अ. (सं. भवनं) भू, अस् (अ. प.), वृत् (भ्वा. आ. अ.), विद् (दि. आ. अ.), अवस्था (भ्वा. आ. अ.) २. भू, जन् (दि. आ. से.), संपद् (दि. आ. अ.), परिणम् (भ्वा. प. अ.) ३. कृ-अनुष्ठा-विधा (कर्म.) ४. रच्-निर्मा (कर्म.) ५. वट्-संवृत् (भ्वा. आ. से.), समापद् (दि. आ. अ.), आपत् (भ्वा. प. से.) ६. (रोगादिभिः) पीड् (कर्म.) ७. अति-व्यति,-इ (अ. प. अ.), व्यतिक्रम् (भ्वा. प. से.) ८. उत्पद् (दि. आ. अ.), जन् (दि. आ. से.) ९. जीव् (भ्वा. प. से.)। सं. पुं. तथा भाव, सत्ता, अस्तित्वं, अव-,स्थितिः (स्त्री.), सद्-,भावः, वर्तनं, विद्यमानता इ.।

होने योग्य, भवितव्य, शक्य, संभाव्य, संभवनीय, संपादनीय, साध्य।

होनेवाला, भाविन्, भविष्यत्, भवितव्य, दे. 'होने योग्य'।

हुआ हुआ, वि., भूत, वृत्त, जात, संपन्न, निष्पन्न, अनुष्ठित, विहित, रचित, निर्मित, उत्पन्न इ.।

(जो) हुआ सो हुआ, मु., अतीतं विस्मर २. यद् भूतं न तद्भावि।

हो आना, मु., दृष्ट्वा-मिलित्वा आगम् (भ्वा. प. अ.)।

होकर या होते हुए, मु., मध्यतः, मार्गेण।

हो चुकना या–जाना, मु., सं. निष्,-पद् (दि. आ. अ.), समाप् (स्वा. प. अ.)।

हो न हो, मु., निःसंदेहं, निःसंशयम्।

होनी, सं. स्त्री. (हिं. होना) उत्पत्तिः (स्त्री.), जन्मन् (न.) २. वृत्तं, वृत्तांतः ३. दे. 'होनहार' सं. स्त्री. ४. संभाव्य-शक्य,-वार्ता।

होम, सं. पुं. (सं.) देवयज्ञः, दे. 'हवन'।

होमना, क्रि. स., दे. 'हवन करना'।

होमियोपैथी, सं. स्त्री. (अं.) समचिकित्सा, चिकित्सापद्धतिविशेषः।

होरा, सं. स्त्री. (सं., यूनानी से लिया गया) लग्नं २. राश्यर्द्धं ३. जन्मपत्रिका ४. जातकं, जातकशास्त्रं ५. दे. 'घंटा' (= ६० मिनट)।

होला[1], सं. पुं. (सं. होलकः) तृणाग्निभृष्टार्द्धपक्वशमीधान्यम्।

होला[2], सं. पुं. (सं. होली) सिक्खानां होलिकोत्सवः।

होली, सं. स्त्री. (सं.) होलिका, होलाका, २. होलिकादहनार्थस्तृणकाष्ठराशिः ३. होलिकागीतम्।

—खेलना, मु., होलिकोत्सवे रम् (भ्वा. आ. अ.), खेल्-क्रीड् (भ्वा. प. से.), अन्योन्यं रंज् (प्रे.)।

होल्डर, सं. पुं. (अं.) लेखनीदंडः २. लेखनी।

होश, सं. पुं. (फ़ा.) संज्ञा, चैतन्यं २. स्मरणं, स्मृतिः (स्त्री.) ३. बुद्धिः-मतिः (स्त्री.)।

—मंद, वि. (फ़ा.) धी-बुद्धि-मति,-मत्।

—हवास, सं. पुं. (फ़ा+अ.) संज्ञाबुद्धी २. चैतन्यम्।

—उड़ना या जाता रहना, मु., (मायादिभिः) निस्तब्धी-जड़ी-अत्याकुली,-भू।

—करना, मु., सावधान-अवहित (वि.) भू।

—ठिकाने होना, मु., मोहः-भ्रान्तिः (स्त्री.) नश् (दि. प. वे.) २. चेतः स्वास्थ्यं आपद् (दि. आ. अ.) ३. गवनाशः जन् (दि. आ. से.) दंडं भुक्त्वा अनुतप् (दि. आ. अ.)।

—दंग होना, मु., आश्चर्यस्तब्धः (वि.) जन् (दि. आ. से.), चकितचकित (वि.) भू।

—दिलाना, मु., स्मृ (प्रे.)।

—में आना, मु., प्रकृतिं आपद् (दि. आ. अ.), संज्ञां लभ् (भ्वा. आ. अ.)।

—सँभालना, मु., प्रौढ-प्राप्तवयस्क (वि.) जन् २. सावधानो भू।

होशियार, वि. (फ़ा.) बुद्धिमत्, चतुर, प्रज्ञ २. निपुण, कुशल ३. सावधान, अवहित ४. धूर्त, मायाविन् ५. पक्वबुद्धि।

होशियारी, सं. स्त्री. (फ़ा.) बुद्धि-धी-,मत्ता, २. दक्षता, नैपुण्यं ३. सावधानता।

होस्टल, सं. पुं. (अं. होस्टेल) छात्रावासः, छात्रालयः।

हौंकना, क्रि. अ. (सं. हुंकरणं) हुंकृ, गर्ज् (भ्वा. प. से.) २. दे. हाँफ(प)ना'।

हौआ, सं. पुं. (अनु. हौ) भूतः, पिशाचः, डाकिनी, शिशुत्रासार्थं काल्पनिकं भयमूलम् । सं. स्त्री., दे. 'हौवा' ।

हौका, सं. पुं. (अनु. हाव) औदरिकता, घस्मरता २. लोभ-तृष्णा,-अतिशयः ।

हौज़, सं. पुं. (अ.) कुंडं, जलाशयः, क्षुद्र-तडागः २. बृहन्मृद्भांडं, दे. 'नाँद' ।

हौदा, सं. पुं. (फ़ा. हौज़ह्) परिस्तो(ष्टो)मः, प्रवेणी, आस्तरणं, कुथः-था-थम् ।

हौल, सं. पुं. (अ.) भयं, संत्रासः ।

—नाक, वि. (अ.+फ़ा.) भयंकर, त्रासन ।

हौले, क्रि. वि. (हिं. हरुआ) शनैः, शनकैः, मंदं २. मृदु, कोमलम् (सब अव्य.) ।

हौवा, सं. स्त्री. (अ.) आदमपत्नी, *हव्वा, पृथिव्यां प्रथमा नारी मानवजातेः जननी च । सं. पुं., दे. 'हौआ' ।

हौस, सं. स्त्री., दे. 'हवस' ।

हौसला, सं. पुं. (अ.) लालसा, उत्कंठा साहसं, उत्साहः ३. हर्षः, प्रफुल्लता ।

—मंद, वि. (फ़ा.) उत्कंठित, अत्यभिलाषिन् २. साहसिन्, उत्साहिन् ३. हृष्ट, प्रफुल्ल ।

—निकालना, मु., आकांक्षां-वाञ्छां-स्पृहां संपद् (प्रे.)-सम्पूर् (प्रे.) ।

—पस्त होना, मु., हतोत्साह-भग्नहृदय (वि.) भू ।

ह्रद, सं. पुं. (सं.) अगाधजलाशयः, महा-तडागः २. तटाकः, कासारः, सरसी ३. नादः ।

ह्रसित, वि. (सं.) अल्पी-न्यूनी,-कृत-भूत, संक्षिप्त, संकुचित ।

ह्रसिमा, सं. स्त्री. (सं.-मन् पुं.) ह्रस्वता, अल्पता, क्षुद्रता ।

ह्रस्व, वि. (सं.) लघु, क्षुद्र, दभ्र, अल्प, दैर्घ्य-आयाम,-शून्य २. ऊन, न्यून, हीन ३. खर्व, न्यंच् ४. अवनत, नीच ५. क्षुद्र, तुच्छ । सं. पुं. (सं.) वामनः २. लघुवर्णः (अ. इ. उ. ऋ.) ।

ह्रास, सं. पुं. (सं.) अपकर्षः, अवनतिः (स्त्री.), क्षयः, अधोगतिः (स्त्री.), अपचयः, ध्वंसः, भ्रंशः ।

—होना, क्रि. अ., क्षि (कर्म.), ह्रस् (भ्वा. प. से.), अपचि (कर्म.) ।

ह्री, सं. स्त्री. (सं.) लज्जा, त्रपा, व्रीडा ।

ह्लाद, सं. पुं. (सं.) आनंदः,-प्र,-मोदः, हर्षः ।

ह्विस्की, सं. स्त्री. (अं.) आंग्लमद्यभेदः ।

ह्वेल, सं. पुं. (अं.) तिमिंगलः, तिमिः, ह्वेल-मत्स्यः ।

प्रथम परिशिष्ट

संस्कृत-सूक्तियों का हिन्दी-अनुवाद

संस्कृत	हिन्दी
अकालमेघवद् वित्तमकस्मादेति याति च। (कथासरित्सागर)	धन अकाल-मेघ के समान अकस्मात् आता-जाता है।
अक्षोभ्यतैव महतां महत्त्वस्य हि लक्षणम्। (कथा०)	क्षुब्ध न होना ही बड़ों के बड़प्पन का चिह्न है।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।	विना चले तो गरुड़ भी पग-भर भी नहीं जा सकता।
अगुणस्य हतं रूपम्।	निर्गुण व्यक्ति का रूप किस काम का ?
अङ्कमारुह्य सुप्तं हि हत्वा किं नाम पौरुषम् ?	गोद में सोये हुए की हत्या में कहाँ की वीरता है।
अङ्गीकृतं सुकृतिनः परिपालयन्ति।	श्रेष्ठ लोग कही हुई बात को पूरा करते हैं।
अचिन्त्यं हि फलं सूते सद्यः सुकृतपादपः। (कथा०)	पुण्यरूपी वृक्ष शीघ्र ही अचिन्त्य फल देता है।
अजीर्णे भोजनं विषम्।	अपच में भोजन विष-तुल्य होता है।
अज्ञता कस्य नामेह नोपहासाय जायते ?	अज्ञान के कारण किसका उपहास नहीं होता ?
अतिदानाद् बलिर्बद्धः।	अत्यधिक दान से बलि को बँधना पड़ा।
अतिपरिचयादवज्ञा, संततगमनादनादरो भवति।	बहुत मेल-जोल से अवज्ञा होती है और किसी के यहाँ अधिक जाने से अनादर।
अतिभुक्तिरतीवोक्तिः सद्यः प्राणापहारिणी।	बहुत खाने और बहुत बोलने से तुरन्त मृत्यु हो जाती है।
अतिलोभो न कर्तव्यः।	अत्यधिक लोभ नहीं करना चाहिए।
अति सर्वत्र वर्जयेत्।	सब बातों में 'अति' त्याज्य है।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति।	जो आग तृणादि पर नहीं पड़ी, वह स्वयमेव बुझ जाती है।
अधरेष्वमृतं हि योषितां हृदि हालाहलमेव केवलम्।	स्त्रियों के ओठों में तो अमृत रहता है किंतु हृदय में भयंकर विष।
अधर्मविषवृक्षस्य पच्यते स्वादु किं फलम् ? (कथा०)	क्या कभी अधर्मरूपी विषवृक्ष पर सरस फल लग सकते हैं ?
अधिकस्याधिकं फलम्।	जितना गुड़ उतना मीठा।
अनध्वा वाजिनां जरा।	सदा बँधे रहनेवाले घोड़े बूढ़े हो जाते हैं।
अनन्यगामिनी पुंसां कीर्तिरेका पतिव्रता।	पुरुषों की स्थायी कीर्ति पतिव्रता नारी के समान होती है।
अनपेक्ष्य गुणागुणौ जनः स्वरुचिं निश्चयतोऽनुधावति। (शिशुपालवधे)	वस्तुतः मनुष्य गुण-दोष की उपेक्षा करके रुचि के अनुसार ही कार्य करता है।
अनवसरे याचितमिति सत्पात्रमपि कुप्यते दाता।	यदि कुअवसर पर माँगा जाए तो दानी मनुष्य सत्पात्र पर भी क्रोध करता है।

अनार्यः परदारव्यवहारः । (अभिज्ञानशाकुन्तले)	पराई स्त्रियों से सम्बन्ध रखना आर्योचित नहीं ।
अनार्यसंगमाद्वरं विरोधोऽपि समं महात्मभिः । (किरातार्जुनीये)	अनार्यों (दुष्टों) के साथ मेल-जोल की अपेक्षा महात्माओं से वैर अच्छा ।
अनाश्रया न शोभन्ते पण्डिता वनिता लताः ।	विद्वान्, स्त्रियाँ और लताएँ आश्रय के विना शोभा नहीं देतीं ।
अनिर्वर्णनीयं परकलत्रम् । (अभिज्ञान०)	पराई स्त्रियों की ओर ताकना न चाहिए ।
अनुकूलेऽपि कलत्रे नीचः परदारलम्पटो भवति ।	पत्नी के अनुकूल होने पर भी नीच मनुष्य परदाराभिगमन करता है ।
अनुत्सेकः खलु विक्रमालंकारः ।	नम्रता वीरता का भूषण है ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं शमयति परितापं छायया संश्रितानाम् । (अभिज्ञान०)	वृक्ष स्वयं तो कड़ी धूप सहता है, परन्तु शरणागतों के ताप को छाया से शान्त कर देता है ।
अनुसृत्य सतां वर्त्म यत्स्वल्पमपि तद् बहु ।	सज्जनों के मार्ग पर चलते हुए थोड़ा भी मिले तो बहुत समझिए ।
अनुहुंकुरुते घनध्वनिं नहि गोमायुरुतानि केसरी । (शिशु०)	सिंह मेघ-गर्जन सुनकर तो दहाड़ता है, गीदड़ों की ध्वनि सुनकर नहीं ।
अन्तःसारविहीनानामुपदेशो न विद्यते ।	जड़बुद्धि मनुष्य को शिक्षा देना व्यर्थ है ।
अन्यायं कुरुते यदा क्षितिपतिः कस्तं निरोद्धुं क्षमः ?	जब राजा ही अन्याय करने लग पड़े तब उसे कौन रोक सकता है ?
अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः । (रघुवंशे)	रजोगुण से अभिभूत विद्वान् भी कुमार्गगामी बन जाते हैं ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ।	कुपथगामी का साथ सगा भाई भी नहीं देता ।
अपायो मस्तकस्थो हि विषयग्रस्तचेतसाम् । (कथा०)	विपत्तियाँ विषयी लोगों के सिर पर मँडराती रहती है ।
अपि धन्वन्तरिर्वैद्यः किं करोति गतायुषि ।	जब आयु समाप्त हो जाती है तब वैद्य धन्वन्तरि भी कुछ नहीं कर सकता ।
अपि स्वदेहात् किमुतेन्द्रियार्थाद्यशोधनानां हि यशो गरीयः । (रघु०)	यशस्वी लोग, भोगों की तो बात ही क्या, स्वशरीर से भी यश को श्रेष्ठ समझते हैं ।
अपुत्रस्य गृहं शून्यम् ।	पुत्रहीन व्यक्ति के लिए घर सूना होता है ।
अपेक्षन्ते हि विपदः किं पेलवमपेलवम् ! (कथा०)	विपत्तियाँ लक्ष्य की कोमलता वा कठोरता नहीं देखा करतीं ।
अप्रकटीकृतशक्तिः शक्तोऽपि जनस्तिरस्क्रियां लभते ।	जो बलवान् निज बल को कभी प्रकट नहीं करता वह तिरस्कार का भाजन बनता है ।
अप्राप्यं नाम नेहास्ति धीरस्य व्यवसायिनः । (कथा०)	धीर और व्यवसायी व्यक्ति के लिए संसार में कोई भी वस्तु अप्राप्य नहीं ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ।	कड़वी परन्तु हितकर बात कहने और सुनने वाले व्यक्ति दुर्लभ हैं ।
अबला यत्र प्रबला ।	जहाँ स्त्री सबल हो··· ।
अभद्रं भद्रं वा विधिलिखितमुन्मूलयति कः ?	बुरा हो या भला, विधाता के लेख को कौन मिटा सकता है ?
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ! (रघु०)	तपाने पर लोहा भी पिघल जाता है, प्राणियों की तो बात ही क्या ?
अभोगस्य हतं धनम् ।	जो भोगता नहीं, उसका धन व्यर्थ है ।

अमर्षणः शोणितकाङ्क्षया किं पदा स्पृशन्तं दशति द्विजिह्वः ? (रघु०)	क्या उग्र सर्प पाँव से छूनेवाले व्यक्ति को लहू पीने की इच्छा से काटता है ?
अमृतं क्षीरभोजनम् ।	खीर-रूपी भोजन अमृत है ।
अमृतं प्रियदर्शनम् ।	प्रिय पदार्थ का दर्शन अमृत है ।
अमृतं राजसंमानम् ।	राजा से प्राप्त सम्मान अमृत है ।
अमृतं शिशिरे वह्निः ।	जाड़ों में अग्नि अमृत है ।
अम्बुगर्भो हि जीमूतश्चातकैरभिनन्द्यते ।(रघु०)	पपीहे जलपूर्ण बादल की ही प्रशंसा करते हैं ।
अयशोभीरवः किं न कुर्वते बत साधवः ! (कथा०)	अपयश से डरने वाले सज्जन क्या नहीं करते !
अयातपूर्वा परिवादगोचरं सतां हि वाणी गुणमेव भाषते । (किरातार्जुनीय)	सज्जनों की वाणी, निन्दा के मार्ग से अपरिचित होने के कारण, गुणों का ही वर्णन करती है ।
अरुंतुदत्वं महतां ह्यगोचरः । (किरात०)	बड़े लोग किसी का जी नहीं दुखाते ।
अर्थमनर्थं भावय नित्यं, नास्ति ततः सुखलेशः सत्यम् ।	सदा ही धन को दुःखरूप समझो, वस्तुतः उससे तनिक भी सुख नहीं ।
अर्थातुराणां न गुरुर्न बंधुः ।	धन के लोभी गुरु और बन्धु तक का ध्यान नहीं करते ।
अर्थो हि कन्या परकीय एव । (अभिज्ञान०)	कन्या पराया ही धन है ।
अर्धो घटो घोषमुपैति नूनम् ।	अधजल गगरी छलकत जाए ।
अल्पविद्यो महागर्वी ।	थोड़ी विद्या वाला व्यक्ति बहुत ही गर्वीला होता है ।
अल्पश्च कालो बहवश्च विघ्नाः ।	समय थोड़ा है और विघ्न बहुत ।
अल्पीयसोऽप्यामयतुल्यवृत्तेर्महापकाराय रिपोर्विवृद्धिः । (किरात०)	रोग की तरह स्वभाव वाले छोटे से शत्रु की उन्नति से भी भारी अनिष्ट होता है ।
अवस्तुनि कृतक्लेशो मूर्खो यात्यवहास्यताम् । (कथा०)	तुच्छ वस्तु के लिए कष्ट उठाने वाला मूर्ख उपहासास्पद बनता है ।
अविद्याजीवनं शून्यम् ।	अविद्यापूर्ण जीवन सूना है ।
अविनीता रिपुर्भार्या ।	नम्रता-रहित पत्नी शत्रु है ।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयंकरः ।	जिसका मन ठिकाने न हो, उसकी कृपा भी भयावनी होती है ।
अशीलस्य हतं कुलम् ।	शीलरहित व्यक्ति की कुलीनता व्यर्थ है ।
अश्नुते स हि कल्याणं, व्यसने यो न मुह्यति ।	जो विपत्ति में विमूढ़ नहीं होता वह अवश्य ही कल्याणभागी बनता है ।
अश्रेयसे न वा कस्य विश्वासो दुर्जने जने ?	दुष्ट जन पर विश्वास करने से किसका अनिष्ट नहीं होता ?
असन्तुष्टा द्विजा नष्टाः ।	संतोष-हीन-ब्राह्मण नष्ट हो जाते हैं ।
असन्मैत्री हि दोषाय कूलच्छायेव सेविता । (किरात०)	दुर्जनों की मित्रता कगार की छाया के समान अनर्थकारिणी होती है ।
असारे दग्धसंसारे सारं सारङ्गलोचनाः ।	इस दुःखपूर्ण निस्सार संसार में साररूप तो केवल मृगनयनियाँ ही हैं ।
असिद्धार्था निवर्तन्ते न हि धीराः कृतोद्यमाः । (कथा०)	उद्यमी धीर कार्यसिद्धि से पूर्व नहीं रुकते ।
असिद्धेस्तु हता विद्या ।	सिद्धि के बिना विद्या व्यर्थ है ।

अस्थिरं जीवितं लोके ।	जगत् में जीवन अस्थिर है ।
अस्थिराः पुत्रदाराश्च ।	पुत्र और कलत्र अस्थिर हैं ।
अस्थिरे धनयौवने ।	धन और यौवन अस्थिर हैं ।
अस्वर्ग्यं लोकविद्विष्टम् ।	लोकविरुद्ध आचरण सुखदायक नहीं होता ।
अहितो देहजो व्याधिः ।	शरीर में उत्पन्न रोग शत्रु है ।
अहो चित्राकारा नियतिरिव नीतिर्नयविदः ।	नीतिज्ञ की नीति नियति के समान विचित्र रूपों वाली होती है ।
अहो दुरन्ता बलवद्विरोधिता । (किरात०)	बलवान् से विरोध करने का परिणाम बुरा ही होता है ।
अहो दैवाभिशप्तानां प्राप्तोऽप्यर्थः पलायते । (कथा०)	हा ! दैव से शापित लोगों के बने हुए काम भी बिगड़ जाते हैं ।
अहो रूपम्, अहो ध्वनिः ।	वाह ! क्या रूप है और क्या स्वर !
आकण्ठजलमग्नोऽपि श्वा लिहत्येव जिह्वया ।	गले तक पानी में डूबा हुआ भी कुत्ता जल को जीभ से ही चाटता है ।
आचारः प्रथमो धर्मः ।	आचार सर्वोत्तम धर्म है ।
आज्ञा गुरूणां ह्यविचारणीया । (रघु०)	गुरुजनों की आज्ञा का बिना विचारे ही पालन करना चाहिए ।
आत्मार्थे पृथिवीं त्यजेत् ।	अपने रक्षार्थ पृथ्वी को भी त्याग दे ।
आदानं हि विसर्गाय सतां वारिमुचामिव । (रघु०)	मेघों के समान सत्पुरुषों का आदान भी प्रदान के लिए ही होता है ।
आपत्काले च कष्टेऽपि नोत्साहस्त्यज्यते बुधैः । (कथा०)	विपत्ति और कष्ट के समय में भी बुद्धिमान् उत्साह नहीं छोड़ते ।
आपत्सु धीरान् पुरुषान् स्वयमायान्ति संपदः । (कथा०)	आपत्तियों में धैर्य रखने वालों के पास सम्पत्तियाँ स्वयमेव आती हैं ।
आपदि स्फुरति प्रज्ञा यस्य धीरः स एव हि । (कथा०)	जिसकी बुद्धि आपत्ति में चमकती है, वह धीर है ।
आपद्यपि सतीवृत्तं किं मुञ्चन्ति कुलस्त्रियः ? (कथा०)	क्या कुलीन ललनाएँ आपत्ति में भी सतीत्व का त्याग करती हैं ?
आपन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम् । (मेघदूते)	उत्तम जनों का धन दुखियों के दुःख दूर करने पर ही सफल होता है ।
आमुखापाति कल्याणं कार्यसिद्धिं हि शंसति । (कथा०)	कार्यारम्भ में होने वाला मंगल, कार्यसिद्धि का सूचक होता है ।
आये दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः ।	धन का आगम और व्यय दोनों ही दुःखपूर्ण होते हैं; इस दुःखदायक धन को धिक्कार है ।
आरब्धे हि सुदुष्करेऽपि महतां मध्ये विरामः कुतः । (कथा०)	आरम्भ किये हुए अत्यन्त कठिन काम में भी बड़े लोग बीच में नहीं रुकते ।
आर्जवं हि कुटिलेषु न नीतिः । (नैषधीयचरिते)	कुटिलों के साथ सरलता का व्यवहार नीति नहीं है ।
आलस्योपहता विद्या ।	आलस्य विद्या का विनाशक है ।
आवेष्टितो महासर्पैश्चन्दनः किं विषायते ?	सर्पों से परिवेष्टित चन्दन क्या विषैला हो जाता है ?
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ।	आहार और व्यवहार में संकोच छोड़कर सुखी रहे ।

आहुः सप्तपदी मैत्री।	सात पग साथ-साथ चलने को मैत्री कहते हैं।
इतो भ्रष्टस्ततो भ्रष्टः।	न इधर के रहे न उधर के रहे।
इदं च नास्ति न परं च लभ्यते।	न यह रहा, न वह मिला।
इन्द्रोऽपि लघुतां याति स्वयं प्रख्यापितैर्गुणैः।	अपने मुँह मियाँ मिट्ठू बनकर इन्द्र भी गौरव-हीन हो जाता है।
इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम्। (शिशु०)	ईंधन के बहुत बड़े ढेर को जलानेवाली आग भी अपनी ज्योति से सूर्य को मात नहीं कर सकती।
इष्टं धर्मेण योजयेत्।	अभिलाषा धर्मानुसारिणी चाहिए।
इहामुत्र च नारीणां परमा हि गतिः पतिः। (कथा०)	लोक और परलोक में स्त्रियों का परम आश्रय पति ही है।
ईर्ष्या हि विवेकपरिपन्थिनी। (कथा०)	ईर्ष्या विवेक की शत्रु है।
ईश्वराणां हि विनोदरसिकं मनः। (किरात०)	धनाढ्य लोग विनोदी होते हैं।
उत्सवप्रियाः खलु मनुष्याः। (अभिज्ञान०)	मनुष्य उत्सवप्रिय होते हैं।
उत्साहैकधने हि वीरहृदये नाप्नोति खेदोऽन्तरम्। (कथा०)	वीरों के उत्साहपूर्ण हृदय में खेद के लिये अवकाश कहाँ!
उदारचरितानां तु वसुधैव कुटुम्बकम्।	उदारचरित लोगों के लिये तो सारी भूमि ही कुटुम्ब है।
उदारस्य तृणं वित्तम्।	उदार व्यक्ति के लिये धन तृणतुल्य है।
उदिते तु सहस्रांशौ न खद्योतो न चन्द्रमाः।	सूर्य के उदय पर न जुगुनू की चमक रहती है, न चाँद की।
उदिते परमानन्दे नाहं न त्वं न वै जगत्।	ब्रह्मानन्द की प्राप्ति होने पर मैं, तू और जगत् का ज्ञान नहीं रहता।
उद्योगः पुरुषलक्षणम्।	उद्योग ही पुरुष का लक्षण है।
उन्नतो न सहते तिरस्क्रियाम्।	उच्च व्यक्ति तिरस्कार नहीं सहता।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।	मूर्ख लोग उपदेश से प्रकुपित होते हैं, शांत नहीं।
उप्तं सुकृतबीजं हि सुक्षेत्रेषु महत्फलम्। (कथा०)	उत्तम पात्रों में बोया हुआ पुण्यरूपी बीज महान् फल देता है।
उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत् सा प्रकृतिर्जलस्य (रघु०)	जल का स्वाभाविक गुण तो शीतलता है, उसमें गर्मी तो अग्नि या धूप के संसर्ग से आती है।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम्।	गर्म अङ्गार हाथ को जलाता है, ठण्डा कलुषित करता है।
ऋणकर्ता पिता शत्रुः।	ऋण लेनेवाला पिता शत्रु है।
ऋद्धिश्चित्तविकारिणी।	ऐश्वर्य चित्त को विकृत कर देता है।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः। (कुमार०)	गुण-समुदाय में अकेला दोष ऐसे छिप जाता है जैसे किरणों में चाँद का कलंक।
क उष्णोदकेन नवमल्लिकां सिञ्चति! (अभि०)	मोतिये के पौधे को गर्म जल से कौन सींचता है!
कणशः क्षणशश्चैव विद्यामर्थञ्च साधयेत्।	विद्या और धन का संग्रह क्षण-क्षण में कण-कण करके करते रहना चाहिए।
कण्ठे सुधा वसति वै खलु सज्जनानाम्। (कथा०)	अमृत सज्जनों के कण्ठ में ही रहता है।
कमलवनभूषा मधुकरः।	भ्रमर कमल-समूह का अलंकार है।
कर्तव्यं हि सतां वचः। (कथा०)	सत्पुरुषों के वचनानुसार चलना चाहिए।
कर्तव्यो महदाश्रयः।	आश्रय बड़ों का ही लेना चाहिए।

कर्मणो गहना गतिः । — कर्म की गति गहन है ।

कर्मणो ज्ञानमतिरिच्यते । — कर्म से ज्ञान बढ़कर है ।

कर्मदोषाद् दरिद्रता । — दरिद्रता कर्म-दोष का फल है ।

कर्मानुगो गच्छति जीव एकः । — अकेला जीव कर्मानुसार गति पाता है ।

कर्मायत्तं फलं पुंसाम् । — मनुष्य को फल की प्राप्ति कर्मानुसार होती है ।

कलासीमा काव्यम् । — कला की सीमा काव्य है ।

कवयः किं न पश्यन्ति ! — कवि क्या नहीं देखते !

कवले पतिता सद्यो वमयति ननु मक्षिकान्न-भोक्तारम् । — ग्रास में गिरी हुई मक्खी भोजनकर्ता को तुरन्त वमन करा देती है ।

कष्टं निर्धनिकस्य जीवितमहो दारैरपि त्यज्यते । — हा ! निर्धन का जीवन इतना दुःखपूर्ण होता है कि पत्नी भी उसका साथ छोड़ देती है ।

कष्टः खलु पराश्रयः । — दूसरे का भरोसा दुःखदायक होता है ।

कष्टादपि कष्टतरं परगृहवासः परान्नं च । — पराये घर में निवास और पराये अन्न से निर्वाह सबसे बड़े दुःख हैं ।

कस्त्यागः स्वकुटुम्बपोषणविधावर्थव्ययं कुर्वतः ! — अपने कुटुम्ब के पालन में ही धन व्यय करने-वाले व्यक्ति का त्याग भी कोई त्याग है !

कस्य नेष्टं हि यौवनम् ? (कथा०) — यौवन किसे अच्छा नहीं लगता ?

कस्यचित् किमपि नो हरणीयम् । — किसी का भी कुछ भी चुराना नहीं चाहिए ।

कस्य नोच्छृङ्खलं बाल्यं गुरुशासनवर्जितम् ? (कथा०) — गुरु का शासन न होने से किसका बचपन उच्छृङ्खल नहीं हो जाता ?

कस्य सत्संगो न भवेच्छुभः ? (कथा०) — सत्सङ्ग किसका भला नहीं करता ?

कः कालस्य न गोचरान्तरगतः । — काल के क्षेत्र से बाहर कौन है !

कः परः प्रियवादिनाम् । — मधुरभाषी का कोई शत्रु नहीं होता ।

कः पैतामहगोलकेऽत्र निखिलैः सम्मानितो वर्तते ? — इस ब्राह्मण में सर्वसम्मानित कौन है ?

कः प्राज्ञो वाञ्छति स्नेहं वेश्यासु सिकतासु च ? (कथा०) — कौन-सा विद्वान् वेश्याओं और रेत से स्नेह (प्रेम, तेल) चाहता है ?

कः सूनुर्विनयं विना ! — विनय से रहित पुत्र क्या !

काकाः किमपराध्यन्ति हंसैर्जग्धेषु शालिषु ! (कथा०) — जब धानों को हंस खा गये तब कौए क्या अपराध करेंगे !

कान्ता रूपवती शत्रुः । — सुरूपा पत्नी शत्रु है ।

कामं व्यसनवृक्षस्य मूलं दुर्जनसंगतिः । (कथा०) — बुरी संगत व्यसन-रूपी वृक्ष की जड़ है ।

कामातुराणां न भयं न लज्जा । — कामपीड़ित व्यक्ति भय और लज्जा से रहित होते हैं ।

कामिनश्च कुतो विद्या ? — कामी को विद्या कहाँ ?

कायः कस्य न वल्लभः ? — शरीर किसे प्यारा नहीं होता ?

कालस्य कुटिला गतिः । — काल की चाल टेढ़ी होती है ।

काले खलु समारब्धाः फलं बध्नन्ति नीतयः । (रघु०) — समय पर प्रयुक्त नीतियाँ अवश्य फल लाती हैं ।

काले दत्तं वरं ह्यल्पमकाले बहुनापि किम् ! (कथा०) — समय पर दिया हुआ थोड़ा भी दान असमय पर दिये हुए बड़े दान से अच्छा होता है ।

कालेन फलते तीर्थं, सद्यः साधुसमागमः ।	तीर्थ का फल विलम्ब से परन्तु सत्संगति का फल शीघ्र प्राप्त होता है ।
का विद्या कवितां विना ?	कविता के विना विद्या कैसी ?
काश्मीरजस्य कटुतापि नितान्तरम्या ।	केसर की कड़वाहट भी अत्यन्त प्यारी होती है ।
का ह्यब्जिनी विना हंसं, कश्च हंसोऽब्जिनीं विना ? (कथा०)	हंस-हीन सरसी कैसी और सरसी-हीन हंस कैसा ?
किं हि न भवेदीश्वरेच्छया ? (कथा०)	ईश्वर की इच्छा से क्या नहीं हो सकता ?
किं किं करोति न निरर्गलतां गता स्त्री ?	निरंकुश नारी क्या-क्या नहीं करती ?
किञ्चित्कालोपभोग्यानि यौवनानि धनानि च ।	यौवन तथा सम्पदा के सुख कुछ ही काल तक लूटे जा सकते हैं ।
कुराजान्तानि राष्ट्राणि ।	बुरे राजाओं से राष्ट्रों का नाश हो जाता है ।
कुरूपता शीलतया विराजते ।	सुन्दर शील से कुरूपता भी खिल उठती है ।
कुरूपी बहुचेष्टिकः ।	कुरूप मनुष्य बहुत चेष्टाएँ करता है ।
कुलवधूः का स्वामिभक्तिं विना ?	पतिभक्ति-विहीन कुलवधू कैसी ?
कुले कश्चिद्धन्यः प्रभवति नरः श्लाघ्य-महिमा ।	कुल में कोई ही धन्य व्यक्ति यशस्वी प्रभु होता है ।
